
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2995

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
स्थितीयुक्तरण पो	—	धर्मशास्त्र	अपूर्ण	-	6/14	390	संस्कृत	कागद	13	50		

॥ योगवा० उत्पत्तिप्रकरणप्रा० पत्र २६८

श्रीगणेशायनमः ॥ श्रीसीतारामचंद्राभ्यान्नमः ॥ श्रीहनुमतेनमः ॥ श्रीविश्वेश्वरायनमः ॥ सत्यंज्ञानमनंतमेकमजरंनित्यंविभुंशाश्वतं प्र
त्यग्ब्रह्मरसायनंसुखघनंपूर्णंपरंपावनं ॥ स्वात्मज्योतिरनादिमध्यनिधनंमायाविलासैर्मुहुर्बिम्बाकारमपास्तमायमभयंवंदे विशुद्धंपदं
१ ज्ञानादेवात्मनोमोक्षोनतुकर्मसमाधिभिः ॥ अज्ञातोऽसौस्वसदृश्यसृजत्येवेतिकीर्त्यते ॥ ॐ ॥ अथयथोक्तसाधनसंपन्नस्याधिका
रिणस्तावद्विचारयेत्प्राज्ञोयावद्विश्रांतिमात्मनिसंप्रयात्यपुनर्नाशांशांतिंतुर्यपदाभिधामितियावत्तत्वापरोक्षावधारणंकर्त्तव्यतयाविहितंवि
चारप्रकारंप्रकरणद्वयेनोपवर्णितसमस्तसाधनसंपन्नायाधिकारिमूर्द्धन्यायश्रीरामायअथोपदिश्यतेसम्यग्विज्ञानक्रमोधुनेतिप्रतिज्ञाप्र

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ वाग्भाभिर्ब्रह्मविद्ब्रह्मभातिस्वप्नइवात्मनि ॥ यदि
दंतत्त्वशब्दोक्त्यैर्योयद्वृत्तिसवेत्तितत् ॥ १ ॥ श्रीरामचंद्रायनमः ॥ श्रीरामचंद्रपरमात्मनेनमः ॥ ६७ ॥ ६७ ॥

र्वकमुत्तरग्रंथेनविस्तरेणवर्णयितुंप्रवृत्तोभगवान् श्रीवसिष्ठः सृष्टिप्रकारोपवर्णनमुखेन ब्रह्माद्वैतंप्रतिपादयितुंप्रवृत्तस्योत्पत्तिप्रकरण
स्यसुखप्रबोधायप्रथमंसंक्षिप्यतात्पर्यंदिदर्शयिषुस्तद्इदंतर्ह्यव्याकृतमासीदितित्यादिसृष्टिप्रदर्शकश्रौतसंदर्भस्याहंब्रह्मास्मीत्यादिमहा
वाक्यार्थबोधद्वारेणापिदृष्टांतस्यैकदेशेनबोध्यबोधोदयेसतिउपादेयतयाऽन्नाख्योमहावाक्यार्थनिर्णयइतिप्रागुक्तरीत्यापर्यवसानमिति
दर्शयतिवाग्भाभिरित्यादिना ॥ ब्रह्मैववाग्भाभिर्महावाक्यजाखंडाकारवृत्तीद्धस्वात्मप्रकाशैर्ब्रह्मवित्स्वतत्त्वंसाक्षात्कृतवत्सन्भातिपारमा
र्थिकनित्यमुक्तपूर्णस्वरूपेणप्रकाशतेसमुक्तोवाक्यजन्यवृत्त्यतिरिक्तंनापेक्षतइतिभावः ॥ तत्कुतः यतोयदिदंदेहेंद्रियादिविषयदादिचदृ
श्यबंधरूपआत्मनिप्रत्यगात्मभूतेब्रह्मण्येवस्वप्नइवाविर्भूतंभाति ॥ नहिस्वाप्नबंधनिवृत्तिःप्रबोधातिरिक्तंसाधनमपेक्षतइतिभावः ॥ तथा

राम
१

जगत उत्पत्तौ मिथ्यात्वप्रदर्शनाय प्रसादिताः न्यायाः। स्थितावपि तुल्याः इति देशेन दर्शयति एवं तावदित्यादिना ॥ २ ॥ अकर्तृकं हेतुकारणोपकरणासंपन्नत्वे
सत्यकर्तृकं शून्यं अरंगं उपपादनं रंजकद्रव्यशून्यं गगने इत्यनेनाधारस्थित्यादिशून्यत्वं नापि चित्रस्य दर्शितं इत्युपरि दृष्टान्तः पातालद्रष्टृकं मोहनिद्रया प्रमातुरभिमा-
वेऽपि साक्षिणो निर्विवादनिद्रं ॥ ३ ॥ मर्कटैः कल्पितो ऽनलगुंजारे गैरिकादिसंचयरूपः तापो न तेन दृष्टान्तो यस्यतेनापि तेषां शीतनिवृत्तिरैतिह्यप्रसिद्धेत्याशये नोक्त-
मसदेवार्थसाधकमिति ॥ ४ ॥ सौरं तेज आलोको न त्वातपः ॥ ५ ॥ अभित्तिमत् अनाधारं ॥ ६ ॥ प्रौढं विस्तृतं स्फुटमनुभूतमिति वा ॥ ७ ॥ कविकल्पितकथार्थेन

एवं तावदिदं विद्धि दृश्यं जगदिति स्थितं ॥ अहं चेत्याद्यनाकारं भ्रांतिमात्रमसन्मयं ॥ २ ॥ अकर्तृकमरंगं च गगने चित्रमुत्थितं ॥ अद्रष्टृकं चानुभव-
मनिद्रं स्वप्नदर्शनं ॥ ३ ॥ भविष्यत्पुरनिर्माणं चित्तसंस्थमिवोदितं मर्कटानलतापांतमसदेवार्थसाधकं ॥ ४ ॥ अत्यण्यनन्यदन्यामं पयसंबावर्तवत् स्थि-
तं सद्रूपमपि निःशून्यं तेजः सौरमिवांबरे ॥ ५ ॥ रत्नाभापुंजमिव खे दृश्यमानमभित्तिमत् ॥ गंधर्वाणां पुरमिव दृश्यं नित्यमभित्तिमत् ॥ ६ ॥
मृगतृष्णाम्बुवासत्यं सत्यवत् सत्यवत्प्रदं ॥ संकल्पपुरवत्प्रौढमनुभूतमसन्मयं ॥ ७ ॥ कथार्थप्रतिभानात्म न क्वचित् स्थितमस्थितं ॥ निःसा-
रमप्यतीवांतःसारं स्वप्नाचलोपमं ॥ ८ ॥ भूताकाशमिवाकारभासुरं शून्यमात्रकं ॥ शरदभ्रमिवायस्तमत्नमक्षयमक्षतं ॥ ९ ॥ वर्णो व्योममल-
स्येव दृश्यमानमवस्तुकं ॥ स्वप्नांगनारताकारमर्थनिष्ठमनर्थकं ॥ १० ॥ चित्रोद्यानमिवोत्फुल्लमरसं सरसाकृति ॥ प्रकाशमपि निस्तेजश्चित्रा-
र्कानलवत् स्थितं ॥ ११ ॥ अनुभूतं मनोराज्यमिवासत्समवास्तवं ॥ चित्रपद्माकर इव सारसौगंध्यवर्जितं ॥ १२ ॥

गरपर्वतादिसंस्थानप्रतिभानमिवात्मा स्वरूपं यस्य ॥ क्वचिदपि देशे काले वा न स्थितमिति हेतोरस्थितमसत् ॥ अंतःसारं प्रतिष्ठं ॥ ८ ॥ अवाप्तमुखी कृतं
दूरनीलमहाकटाहाकारभासुरं यावदयं स्वत्तावदलं आतपनिरोधादिसमर्थं स्प्रष्टुमशक्यं अक्षतं अविच्छिन्नं च ॥ ९ ॥ व्योममलस्य कालिम्नो वर्णः स्निग्ध-
ताराहोः शिरइति वृद्धाः व्योमनलस्येति पाठे स्पष्टं ॥ अर्थनिष्ठं भोगात्मक्षयार्थे क्रियाकारि ॥ १० ॥ अरसं शुष्कं निर्मकरंदं च ॥ ११ ॥ असत्संसतः अवास्तवं फलतोऽपि सारो

मकरंदमरालगा० १२

॰सिद्धि॰ पिंड ग्रहोमूर्त्तता तच्छून्यां ॥१३॥ परस्परमात्मनः ॥ आमर्शेन ईषद्विचारेणापि परस्यान्यस्य वाप्यातयजनादेरामर्शेन ईषदभिघातेन च कदलीस्तंभः कद लीनरुः ॥१४॥ स्फुरितेक्षणो नाक्षिरोगविशेषेण असंभवद्रूपमसंभवद्रूपं ॥१५॥ अयोगिकल्पिताकारं रसआयान रमणीयतात दात्मकं ॥ अरसं परिणा मकं दुष्कं तदेव प्रपंचयति ॥ अविछिन्नेति क्षयोदया जन्ममरणानि ॥१६॥ सांख्यानां केवलजडात्मकं नउशून्यमविद्यालदास्यदंवेदांतीनां शून्यं माध्यमि कानां क्षणिकत्वात्कालतः परमाणुवनूयोगाचार्याणां कालतो देशतश्च परमाणुवत्सौत्रांतिकवैभाषिकयोः देशत एव परमाणुवत्कणादगौतमीययोः

शून्येप्रकचितं नानावर्णमाकारितात्मकं ॥ अपिंड ग्रहमाशून्यमिंद्रचापमिवोत्थितं ॥१३॥ परामर्शेनशुष्यद्भिर्मूलपेलवपल्लवैः ॥ कलंज उमसारा त्मकदलीस्तंभभासुरं ॥१४॥ स्फुरितेक्षणादर्शांधकारचक्रकवर्तनं ॥ असंतमसभवद्रूपमपिप्रत्यक्षवत्स्थितं ॥१५॥ वार्बुद्बुदमिवाभोगि शून्यमंतः स्फुर द्वपुः ॥ रसात्मकं चाप्यरसमविछिन्नक्षयोदयं ॥१६॥ नीहार इव विस्तारि गृहीतं सन्निकिंचन ॥ जडशून्यास्पदं शून्यं केषांचित्परमाणुवत् ॥१७॥ किंचि द्भूतमयोस्मीति स्थितं शून्यमभूतकं ॥ गृह्यमाणोप्यसद्रूपो निशाचर इवास्थितं ॥१८॥ श्रीराम उवाच ॥ महाकल्पक्षये दृश्यमास्ते बीज इवांकुरः ॥ परे सूक्ष्मे उदेत्येनत्तदेवेति किंविद ॥१९॥ एवं बोधाः किमज्ञास्युरुतज्ञाइतिच स्फुटं ॥ यथावद्भगवन्ब्रूहि सर्वसंशयशांतये ॥२०॥ श्रीवसिष्ठ उवाच ॥ इदं बीजेंकुर इव दृश्यमास्ते महाशये ॥ ब्रूतेय एवमज्ञत्वमेतत्तस्यास्ति शैशवं ॥२१॥

अनियतस्वभावपरमाणुवदार्हतानामिलितादिभिर्बहुधा विकल्पितमित्यर्थः ॥१७॥ बाह्ये जगत्कृत्स्नं न्यायमाध्यात्मिकेपि दर्शयिष्यात ॥ किंचिदिति ॥१८॥ न न्वेवं जगत्स्वतः सत्ताशून्यं ब्रह्मसत्ता च जगत्स्पृशतितदासदेवसोम्येदमग्र आसीदित्यादीनां सत्कार्यवादिश्रुतीनां तदनुसारिण्याः सत्कपिलाद्युपबृंहणा नां कथं सामंजस्यं स्यादिति मन्यमानो रामः पृच्छति ॥ महाकल्पेति ॥ इति यत्सांख्यासादिभिरुक्तं तत्किं कथं सामंजस्यमित्यर्थः ॥१९॥ एवं प्रलये सत्त्वसत्तयाकारणो जगदस्तीति प्रकारेण बोधो येषां ते कपिलादयः ॥२०॥ महति शये शयनेप्रलये एतद्दृश्यमायाप्रकारं शैशवं असंगात्मविवेचनेपि जगत्सत्ता विश्वासादी

चतुर्थः ॥

॥ताम्रत्यनसि २९॥

॥२॥

पुनदृश्यमानमपयुक्तिं जातं शृणु कारणे प्रागुत्पत्तेः कार्यमस्तीति वदन्त्र ष्टव्यः॥ किंन सत्ता सामान्ये नास्ति॥ उत्तबीजादिसत्तया उत्तांकुरादिसत्तया आद्येनदं
कुरादि किमसंबंधं केन असंबंधोयस्य तत्तथाविधं॥ सामान्यसत्तायाः सर्ववस्तुसाधारण्या ज्ञायमानांकुरादेः सर्वत्र संबंधप्रसंग इत्यर्थः॥ अस्त्विष्टापत्ति
रिति चेत्॥ एतदंकुरादिक्षेत्रे अंकुरितबीजे दृष्टमेव वास्तवं कुसूलस्थबीजे शिलाशकले वा भ्रांतिदृष्टमवास्तवमित्येतत्कथमित्यर्थः॥ द्वितीयेपि बीजसत्ताया
अंकुरसंबंधस्य च स्वरूपतो विशेषानिरूपणान्न विद्यते संबंधो यस्य तदसंबंधं किं वस्तु यद्बीजेन स्यादिति व्रीह्यादिबीजे सर्वजगत्सत्वप्रसंग इत्यर्थः॥ इष्टाप
त्तौ अंकुरितबीजे अंकुराद्येव वास्तवं न घटपटादीत्येतत्कथमित्यर्थः॥ तृतीयेपि अंकुरस्वरूपसत्तया बीजसंबंधस्य च विशेषानिरूपणादसंबंधं किं वस्तु

दृष्टमेव तत्किमसंबंधं कथमेतद्वास्तवं॥ विपरीतो बोध एष वक्तुः श्रोतुश्च मोहकृत्॥२२॥ बीजे किलांकुर इव जगदास्त इतीहया॥ बुद्धिः सासहत्वाघा
थं मूढा शृणु कथं किल॥२३॥ बीजं भवेत्स्वयं दृश्यं चित्तादींद्रियगोचरं॥ यवधानादिधान्यानि युक्तरूपत्रांकुरोद्भवः॥२४॥ मनःषष्ठेंद्रियातीतं यत्स्यादति
तरामणु॥ बीजं तद्भवितुं शक्यं स्वयंभूर्जगतां कथं॥२५॥ आकाशादपि सूक्ष्मस्य परस्य परमात्मनः॥ सर्वाख्यानुपलंभस्य कीदृशी बीजता कथं॥२६॥१०

सर्वत्रांकुरसद्भावप्रसंग इत्यर्थः॥ इष्टापत्तौ बीजादावेवांकुरादिवास्तवं नान्यत्रेत्येतत्कथमित्यर्थः॥ किंच साधारणं अंकुरादि अस्मिन्कारणास
त्तया कार्यमस्ति कार्यसत्तया च कारणमस्तीति पक्षत्रयेपि उक्तिसंभवाघटनाद्विपरीत एवायं बोध इत्याशयेनाह॥ विपरीत इति॥२२॥ किंच बीजें
कुर इव प्रलये जगदस्तीति दृष्टांतो विषमः॥ कूटस्थचिदेकरसस्यात्मनो बीजत्वस्यैवासंभवादित्याशयेनाह॥ बीज इत्यादिना॥ सहत्वापार्थप्रलये
जगत्सत्वे दृष्टांतोपन्यासार्थया बुद्धिः॥ सा मूढा भ्रांतिर्दृष्टांतिकवैषम्यादित्यर्थः॥२३॥ वैषम्यमेव स्फुटयति॥ बीजमित्यादिना॥ यवधानाः॥ सतुषयवा
स्तदादि बीजं॥ दृश्यं दर्शनार्हं तथा च तत्रांकुराद्यन्वयव्यतिरेकस्य प्रत्यक्षसिद्धत्वात्सावयवत्वात्परिणामिस्वभावत्वादंकुरवैजात्यभेद निर्वाहकं जाति
संस्थानादि भेदवत्वाच्च युक्तोंकुरादि बीजभाव इत्यर्थः॥२४॥ दार्ष्टांतिके तु न तथेत्याह॥ मन इति॥ स्वयमेव भवति स्वयंभव तस्येवेति च॥ स्वयंभूः कू
टस्था द्वितीय चिदात्मा न तथा च यस्य बीजत्वमेव दुर्घटं दूरे तत्र जगत्वं॥ स्वसत्तया स्थितिरिति भावः॥२५॥२६॥ श्रीरामचंद्रो जयति॥ ७॥७

एवं नतत्तज्ज्ञदृशा बीजत्वासंभवमुक्त्वा अज्ञदृशापि तस्य तदसंभवमाह ॥ नदिति ॥ वस्तुतः ॥ अतादृशं सदेवारसमपि सूक्ष्मत्वादज्ञदृशा असदाभा समिसं सदेवेत्यर्थः ॥ अंकुरो जगदंकुरः ॥ २७ ॥ २८ ॥ न किंचिदात्मनः आयातं आदेशो नेति नेतीति सर्वनिषेधात्मनः ॥ ३० ॥ चिदेकरससत्ताया जडाने करससत्ताप्रतिपक्षत्वादपि तत्र न जगत्सत्तासंभावितेत्याह प्रतिपक्षेइति ॥ ३१ ॥ ननुमास्तु भेदेनासत्त्वे दैक्ये न तु स्यात्तत्राप्याह ॥ तदतद्रूपयोरित्यर्थः ॥ ३२ ॥ नाकारेअनाकारेनायं नञ् किंतु नशब्दोन्यः ॥ प्रतिषेधार्थः समस्यते ॥ ३३ ॥ किंचायं सांख्यादिभिः कल्पितः कारणे जगत्सद्भावः सर्वकिं लोकिकप्र

चतुर्थः ॥

तत्सूक्ष्ममसदाभासमसदेवस्यतादृशं ॥ कीदृशी बीजता तत्र बीजाभावे कुतोंकुरः ॥ २७ ॥ गगनांगादपि स्वच्छे शून्येतत्र परे पदे कथं संति जगन्मेरुसमुद्रगगनादयः ॥ २८ ॥ न किंचिद्यत्कथं किंचित्तत्रास्तेवस्तुवस्तुनि ॥ अस्ति चेत्तत्कथं तत्र विद्यमानं न दृश्यते २९ न किंचिदात्मनः किंचित्कथमेति कुतोथवा ॥ शून्यरूपात्घटाकाशात्जातो द्रिः क कुतः कदा ॥ ३० ॥ प्रतिपक्षेकथं किंचिदास्ते छायातपेय था ॥ कथमास्ते तमो भानौ कथमास्ते हिमोनले ॥ ३१ ॥ मेरुरास्ते कथमणौ कुतः किंचिदनाकृतौ ॥ तदतद्रूपयोरैक्यं क छायातपयोरिव ३२ साकारवटधानादावंकुराः संति युक्तिमत् ॥ नाकारेतन्महाकारं जगदस्तीत्ययुक्तिकं ॥ ३३ ॥ देशांतरेयथनरांतरे च बुध्यादि सर्वें द्रियशक्तिदृश्यं ॥ नास्तेव तत्तद्विधबुद्धिबोधो न किंचिदित्येव तदुच्यते च ॥ ३४ ॥ ७ ॥

माणबलाद्गुत सदेव सोम्येदमग्र आसीत्यादिश्रुतिबलात् ॥ नाद्यइत्याह देशांतर इति ॥ यद्बुध्यादि सर्वेंद्रियशक्तिदृश्यं घटपटादि तदधिकरणादे शाद्देशांतरे तदधिकरणकालात्कालांतरे च साक्षात्स्वयंद्रष्टरि नरांतरे चाद्रष्टरि सति च तत्तद्विधप्रत्यक्षानुमानादिबुद्धिरूप्तिलक्षणो बोधेनास्ते व न भात्येव तत्तद्दृश्यादर्शनादियोग्यानुपलब्धिवशान्न किंचित्सर्वैर्लौकिकैः प्रमाणिकैरुच्यते ॥ अतः सर्वलौकिकानुपलंभविरुद्धं प्रलये जगत्सद्भावकल्पनमित्यर्थः ॥ ३४ ॥ श्रीगुरवेनमः ॥ श्रीरामचंद्रगुरवेनमः ॥ श्रीविश्वेश्वरो जयति ॥ श्रीकृष्णपरब्रह्मणेनमः ॥ ७ ॥ ७

न द्वितीयोऽपीत्याह ॥ कार्यस्येति ॥ सदेव सोम्येदमग्र आसीदित्यादिश्रुतिषु न कार्यकारणयोर्द्वैतं संप्रतीयते ॥ एकमेवाद्वितीयमिति वाक्यशेषविरोधात् तत्त्वेन
द्विमृश्यतां किं कार्यमेव सत् न कार्यमेव कारणतां प्रयातं करणे आरोपितमिति श्रुतिर्वक्तीति वा ॥ अथवा सदेव सत् न तु सत्त्वेन कार्यकारणयोरारोपितेति त
त्तस्य सांख्यस्य संबोधः ॥ स आद्यपक्षानुसारी चेत् विमूढबोधो भ्रम एव वाचारंभणं विकारो नामधेयमित्यादिकार्यानृतत्वपरिष्कृतानुगुणत्वात् कार
णानृतत्वापादकत्वेन स्वसिद्धांतबाधकत्वाच्चेत्याशयेनाह ॥ कैर्नामेति ॥ कारणानां गुणानामेवानृतत्वे तन्महदादिकार्यं कैः कारणैः रूढं कल्पसघटनेना
म कारणे असति कार्यस्योत्पत्तिमेवाशक्तेरित्यर्थः ॥ अत एव न द्वितीयेऽपि कार्ये असति तत्कारणता या अपि तत्त्वघटिताया निरूपयितुमशक्तेरिति परि

कार्यस्य न कारणतां प्रयातं वक्तीति यस्तस्य विमूढबोधः ॥ कैर्नाम तत्कार्यमुदेति तस्मात्स्वैः कारणाद्यैः सहकारिरूपैः ॥ २५ ॥ दुर्बुद्धिभिः
कारणकार्यभावं संकल्पितं दूरतरे व्युदस्य ॥ तदेव तत्सत्यमनादिमध्यं जगत्तदेतत्स्थितिमित्यवेहि ॥ २६ ॥ स्थितिप्रकरणे जन्मनि
राकरणं नाम प्रथमः सर्गः ॥ १ ॥ श्रीवसिष्ठ उवाच ॥ अथैतदभ्युपगमेव चित्तेच्छविदांवर ॥ समस्तकल्पनातीतेमलाचिद्व्योमनिर्मले १

शेषाच्च तृतीयकल्पः ॥ पूर्वश्लोकस्याभिप्रेतो युक्त्यपरिग्राह्यत्व इत्याह उत्तरश्लोकेन ॥ २५ ॥ तस्मात्कार्यकारणभेदस्यासत्तायाः कृत्स्नसमंततत्वात् दुर्बुद्धिभिः
सांख्यादिभिः संकल्पितं कार्यकारणभावं उपादानोपादेयभावं स्वैः स्वीयैः सहकारिरूपैः कारणाद्यैर्निमित्तप्रयोजनादिभेदैः सह दूरं व्युदस्य मिथ्येति
निरस्य यदेवावशिष्यमाणानादिमध्यान्तं सन्मात्रं वस्तु तदेवाहि कुत एव जगदिति स्थितं नान्यदित्यवेहि इत्यर्थः ॥ २६ ॥ इति श्रीवासिष्ठतात्पर्यप्र
काशे स्थितिप्रकरणे प्रथमः सर्गः ॥ १ ॥ तर्कैः स्वरूपभेदेन निरस्य जगतः स्थितिः ॥ पूर्णानंदात्मसन्मात्रस्थितिः शिष्टाववर्ण्यते ॥ एतस्य ज
गतः प्रलये पृथक्सत्त्वाभ्युपगमेव चित्ते दोषा निनि शेषः ॥ ननु यदि नास्ति जगत्तर्हि सर्ग एव न सिध्येत् उत्पत्तिक्रियायाः कर्तृसाध्यानत्वसत्त्वनिक
र्तेरिसिध्यति ॥ न चोत्पद्यमानादन्यत्कर्तृ स्तिब्रह्मैव सत्त्वात् न कर्तृत्वे तदेवोत्पद्येतेन जगत् ॥ न च कूटस्थस्य तु सत्यादिभिर्विकारैर्युज्यते न तस्मादुत्पत्तिसिद्ध
ये प्रलये जगतोऽपि सत्ताभ्युपेयेत्याशंक्यानूद्य निरस्यति समस्तेत्यादिना ॥ १ ॥

टी० सि०

अनेककर्तृत्वसत्ताकल्पनं यदि कर्तृमात्राद् उत्पत्तिक्रिया सिध्येत् सा हि कर्तारमिव स्वसिद्धये करणोपकरणादीनि कारकांतराण्यपि सहकारीण्यपेक्षते तद
भावात् तेन कल्पितमपि जगन्नोत्पत्तुं शक्नोतीत्याशयेनाह जगदादिति॥ आदिपदं वैचित्र्यप्रपंचार्थं इवकारस्तु संतासंभावितत्वद्योतनार्थः॥२॥३॥ न
तस्माद् रज्जुसर्पादिवत् सहकारिकारणानामभावेपि अवोदितं आविर्भूतं यद्यप्युपगच्छसि तर्हि मूलकारणमेव भ्रांतिकृतजगत्स्वभावस्थितिंगतं
न वस्तुतो जगत् सर्गेऽस्तीति व्यर्थानस्य प्रलये सत्त्वकल्पनेत्यर्थः॥४॥ तदेवस्पष्टमाह सर्गादाविति॥५॥ ननु प्रलये जगत्सत्त्वस्वीकारान्नसहकारिदौर्ल

जगदाद्यंकुरस्तत्र यद्यखिलदसौ तदा॥ कैरिवोदेति कथय कारणैः सहकारिभिः॥२॥ सहकारिकारणानामभावे त्वंकुरोद्गतिः
वंध्याकन्येव दृष्टेह न कदाचन केनचित्॥३॥ सहकारिकारणानामभावे यद्यवोदितं॥ मूलकारणमेवांग तत्स्वभावस्थितिं गतं॥४॥
सर्गादौ सर्गरूपेण ब्रह्मैवास्ते निति स्थिति॥ यथास्थितमनाकारं कजन्यजनकक्रमः॥५॥ अथ पृथ्व्यादयोन्योन्यं वाके चिदत्रोपकुर्व
ते॥ सहकारिकारणात्वं तत्सर्वं चात्र दूषणं॥६॥ तस्मात्सदेजगच्छांतमास्ते न सहकारिभिः॥ चित्तात्म सरती स्फुरन्ति बल्यस्यनविप
श्चितः॥७॥ तस्माद्ब्रह्म जगन्नासीन्नचास्ति न भविष्यति॥ चेतनाकाशमेवाशु कचतीस्य मिवात्मनि॥८॥ अत्यंताभावमेवास्य
जगतो विद्धि तेयदा॥ तदा ब्रह्मेदमखिलं मितित्वद्गामनान्यथा॥९॥

भ्यं तदंतर्गतैः पृथ्व्यादिभिः परस्परमुपकर्तुं शक्यतादित्याशंक्य परिहरति॥ अथेति॥ तत्सर्वं पृथ्व्याद्युत्पत्तिपूर्वकं वाच्यं न हि स्वयमेवानुत्पन्नमन्य
स्योत्पत्तौ सहकारिभवितुं शक्नोति॥ तथाचोत्पत्तिसिद्धौ सहकारित्वसिद्धिस्तत्सिद्धावुत्पत्तिसिद्धिरित्यन्योन्याश्रयो नत्र दूषणमित्यर्थः॥६॥ इत्थं चत्सं
स्यादिकल्पना बालिशकल्पनैवेत्युपसंहरति॥ तस्मादिति॥ पदेस्व प्रकृते शांतं प्रलये निरोहितं॥७॥ परमते निरस्ते परिशिष्टं स्वसिद्धांतं दर्शयति
तस्मादिति॥८॥ ब्रह्मैवेदमग्रे पुरस्तादित्यादि श्रुतीनामपि बाधायां सामानाधिकरण्यादत्रैव तात्पर्यमित्याशयेनाह॥ अत्यंताभावइति नत्वसिद्धश्रुति
॥तात्पर्यं॥९॥

चतुर्थः॥

एवं च श्रोत्रबोधात्सर्वं जागतं घटपटादि मुद्गरप्रहारादिना प्रध्वंसे वस्त्तं नरात्मनान्योन्याभावेऽस्य यदुपशाम्यति ॥ इदमिदानीं नास्ति इदं मिदं न भव
तीति गृह्यमाणाभावरूपं उपशमं भजते इति यत्तन्न शाम्यत्येव नाप्युपशमः किंतु तिरोधानेन तमसा चक्षुरादिदृश्यतायां एवोपरमः ॥ यतश्चित्ते वासना
त्मना न शाम्यत्येवेत्यर्थः ॥ अयं न्यायः प्रागभावात्यंताभावयोरपि योज्यः स्वसत्तया वासनातो घटादेर्बाधमंतरेणाप्यसत्वयोगात् मृत्पिंडभूतलादावदर्शनस्य
तिरोधानेनाप्युपपन्नेरिति ॥१०॥ यदि दृश्यं भावैः कामकर्मवासनादिबीजैः सहोपशाम्यति तदा अस्य दृश्यस्य अत्यंताभावः ॥ आत्यंतिको छेदस्य भवेत् चित्ते तु सति का
मादिभावानां दुर्वारत्वान्न शाम्यत्येव ॥ अतो दृश्यता विज्ञानं न शाम्यते तदुपशमो दुर्लभ एवेत्यर्थः ॥११॥ अत एव समूलमनोनाशांतश्रोत्रबोधातिरिक्तः सर्वदृश्या

पूर्वं प्रध्वंसनान्योन्याभावैर्यदुपशाम्यति ॥ न शाम्यत्येव तच्चित्ते शाम्यत्येव तु दृश्यते ॥१०॥ अत्यंताभाव एवास्य भावैर्यदुपशाम्यति ॥ न शाम्यत्येव सच्चित्ते
न शाम्यत्येव दृश्यता ॥११॥ अत्यंताभाव एवातो जगत्दृश्यस्य सर्वतः ॥ वर्जयित्वेतरा युक्तिर्नास्त्येवानर्थसंक्षये ॥१२॥ चिदाकाशस्य बोधोऽयं जगज्ज्ञाती
ति यः स्थितं ॥ अयं सोऽहमिदं नाहं लोके चित्रकथा यथा ॥१३॥ इदमप्यादि पृथ्व्यादि तथेदं वत्सरादि च ॥ अयं कल्पः क्षणश्चायमिमे मरणजन्मनी
॥१४॥ अयं कल्पांतसंरंभो महाकल्पांत एष सः ॥ अयं स सर्गप्रारंभो भाव्यभावक्रमस्त्वसौ ॥१५॥

नर्थसंक्षयरूपे मोक्षे उपायो नास्तीत्याह ॥ अत्यंताभावोधिष्ठानदर्शनेन बाध एवात्र युक्तिरिमां युक्तिं वर्जयित्वा ॥१२॥ यत् यदा जगत् तत्त्वसाक्षा
त्कारवशाच्चिदाकाशस्य बोधः राहोः शिर इतिवत् षष्ठी बोधैकरसश्चिदाकाश एवानाणुमात्रमपि चिद्रूपमस्तीति स्थितं परिनिष्ठितं ज्ञानं भव
ति तदा अयं देवदत्तादिनामदेहः सः विष्णुमातापितृजन्यः प्रत्यभिज्ञायमान एवाहं इदं परकीयदेहः कुड्यादि नाहं इति लोके प्रसिद्धः पाम
रव्यवहारश्चित्रकथा यथा तथा हि भित्तिलिखितचित्रस्य सर्वस्य परमार्थतो भित्तिमात्रत्वेपि चित्रप्रासादभित्तौ इयं भित्तिरिति भवति चित्र
मनुष्यगजादौ नेयं भित्तिरिति तद्वदित्यर्थः ॥१३॥ चित्रकथान्यायमेव पृथिव्यादिष्वपि प्रपंचयति इदमित्यादिना ॥१४॥ एष दृश्यमानः
सः क्लिपुरायाप्रसिद्धः भाव्यानां स्रज्यानां आकाशादीनां भावक्रमः सृष्टिक्रमः ॥१५॥ श्रीरामचंद्रो जयति ॥ श्रीगुरवे नमः

ना॰ टी॰ सि॰

१०

लक्ष्मापि त्वत्स्वरूपाणि परिगतान्यतीताः सर्गाः॥१६॥ धिष्ण्यजालानि चतुर्दशधाभिन्नादेवमनुष्यादिस्थानानां भेदाः देशानां सप्तद्वी-
पानां कालानां कृतत्रेताद्वापरादीनां कल्पाः कल्पनाः॥१७॥ इत्येवं वर्णितेन विचित्रकथान्यायेन महाचित्सरमाकाशस्सैव स्वयं स्वात्मनि कच-
ति स्फुरति नान्यदित्यर्थः॥ न हि किंचित्सकाशं एतावानेव नेत्याह परमाणुविति॥ यथा गवाक्षच्छिद्रान्तर्गतपरमाणुषु सहस्रांशोर्भासः
प्रभाः परिच्छिन्नाः त्वद्धामनो निर्गतब्रह्मांडकोटिषु परिच्छिन्ना एताश्चिद्भासः तथा च नभो विस्तृते सूर्यप्रकाशे न परमाणुभेद भ्रमणादि

लक्ष्मापीमानि कल्पानि मिमा ब्रह्मांडकोटयः॥ एते चेमे परिगता इमे भूयः सुपागताः॥१६॥ इमानि धिष्ण्यजालानि देशकालकला
इमाः॥ महाचित्परमाकाशमनावृतमनंतकं॥१७॥ यथापूर्वं स्थितं शांतमित्येवं कचति स्वयं॥ परमाणुसहस्रांशुभास एता महाचितेः॥१८॥
स्वयमंतश्चमत्कारो यः सस्तु ज्ञीयते चिता॥ तत्सर्गभानं भातीदमरूपं ननु भित्तिमत्॥१९॥ नो धंति न च नश्यंति नायांति च न यांति च
महाशैलास्तु लेखानां सन्निवेशा इवाचलाः॥२०॥ इमे सर्गाः प्रस्फुरंति स्वात्मन्यात्मनि निर्मले॥ नभसीव नभोमार्गा निराकारा नि-
राकृतौ॥२१॥ द्रवत्वानीव तोयस्य स्पंदा इव सदागतौ॥ आवर्ता इव चांभोधेर्गुणिनो वा यथा गुणाः॥२२॥ विज्ञानघनमेवैकमिदमेवमव-
स्थितं॥ सोदयास्तमनारंभमनस्तं शांतमाततं॥२३॥ सत्कार्यादिहेतूनामभावे शून्यतो जगत्॥ स्वयंभूर्जायते चेति किलोन्मत्तकल्पितं॥२४॥

दृश्यते॥ तथा महाचित्परमाकाशेपीति भावः॥१८॥ तथा च मनःपरिच्छेदपीडिता चित्स्वांतर्गतं जगदक्षमती लेखेवस्फूलेसमापाद्याह॥ स्वयमिति॥१९॥
स्फटिकशिलांतर्नयनदोषाद्भूलीयमानरेखा इव न पदार्थभेदाः संतीत्याह नो धंतीत्यादिना॥२०॥ नभसीवेत्यादयः पृथक्सत्ताशून्यत्वे दृष्टांताः॥
२१॥२२॥ सोदयास्तमनारंभं इदं जगत् एवं उक्तदृष्टांतानुसारेण शांतं ब्रह्मैवाततं विस्तृतं॥२३॥ एवं च सत्कार्यभावे सत्यपि कर्तरि उत्पत्त्यसिद्धेः
सांख्यानां कल्पना उन्मत्तचेष्टेवेत्युपसंहरति॥ स्वयं भवतीत्यसतीति स्वयंभूः प्रागुत्पत्तेः पृथक्सत्त्वेनाभ्युपगतोपि पदार्थ इत्यर्थः॥ शून्यतः
शून्यकल्पप्रधानादित्यर्थः॥ जायते चेति चकारो जन्युत्तरभाविनी सत्ता प्रागेवाभ्युपगता चेत्तज्जनिकल्पनं वैयर्थ्यमपि लिंदोषांतरसमुच्चयार्थः॥२४॥

चतुर्थ॥

॥५॥

सर्वार्थस्वप्नदर्शनहेतुत्वादिविकल्पात्स्वल्पमिव तत्कल्पनेपि हेतुर्दीर्घनिद्राऽविद्यासैव स्वरूपजागरे याविद्रा विता चेत्वाप्रव्याघ्रादिकल्प जन्मम-
त्वादिमय हेतुबाधादृश्यः तल्पादुत्थितेन राज्ञा स्वसभाम्भूरिव भूषिता अलंकृता अत्यविलसा भान्ति ये न तथा विधो नवेष्कृपदेश आशीः ॥२५॥
इति श्रीवासिष्ठतात्पर्यप्रकाशे स्थितिप्रकरणे द्वितीयः सर्गः ॥२॥ विवर्तत्वं च निष्ठाप्याप्रवादोत्र प्रदर्श्यते । बोधदृश्याऽन्नदृश्यात्तु जगदानं समुच्यते बा
ह्याघ्राघ्रात्तो उत्पत्तिकर्तारित्वात्सहकार्यपेक्षा स्तु जगत्तुल्या हिरण्यगर्भमनः । संकल्पजं तदीयस्मृतिमनोराज्यकल्पमुक्तं न च तत्र सहकार्य
पेक्षादृष्टा एवं च प्रलये प्रक्षेतो स्वसत्तायां तिरोभूयसन्नेव मनोरूपः प्रजापतिः स्मृत्यात्मा जायते तस्मिंश्च संस्कारात्मना सदेव जगत्स्मृत्यात्मैव जायते

प्रशांतसर्वार्थकलाकलंको निरस्तनिःशेषविकल्पतल्पः । चिराय विद्रावितदीर्घनिद्रो भवाभयो भूषितभूः प्रबुद्धः ॥२५॥ स्थितिनीजोपन्यासो
नाम द्वितीयः सर्गः ॥२॥ श्रीरामउवाच ॥ महाकल्पांतसर्गादौ प्रथमोसौ प्रजापतिः ॥ स्मृत्यात्मा जायते मन्ये स्मृत्यात्मैव ततो जगत् ॥१॥ श्रीवसिष्ठउवाच ॥
महाप्रलयसर्गादावेवमेतद्रघूद्वह ॥ स्मृत्यात्मैव भवत्यादौ प्रथमोसौ प्रजापतिः ॥२॥ तत्संकल्पात्मकं जगत्स्मृत्यात्मैव मिदंततः ॥ भातिसंकल्पनग

चेत्को विरोध इति गूढाभिसंधिना रामः पृच्छति महाकल्पांतेति ॥१॥ अस्त्वेवं तथापि जगतो न प्रलये सत्त्वसिद्धेः स्व ॥ ॥र स्थितं पूर्वप्रजापतेः ॥३॥
भ्रमनोरथस्मृत्यादिविषयस्य स्वकालेपि स्वत्वाप्रसिद्धेस्तत्त्वद्वलेन प्रत्ययसत्त्वकल्पना सिद्धेरिति गूढाभिसंधिरेव गुरुरभ्युपगमेन समाधत्ते म
हाप्रलयेति ॥२॥ प्रजापतेः पूर्वप्राथमिकसंकल्पनगरमेवैतज्जगदिति स्थितमित्यर्थः ॥३॥ तत्र हि बाह्यविकारमनोनि । रिक्तविषयात्मना जगन्मात्र
तत्त्वं मनोविकारात्मना तु सत्त्वमेव यथा चित्रतुरगो मांसविकारात्मना असत्त्वेपि रंगद्रव्यविकारात्मना सन्स्तद्वदिति रामशंकां त्तिरोरूपल
क्ष्याह । स्मृतिरिति । अयं भावः सतिहि स्मर्तरि स्मृत्यादयो मनः परिणामास्युः तत्र न तावत्पर परिकल्पितं प्रधानं स्मृतिसमर्थं मृदादिवदचेतन
त्वात् । नापि पुरुषाः परैस्तेषामसंगोदासीन निर्विकारत्वाभ्युपगमात् । परस्यापरव्यावर्तकधर्मानभ्युपगमेन भेदासिध्या परमात्मभेदे तु सुल

रां स्मृतिर्न संभवत्येव जन्माभावात् विकारांतरायांतत्पूर्वकत्वात् ॥ अप्राणोह्यमनाः शुभ्र इत्यादिश्रुत्या तस्य मनोनिषेधात्तद्द्वारा स्मृते
त्वासिद्धेः ॥ तस्य स्मृतिर्न मोदुमकल्पैवेति ॥ ४ ॥ ननु यथा प्राप्तात्यादिकी सुषुप्तिस्तथा प्रलयेपि तत्र च लीनस्य मनसो जागरादाविव सर्गादा
वप्याविर्भावात्तदवच्छिन्नप्रजापतेरन्यस्य वास्मर्तृत्वे को विरोध इत्याशयेन रामः शंकते नसंभवतीति ॥ प्राक्स्मृतिः कल्पीयसंस्कारः ५
अभिसंधिमुद्घाटयन्वसिष्ठः परिहरति येमहाप्रलये इत्यादिना ॥ अयंभावः इयंतव शंका किं हिरण्यगर्भजीवपक्ष एव स्वमनसा

स्मृतिर्न संभवत्येव सर्गादौ परमात्मनः ॥ जन्माभावात्कथं कुत्र नभसीव महाद्रुमः ॥ ४ ॥ श्रीरामउवाच ॥ न संभवति किं ब्रह्मन्सर्गा
दौ प्राक्तनी स्मृतिः ॥ महाप्रलयसंमोहैर्नश्यति प्राक्स्मृतिः कथं ॥ ५ ॥ श्रीवसिष्ठउवाच ॥ येमहाप्रलये प्राज्ञाः सर्वे ब्रह्मादयः पुरा
किल निर्वाणमायातास्तेवश्यं ब्रह्मतां गताः ॥ ६ ॥ प्राक्तनः कः स्मरेत्कर्त्ता तस्मात्कथय सुव्रत ॥ स्मृतिर्निर्मूलतां याता नास्मर्त्तु
र्मुक्ततायायतः ॥ ७ ॥ अतः स्मर्त्तुरभावेन स्मृतिर्वेदिति किं कथं ॥ अवश्यं हि महाकल्पे सर्वे मोक्षैकभागिनः ॥ ८ ॥ ननु मूले तु
मूले च स्खलश्चित्व्योम्नि या स्मृतिः ॥ साजगद्भूरिति प्रोढा दृश्यासा स्येव चिद्भभा ॥ ९ ॥ भाति संविदात्मैवेयमनाद्यंतावभासिनी ॥
॥ यत्त एतज्जगदिति स्वयंभूरिति च स्थितं ॥ १० ॥

नानाजीवशरीरादिभेदान्परिकल्प्य संसरतीति मतेन वा नानाजीवाः स्वस्वोपभो
गयोग्यप्रपंचभागं कल्पयंतीति हिरण्यगर्भमपि स्वस्वबुद्ध्यनुसारेण सर्वस्य शरीरं कल्पयंतीति मतेन वा । तत्र द्वितीयमहाकल्पांतसर्गादौ प्रथमो
सोप्रजापतिरित्यादिस्तदीयशंकोपक्रमविरोधात् शिष्टसननुगुणत्वात्प्रथमकल्पः परिशिष्यते तत्र च प्राक्तनकल्पीयजीवजगतां महाप्रलय
काले हिरण्यगर्भस्य चैव मुक्तत्वाज्जीवांतराप्रतिशेषात्स्मर्त्ता न कश्चिदस्तीति नैतत्सर्गसिद्धिरिति ॥ अक्षरार्थः स्पष्टः ॥ ८ ॥ एवं पूर्वपूर्वकल्पीय
सर्गादावपि स्मृतिरूपा न सिध्यतीति तया शंकितो जगद्भूर्जगत्स्थितिः सा प्रोढा ब्रह्म चिद्भैवसा स्त्येव सदेति सत्कार्यवादिनीनां श्रुति
॥ नामाशय इत्यर्थः ॥ ९ ॥ उक्तमेव स्पष्टमाह भातीति ॥ १० ॥ श्रीरामो जयति ॥

विराजः ब्रह्मांडशरीरस्योपादानभूतः । आतिवाहिकः सूक्ष्मो देहः स परमात्मैवेत्यर्थः ॥ तथा च ब्रह्मैव सूक्ष्मस्थूलभावारोपक्रमेण जगदात्मना भातीति भावः ११
अव्यवस्थितस्वभावत्वादपि जगतो न जगद्रूपेण सत्ता किंतु ब्रह्मरूपेणैवेत्याशयेन व्यवस्थितस्वभावमुपपादयति । परमाणावित्यादिना ॥ १२ ॥ तस्य पूर्वपरमाणो
रंतरन्यः प्रविततः परमाणुरास्ते स च तादृक् पूर्वपरमाणुसदृश एव पुनस्तत्रापि तादृक् सवनाभ्रखं गिरिकुलं भातीत्येवं प्रसृतं तु संततमित्यपरेणान्वयः १३
उपपादितेन यत्फलितं तदाह एतदिति ॥ १४ ॥ एवं च सन्मात्रदृष्टिस्तत्त्वज्ञं प्रति स्वतो यथानंता एवं असदन्त तज्जगत्तद्दृष्टिरर्थज्ञं प्रति संख्यया अनंतैवेत्याह इती

अनादिकालसंसिद्धं यत्तु ज्ञानं ब्रह्मयोनिजं । स आतिवाहिको देहो विराजो जगदाकृतिः ॥ ११ ॥ परमाणाविदं भाति त्रिजगत्सवनाभ्रखं । देशकालक्रि
याद्रव्यदिनरात्रिक्रमान्वितं ॥ १२ ॥ परमाणुः प्रविततस्तस्यास्ते तादृगेव च ॥ भाति भासुरताकारि तादृग्गिरिकुलं पुनः ॥ १३ ॥ तत्रापि तादृगाकारमेवं प्रसृ
तु संततं । दृश्यमाभाति भारूपमेतदंगनवास्तवं ॥ १४ ॥ इत्यनंतोन सत्तु दृष्टेरसत्त्वदृष्टेश्च वाक्कचित् । अस्यास्त्वस्तु दितं बुद्धं नाबुद्धं प्रति नानघ ॥ १५ ॥ बु
द्धं प्रतीदं ब्रह्मैव केवलं शांतमव्ययं । अबुद्धं प्रतिबुध्योतज्ञासुरं भुवनान्वितं ॥ १६ ॥ यथेदं भासुरं भाति जगदंडकदंबितं । तथा कोटिसहस्त्राणि भांत्यन्या
न्यप्यपावसे ॥ १७ ॥ यथास्तंभे पुत्रिकांतस्तस्याः स्वांगेषु पुत्रिका । तस्याश्च पुत्रिकास्वंगे तथा त्रैलोक्यपुत्रिका ॥ १८ ॥ नाभिन्ना नापि संख्येया यथांगेऽपि परमा
णुकाः । तथा ब्रह्मस्वदेहस्थे मेरौ त्रैलोक्यपरमाणवः ॥ १९ ॥ सूर्यांशुषु संख्यातुं शक्यंते न घवोपावः । उसद्यंते चिदादित्ये त्रैलोक्यपरमाणवः ॥ २० ॥ यथापावो वहं
सर्वदीप्तिषु स्फुरजस्सु च । तथावहंति चिद्व्योम्नि त्रैलोक्यपरमाणवः । २१ शून्यानुभावमात्रात्मभृताकाशमिदं यथा । सर्गानुभावमात्रात्म चिदाकाशमिदं तथा ॥ २२ ॥

ति ॥ अस्युदितं परमात्मस्वरूपं यं प्राप्य संबुध्यते तत्त्वज्ञं प्रति न अबुद्धं येन सः नाबुद्धोऽज्ञस्तं प्रति वा ॥ १५ ॥ तदेव स्पष्टीकृत्य दर्शयति बुद्धं प्रतीत्यादिना ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ शक्यते
यदीति शेषः पूर्वश्लोकान्नेतिवानुषंजनीयं ॥ २० ॥ वहंति प्रवहंति भ्रमंतीति यावत् ॥ २१ ॥ ननु निःप्रपंचकूटस्थस्य कथं सवितृसर्गात्मना भानमिति चेद्यथा निरूप
स्याशून्यस्य चाकाशस्य तद्विरुद्धरूपवच्छून्यतया भानं तद्वदित्याह शून्येति । शून्यं आवरणाभावः असन्नैल्यं च तदनुभवमात्रात्म तथानुभूयमानं न तु वास्तवपूर्णनि
॥ रूपानुभावात्मेत्यर्थः ॥ २२ ॥ श्रीरामो जयति ॥ ५

॥वा॰ री॰ सि॰ ॥७॥

चतुर्थ॰॥

नयसधइतिउदरमंतरंकुरुते अथ तस्य भयं भवतीत्यादिश्रुतेः॥ श्रेयो भवतीति तरति शोकमात्मविदित्यादिश्रुतिरिति भावः॥२३॥ क्रितरस्खलनयापि ज्ञातं ब्रह्मश्रे
यो भवतीति नेत्याह विज्ञानात्मेति यः विज्ञानात्मा जीवाख्य प्रसगात्मा यश्च विश्वस्य बीजं शासिता चेश्वरस्तो परमार्थदशापरिशोधने अलं पूर्णं स्वं भगेकरसं चिदाकाश
मात्रं ब्रह्मैव। यतो हि बाह्याभ्यंतरं च भेदकोपाधिद्वयं ब्रह्मणः सकाशादेव जातं भूयते यद्यस्माज्ज्ञानं तत्तदेवेति तदनन्यत्वमारंभणशब्दादिभ्य इत्यादिनावगतं तस्मात्
सर्वं वेद्यं स्वांतबोधमात्रं शुद्धचिन्मात्रमित्यर्थः॥२४॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे स्थितिप्रकरणे तृतीयः सर्गः॥३॥ इह विश्वस्थितेर्मूलं सेंद्रियं मन ईयते न

सर्गस्तु सर्गशब्दार्थतया बुद्धो वयसाधः॥ स ब्रह्मशब्दार्थतया बुद्धः श्रेयो भवत्यलं॥२३॥ विज्ञानात्माशासिता विश्वबीजं ब्रह्मैवालं स्वं चिदाकाशमात्रं यस्माज्ज्ञा
तं यत्तदेवेति विद्याद्वेद्यं स्वांतबोधसंबोधमात्रं॥२४॥ मोक्षोपाये जगदनंतवर्णनं सर्गः॥३॥ श्रीवसिष्ठ उ॰॥ इंद्रियग्रामसंग्रामसेतुना भवसागरः तीर्यते नेतरेणो
ह केन चिन्नामकर्मणा॥१॥ शास्त्रसत्संगमाभ्यासात्सविवेको जितेंद्रियः॥ अयं तावभेनस्य दृश्यस्याप्यवगच्छति॥२॥ पतत्येकस्थितं सर्वे स्वस्वरूपं स्वरूपिणां
वर संसारसागरस्त्रेण्यो यथायांति नयांति च॥३॥ बहुनात्र किमुक्तेन मनः कर्मद्रुमांकुरः॥ तस्मान्छिन्ने जगच्छाखी। छिन्नः कर्मतनुर्भवेत्॥४॥
मनः सर्वमिदं राम तस्मिन्नंतश्चिकित्सिते चिकित्सितो वै सकलो जगज्जालमयो भवेत्॥५॥ तदेतज्जायते लोके मनोमननमाकुलं॥ मनसीव्यति
रेकेण देहः क्व किल दृश्यते॥६॥ ७॥

स्योच्छेदे जगच्छून्यं दृश्यासंभवदर्शनात्॥ इंद्रियग्रामाभ्यां संग्रामो जयस्तल्लक्षणपोन सेतुना॥१॥ इंद्रियजये च विवेक उपायस्तत्र च सज्जनसच्छास्त्रे कनिष्ठतो
पाय इत्याशयेनाह शास्त्रेति॥२॥ विहितजयस्येंद्रियस्य प्रकृतसंबंधं वक्तुं प्रागुक्तं स्मारयति। एतदिति रूपिणां सौंदर्यवतां वरः श्रेष्ठ प्रयांति अपगच्छंति नयां
तीति पाठेप्ययमेवार्थः॥३॥ सोन्न्हे भोगभोग्याकारपरिणता निविहित निषिद्धकर्माण्येव तंतुः शरीरं यस्य तथाविधो जगच्छाखी संसारवृक्षः छिन्नो भवेत्॥४
जगज्जालं लक्षणाग्रामयो रोगः॥५॥ ननु मनसि चिकित्सितेऽपि देहाधीने सुखदुःखे स्यातां तत्राह॥ तदेतदिति॥ मनसो देहाकारमननमेव स्वप्न इव आकु
लं क्रियासमर्थं देहं जायते॥६॥ श्रीरामचंद्रो जयति॥ श्रीकृष्णपरब्रह्मणे नमः॥ श्रीरामजयराम जयजयराम॥ श्रीवेदव्यासाय नमः॥ ७॥ ॥७॥

तर्हिमनश्चिकित्सायांकिमौषधंतदाहदृश्येति । दृश्यस्यअसंताभावाबाधस्तस्माद्दत्तेतृतीयछांदसी ॥ ७ ॥ ननुमनोरोगआभ्यंतरः दृश्यंतुबाह्यं
तत्कथंबाह्यार्थासंतासंभवादांतरमनश्चिकित्सासंभवस्तत्राह एतदिति । एतत्दृश्यासंतासंभवात्मकंपरमौषधंमनोव्याधिचिकित्सितेसंभवसेवोपाय
इतिशेषः । चिकित्सितेइतिभावेक्तः ॥ ८ ॥ कथंसंभवतितदाह मनइति । नहिमनसाआंतरताअर्थानांबाह्यताचवास्तवीकिंतुमनएवतथाद्वैविध्यादिकल्प
नयामोहंभ्रांतिमुत्पादयतेजन्ममरणबंधमोक्षादिचकल्पयतीत्यर्थः ॥ ९ ॥ कथमिदंज्ञातमितिचेदन्वयव्यतिरेकाभ्यामित्याह स्फुरतीति । मननेमूर्छितेस

दृश्यासंतासंभवेनयत्नेनान्येनहेतुना ॥ मनःपिशाचःप्रशमंयातिकल्पशतैरपि ॥ ७ ॥ एतच्चसंभवसेवमनोव्याधिचिकित्सिते । दृश्यासंतासं
भवात्मापरमौषधमुत्तमं ॥ ८ ॥ मनोमोहमुत्पादयतेम्रियतेजायतेमनः ॥ तत्त्वचिंताप्रसादेनबध्यतेमुच्यतेपुनः ॥ ९ ॥ स्फुरतीदंजगत्सर्वंचित्ते
मननमूर्छिते ॥ शून्यमेवांबरेस्फारेगंधर्वाणांपुरंयथा ॥ १० ॥ मनसीदंजगत्कृत्स्नंस्फारंस्फुरतिचास्तिच ॥ पुष्पगुच्छइवामोदस्तस्मिंस्तस्मा
द्विवेलरतु ॥ ११ ॥ यथातिलकपोलेतैलंगुणोगुणिनिदायथा ॥ यथाधर्मिणिवाधर्मस्तथेदंचित्तकेजगत् ॥ १२ ॥ रश्मिजालंयथासूर्येयथा
लोकस्तुतेजसि ॥ यथैच्छ्यंचित्रभानौचमनसीदंतथाजगत् ॥ १३ ॥ शैत्यंयथैवतुहिनेयथानभसिशून्यता ॥ यथाचंचलतावायौमनसीदंत
थाजगत् ॥ १४ ॥ मनोजगज्जगदखिलंतथामनःपरस्परंतुविरहितेसदैवहि ॥ तयोर्द्वयोर्मनसिनिरंतरंक्षतेक्षतंजगन्नतुजगतिक्षिते
मनः ॥ १५ ॥ स्थिसंकुरकल्लनंसर्गः ॥ ४ ॥ श्री ॥ श्रीश्रीरामायनमः ॥

मूर्छिते ॥ १० ॥ तथाचविमर्शेजगन्मनोधर्मएवेतिनधर्मिनिरपेक्षोस्थातुमर्हतीत्याशयेनदृष्टांतानाहमनसीत्यादिना । धर्मेषुधर्मिभेदोनवास्तवइ
तिद्योतनायांसइवकारः ॥ ११ ॥ १२ ॥ चित्रभानौअग्नौ ॥ १३ ॥ १४ ॥ मनोजगतोःधर्मिधर्मभावेनाभेदेपिधर्मिमनोनाशादेवजगन्नाशोनतुवैपरी
त्यंतथैवलोकेदर्शनादित्याशयेनोपसंहरति । मनइति । अविरहितेअविनाभूतेक्षतेनध्वंसेसतिक्षतंनष्टंभवति ॥ १५ ॥ स्थिसंकुरकल्लनसर्गः ४

भगवत्समाधिस्थिते शुक्रस्य क्रीडतो गिरौ। अप्सरोदर्शने मोहात्तन्मयी भाव ईर्यते कथं कीदृश दृष्टांतप्रकारेणैव १ बहिः स्फुरन्नयं स्फारसंसारः
मनसि यथा स्फुरति प्रत्यक्षं प्रतिभाति तथा दृष्टांतदृष्ट्या दृष्टांतप्रदर्शनेन कथयेत्यर्थः २ उक्तान्येवात्रैंदवादिजगंति दृष्टांत इत्याह यथेति ३ आकु
लाकुलितेव्याकुलचित्तस्य ४ भार्गवोपाख्यानमप्यत्र दृष्टांतत्वेनावतारयति भार्गवस्येति भोगाधिनाथत्वं अप्सरोभोगलिप्सुत्वं संसारित्वं न दर्शस्व

॥ श्रीराम उवाच ॥ भगवन्सर्वधर्मज्ञ पूर्वापरविदां वर ॥ अयं मनसि संसारः स्फारः कथमिव स्थितः ॥ १ ॥ यथायं मनसि स्फारसंसारः स्फुरतीति स्फु
रन् दृष्टांतदृष्ट्या स्फुटया तथा कथय मेऽनघ ॥ २ ॥ श्रीवसिष्ठ उवाच ॥ यथैंदवानां विप्राणां जगंत्यवपुषामपि ॥ स्थितानि जातदार्ढ्यानि मनसीदं तथा
स्थितं ॥ ३ ॥ लवणस्य यथा राज्ञश्चैंद्रजालाकुलाकृतेः ॥ चंडालत्वमनुप्राप्तं तथेदं मनसि स्थितं ॥ ४ ॥ भार्गवस्य चिरं कालं स्वर्गभोगबुभुक्षया ॥
यथा भोगाधिनाथत्वं संसारित्वं बभूव च ॥ ५ ॥ श्रीराम उवाच ॥ भगवन् भृगुपुत्रस्य स्वर्गभोगबुभुक्षया ॥ कथं भोगाधिनाथत्वं संसारित्वं बभूव
च ॥ ६ ॥ श्रीवसिष्ठ उवाच ॥ शृणु राम पुरा वृत्तं संवादं भृगुकालयोः ॥ भोगेश्वरत्वं च तथा तथेदं मनसि स्थितं ॥ ७ ॥ सानौ मंदरशैलस्य तमा
लविटपाकुले ॥ पुरा मंदरशैलस्य सानौ कुसुमसंकुले ॥ ८ ॥ अतप्यत तपो घोरं तस्मिन् श्रीमद्भगवान् भृगुः ॥ तमुपास्ते स्म तेजस्वी बालपु
त्रो महामतिः ॥ ९ ॥ शुक्रः सकलचंद्राभः प्रकाश इव भास्करं ॥ भृगुर्वनवरे तस्मिन्समाधावेव संस्थितः ॥ १० ॥ सर्वकालं समुत्कीर्णो वनो
पलतलादिव ॥ शुक्रः कुसुमशय्यासु कुसुमलधौतशिरेषु च ॥ ११ ॥ मंदरोद्दाममदोन्मत्तासु बालो रमणालीलया ॥ विद्याविद्यादृशोर्मध्ये शुक्रो
॥ प्राप्तमहापदः ॥ १२ ॥

गर्दिगंतत्वं जन्मांतरत्वं च नाथत्वं तिरश्चोपपयाश्चार्यां ॥ ५ ॥ भोगेश्वरत्वं स्वर्गेऽप्सरोभोक्तृत्वं प्रश्नः स्पष्टः ॥ ६ ॥ सानौ प्रस्थे जातं भृगुकालयोः सं
वादं शृणु इति पूर्वेणान्वयः उक्तस्यैवोपोद्घातमाह पुरेत्यादिना ॥ ८ ॥ ९ सकलः पूर्णः भास्कर इति पाठे प्रकाशत इति प्रकाशः स्फुरन् भास्कर इव ॥ १० ॥
सर्वकालं संस्थित इति पूर्वेणान्वयः वनोपलतलात्मकृतेः समुत्कीर्णः टंकच्छेदनिष्पादित इवेति निश्चेष्टत्वेनोत्प्रेक्षा कलधौतशिरेषु रूप्यत
लवेदिकासु ॥ ११ ॥ विद्यारूपा रमार्थिका स्वात्मतत्त्वदर्शनं अविद्या दृक्पामरादिप्रसिद्धं जगत्सत्तादर्शनं तयोर्मध्ये ॥ १२ ॥ श्रीरामायनमः ॥ ५ ॥

रोदस्योर्द्यावाभूम्योरंतर्मध्ये विश्वामित्रनिर्मितस्वर्गे त्रिशंकुः राजर्षिरिव अवर्तत ॥ अत एव रागादिना आकुलः ॥१३॥ अव्यग्रो विषयांतरे अ
व्यासिक्तचित्तः ॥१४॥ क्षीरोदस्य मध्यात्तुलितां मंथनेनोत्पादितां ॥ लक्ष्म्या इवाप्सरसामपि क्षीरोदादुत्पत्तिप्रसिद्धेरुभयविशेषणं ॥१५॥ सुगंधिनो नभोनि
लो यथा ॥ नभोग्रहणमपगतेष्वनिलेतरदेशस्य चिरं सुगंधित्वद्योतनार्थं ॥१६॥ देहलक्षणादिंदोरुदयो यासां ताभिर्दीप्तिभिः किरणैः ॥१७॥ अंबुनिधेर्वपुः
संस्थानमिव उच्छलत्सत्त्वरत्नं च ॥१८॥ स च उशना अनु अप्सरोदर्शनानंतरं मनसिजस्येषुभिः ॥ पराहतं आशेते विषयेषु सुत्यनीत्याशयं मनः ॥ यथाशक्ति विवे

त्रिशंकुरिव रोदस्योरवर्त्तत तदाकुलः ॥ निर्विकल्पसमाधिस्थेस कदाचित्सितर्यथा ॥१३॥ अव्यग्रोभवदेकांते जितारिरिव भूमिपः ॥ ददर्शाप्सरसं तत्र गछंती
नभसः पथा ॥१४॥ क्षीरोदमथ्यतुलितां लक्ष्मीमिव जनार्दनः ॥ मंदारमालावलितां मंदानिलचलालकां ॥१५॥ हारझांकारिगमनां सुगंधिलनभोनि
लां ॥ लावण्यपादपलतां मदघूर्णितलोचनां ॥१६॥ अमृतीकृतदेहां देहेंदूदयदीप्तिभिः ॥ कांतामालोक्य तस्याभूत् उच्छलत्सत्त्वरलं मनः ॥१७॥
दृष्टिनिर्मलपूर्णेंदुवपुरंबुनिधेरिव ॥ साप्यालोक्य भृगुसुतं तथा परवशाभ्यभूत् ॥१८॥ मनसिजेषुपराहतमाशयं स परिबोध्य मनस्तदनू
शनाः ॥ विगलितेतरवृत्तितयात्मना सच बभूव तन्मयएव बभूव ह ॥१९॥ भार्गवोपाख्याने भार्गवस्खलनं सर्गः ॥४॥ श्रीवसिष्ठउवाच ॥ अथतां
मनसाध्यायंस्तत्रैवामीलितेक्षणः ॥ आरब्धवान्मनोराज्यमिदमिदमेकः किलोशनाः ॥१॥ एषा हि ललनाव्योम्नि सहस्रनयनालये ॥ संप्राप्सोय
महत्स्वर्गमिलानसुरसुंदरं ॥२॥५ ७॥ कैः ॥ परिबोध्य बहिः शरीरकांतानुसरणादिव्यापारात् ॥ निरुध्यैकाग्रतामापाद्यापि अंतर्विगलितेतरवृ

त्तितया बध्वैकाग्रचित्ततत्तदात्मनाभ धूमयएव बभूव ॥ यच्चित्तस्तन्मयो भवतीत्यादिश्रुतिस्मृत्यनुभवप्रसिद्धिद्योतनाय ह इति निपातः ॥१९॥ इति
वासिष्ठतात्पर्यप्रकाशे स्थितिभार्गवोपाख्याने भार्गवस्खलनं नाम पंचमः सर्गः ॥५॥ इह शुक्रस्य मनसा स्वर्गगमनमुच्यते । तत्र शक्रेणास्य सम्मानात्स
निधाउपवेशनं ॥१॥ इदं वक्ष्यमाणप्रकारं मनोराज्यं एवंकारः प्रकारांतरवारणार्थः ॥ इह विस्मृतिपर्यंतता द्योतनार्थः ॥१॥ एषा पुरोवर्तिनी मयानुगम्य
माना सहस्रनयनस्येंद्रस्यालये स्वर्गे गछतीति शेषः ॥ अयं तामनुगच्छामि अहं ॥२॥ श्रीराम जयराम जयजयराम ॥ श्रीकृष्णायन मोनमः ॥

वा॰ टी॰ स्थि॰ ९ | चतुर्थः

कनकनिष्यंदः द्रुतसुवर्णं तद्वि अत्यंतकांतिमत्त्वसिद्धं नदेवविलासि शोभमानं वपुर्येषां ॥ ३ ॥ लोचनोल्लासेन प्रत्यक्षेण दृष्टा निनीलाब्जा
नीव दृष्टयो यासां ता इमाः कांता अप्सरसः ॥ ४ ॥ कौसुमैः पारिजातादिकुसुमरचितैर्माल्यैरुद्योतंते प्रकाशंते इति कौसुमोद्योताः कौसु
मोद्योता इति पाठे कौसुमवत् उद्योतमानाः अन्योन्यप्रतिबिंबितत्वादेव विश्वरूपः सर्वाकारो हरिस्तदुपमाकाराः मत्ताहृष्टाः काशंते दीप्यंते
तच्छीलाः मरुतो देवाः प्राग्वर्णितानामपि देवानां प्रकारांतरेण वर्णनान्न पौनरुक्त्यं ॥ ५ ॥ ऐरावणस्यैरावतस्य करेण उंगंडौ ताभ्यां मदजलं लक्ष्य

इमे ते मद्रुमंदारकुसुमोत्तंससुंदराः । द्रवत्कनकनिष्यंदविलासिवपुषः सुराः ॥ ३ ॥ इमास्ता लोचनोल्लासदृष्टनीलाब्जदृष्टयः । मुग्ध
हासविलासिन्यः कांता हरिपुरस्त्रियः ॥ ४ ॥ इमे ते कौसुमोद्योता अन्योन्यप्रतिबिंबिताः । विश्वरूपोपमाकारा मरुतो मत्तकाशिनः ॥ ५ ॥
ऐरावणकरामोदविरक्तमधुपस्तुताः । इमास्ताः काकलीगीता गीर्वाणीगणगीतयः ॥ ६ ॥ इयं सा कनकांभोजचलद्वैरिंचसारसा । मंदाकि
नीतटोद्यानविश्रांतसुरनायका ॥ ७ ॥ एते ते यमचंद्रेंद्रसूर्यानलजलानिलाः । लोकपालास्तनुद्योतकीर्णदीप्तानलार्चिषः ॥ ८ ॥
अयं सरणवृत्तांतहेतिकंडूयिताननः । ऐरावणो रणोद्दामप्रोन्नद्धेसेंद्रमंडलः ॥ ९ ॥ इमे ते भूतलस्थानाद्व्योम्नि तारकतां गताः । वैमानिका
श्चलज्ज्वारुचामीकरमयातपाः ॥ १० ॥ मेरुस्खलज्जलस्फालशीकराकीर्णदिवताः । एतास्ताः कीर्णमंदारा गंगासलिलवीचयः ॥ ११ ॥ एताः प्र
स्रुतमंदारमंजरीपुंजपिंजराः । दोलालोलाप्सरःश्रेण्यः शक्रोपवनवीथयः ॥ १२ ॥ इमे ते कुंदमंदारमकरंदसुगंधयः । चंद्रांशुनिकराकाराः पारि
जातसमीरणाः ॥ १३ ॥

नेतदामोदेऽपि विरक्तैः अनासक्तैर्मधुपैः स्तुताः आकीर्णताः काकल्या मधुरास्फुटध्वनिना गीताः आलापिताः ॥ ६ ॥
कनकांभोजेषु चलंतो भ्रमंतः वैरिंचा विरिंचिसंबंधिनो हंसाः सारसाश्च यस्यां ॥ ७ ॥ तनुद्योतैः शरीरकांतिभिः कीर्णाः परितः प्रसारिताः दीप्तानलार्चि
षो यैः ॥ ८ ॥ रणवृत्तांतेषु युद्धप्रसंगेषु हेतिभिरायुधैः कंडूयितमिव आननं यस्य ॥ ९ ॥ चरंतः प्रसरंतः चारुचामीकरमया आतपा इव आतपाः देहविमानादिकां
तयो येषां ॥ १० ॥ ११ ॥ १२ ॥ चंद्रांशुनिकरा इव सुखस्पर्शः आकारः शैत्यमांद्यादियुक्तः सन्निवेशो येषां ॥ १३ ॥

पुष्पैः केसरैः नीहारैः हिममकरंदकणैः पटान्वासयंति सुगंधयंतीति पटवासा परागास्तैश्च्यः पवनांदोलनक्रीडार्थं चपरस्परताडनलक्षणो रणस्तत्र उत्क
कैरासक्तैः लतागपीश्च्यु उतालक्षणो रंगनागयोर्वल्लितासदृशैरंगनागयोर्वाप्याप्तं १४ नारदतुंबुरु गंधर्वविशेषौ ऋषीवा १५ १६ देवेश्वरं इंद्रं १७ इंद्राश्मजा
लानि इंद्रनीलसमूहरूपाणि चंद्राश्मेतिपाठे चंद्रकांतसमूहसदृशानि कुसुमानि येषां चिंतामणाय इव गुलुच्छकाः कलिकागुच्छानि येषां पक्षैः फूलस्तबकैः

पुष्पकेसरनीहारपटवासरणोत्सुकैः। लतांगनागपौर्व्याप्तमिदं तं नंदनं वनं १४ कांतगीतरवानंदप्रनर्तितसुरांगनौ इमौ तौ वल्लकी स्निग्धस्व
रौ नारदतुंबुरू १५ इमे ते पुण्यकर्तारो भूरिभूषणभूषिताः व्योमन्युड्डीयमानेषु विमानेषु च संस्थिताः १६ मदमन्मथमत्तांग्य इमास्ताः सुरयो
षितः देवेश्वरं निषेवंते वनं वनलताइव १७ चंद्राश्मजालकुसुमाश्चिंतामणिगुलुच्छकाः कल्पवृक्षा इमे पक्कारत्नस्तबकदंतुराः १८ इहतावदिमं
शक्रमठमासननसंस्थितं द्वितीयमिव त्रैलोक्यस्त्रष्टारमभिवादये १९ इति संचिंत्य शुक्रेण मनसैव शचीपतिः तेनाभिवादितस्तत्र द्वितीय इव खे
ऽगुः २० अथसादरमुत्थाय शुक्रः शक्रेण पूजितः गृहीतहस्त आनीय समीप उपवेशितः २१ धन्यस्त्वदागमेनाथ स्वर्गोयं शुक्र शोभते उ
ष्यतां चिरमेवेह शक्र इत्थमुवाच तं २२ अथ तत्रोपविश्यासौ भार्गवः शोभिताननः श्रियं जहार शशिनः सकलस्यामलस्य च २३ सकलसुर
गणाभिर्वंदितो सौ भृगुतनयः शतमन्युपार्श्वसंस्थः चिरतरमतुल्यमवापतुष्टिं नरपतिसत्तमलालनं बभूव २४ मोक्षोपाये भार्गवगमनो
राज्यं सर्गः ६ श्रीवसिष्ठ उवाच इति शुक्रपुरं प्राप्य वैबुधं स्वेन तेजसा विसस्मार निजं भावं प्राक्तनं व्यसनं विना १ °

दंतुरा उन्नतदंता इव शोभमानाः १८ त्रैलोक्यस्त्रष्टारं ब्रह्माणं १९ २० समीपमानीय उपवेशितः २१ २२ सकलस्य पूर्णस्य अमलस्य रजः कलंकरहित
स्य २३ नरपतिसत्तमस्य राजोत्तमस्येंद्रस्य लालनं लालनीयः पुत्रादिरिव प्रियतम इतियावत् २४ इति श्रीयोगवासिष्ठे मोक्षोपाये भार्गवगमनोराज्यं षष्टः
सर्गः इतः प्रभृत्यः स्वकांतायाः स्वर्गे शुक्रेणादर्शनं परस्परानुरागेणासंगमश्योपवर्ण्यते इति उक्तमनोराज्यप्रकारेण विबुधानां निवासं वैबुधपुरं स्वर्गं स्वेन स्व
कीयेन तेजसा पुण्यसामर्थ्येन व्यसनं मरणादुःखं विनापि १ श्रीरामचंद्रो जयति श्रीविश्वेश्वरायनमः श्रीकृष्णायनमः श्रीवेदव्यासायनमः ५

स्वर्गेणसुखातिशयेनान्वितः परिमोदितोहर्षितः स्वर्गामिपरिमोदितइतिपाठेस्वर्गसंचरणशीलेदेवैःसहाहितइत्यर्थः ।२। स्वःश्रियंस्वर्गशोभांस्वसौंदर्यंचलोललोचनस्यस्त्रीजनस्यवांछितांअभीष्टतामामिति विलोक्यविचार्यस्त्रैणंस्त्रीसमूहं ।३। तांपूर्वदृष्टामप्सरसंस्फ्रगुःमार्गवः ।४ तामालोक्यसभार्गवोपिपरवशोभवदित्यनुषंगः परेणावान्वयः ५ स्वेदाख्यंवारिभावंदर्शयति विलीयमानांगइति ६ ७ निशिवियो

मुहूर्तमिवविश्रम्यतस्यपार्श्वेशचीपतेः ॥ स्वर्गेविहर्त्तुमुत्तस्थौस्वर्गामिपरिमोदितः २ स्वःश्रियंससमालोक्यलोललोचनवांछितां स्त्रैणंद्रष्टुंजगामासौनलिनीमिवसारसः ।३ तत्रतांमृगशावाक्षींकांतामध्यागतामसौ ददर्शविपिनांतस्थांस्फ्रगुश्चूतलतामिव ४ सापितंभार्गवंरामदृष्ट्वापरवशाभवत् तामालोक्यसमंलोलविलासवलिताकृतिं ५ आसीद्विलीयमानांगोज्योत्स्नाभिंदुमणिर्यथा विलीयमानसर्वांगस्तामवैक्षतकामिनीं ६ चंद्रकांतइवज्योत्स्नांशीतलांखेविलासिनीं तेनावलोकितासापितत्सरायणतांगता ७ निशांतेचक्रवाकेनकांतेवपरिकूजिता रसाद्विकासितानूनंमन्योन्यमनुरक्तयोः ८ प्रातरर्कनलिन्योर्याशोभासैवतयोरभूत् संकल्पितार्थदापित्वाद्देशस्याभूच्चनेनसा ९ सर्वांगंविवशीकृत्यकामायैवसमर्पितं पेतुःस्मरशरास्तस्यामृदुष्वंगेषुभूरिशः १० पलाशेष्विवपद्मिन्याधाराइवपयोमुचः साबभूवस्मरोद्भूतालोलालिवलयाकुला ११ मंदवातामिनुन्नायमंजर्यस्सदृधर्मिणी नलिनीरजनेवांतांहंससारसगामिनीं १२ मदनःक्षोभयामासगजःकमलिनीमिव अथतांतादृशींदृष्ट्वाशुक्रःसंकल्पितार्थभाक् १३ तमःसंकल्पयामाससंहारइवभूतभुक् त्रिविष्टपस्यदेशोसौबभूवतिमिराकुलः ।१४

गाप्हरितःकूजितंययासाकांताचक्रवाकीनिशांतेप्रातश्चक्रवाकेनावलोकितेवारसाद्वेमातिशयाद्विकासिना आविष्कृताशोभानूनमित्युत्प्रेक्षादोहेक्षाद्योतनाय ९ देशस्यनंदनोद्देशस्य ९ १० पलाशेषुपत्रेषुतस्याःकामाख्यंसंचारिभावंदर्शयतिसेतिस्मरप्रोद्भूताकंपिता ११ सदृशब्दःसादृश्येसदृशधर्मिणीत्यर्थः १२ १३ संहारेप्रलयेकालेभूतभुक्रुद्रः त्रिविष्टपस्यस्वर्गस्यावयवोसौनंदनोद्देशः ।१४ श्रीरामायनमः

लज्जालक्षणास्यांधकारस्य तीक्ष्णांशोः सूर्यवन्निवारके तिमिरमंडले तस्मिन्मंडले नंदनप्रदेशे तस्य मिथुनस्य स्त्रीपुंसद्वंद्वस्येव प्रतिष्ठांस्थैर्यं आगते प्राप्ते सतीतिपरे
पासहान्वयः ॥१५॥ फूलेषु तस्याः सखीजनेषु तस्मात्प्रदेशात् अभिमतां दिशं गतेषु सत्सु ॥१६॥१७॥ धवलागारं स्फाटिकगृहं तन्मध्यस्थे १८ १९ सुरेभस्यैरावण
स्य ॥२०॥२१॥ नागको ऽनंगकः अबलां मामनुबध्नाति निर्बंधयति अत एव पाहि ॥२२॥२३॥ प्रणयायाः प्रीसतिशयाः अवगण्यं तेन बहुमन्यं ते अशंकितं अन्यगोचरता

फूलोकस्यां धृतमसालोकालोकृतेरोयथा ॥ लज्जांधकारतीक्ष्णांशोस्तस्मिंस्तिमिरमंडले ॥१५॥ प्रतिष्ठामागते तस्य मिथुनस्येव मंडले ॥ तेषु सर्वेषु फूलेषु गते
ष्वभीमतां दिशं ॥१६॥ तस्मात्प्रदेशात् फूलोके दिनांते विहगेष्विव ॥ सा दीर्घचंचलापांगी प्रवृद्धमदनव्यथा ॥१७॥ आजगाम स्मरगोः पुत्रं मयूरीवाऽरिदं यथा ॥ ध
वलागारमध्यस्थे पर्यंके परिकल्पिते ॥१८॥ विवेश भार्गवस्तत्र क्षीरोद इव माधवः ॥ साकारा वल्लभास्य विवेशावनतानना ॥१९॥ रराज च सुरेभस्य ह
दिन्यग्नेव पद्मिनी उवाच चेदं मधुरं रसस्नेहाक्तया गिरा ॥२०॥ वचो मधुरमानंदविलासवलिताक्षरं ॥ पश्यामलेंदुवदनमंडली कृतकासुकिः ॥२१॥
अबलामनुबध्नाति मामेष किल नागकः ॥ पाहि मामबलां नाथ दीनां त्वच्छरणामिह ॥२२॥ कृपापूर्णास्वासनं साधो विद्धि सच्चरितं व्रतं ॥
स्नेहदृष्टिमजानद्भिर्मूढैरेव महामते ॥२३॥ प्रणाया अवगण्यंते नरसज्ज्ञैः कदाचन ॥ अशंकितोऽयः संपन्नः प्रणयोन्योन्यरक्तयोः ॥२४॥ अधः
करोति निःस्पंदं चंद्रमाल्हादिनं प्रियं ॥ न तथा सुखयत्येषा चेतस्त्रिभुवनेशिता ॥२५॥ यथा परस्परानंदः स्नेहः प्रथमरक्तयोः ॥ त्वत्सद
स्पर्शनेनेयं समाश्वस्तास्मि मानद ॥२६॥ चंद्रपादपरामृष्टा यथा निशि कुमुद्वती ॥ संस्पर्शामृतपानेन नवजीवामि सुंदर ॥२७॥ चं
द्राम्बुरसपानेन चकोरी चपला यथा ॥ मामिमां चरणालीनां भ्रमरीं करपल्लवैः ॥२८॥ आलिंग्यामृतसंपूर्णोऽस्मि पद्महृदये कुरु ॥ इत्युक्ता
पुष्पमृद्वंगी सा तस्य पतितोरसि ॥२९॥ व्याघूर्णितानयना सुतरोरविमंजरी ॥ तौ दंपती तत्र विलासकांती विवेशतुस्ताः सुवनस्थलीषु ॥ द्विज
ल्कगौरानिलघूर्णितासुरक्तौ द्विरेफाविव पद्मिनीषु ॥३०॥ रतिश्रीवासिष्ठनाम्ये प्रकाशे स्थितिप्रकरणे सप्तमः सर्गः ॥७॥

सोपाधिकत्वविघ्नेदापराधगणनादिशंकारहितं यथा स्यात्तथा उपसंपन्नः संजातः ॥२४॥ निष्पंदं देव संजीवनामृतः स्त्राविणं अधः करोति संजीवकाल्हा
दकां चंद्रसहस्रादपि प्रियतम प्रणय एवातिशेते इतियावत् ॥ त्रिभुवनेशिता त्रैलोक्यैश्वर्यं ॥२५॥ २६॥ २७॥ २८॥ अमृतसंपूर्णोऽस्मि हृदयामृतभरिते हृत्सद्यांतस्थे
हृदये चित्तो ॥२९॥ सुतरां कल्पवृक्षस्य विवेशितुः निर्विविशतुः गुणाच्छादसः किंजल्कैः केसरैः तदीयपरागैः गौरापीतेन अनिलेन घूर्णिता सुकंपिता सुवनस्थली

पालितोः स्माधरणाविशेषणां ॥३०॥ इतिश्री० सप्तमः सर्गः ॥

वा॰टी॰स्थि॰
॥११॥

विविधस्वर्गभोगान्नेपतितस्यात्र रिशः॥ जन्मानिवासनायोगात्तापसत्वं चिकीर्षति १ उत्से स्मितैः कल्पितैः॥ १ मंदारमालाः आकल्पयुक्तिसर्वतोधारय
तीतितथोक्तया मंदारमालालंकृयेतिपाठः स्पष्टः विबुधासवममृतं देवभोग्यमासवांतरंवा॥ २ अमरवाहिन्याः मंदाकिन्याः॥ ३ इंदुदलानां चंद्रकलानांस्पंदे
निस्यंदरूपैश्चंद्रकलारब्धशरीरैरितियावत्॥ लताजालनिलयेषु कुंजेषु॥ ४ लताकल्पितयालीलार्थयासुदोलया विलसितं क्रीडितं ५ शांभवैः शिवा

श्रीवसिष्ठउवाच॥ इतिचित्तविलासेनचिरमुत्सेस्मितैः प्रियैः॥ प्रणयेभार्गवस्यासीत्तुष्टयेसुसमागमः॥ १ मंदारमालालंकृयाविबुधासवमत्तया
तदातेनतयासार्द्धं द्वितीयेनामलेंदुना॥ २ विहृतंमत्तहंसासुहेमपंकजिनीषुच॥ तटीष्वमरवाहिन्याः सहचारणकिंनरैः॥ ३ पीतमिंदुदलस्यं
दैर्दैवैः सहरसायनं॥ पारिजातलताजालनिलयेषुविलासिना ४ चारुचैत्ररथोद्यानलतालीलासुदोलया॥ चिरंविलसितंव्यग्रैः सहविद्याध
रीगणैः॥ ५ नंदनोपवनाभोगोमंदरेणेववारिधिः॥ दशमालोड्यतानीतः प्रमथैः सहशांभवैः॥ ६ बालहेमलताजालजटालासुनदीषुच॥
भ्रांतमुन्मत्तनागेनमेरुवीथिष्विव॥ ७ कैलासवनकुंजेषुतयासहविलासिना॥ हरेंदुधवलारात्र्याः क्षपितागणगीतिभिः॥ ८ गंधमाद
नशैलस्यविश्रम्योपरिसानुषु॥ सातेनकनकांभोजैरापादमभिमंडिता ९ लोकालोकतटांतेषुविचित्राश्चर्यहारिषु॥ क्रीडितंकनकासेन
रामतेनतयासह॥ १० मंदरांतरकच्छेषुसार्द्धं हरिणशावकैः॥ अवसत्तसमाः षष्टिं कल्पितामरमंदिरे॥ ११ क्षीरार्णवतटीष्वस्यवनितास
हचारिणः॥ क्षीणंकृतयुगार्द्धं श्वेतद्वीपजनैः सह॥ १२ गंधर्वनगरोद्यानलीलाविरचनैरसौ॥ स्वस्थानंतजगत्स्रष्टुः कालस्यानुकलिंगतः॥ १३

नुचरैः प्रथमैः सह। आलोड्यतांपरिभ्रांततां॥ ६ उन्मत्तनागेनमत्तगजेनमेरुवीथिषु मेरुसंबंधिनीषुभूमिषु॥ ७ हरस्येंदुनाचूडामणिना द्वक्षपक्षेपिधव
लाः क्षपिताः क्षपिताः अतिवाहिताः इतियावत्॥ इट् छांदसः॥ ८ सावधः॥ ९ लोकालोकोभ्रांतपर्वतः प्रसिद्धः॥ १० कच्छेषु जलप्रायशिशिरदे
शेषुहरिणशावकैः मृगपोतैः षष्टिसमाः संवत्सरान्॥ ११ १२ मनोरथमात्रेणाश्चर्यरूपजगत्स्रष्टुः क्रमेणास्वस्थानसन्कालस्यानुकलितंसाम्यंग
तः प्रापेत्यर्थः॥ १३ श्रीरामचंद्रोजयति॥ श्रीविश्वेश्वरायनमः॥ श्रीकृष्णपरब्रह्मणेनमः॥ श्रीवासुदेवायनमः॥ श्रीवेदव्यासायनमः॥ छ

चतुर्थः॥

॥१४ उपहतापत्तनप्रतिसंधानभयाद्गलिता आरूढनिर्दिव्यंशरीरंयस्य ॥१५॥ परान्यूनानि द्रवीभावेन विच्छिन्नानि समस्तांगानि यस्य हूले देवे वन्नाद्गृही
ते स्यंदने विमाने नंदनवने वासोलंकाराद्युपभोगानंदसाधनं चयस्य ध्वस्तः अधः समिति युद्धे ॥१६॥ शरीरं द्रवीभूतं स्वरूपं ॥१७॥ चित्तके लिंगशरीरे व्यसनेन
दुःखेन आविले अस्वस्थे ॥१८॥ तत्र व्योम्नि आ विविशतुः प्रविष्टे प्रालेयतां हिमजलतां ॥१९॥ दशार्णे बुदेश विशेषे बुभुक्षतां रेतस्तां ॥२०॥ मेरुगहने इलावृता

अथावसदसौ मुमुक्षुः पुरंदरपुरे पुनः ॥ सुखं चतुर्युगान्यष्टौ हरिपोक्षप्राया सह ॥१४॥ पुण्यक्षयानुसंधानात्तनश्चावनिमंडले ॥ तयैव सह मानिन्या
पपात तो पलतातुलिः ॥१५॥ परान्यूनासमस्तांगो हलस्यंदननंदनः ॥ चिंतापरवशो ध्वस्तः समितीव हतो भटः ॥१६॥ पतितस्यावनौ तस्य चिंतया
सह दीर्घया ॥ शरीरं शतधा जातं शिलापालीव निर्झरः ॥१७॥ संशीर्णयोर्देहकायोश्चित्तके व्यसनाविले ॥ विचेरतुस्तयो व्योम्नि निर्नीडौ विहगौ
यथा ॥१८॥ तत्राविविशतुश्चांद्रं ते चित्रे रश्मिजालकं ॥ प्रालेयतामुपेताशु शालितामयजग्मतुः ॥१९॥ शालीस्तान् भुक्तवान्यस्तान् दशार्णेषु द्विजो
त्तमः ॥ सभुक्तः शुक्रतामेत्य तनद्भार्यातनयोऽभवत् ॥२०॥ ततो मुनीनां संसर्गात्तपस्युग्रे व्यवस्थितः ॥ अवसन्मेरुगहने मन्वंतरमनिंदितः ॥२१॥ तत्र त
स्य समुत्पन्नो मृगयाः पुत्रो नराहृतिः ॥ तत्स्नेहेन परं मोहं पुनरप्याय योक्षपात् ॥२२॥ पुत्रस्यास्य धनं मेस्तु गुणाश्चायुश्च शाश्वतं ॥ इत्यनारतचिंताभि
र्जहौ स सामवस्थिति ॥२३॥ धर्मचिंतापरिभ्रंशात्सुखार्थभोगचिंतया ॥ क्षीणायुषं तमहरन्मृत्युः सर्प इवानिलं ॥२४॥ भोगैकचिंतया सार्द्धं स समुत्क्रां
तचेतनः ॥ प्राप्य मद्रदेशपुत्रत्वमासीन्मद्रमहीपतिः ॥२५॥ मद्रदेशे चिरं कृत्वा राज्यमुत्सन्नशात्रवं ॥ जरामभ्याजगामाथ हिमाशनिमिवांबुजं ॥२६॥
मद्रराजस्ततनुं चारु तपोवासनया सह ॥ तत्याज तेन जातोसौ तपस्वी तापसात्मजः ॥२७॥

दिवर्षे ॥२१॥ मृग्या इति ॥ अर्थात्साप्सराः शापान्मृगी संपन्नेति गम्यते ॥२२॥ ससांश्च सादिप्रमापानि यंत्रितां अवस्थितिं तपोध्यानादिनिष्ठां जहौ ॥२३॥ अह
रत् अग्रसत् ॥२४॥ मद्रेशो मद्रराजस्तस्य पुत्रत्वं प्राकृतबाल्यापेक्षया निरुक्तांशसत्रयोनिमिसाशयः ॥२५॥ अभ्याजगाम प्राप ॥२६॥ तपोवासनया वा
नप्रस्थधर्मसंततिनये स्यर्थाद्गम्यते ॥२७॥ श्रीरामायनमः ॥ श्रीकृष्णाय नमः ॥ श्रीवेदव्यासायनमः ॥ श्रीविघ्नेश्वरायनमः ॥ श्रीकृष्णाय०

विगतज्वरः शांतादिनिरस्तरागादिसंतापः ॥२८॥ असौ प्रागुक्तो भृगुनंदनः शुक्रः विविधाशयः नानाविधवासनावासितः सन् तत्तदनु
सारिणीं विविधजन्मदशां प्राप्य शरीरपरंपराः सम्यगनुभूय दैवात् वैराग्यादिसाधनसंप्राप्त्या सुखं निर्विक्षेपं यथा स्यात्तथा वरनद्याः समंगाया
स्तटे दृढवृक्षवत् च्छेदनभेदनादिविक्षेपसहत्वेप्यचंचलवृत्तिः तिष्ठदित्यर्थः ॥२९॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे स्थितिप्रकरणे ऽष्टमः सर्गः
इत्थं शुक्रशरीरस्य भृगुसंनिधिवर्तिनः मृतप्रायस्य पतनं शुष्कताचोपवर्ण्यते ॥१॥ इति उक्तप्रकारेण चिंतयंतः मनोराज्यैः कल्पयतः पितुर्भृगो

समंगायां महानद्यास्तटमासाद्य तापसः ॥ तपस्तेपे महाबुद्धिः सरामिव गतज्वरः ॥२८॥ विविधजन्मदशां विविधाशयः सम
नुभूय शरीरपरंपराः ॥ सुखमतिष्ठदसौ भृगुनंदनो वरनदीषु तटे दृढवृक्षवत् ॥२९॥ भार्गवोपाख्याने विविधजन्मानुभावः सर्गः ॥७॥८
॥ श्रीवसिष्ठ उवाच ॥ इति चिंतयतस्तस्य शुक्रस्य पितुरग्रतः ॥ जगामानिलरंकालो बहुसंवत्सरात्मकः ॥१॥ अथ कालेन महता पवनातपज
र्जरः ॥ कायस्तस्य पपातोर्व्यां छिन्नमूल इव द्रुमः ॥२॥ मनस्तु चंचलाभोगं तासु तासु दशासु च ॥ बभ्रामाति विचित्रासु वनराजिष्विवैणा
कः ॥३॥ भ्रांतमुद्भ्रांतमखिलश्वभ्राकापितिमिवाकुलं ॥ मनस्तस्य विशश्राम समंगासरितस्तटे ॥४॥ अनंतरं तांतघनां पेलवां सुदृढामपि
तां संस्थितिं दशां शुक्रो विदेहो नु भवन्निःस्पृहः ॥५॥ मंदराचलसानुस्था सा तनुस्तस्य धीमतः ॥ तापप्रसरसंशुष्का चर्मशेषा बभूव ह ॥६॥ शरी
ररंध्रप्रवहद्वातसीत्काररूपया ॥ चेष्टा दुःखक्षयानंदात्कान्त्यैव प्रगायति ॥७॥

रग्रतः ॥१॥ पवनातपाभ्यां जर्जरः शिथिलीकृतः ॥२॥ तासु तासु स्वकल्पितस्वर्गगमनादिदशासु एणः कोहरिणः ॥३॥ भोगकल्पनादिभिः भ्रांतिं जन्ममरणपरंक
ल्पनयोगात् भ्रांतं विशश्राम विश्रांतिं प्राप ॥४॥ मनः कल्पनामात्रत्वात् पेलवां असत्यतां भ्रांतां प्राक्तनदेहविस्मरणात् सुदृढां विदेहः शुक्रदेहनिरपेक्षः ॥५॥ चर्मशेषाव
स्थिः अंतस्थत्वेशेषः ॥६॥ सा तनुरपि मानदुःखक्षयप्रयुक्तादानंदाद्धेतोः शरीररंध्रेषु वेणुरंध्रेष्विव प्रवहतः संचारतो वातस्येव वेणुध्वनिवत् सीत्कारास्तद्रूप
या कालकल्यां सूक्ष्मां व्यक्तमधुरध्वनिं देहस्येदृशी गतिरिति तत्त्वचेष्टा प्रगायतीवेत्युत्प्रेक्षा ॥७॥

तामेव देहदशामुत्प्रेक्षांतरैरपि वर्णयति ॥ नो वराकमित्यादिना सा तनुः भवभूमिषु योगाशालस्य पो अवटे शुष्कपल्वले इति प्राग्वर्णितप्रकारेण लुठितं मनोवरा
कम् शुभ्राभ्राखिलयादंतमालयाहसतीव ॥८॥ सा तनु मुखमंडलरूपे अरण्ये जरत्कूपसमूहरूपया नासानयनवक्त्रादिगर्तानां शोभया अकृत्रिमं स्वाभाविकं ज
गतः शून्यं असद्रूपतां विवेकिनां वपुरक्ष्णोः प्रत्यक्षं दर्शयंतीव स्थिता इत्यर्थः । वपुर्गृहपांनदाग्नितप्रमाणानारोपलक्षणार्थं ॥९॥ प्राक्तापोपलतापश्वासं सिक्ता प्रागनु
स्मरणं स्वबंधुभूतपूर्वपूर्वदेहपरंपरानुस्मरणं च तत्र युक्ता दुःखादानंदाद्वा उच्छ्वसतीति प्रागनुस्मरणोच्छ्वासं बाष्पं अश्रुधूमाभासयोः श्लेषादभेदारोपः ॥१०॥११

मनोवराकमवटे लुठितं भवभूमिषु ॥ हसतीवेति शुभ्राभ्रासितयादंतमालया ॥८॥ दर्शयंतिजगच्छून्यं वपुरक्ष्णोरकृत्रिमं ॥ मुखारण्यजरत्कूपरूप
यागर्तशोभया ॥९॥ तापोपलश्वाससिक्तावर्षाजलभरेण सा ॥ प्रागनुस्मरणोच्छ्वासमिव बाष्पं विमुंचति ॥१०॥ चंडानिलविलासेन लुलिता वनभू
मिषु ॥ धारानिकरपातेन विनुन्ना जलदागमे ॥११॥ प्रावृडिझर्झररूपेण पाण्डुता गिरिनदीतटे ॥ पांशुना पवनोत्थेन दुःकृतेनेव रूषिता ॥१२॥ शुष्ककाष्ठ
वशाल्लोलावातेषु कृतखट्खटितिः ॥ तारमारुतसीत्कारो वनेतपइवास्थिता ॥१३॥ वक्त्रासुष्कांत्रतंत्रीव भूतमांकारकारिणी ॥ अरण्यलक्ष्मीर्बाल्येव भू
न्या चर्ममयोदरी ॥१४॥ रागद्वेषविहीनत्वात्तस्य पुण्याश्रमस्य तु ॥ महातपस्त्वाच्छक्रगोनभुक्ता मृगपक्षिभिः ॥१५॥ यमनियमकृशीकृतांगयष्टिश्च
रतितपःस्मरगूढहृस्यचेतः ॥ तनुरथपवनायनीतरक्ताचिरमलुठन्महतीषु सा शिलासु ॥१६॥ इति योगवासिष्ठे भार्गवकलेवरवर्णनं सर्गः ॥९॥

प्रावृड्निर्झररूपेण धातुरागेण पाण्डुतां रंजिता ॥१२॥ खट्कृतिर्विलोडनोत्थखडशब्दकरणं अव्यक्तानुकरणात् उच्चिबहुलग्रहया क्षितं ॥१३॥ भूतानांभां
कारो भयंकरध्वनिः तत्करणशीला अरण्यलक्ष्मीः बाल्या बालिक्रमणा आहारेणेति यावत् बालरूपा हतिगणात्वाकृर्मणिष्यभू उत्भिषु । चर्ममयोदरी चर्ममात्रशेषो
दरी ॥१४॥ तर्हि सा ननुः श्वापदगृध्रादिभिः कुतो न भक्षिता तत्राह रागेति । सप्रमाणालांछनशीर्णा सापि द्रष्टव्यं ॥१५॥ यमनियमाभ्यां कृशीकृता अंगयष्टिः
स्वकल्पितशरीरांतरं येन क्रीबेपि विभ्रमस्तु कुछांदसः स्मरगूढहस्यमुक्तस्य चेतश्चित्तं तपश्चरति स्म समं गाल तटे सह प्रान्तनी शुक्रतनुः ॥१६॥ इति श्रीयोगवासि
ष्ठे तात्पर्यप्रकाशे भार्गवकलेवरवर्णनाम नवमः सर्गः ॥९॥ श्रीकृष्णायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीगुरुभ्योनमः ॥ ७ ॥

दृष्टपुत्रतनोः क्रोपोफ्रगोरत्रोपवर्व्यन्ते॥ कालं प्रत्यथकालेन बोधनं चात्मविद्यया॥१॥ परमात्मानं संबोधयन्ति स्फुटं दर्शयतीति परमसंबोधः समाधिस्त
नः १ गुणासेनायाः गुणासमूहस्य सामंतं अधिष्ठातारं॥२॥ कायत्वक्षपांकंकालं शवं॥३॥ कंकालमेव वर्णयन्ति तापेत्यादिना तापेनातपेन शुष्कवपुः राहुः स
र्पशिराः इतिवत् बहुव्रीहिः कृत्तिरंध्रेषु चर्मच्छिद्रेषु कृतनीडत्वात् स्फुरिता रिन्ति रियः पक्षिविशेषा यत्र संशुष्कांत्रायाउदरगुहायाश्छायायां विश्रांताः दर्दुराः
भेकाः यस्य ४ नेत्रगर्तके संसक्ताः प्रसूताश्च परस्परपराभिर्द्धाः नवकीटकायस्य पर्शुकानि पार्श्वास्थीनि तन्मनसपंजरे प्रोता कोशकाराः कृमयः पूर्वदेश

॥श्रीवसिष्ठउवाच॥ अथवर्षसहस्रेण दिव्येन परमेश्वरः॥ स्वगुः परमसंबोधाद्विरराम समाधितः॥१॥ नापश्यदग्रेतनयं विनयावनतानन्नं॥ सामं
तं गुणासेनायाः पुण्यं मूर्तमिव स्थितं॥२॥ अपश्यत्केवलं कायं कंकालं पुरतो महत्॥ देहयुक्तमिवाभाग्यं दारिद्र्यमिव मूर्तिमत्॥३॥ तापशुष्कवपुः कृत्ति
रंध्रस्फुरिततित्तिरि॥ संशुष्कांत्रोदरगुहाछायाविश्रांतदर्दुरं॥४॥ नेत्रगर्तकसंसक्तप्रसूतनवकीटकं॥ पर्शुकापंजरप्रोतकोशकारकृमिव्रजं॥५॥
प्राक्तनीमुपभोगेहामिष्टानिष्टफलप्रदां॥ धाराधौतांत्रयानद्धन्यस्तशंशुष्कास्थिमालया॥६॥ शिरोघटेन शुभ्रेणामरणेनेंदुवर्चसा॥ विडंबय
च्चकर्पूरप्लुतलिंगशिरःश्रियं॥७॥ कृत्यासंशुष्कशिरयास्वास्थिमात्रावशेषया॥ ग्रीवयात्मानुसरंतया दीर्घीकुर्वद्दिवाकृतं॥८॥ मृणालिकापां
डुरयाधाराववरत्तमांसया॥ नासाग्रास्थिकयावक्रं कृतसीमाकृतिं दधत्॥९॥ दीर्घकंधरयान्नूनमुन्नतीकृतवक्त्रया॥ प्रेक्षमाणामिव प्राणानुक्रां
तानंबरोदरे॥१०॥६॥

प्रसिद्धाः त्वूलावा॥५॥ उपभोगेहां भोगवासनां शुष्कास्थिमालया विडंबयेदित्युत्तरेणान्वयः नानावैचित्र्यसंधिसंबंधैर्देहारंभकत्वेन चा स्थ्यां वासनानां च
साम्यात्॥६॥ वचो विशीर्णत्वेनास्थिमात्रया अस्थिमात्रशेषादिंदुवर्चसा पूजाविशेषे कर्पूरेरराप्लुतस्याभिषिक्तस्य शिवलिंग शिरसः श्रियं शोभा विडंब
यत् अनुकुर्वत्॥७॥ वासनाप्रसृतमात्मानमनुसरंतयेव॥८॥ वर्षधाराभिरवक्षतमांसया शीर्णमांसया॥ नासाग्रास्थिकयानक्रं मुखमंडले कृतः सीमा
मध्यावधारणा शंकुर्यस्य तदाकृतिं दधत्॥ नासास्थ्यग्रस्य मुखमंडलमध्यत्वादिसर्थः नासाग्रस्थितयेति पाठे अस्थिकयेति विशेष्यमध्याहार्य॥९॥ दीर्घया
०॥ कंधरया ग्रीवया॥१०॥

दंउशाब्दस्य प्राण्यंगवचनत्वाभावान्न दंद्वैकवद्भावः जंघादिभिरष्टभिः आशांतं अष्टदिगंतं प्रतिप्रतिष्ठानं प्रतिष्ठमानं प्रस्थानं कुर्वाणं विश्लिष्य पलायनकाम मिवेतियावत् मुगशावश्च्छांदसः दीर्घाध्वश्रमभीत इत्तित्रहेतूत्प्रेक्षा न हि दीर्घे परलोकाध्वनि कायवाहनश्रमः सोढुं शक्यत इति भ यादिवेत्यर्थः ॥ ११।१२ आलानं बंधनस्तंभं ॥ १३ ॥ आलोकनमालोकः स्तसमकाले प्रतिभानं वस्यमाया वितर्कः अभूदिति शेषः ॥ १४ ॥ भविष्यं अवश्यं भाव्य

जंघोरुजानुदोर्दंडैर्हिगुणां दीर्घतां गतैः ॥ प्रतिष्ठानमिवाशांतं दीर्घाध्वश्रमभीतितः ॥ ११ ॥ उदरे णातिरिक्तेन चर्मशेषेण शोषिणा ॥ प्रदर्शय
दिवाग्नस्य हृदयस्यातिशून्यतां ॥ १२ ॥ प्रेक्ष्यत घुष्ककंकालमालानं दुःखदंतिनः ॥ पूर्वापरपरामर्शमकुर्वन् रघुरुत्थितः ॥ १३ ॥ आलोक समका
पः परमदारुणः ॥ १५ ॥ अकालएवम सुत्रो नीतः किंमितिकोपितः ॥ कालाय शापमुत्स्रष्टुं भगवानुपचक्रमे ॥ १६ ॥ अथाकलितरूपो सौ कालः
कवलितप्रजः ॥ आविर्भूतोतिकमास्थायवपुर्मुनिमुपाययौ ॥ १७ ॥ खड्गपाशधरः श्रीमान्कुंडलीकवचान्वितः ॥ षड्भुजः षण्मुखो बभ्याद्दतः क्रिं
करसेनया ॥ १८ ॥ यच्छरीरसमुत्थेन ज्वालाजालेन वल्गता ॥ फुल्लकिंशुककक्षस्य बभाराद्रेः श्रियं नभः ॥ १९ ॥ यत्करस्थत्रिशूलाग्रनिःसृतैरग्नि
मंडलैः ॥ विरेजुरुद्दितैराशाः कानकैरिव कुंडलैः ॥ २० ॥ यसरम्भसनापास्तशिखरामेदिनीधरः ॥ दोलामिव समारूढाश्चेलुः पेतुश्च घूर्णिताः ॥
॥ २१ ॥ यत्खड्गमंडलोद्योतैः श्यामं बिंबं विवस्वतः ॥ कल्पे दग्धजगद्धूमपर्याकुलमिवाबभौ ॥ २२ ॥ स उपेत्य महाबाहो कुपितं तं महामुनिं कल्पस्युध्याब्धि
गंभीरं सांत्वपूर्वमुवाच ह ॥ २३ ॥

र्थम चिंतयतः तनयं मृतं दृष्ट्वेति शेषः ॥ १५ ॥ १६ ॥ अरूपोपीतियावत् आकल्पितं कल्पितं रूपं येनेतिवा ॥ १७ ॥ प्रतिपार्श्वं षड्भुजो द्वादशामासभुज इत्यर्थः षड्
तु मुखः ॥ १८ ॥ १९ ॥ आशाः दिशः कानकैः कनकमयैः ॥ २० ॥ परेणाप्रबलेन म्वसनेन श्वासवायुनाऽपास्तशिखराः ॥ २१ ॥ कल्पे प्रलयकाले दग्धस्य जगतो
धूमेन पर्याकुलं मुखमिव विरूतं ॥ २२ ॥ महाबाहो इति रामस्य राज्ञो वा संबोधनं ॥ २३ ॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः ॥ श्रीविश्वेश्वराय नमः

हेतुना परापराधनिमित्तेन सतापि ॥ २४ ॥ इतरया शापपात्रयादिनिमित्तया ॥ २५ ॥ शापदाने प्रसक्ते तत्तवैव नानिष्टं स्यान्ममेत्याशयेनाह ॥ मातपइति ॥ अबुद्धे व्यर्थबुद्धे इति क्षेपपक्षत्वेन ज्ञानबाधितत्वात् विद्यमानबुद्धे इति प्रशंसासमानवाक्येषु युष्मदादेशा वक्तव्या इति कात्यायनवचनविरोधाद्भिन्नवाक्यस्थपदात्परस्य मेइत्यादेशः छांदसः ॥ २६ ॥ अप्रधृष्यतामुक्त्वा स्वस्याव्याहतशक्तिनामाह संसारेति संसारवल्लयो ब्रह्मांडपंक्तयः कस्मिन्विषये वयं नाशकाः स्तमुदाहरेत्यर्थः कनुशक्ताइति पाठे तु कस्मिन्नपराधेकेनवा शापेनाभिभूताः इत्यर्थः ॥ २७ ॥ स्वयं नियतिः स्वाम्यादिकी मर्यादा ईहितं इच्छा द्वेषादिनिमित्तां तरहितमित्यर्थः ॥ २८ ॥

विज्ञातलोकस्थितयो मुने दृष्टपरावराः ॥ हेतुना पि न मुह्यंति किं तु हेतुं विनोत्तमाः ॥ २४ ॥ त्वमनंतत पा विप्रो वयं नियतिपालकाः ॥ तेन संपूज्य से पूज्यः साधो नेतरये च्छया ॥ २५ ॥ मातपः स्विपयाबुद्धे कल्पकालमहानलैः ॥ योनदग्धोस्मि मेतस्य किं त्वं शापेन धक्ष्यसि ॥ २६ ॥ संसारावल्लयो ग्रस्ता निगीर्णा रुद्रकोटयः ॥ मत्तानि विष्णुवृंदानि कनु शक्ता वयं मुने २७ मोक्तारो हि वयं ब्रह्मन्भोजनं युष्मदादयः ॥ स्वयं नियतिरेषा हि नावयोरेतदीहितं ॥ २८ ॥ स्वयमूर्ध्वं प्रयात्यग्निः स्वयं यांति पयांस्यधः ॥ भोक्तारं भोजनं याति सृष्टिं चाप्यंतकः स्वयं ॥ २९ ॥ इदमित्थं मुने रूपं ममेह परमात्मनः ॥ स्वात्मनि स्वयमेवात्मा स्वतएव विजृंभते ॥ ३० ॥ नेहकर्तानुभोक्तास्ति दृष्यानष्टकलंकया ॥ बहवश्चोहकर्तारो दृष्यानष्टकलंकया ॥ ३१ ॥ कर्तृताकर्तृते ब्रह्मन्केवलं परिकल्पिते ॥ असम्यग्दर्शनेनैव न साम्यग्दर्शनस्य ते ॥ ३२ ॥

सृज्यत इति सृष्टिस्तां जन्यभावमित्यर्थः ॥ अंतकः विनाशकालः स यद्यदेवासृजत्तत्तदत्तुमध्रियते ति श्रुतेरिति भावः ॥ २९ ॥ कुतस्त्वं भोक्ता किं वा स्वरूपं तत्राह इदमिति ॥ इह मूर्तामूर्तजगत्सु परमात्मनो मम इत्थं भोज्यस्वभावतयैव स्वस्मिन्नुकल्पितं रूपं यतः परमात्मा स्वात्मनि स्वयमेव जगदात्मना विजृंभते अतः स्वयमेवोपसंहरतीत्यर्थः ॥ ३० ॥ इदमप्यौपनिषद्व्यवहारदशोक्तं परमार्थदशायां तु नाह नेति ॥ कर्मठ दृष्ट्या तु आह बाहव इति ॥ अनष्टकलंकयेति च्छेदः ॥ ३१ ॥ सम्यक्तु दर्शनं तत्साक्षात्कारो यस्य तस्य ते कर्तृताकर्तृते न स्तः ॥ ३२ ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवेदव्यासायनमः ॥ श्रीविश्वेश्वरायनमः ॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुरित्यादि भगवद्दर्शितं पक्षमाश्रित्याह ।। पुष्पाणीति हेतुनामभिः कर्त्रादिशब्दैः हेतुना विधिरिति पाठे विधीयते
इति विधिः प्राणिकर्मैव स्वापि मे न हेतुना निमित्तेन वैचित्र्येण विचित्रकार्याय कल्पते समर्थं भवतीत्यर्थः ।।३३।। परमार्थदर्शात्मभगवान्स सैव्यवहारसंवादाभ्या
न्तं ते कालस्य कालरूपस्य परमात्मनः ।।३४।। भ्रांते भ्रमणे दुष्टदृष्टिः ।।३५।। ते नवर्तितरीत्या अपराधासंभवेन आकुलः सन् कोपं मागाः ।।३६।। रागाभिमाना
दिवशात्तु चवधे अपराधितास्यात् न च मे नोस्ति इत्याह वयमिति मतिभ्रमार्थे भ्रांतिकल्पितरव्यातिपूजाद्यर्थे ईहा रागो येषां ते अस्मदादयोऽस्मे ति बहुवच

पुष्पाणि तरुखंडेषु फलानि भुवनेषु च ।। स्वयमायांति यांतीह कल्पने हेतुनामभिः ।।३३।। प्रतिबिंबितस्य चंद्रस्य चलने कर्तृकर्तृते न रसेनान्तरे यद्व
न दृक्कालस्य सृष्टिषु ।।३४।। मनो मिथ्याभ्रमाभोगे कर्तृताकर्तृतामयीं ।। करोति कल्पनां रज्ज्वां भ्रांते सर्पाइवाहितां ।।३५।। तेन मा गा मुने कोपमापदामी
दृशः क्रमः ।। यद्यथा तत्तथैवास्तु समालोकयाकुलः ।।३६।। न वयं प्रतिभार्थेहानाभिमानवशीकृता ।। स्वतो हि तात वशगाः केवलं निपती
स्थिताः ।।३७।। प्रकृतव्यवहारेहा नियती निर्यते वशात् ।। प्राज्ञाः समभिवर्त्तंते नाभिमानमहातमः ।।३८।। कर्तव्यमेव नियतं केवलं कार्य
कोविदैः ।। सुषुप्तिरत्तिमाश्रित्य कदाचित्त्वं न नाशय ।।३९।। क्व सा ज्ञानमयी दृष्टिः क्व महत्त्वं क्व धीरता ।। मार्गे सर्वत्र सिद्धेपि किमंध इव मु
ह्यसि ।।४०।। स्वकर्मफलपाकोत्थाम विचार्य दशां मुने ।। किं मूर्ख इव सर्वज्ञ मुधा मां शप्तुमिच्छसि ।।४१।।

नं त्वत्समीपागमनमपि न त्वत्क्रोधभयात् किं तु तपस्विनो मान्या इति नियतिवशादित्याशयेनाह स्वत इति ।।३७।। सर्वप्राज्ञानुसारित्वान्नियतिवश्य
तामस्मो चिता न तु क्रोधाभिमानतमोनुवृत्तिरनुचितेत्याशयेनाह ।। प्रकृतेति ।। जगन्मर्यादापालके स्वरेच्छा लक्षणया महानियतेर्वशाद्वांतरेच्छा नियतीः
समनुवर्तंत इत्यर्थः ।।३८।। कार्यकोविदैर्व्यवहारचतुरैः कर्तव्यमेव अवश्यं कर्तव्यं नियतं स्वस्वोचितमर्यादापालनं त्वं सुषुप्तिरत्तिमाश्रित्य न नाशय
कदाचिदपि नाशयाद्विति पाठे स्पष्टं ।।३९।। सर्वप्राज्ञप्रसिद्धे ।।४०।। सुधा व्यर्थं ।।४१।। श्रीरामचंद्रो जयति ।। श्रीवेदव्यासाय नमः ।। श्रीकृष्णाय नमः

वि३

इत्थं रागो मोहं विनिघ्नन् प्रसुप्तं ज्ञानं प्रबोधयितुमुपक्रमते देहिनामित्यादिना॥ तं प्रसिद्धं स्थूलं॥४२॥ आविनाशः ईषन्निमित्तेनापि विनाशः नियतं असौ सुस्थायि तुच्छं प्रातिभासिकं कदर्थीक्रियते क्रोधादिना पीड्यते॥४३॥ स्नेहादभिमानात् किंचन ईदृशमिति विशिष्य वक्तुमशक्यं अंतर्व्यापारं कुर्वता॥४४॥ असद्देहांतरविषयः संकल्पः क्रियते सत्पूर्वसिद्धं नाश्यते॥ पंकपुरुषः आर्द्रमृत्तिकाकृतोऽर्थः॥४५॥ असत्संकल्पनमेव कलनात् तद्रूपाद्धेतोर्बद्धं॥४६॥ तस्य देह

देहिनामिह सर्वेषां शरीरं द्विविधं मुने॥ किंनु ज्ञानासितं देहमेकमन्यन्मनोऽभिधं॥४२॥ तत्र देहो जडो सर्थमाविनाशपरायणः॥ मनस्तुच्छं च नियतं कदर्थीक्रियते नव॥४३॥ चतुरेणायथा साधो रथः सारथिना ह्यते कुर्वता किंचन स्नेहाद्देहोयं मनसा तथा॥४४॥ असत्संकल्पः क्रियते सद्यः शरीरं विनाश्यते॥ स्वपोन मनसा पंकपुरुषः शिशुना यथा॥४५॥ चित्तमेवेह पुरुषस्तत्कृतं कृतमुच्यते॥ तद्बद्धं कलनाहेतोः कलनास्तं विमुच्यते॥४६॥ अयं देह इवात्रस्त मिदमंगमिदं शिरः॥ इदं स्फारविकारं तन्मन एवाभिधीयते॥४७॥ मनो हि जीवो जीवाख्यं निश्चयैककतयानुधीः॥ अहंकारोऽभिमंतृत्वान्नानानाता स्वयमेव हि॥४८॥ देहवासनया चेतस्तन्या निस्वा निचेष्टया॥ पार्थिवानि शरीराणि ह्यसंति परिपश्यति॥४९॥ आलोकयति त्वेतस्संतदा समयैर्मनः॥ शारीरभावनां त्यक्त्वा परमां याति निर्वृतिं॥५०॥ तन्मनस्तव पुत्रस्य समाधौ त्वयि संस्थिते॥ स्वमनोरथमार्गेण दूराद्दूरतरं गतं॥५१॥ इमं मोशनसं त्यक्त्वा देहं मंदरकंदरे॥ प्रयातो विबुधं सद्म नीडोड्डीनः खगो यथा॥५२॥(७)॥

कलनाप्रकारमभिनयन्नाह॥ अयमिति॥४७॥ एकमेव मनः यथापूर्वं पूर्वं जीवाज्जीवांतराख्यं भवति तथा जीवादेरोपाख्याने वक्ष्यते मनः संकल्पितेर्थे निश्चयैककतया मन एव तदनुधीर्भवति अभिमंतृत्वादहंकार इति मनः स्वयमेव नानानाता नानातां भवतीत्यर्थः॥४८॥४९॥ इदं च मनसो देहादिकल्पकत्वात्मसाक्षात्कारपर्यंतमेव नो चेत् रवे स्यात्॥ आलोकयतीति॥५०॥ एवं भार्गुं प्रबोध्य मनोविलासमाचष्टे तात पुत्रकथां प्रस्तौति तदिति॥५१॥ इमं त्वया दृश्यमानं॥५२॥

॥५३ देवसुंदरीं अप्सरसं ॥५४॥ स्वर्ग इव पुण्यक्षयान्तमातोपि मनः कल्पनयैव साशयेनाह तीव्रेति ॥५५॥ उत्तंसकुसुमम्लान्यादिकं स्वर्गे पुण्यक्षयचि
ह्नं ॥५६॥ व्यजायत जन्म लेभे ॥५७॥ तस्य तत्र द्वासनोऽकर्मानुसारीणि पूर्वमुक्तान्यनुक्तानि च बहूनि जन्मान्याह ॥ आसीदित्यादिना ॥५८॥ पौंड्रैः पुंड्रदेशा
धिपतिः देशिको मंत्रसिद्धः अन्येषामुपदेष्टा अत एव मंत्रोपास्तिप्रभावात् कल्पं विद्याधरः अथ अनंतरं मुनेः सुतो जातः ॥५९॥ ६०॥ नैनावंसे वास्य जन्मानि

तत्र मंदारकुंजेषु पारिजातलतेषु च ॥ नंदनोद्यानखंडेषु लोकपालपुरेषु च ॥५३॥ मुनेश्चतुर्युगान्यष्टौ विश्वाचीं देवसुंदरीं ॥ असेवत म
हातेजाः षट्पदः पद्मिनीमिव ॥५४॥ तीव्रसंवेगसंपन्नस्वसंकल्पोपकल्पिते ॥ अथ पुण्यक्षये जाते नीहार इव शार्वरे ॥५५॥ अम्लानकु
सुमोत्तंसः खिन्नांगावयवोऽलसः ॥ सपपात तया सार्द्धं कालपक्वफलं यथा ॥५६॥ वैबुधं तत्सरित्यज्य नभस्येव शरीरकं ॥ भूताकाशमथा
साद्य वसुधायां व्यजायत ॥५७॥ आसीद्विप्रो दशार्णेषु कोसलेषु महीपतिः ॥ धीवरोऽथ महाटव्यां हंसस्त्रिपथगातटे ॥५८॥ सूर्यवंशोन्न
पः पौंड्रः सौरशाल्वेषु देशिकः ॥ कल्पं विद्याधरः श्रीमान्धीमानथ मुनेः सुतः ॥५९॥ मद्रेष्वथ महीपालस्ततस्तापसबालकः ॥ वसु
देव इति ख्यातः समंगायास्तटे स्थितः ॥६०॥ अन्यास्वपि विचित्रासु वासनावशतः स्वयं ॥ विषमास्वेव पुत्र ते च चारांतरयोनिषु ॥६१॥
अभूद्विंध्यनगे भूपः किरातः कैकटेषु च ॥ सौवीरेष्वथ सामंतः त्रिगर्तेषु च गर्दभः ॥६२॥ वंशगुल्मः किरातेषु हरिणश्चीलजंगले ॥ सरि
स्रपस्तालवृक्षे तमाले वनकुक्कुटः ॥६३॥ अयं सुपुत्रो भवतो भूत्वा मंत्रविदांवरः ॥ प्रजजाप पुरा विद्यां विद्याधरपुरप्रदां ॥६४॥ तेनासाव
भवत्कल्पं व्योम्नि विद्याधरो महान् ॥ हारकुंडलकेयूरलीलानिचपलालकः ॥६५॥ नायिकानलिनीभानुः पुष्पचाप इवापरः ॥ विद्याधरीणां दयि
तो गंधर्वपुरभूषणः ॥६६॥ संकल्पाविधिमासाद्य द्वादशादित्यधामनि ॥ जगाम भस्मशेषत्वं शलभः पावके यथा ॥६७॥

किं तान्यथासन्नित्याह । अन्यास्वपीति ॥६१॥ सामंतः मंडलेश्वरः तत्रत्यैः पापैः तिर्यक्स्थावरादिजन्मान्यपि दर्शयति त्रिगर्तेष्वित्यादिना ॥६२॥६३॥ कल्पं विद्या
धरोऽभवदिति यदुक्तं तस्य निमित्तं प्रपंचयति अयं स इत्यादिना ॥६४॥ हारकेयूरादिभिः लीलानिचयैश्चलालको विलासयिता स्त्रीणां ॥६५॥ अत एव स तासां
प्रियतम इत्याशयेनाह ॥ नायिकेति ॥ द्वादशादित्यधामनि कल्पांते युगपदुदित द्वादशादित्यार्चिषि भस्मतां ॥६७॥ श्रीरामचंद्रो जयति ॥ श्रीकृष्णायनमः
॥६६॥

६८ ६९ इते आद्ययुगे ॥ ७० ॥ ७१ ॥ ७२ उपसंहरति विविधेति ॥ खदिरकरंजककरालगिरिकटोरकल्या सु जठरयो निभुगर्भवासमेदेषु प्रयातो ग्रांतः ॥ ७३ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे स्थि॰ दशमः सर्गः ॥ १० ॥ एवं गो योगि दृष्टा सम्यक् पुत्रवृत्तांतदर्शनात् वर्ण्यते कालसंवादान्मनः क्षीणजगत्स्थितिः ॥ तरंगौघानां भांकारैः मंद्रध्वनिभिः रणितानां ध्वनंतो निलाया तत्तरंगिण्याः समंगायाः तपस्तपति करोति ॥ १ ॥ २ तं पुत्रं च चिरात्तत्र कं पुत्रं मनोभ्रमं विज्ञाय

जगन्निर्माणारहिते स्फारेन भासि सा ततः ॥ वासनातत्स्य बभ्राम निर्नीडा विहगी यथा ॥ ६९ ॥ अथ कालेन संजाते विचित्रारंभकारिणी ॥ संसाररचनारंभे ब्राह्मेरात्रि विपर्यये ॥ ६९ ॥ सा मुनेर्वासनातत्स्य वातव्याचलिता सती ॥ इते ब्राह्मपलामे सञ्जातो द्यव सुधा तले ॥ ७० ॥ वासुदेवाभिधानो सौ मुने विप्रकुपारकः ॥ जातो मतिमतां मध्ये समधीताखिलश्रुतिः ॥ ७१ ॥ कल्पं विद्याधरो भूत्वा नद्यास्तु ग्रथमहामुने ॥ तपश्चरति ते पुत्रः समंगायास्तटे स्थितः ॥ ७२ ॥ विविधविषयवासनानुवृत्त्या खदिरकरंजकरालकोटरेषु ॥ जगति जठरयोनिषु प्रयातो गहनतरासु च काननस्थलीषु ॥ ७३ ॥ मार्गवोपाख्याने कालरचनं सर्गः ॥ १७ ॥ काल उवाच ॥ अथोद्दाम तरंगौघा भांकाररणिता निले ॥ तीर एव तरंगिण्यास्तप स्तपति ते सुतः ॥ १ ॥ जटावान् अक्षवल्यी जितसर्वेन्द्रियभ्रमः ॥ तत्र वर्षशतान्यष्टौ संस्थित स्तप सि स्थिरे ॥ २ ॥ यदीच्छसि मुनेद्रष्टुं तं स्वप्राभ्रममनोभ्रमं ॥ तत् सम्मुन्मील्य विज्ञाननेत्रमाशु विलोकय ॥ ३ ॥ श्रीवसिष्ठ उवाच इत्युक्तो जगदीशेन कालेन समदृष्टिना ॥ मुनिः संचिंतयामास ज्ञानाक्ष्या तनये हितं ॥ ४ ॥ ददर्श च मुहूर्तेन प्रतिभानवशाद्सौ पुत्रोदंतमशेषेण बुद्धिदर्पणबिंबितं ॥ ५ ॥ पुनर्मंदरसानुस्थं स्वस्थं कालाग्र संस्थितौ ॥ समंगायास्तटादेत्य विवेशस्वतनुं भृगुः ॥ ६ ॥ विस्मयस्मेरया दृष्ट्या कालमालोक्य कांतया ॥ वीतरागमुवाचेदं वीतरागो मुनिर्वचः ॥ ७ ॥ भगवन्भूतभव्येशबालावयमनुज्ज्वलाः ॥ त्वादृशामेव धीर्देव त्रिकालामलदर्शिनी ॥ ८ ॥

ते अनेनेति विज्ञानं योगः स्वं नेत्रं सम्यगुन्मील्य उद्घाट्य ॥ २ तनये हितं पुत्रचरित्रं ॥ ४ पुत्रस्योदंतं वृत्तांतं योगधर्मविशुद्धबुद्धिः द॥ र्पणे बिंबितमिव प्रत्यक्षं ॥ ५ ॥ अत्र भृगुः स्वदेहान्निर्गत्य तेषु प्रदेशेषु समंगातटेषु पुत्रवृत्तांतं क्रमेणाद्राक्षीत् पुनरागत्य स्वदेहं विवेशेति न भ्रमितव्यं योगबलेन स्वस्थान एव सर्वदर्शन संभवात् निर्गत्य भ्रमणोप्यतीतानागतदर्शनयोगात् तस्मात् समंगायास्तटादेत्य स्वतनुं विवेशेत्युक्ते स्तटचिंता त्यागशरीरप्रतिसंधानमात्रे तात्पर्यं बोध्यं ॥ ६ ॥ वीतरागः अपगतपुत्रस्नेहः ॥ ७ ॥ बालाः अज्ञाः यतोऽनुज्ज्वलाः रागादिमलिनचित्ताः ॥ ८ ॥ श्रीरामायनमः

असत्सरूपिणी जगत्स्थितिः सत्येव परमार्थरूपेव भासमाना सति परमार्थवस्तुन्येव विभ्रमं जनयतीति वा । धीरस्य विदुषोपि ॥ ९ ॥ विषयजगत्स्थितिरिवका-
रिणी भूतं मनोरूपमपि मादृशां दुर्ज्ञेयमित्याह त्वमेवेति ॥ इंद्रजालसदृशमाया व्यामोहविधायकं ॥ १० ॥ स्वव्यामोहे द्वेनिमित्ते आह मत्सुतस्येति द्वाभ्यां ॥ न विद्यते
आकल्पमित्यर्थः ॥ ११ ॥ न क्षीणं जीवितं आयुर्यस्य तं ॥ १२ ॥ विस्मयस्याप्यर्थस्य च योन कोनानुशब्दः ॥ १३ ॥ नियतिरूपं द्वितीयं हेतुं विवृणोति । असुक्तेति ॥ स्थिति-
र्नियति ॥ १४ ॥ क्रियत्कालं संसारूढानत्राह इदमिति ॥ यावत्कालं इदमवश्यं कर्तव्यमिदं न कर्तव्यमितीष्टानिष्टसाधनयोः कार्यफलं संसारमिति जगद्भ्रमः तावदे-

नानाकारविकारादयासत्येवासत्यरूपिणी ॥ विभ्रमं जनयत्येषा धीरस्यापि जगत्स्थितिः ॥ ९ ॥ त्वमेवद्देव जानासि त्वदभ्यंतरवर्तियन्तृ ॥ स्वरूप-
मस्यामनोवृत्तेरिंद्रजालविधायकं ॥ १० ॥ मत्सुतस्यास्य भगवन्मृत्युः किल न विद्यते ॥ तेनेमं मृतमालोक्य जानः संभ्रमवानहं ॥ ११ ॥ अक्षीण-
जीवितं पुत्रं कालो भेनीलवानिति ॥ नियतेर्वशतेंद्देवतुच्छापीच्छा ममोदिता ॥ १२ ॥ ननु विज्ञानसंसारगतयोर्वयमापदां ॥ संपदां चैव गच्छामो हर्षा-
मर्षवशं विभो ॥ १३ ॥ अयुक्तकारिणि क्रोधः प्रसादो युक्तकारिणि ॥ कर्तव्य इति रूढेयं संसारे भगवं स्थितिः ॥ १४ ॥ इदं कार्यमिदं नेति यावत्कार्य
जगत्भ्रमः ॥ तस्येतहसपरित्यागोहेय एव जगद्गुरो ॥ १५ ॥ केवलं तावकीं चिंतामनालोक्य यदा वयं ॥ भगवन्भवते क्रुद्धा यातास्मस्तेन बध्यतां ॥ १६ ॥
त्वयेदानीमहं देव स्मारितस्तनये हितं ॥ समं गायास्तटे तेन दृष्टोयं तनयो मया ॥ १७ ॥ मनो जगति भूतानां द्वे शरीरे च सर्वगं ॥ मन एव शरीरं हि येनेदं
भाव्यते जगत् ॥ १८ ॥ कालउ० ॥ सम्यगुक्तं त्वया ब्रह्मन् शरीरं मन एव च ॥ करोति देहं संकल्पात् कुंभकारो घटं यथा ॥ १९ ॥ करोत्यकृतमाकारं कृतं नाशयति क्षणा-
त् ॥ संकल्पेन मनो मोहाद्बालो वेतालकं यथा ॥ २० ॥

व तर्हि सत्किमिदानीमपि न वोचितः ॥ नेत्याह तस्येति ॥ एतत् ॥ एतर्हि तस्य भ्रमस्य तत्त्वबोधात्परित्यागो वृत्तः ॥ अतस्तदर्थं क्रोधप्रसादकर्तव्यता नियमोपि हेय एवेत्य-
नुचित एव क्रोध इत्यर्थः ॥ १५ ॥ एवं सत्यप्यपराधे क्रोधो न युक्तः असति तु तदारोपेण क्रोधे प्रसक्ते न कोऽद्भुरेव दंडो युक्त इत्याशयेनाह केवलमिति चिंतां वर्णितरूपनि-
यतिपरिपालनाभिप्रायं बाध्यतां दंड्यतां यातास्म ॥ १६ ॥ १७ ॥ हि यस्मान्मन एव भोक्तृकं शरीरं कल्पयति ॥ अतो मन एव द्वे शरीरे इत्यर्थः येन मनसा ॥ १८ ॥ इत्थं
विनीतवादेन स्वोपदिष्टसूक्ष्मार्थग्रहणेन च तोषितः कालस्तदुक्तिं प्रशंसंस्तामेवोपपत्तिभिर्दृढयति सम्यगुक्तिमित्यादिना ॥ १९ ॥ २० ॥ श्रीरामायनमः

मनसः असन्निर्माणशक्तिः सर्वानुभवप्रसिद्धेत्यात् ॥ तथा चेति ॥२१॥ मन एव शरीरं हीत्युक्ते: सम्यक्त्वमुपपादयेनेदं ज्ञाप्यते जगदित्युक्ते स्तनो पि सम्यक्त्व मित्युपपादयितुं पूर्वानिंदति स्थूलत्वदृष्टिदृशामिति ॥२२॥ कान्तर्हि सूक्ष्मदृष्टिस्तामाह ॥ मन इत्यादिना यतो मन इव सत्तासत्ताभ्याम निर्वचनीयमिदं मुदितमित्यर्थः ॥२३॥ चित्तदेहस्य अवयवभूतयालतयेव प्रतन्यमानया नानानाजगद्भिदा ॥२४॥२५॥२६॥ संसारक्रममुपपाद्य तन्निवृत्त्युपायमाह ॥ मननमिति ॥

तथा च संभ्रमस्वप्नमिथ्याज्ञानादिभासुरः ॥ गंधर्वनगराकारा दृष्टा मनसि शक्तयः ॥२१॥ स्थूलत्वदृष्टिदृशां ते नाम वल्गंत्य महामुने ॥ पुंसो मनः शरीरं च कार्यो द्वा वितिकथ्यते ॥२२॥ मनो मनननिर्माणमात्रमेतज्जगत्त्रयं ॥ न सन्नासदिव स्फारमुदितं नेतरन्मुने ॥२३॥ चित्तदेहांगलतया मेदवासनयेद्धया ॥ द्विचंद्रत्वमिवाज्ञानान्नानातेयं समुत्थिता ॥२४॥ भेदवासनया पश्यत्सदार्थानि चयं मनः ॥ भिन्नं पश्यति सर्वत्र घटावटपटादिकं ॥२५॥ कृशोति दुःखी मूढोहमेता श्चान्याश्च भावनाः ॥ भावयत्स्वविकल्पोत्थां याति संसारितां मनः ॥२६॥ मननं कृत्रिमं रूपं मम मे तन्न यतोस्त्यहं ॥ इति निस्यागतः शांतं चेतो ब्रह्म सनातनं ॥२७॥ यथाप्रविततां भोधौ द्रुतानेकतरंगिणि ॥ शाम्यत्स्पंदतयानेककल्लोलावलिशालिनि ॥२८॥ वार्यात्मनि समे स्वच्छे शुद्धे स्वादुनि शीतले ॥ अविनाशिनि विस्तीर्णे भिहामहिमनि स्फुटे ॥२९॥ कश्चित्तरंगः स्वंरूपं भावयन्स्वस्वभावतः ॥ कृशोस्मीति विकल्पेन करोति स्वेन भावनां ॥३०॥ दीर्घस्तरंगः स्वं रूपं भावयन्स्वस्वभावतः ॥ दीर्घोस्मीति विकल्पेन करोति स्वेन भावनां ॥३१॥ कश्चिच्चैव परिस्फुरद्रूपोस्मीति नितान्तं ॥ भावयन्मूलतं यातिताहृग्भावनयास्वया ॥३२॥

कृत्रिमं मननरूपं त्यागे अकृत्रिमस्वरूपावस्थिते रर्थप्राप्तत्वादिति भावः ॥२७॥ उक्तेर्थे विस्तरेणास्मुद्रत रंगदृष्टांतं वर्णयितुमारभते ॥ यथेत्यादिना अत्र यथाशब्दस्य चतुर्दशश्लोकस्थेन तथैवेत्यनेनान्वयः वारिसामान्यात्मना अंभोधिरूपे प्रततत्वदेशस्थितजलात्मना च दृश्यमानदूरप्रस्थानरूपस्पंदाभावाच्छाम्यत्स्पंदतया स्थिते कल्लोलग्रहणं महत्ता ज्ञो बल्लिर्वदन्यायेन ॥२८॥२९॥ स्वंरूपं भावयन्नित्यादिः ॥ सर्वस्ता र्द्धिको हंकारारोपवादः यदि भावयति तदा वक्ष्यमाणभावनां करोतीत्यर्थः ॥३०॥३१॥ तत्तानतं भावयन्पतनभयाद्भूततं तीरभूमिमुद्दिश्य याति ॥३२॥

पलादल्पकालादूर्ध्वमनंतरं उच्छ्रितः भोगयोग्यं जन्मप्राप्तोऽस्मीति भावितोऽभिमन्यमानो देवाद्रिः रविप्रस्तररश्मिनालसहितः सन् शोभते भूषितोऽस्मीति हृष्यती
सर्वः ॥२३॥ तस्यान्यान् विहर्षभयस्थानानि दर्शयति तुषारेत्यादिना तुषारकरस्य चंद्रबिंबनं बिंबस्तत्र उपाधित्वेन स्थितः सन् शीतलोऽस्मीति बिंबत्याभिमन्यते तट
स्थाचलदावाग्निप्रतिबिंबेन सहितस्तु ज्वलद्वपुरस्मीति बिभेति कंपते चेति परेणान्वयः ॥२४॥ प्रतिबिंबिताः वेलाद्रितटयोः पक्षप्रायाः वनद्रुमाः यस्मिंस्तथाभूतः सन्

उत्पन्नश्च पलादूर्ध्वमुच्छ्रितोऽस्मीति भावितः ॥ सरश्मिरत्नजालस्तु शोभते दीप्तया श्रिया ॥२३॥ तुषारकरबिंबस्थः शीतलोऽस्मीति बिंबति
सतटाचलदावाग्निप्रतिबिंबो ज्वलद्वपुः ॥२४॥ बिभेति बत दग्धोऽस्मीत्यात्तमौनश्च कंपते ॥ प्रतिबिंबितवेलाद्रितटपक्षवनद्रुमाः ॥२५॥
महदारंभसंरंभसंयुक्तोऽस्मीति राजते ॥ विशालोल्लोलानिलासंगध्वस्तलोलशरीरकः ॥२६॥ खंडशः परियातोऽस्मीत्यात्तक्रंद इवारवी
न चोर्मयस्ते जलधेर्व्यतिरिक्ताः पयोभरात् ॥२७॥ न चैकरूपमेतेषां किंचित्सत्त्वाप्यसन्मयं ॥ न चैते क्वचिदीर्घाद्या गुणास्तेषु न तेषु ते ॥२८॥
नोर्मयः संस्थिता ह्यब्धौ न तत्तत्र न संस्थिताः ॥ केवलं स्वस्वभावस्थसंकल्पविकल्पीकृताः ॥२९॥ नष्टानष्टाः पुनर्जाता जाता जाताः पुनः
पुनः ॥ परस्परपरामर्शान्नान्यतामुपयांत्यलं ॥४०॥ एकरूपांबुसामान्यमयाप्येवं निरामयाः ॥ तथैवास्मिन्प्रविततेऽसिते शुद्धे निरामये ॥
॥४१॥ ब्रह्ममात्रैकवपुषि ब्रह्मणि स्फाररूपिणि ॥ सर्वशक्त्यावनाद्यंते पृथग्वदृश्य कृताः ॥४२॥

महता राज्यप्राप्त्यादिफलारंभाडंबरेण संयुक्तः कृतार्थोऽस्मीति राजते इति परेणान्वयः ॥२५॥२६॥ आत्तक्रंदः आरब्धरोदन इव आरवी ध्वनिमान् दृष्टांते आ
रोपमुक्त्वा अपवादं दर्शयति न चेत्यादिना पयोभरात् वारिसमूहरूपात् जलधेः ॥२७॥ तेषूर्मिषु गुणाः न संति ते गुणा एषु ते ऊर्मयश्च न इति दृष्टांतार्थः ॥२८॥ तत्रा
ब्धौ न संस्थिता इति यत्तन्न अधिष्ठानात्मना सत्त्वाद्विवर्तात्मना तु प्रतियोग्यसिद्धावभावसिद्धेरिति भावः केन तर्हि ते ऊर्मयस्तत्राह केवलमिति ॥ विकल्पीकृताः
परिच्छेदभेदविकल्पिता इति यावत् ॥२९॥ परस्परपरामर्शात् अन्योन्यमेलनात् ॥४०॥ दार्ष्टांतिके योजयति तथैवेत्यादिना सिते भारूपे ॥४१॥ ब्रह्ममात्रैक
वपुषि निरंकुशाहंरूपैकस्वभावे अत एव ब्रह्मणि पूर्णे नैवात्र संहर्षानरद्विक्रियेत्याशयेन तद्व्याख्या स्फाररूपिणीति ॥४२॥

शक्तयः उपचाराज्जगंति। अभेदोपचारे हेतुमाह नानेति ॥४३॥ व्यंगो नपुंसकः त्रिपदद्वंद्वे विभक्त्यलुक् छांदसः ॥४४॥ यो त्विति कद्रूप्याप्याह कल्पनेति ॥४५॥४६॥ अन्यपरित्यागोपायतया सर्वाधिष्ठानसन्मात्रं बृंहयादयति नानेति। नियताकारा सदा सर्वत्रैकरूपा नियतिः सत्ता ॥४७॥ ननु जडाजडसाधारणी सत्ता कथं नियतैकरूपा स्यादाशंक्य न चित्तकृत जडाजडविकल्पाभ्यां सन्मात्रैकरूप्यस्य निरित्याशयेनाह जडेति। चिन्मये चिराभासे चित्तं आयाति ग्राहे सलिलं तत्त्वाभासमहंकारमे

संस्थिताः शक्तयश्चित्रा विचित्राचारचंचलाः। नानाशक्तिर्हि नानात्मेति खे वपुषि स्थितं ॥४३॥ वेल्लितं ब्रह्म पयो ब्रह्मपयसी वोर्मिमंडलं। स्त्रीपुमान्यंगरूपे पाब्रह्मैव परिवर्तते ॥४४॥ कल्पनान्या जगन्नाम्नी नासीदस्ति न भविष्यति। ब्रह्म यो जगतो भेदो मनागपि न विद्यते ॥४५॥ संपूर्णं खल्विदं ब्रह्म जगद्ब्रह्मैव केवलं। इति भावयतेनह्यन्यत्सर्वं परिसज्ज ॥४६॥ नानारूपिण्येकरूपा वैरूप्यशतकारिणी। नियतिर्नियताकारा पदार्थमधितिष्ठति ॥४७॥ जडाजडमुपादत्ते चित्तमायाति चिन्मये। वासनारूपिणी शक्तिः स्वस्वरूपास्थितात्मनः ॥४८॥ ब्रह्मैवानघ तेनेदं स्फाराकारं विजृंभते। नानारूपैः प्रतिस्पंदैः परिपूर्ण इवार्णवः ॥४९॥ नानातां स्वयमादत्ते नानाकारविहारतः। आत्मैवात्मन्यात्मनैव समुद्रांभ इवांभसि ॥५०॥ व्यतिरिक्ता न पयसो विचित्रा वीचयो यथा। व्यतिरिक्ता न विश्वेशात्समग्राः कल्पनास्तथा ॥५१॥ शाखापुष्पलतापत्रफलकोरकयुक्त्यः। यथैकस्मिंस्तथा बीजे सर्वदा सर्वशक्तिता ॥५२॥ विचित्रवर्णता यद्वद्दृश्यते कठिनातपे। विचित्रशक्तिता तद्वद्देवेशे सदसन्मयी ॥५३॥ विचित्ररूपोदेती यम विचित्रा हि स्थितिः शिवात्। एकवर्णात्पयोवाहाद्धक्रचापलता यथा ॥५४॥ अजडाज्जडतो देति जाड्या भावनहेतुका। ऊर्णनाभाद्यथा तंतुर्यथा पुंसः सुषुप्तता ॥५५॥

वात्मतया तदन्यसन्मात्रं चानात्मतया मन्यमानं अनाध्यात्मिकं जडं आध्यात्मिकं चाजडमिति भेदमुपादत्ते सेयं चित्तस्य भेदवासनारूपिणी शक्तिरधिष्ठानसन्मात्रातिरेके मिथ्यात्वापत्तेरात्मनः स्वस्वरूपेव स्थितेति नैकरस्यहानिरित्यर्थः ॥४८॥ एवं चव पितिर दृष्टांतदार्ष्टांतिकसाम्यमव्याहतमित्याह ब्रह्मैवेत्यादिना ॥४९॥५०॥५१॥ एकस्मिन्बीजे ॥५२॥ परिणामवाददृष्टांते नोपपाद्य विवर्तवादप्रसिद्धदृष्टांतेनाप्युपपादयति विचित्रेत्यादिना ॥५३॥ पयोवाहान्मेघात् ॥५४॥ चेतनादचेतनोत्पत्तावपि वादद्वयानुरूपे दृष्टांते आह। अजडादिति। सुषुप्तता स्वप्नरथादिः ॥५५॥

ननु चित्त एकरूप्यात् तत्कार्ये अचितिकथं वैचित्र्यसिद्धिरित्यत उक्तं चेतसः शक्तिमिति। वासनावैचित्र्यमित्यर्थः॥ ५६ ५७॥ स्वकं वपुः स्वीयं पूर्णस्वरूपं भावयित्वा सा क्षादनुभूय॥ ५८ ५९॥ अविनाविरभावनया दृढीकृत्वा शक्तिर्वासना॥ आत्मनो स्वानुरूपतां॥ अनंतं आकाशं प्राणिमहिकाप्रसिद्धा॥ ६०॥ उक्तमेव स्फुटयति याश क्तिरिति॥ ६१॥ इयं बंधमोक्षकल्पना अज्ञदशातत्त्वज्ञदशातु तत्संभावनैव नास्तीत्याह नेति॥ ६२॥ तन्मयो बंधमोक्षविकारवानिव लक्ष्यते आत्मा॥ कुतः यतो स्य नित्यं पूर्ण

अचितश्चेतसः शक्तिं स्वबंधायेच्छया शिवः॥ तनोति तां तवं कोशं कोशकारकृमिर्यथा॥ ५६॥ स्वेच्छयात्मात्मनो ब्रह्मन्नुभावयित्वेष विस्मृतिं॥ करोति कठिनं बंधं कोशकारकृमिर्यथा॥ ५७॥ स्वेच्छयात्मात्मनो ब्रह्मन्नूनं भावयित्वा स्वकं वपुः॥ संसारान्मोक्षमाप्नोति स्वात्मनात्मा दिवा रिपाः॥ ५८॥ यथैव भावयत्यात्मा सततं भवति स्वयं। तथैवापूर्यते शक्त्या शीघ्रमेव महानपि॥ ५९॥ भाविता शक्तिरात्मानमात्मना नयति क्षणात्॥ अनंतमखिलं प्रावृण्मिहिका महती यथा॥ ६०॥ या शक्तिरुदिता शीघ्रं याति तन्मयतामज॥ यएव वर्तुः स्थितिं यातः स्तन्मयो भवति द्रुमः॥ ६१॥ न मोक्षो मोक्ष ईशस्य न बंधो बंधमात्मनः॥ बंधमोक्षदृशो त्लोके न जाने प्रोत्थिते कुतः॥ ६२॥ नास्ति बंधो न मोक्षोस्ति तन्मयस्त्विव लक्ष्यते॥ ग्रस्तं नित्यमनित्येन मायामयमहो जगत्॥ ६३॥ यदेव चित्तं कलितं किलानेनाकलात्मना॥ कोशकृ त्स्वदात्मायमनेनावलितस्तदा॥ ६४॥ अन्योन्यरूपाः स्वसंततं विकल्पितशरीरकाः॥ मनः शक्तय एतस्मादिमा निर्यांति कीटयः॥ ६५॥ तज्ज्ञास्तत्स्थाः पृथग्रूपाः समुद्रादिव वीचयः॥ तज्ज्ञास्तत्स्थाः पृथक्क्वाश्चंद्रादिव मरीचयः॥ ६६॥ अस्मिन्स्पंदमये स्फारे परमात्ममहांबुधौ॥ चिज्जले वितताभोगे चिन्मात्ररसमालिनि॥ ६७॥ काश्चित्स्थिरा ब्रह्मविष्णू काश्चिद्रुद्रत्वमागताः॥ काश्चित्पुरुषतां प्राप्ताः काश्चिद्देवत्वमागताः॥ ६८॥ कृमिकीटपतंगाहिगोमशाजगरादिकाः॥ काश्चित्तस्मिन्महांभोधौ स्फुरंत्येते बुबिंदुवत्॥ ६९॥

स्वरूपं अनित्येन आविद्यकेन वासनाध्यस्तभोक्तृभोग्यादिभावेन ग्रस्तं तिरोहितं तदेव मायामयं जगदित्यर्थः॥ ६३॥ तत्र मुख्यासंबंधं दर्शयति॥ यदेवेति॥ ६४॥ अन्येबंधास्तु तत्कृताएवेत्याह॥ अन्योन्येति॥ ६५॥ पृथगिवाभूताः कर्मज्ञानेंद्रियभेदात्तामससात्त्विकभेदाद्वा विभागविवक्षया क्रमात् दृष्टांतद्वयोपन्यासः॥ ६६॥ मुख्यामुख्यबंधौ पाधिकजीवाख्यसंविद्भेदानेव नामरूपक्रियादिवैचित्र्यैर्विस्तरेणादर्शयितुमुपक्रमते॥ अस्मिन्नित्यादिना॥ ६७॥ पुरुषतां मनुष्यतां॥ ६८॥ मशा मशकाः महांभोधौ यादोरूपेणेति शेषः दृष्टांतशेषो वा॥ ६९॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥ श्रीविश्वनाथायनमः॥ श्रीरामचंद्रगुरवे नमः॥

जांबुलका जंबुकाः चंचुलकाइतिपाठेपक्षिभेदाः वेलावनतटेष्विव चलाः अस्थिराः तेषु हि वायुप्राबल्यात्सदैव तरुगुल्मलतादीनां चलत्ताप्रसिद्धा ॥७०॥ अतुच्छा महती कल्पना देहसंस्थानकल्पनायासांताः ॥७१॥ स्वैर्ये या चिरस्थायित्वेन सुविकल्पैः हतामोहिताः शंकंते भावयंति ॥७२॥ अल्पभावनामेव त्रिधादर्शयति कृशाइति ॥७३॥ पुरुषतांसदेहतां अर्णवतां सुषुप्तिप्रत्ययोरिवानाविर्भूतवासनां मोहार्णवतां ॥७४॥ इंदुरिवज्ञानामृतपूर्णत्वात्स्वच्छाः सत्यःपरमंपदं पूर्णस्वरूपावस्थितिलक्षणां मोक्षं व्रजंति ॥ लहर्यइव विलोलाश्चित्तः संविदः औपाधिकसंवेदनभेदाः मननस्तत्तादात्म्याध्यासात्तन्नाम

कश्चिद्गलानरमृगगर्धचंचुलकादिकाः स्फुरंति गिरिकुंजेषु वेलावनतरेष्विव ॥७०॥ सुदीर्घजीविताः काश्चित्काश्चिदत्यल्पजीविकाः ॥ अतुच्छकल्पनाः काश्चित्काश्चित्तुच्छशरीरकाः ॥७१॥ संसारस्वप्नसंरंभे काश्चित्स्वैर्ये या भाविताः ॥ सुविकल्पहताः काश्चिच्छंकंते सुस्थिरं जगत् ॥७२॥ अल्पाल्पभावनाः काश्चिद्दैन्यरोषवशीकृताः ॥ कृशोऽतिदुःखी मूढोऽहमिति दुःखेचरशीकृताः ॥७३॥ काश्चित्स्थावरतां याताः काश्चिद्देवत्वमागताः काश्चित्पुरुषतां प्राप्ताः काश्चिदर्णवतां गताः ॥७४॥ काश्चित्स्थिताजगति कल्पशतान्यनल्पाः काश्चिद्व्रजंति परमं पदमिंदुशुद्धाः ॥ ब्रह्मार्णवात्समुदितालहरीविलोलाश्चित्संविदो हि मननापरनामवत्यः ॥७५॥ भार्गवोपाख्याने संसारप्रवृत्तिदर्शनं सर्गः ॥११॥ कालउवाच सुरासुरनराकाराइमायाः संविदो मुने ॥ ब्रह्मार्णवाद्भिन्नास्ताः सत्यमेतन्मृषेतरत् ॥१॥ मिथ्याभावनया ब्रह्मन्नूत्सविकल्पकलंकिताः ॥ नब्रह्मवयमित्यंत निश्चये नह्यधोगताः ॥२॥ ब्रह्मणोव्यतिरिक्तत्वं ब्रह्मार्णवगता अपि ॥ भावयंत्यो विमुह्यंति भीमासु भवभूमिषु ॥३॥ याएताः संविदो ब्रह्मन्मननैककलंकिताः ॥ एतत्तत्कर्मणांबीजमप्यकर्मैव विद्धिताः ॥४॥

मधेयाः ॥७५॥ इतिश्रीवासिष्ठ॰ एकादशः सर्गः ॥११॥ तरंगांबुधिदृष्टांतात्साम्यमात्मविकारतां वारयन्नक्रियो होश्चैवचिद्व्यस्य विवर्ततां ॥ तत्रादौ सर्वजीवानां ब्रह्मैक्यं भेदकप्रपंचमिथ्यात्वं चोपपादयितुं प्रतिजानीते ॥ सुरासुरेति ॥१॥ यद्यभिन्नास्तर्हि कुतस्तथा नानुभवंतित त्राह ॥ मिथ्येति मिथ्याभावना अनात्मन्यात्मता भ्रांतिस्तथाहेतुनेत्यर्थः ॥ अधोगताः निकृष्टां दशां प्राप्ताः ॥२॥ व्यतिरिक्तत्वं परिच्छिन्नत्वं भावयंत्यः कल्पयंत्यः ॥३॥ मननं देहात्मभावस्य पुनःपुनरनुसंधानं तदेवैतत्कर्मणां पुण्यपापप्रवृत्तीनां एवंभूता अपिताः अकर्म निष्क्रियं ब्रह्मैव विद्धि ॥४॥ ॥०॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवेदव्यासायनमः ॥५०॥

आपास्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयतीति श्रुतेः ॥ कर्मबीजप्ररोहवैचित्र्यव्यवस्थायामपि संकल्पो हेतुरित्याह संकल्परूपयेति ॥ ५ ॥ ६ ॥ ७ ॥ इदा
नींतरंगस्था नीयां संविद्वितान् जीवानुपाधिवैशद्यतारतम्येन ज्ञानभूमिकाभेदेन कर्मगतिवैचित्र्यप्रयुक्तसंसरणप्रकारभेदेन च विभज्योदाहरति ॥ ता एता इत्यादि
ना ज्ञानैश्वर्योत्कर्षावधित्वादस्यस्थाः ज्ञानाधिकारयोग्यताप्राप्तेरल्पविमोहस्थाः ॥ ८ ॥ इष्टानिष्टयोः प्रवृत्तिनिवृत्तिक्षमत्वान् कृमिकीटादेः स्थावरवन्नात्यंतमो
हस्थत्वेति भावः ॥ ९ ॥ ब्रह्ममहोदधेः मुक्तेः दूरे ऊह्यंते प्रवाह्यंते शास्त्रप्रतिकूलप्रवृत्तिभिरित्यर्थः ॥ १० ॥ एवं संसरणक्रमेणानगरादिभावमुपागताः संतः सत्वं सं

संकल्परूपयैवांतर्मुने कल्लनयैतया ॥ कर्मजालकरंजानां बीजमुष्या करालया ॥ ५ ॥ इमा जगति विस्तीर्णाः शरीरोपल्लपंक्तयः ॥ तिष्ठंति परिवल्गंति निरु
दंति च हसंति च ॥ ६ ॥ आब्रह्मस्तंबपर्यंतं स्यंदनैः पवनो यथा ॥ उल्लसंति नलीयंते म्लायंति विहसंति च ॥ ७ ॥ ता एताः काश्चिदस्यच्छाय याहरिहरादयः ॥ काश्चिद
ल्पविमोहस्थाय योरगनरामराः ॥ ८ ॥ काश्चिद्दृढंतमोहस्थाय थानरूत्पादयः ॥ काश्चिदज्ञानसंमूढाः कृमिकीटत्वमागताः ॥ ९ ॥ काश्चित्स्वपावदू
ह्यंते दूरे ब्रह्ममहोदधेः ॥ अप्राप्तभूमिका एता यथोरगनगादयः ॥ १० ॥ सत्वमात्रसमालोक्य काश्चिदेवमुपागताः ॥ जाता जाता निरवन्यं ते हतां न
जरठाखुना ॥ ११ ॥ काश्चिदंतरमासाद्य ब्रह्मत्वमहांबुधेः ॥ गतास्तत्तां समं कार्यैर्हरिब्रह्महरादिकाः ॥ १२ ॥ अल्पमोहात्मिकाः काश्चित्तमेव ब्रह्मवारि
धिं ॥ अदृष्टपारभूम्योद्यमवलंब्य व्यवस्थिताः ॥ १३ ॥ काश्चिज्जोत्कृव्य जन्मौघभुक्त जन्मौघकोटयः ॥ वंध्याः प्रकाशनामस्य संस्थिताभूतजातयः ॥
॥ १४ ॥ काश्चिदूर्ध्वादधो यांति यथाहस्तान्महत्फलं ॥ ऊर्ध्वादूर्ध्वतरं काश्चिदधस्ताकाश्चिदप्यधः ॥ १५ ॥

सरणाश्रमविश्रांतिहेतुभूतयोगभूमिकासद्भावल्लभ्यात्र्यंमिति पाठेप्ययमेवार्थः समालोक्य शास्त्रतः श्रुतालङ्गुन्मुखाः जाता जाता अपि हतां तो विघ्नका तटमात्र
रिदुरदुष्टं तब्रह्मणेन जरठाखुना निरवन्यं ते भूमिकादूषणेनपीड्यंत इति यावत् ॥ ११ ॥ अंतरं ईषद्भेदकं विशुद्धज्ञानोपाधिं कार्यैः समं तत्तां ब्रह्ममहांबुधितां
मिति जीवन्मुक्तिं यावत् ॥ १२ ॥ न दृष्टापारभूमिर्यस्य तथाविधः अोधः पूर्णता यस्य तं समाधिरवलंब्य ॥ १३ ॥ अधिकारिदेहप्राप्या प्रकाशेपि रागांधत्वा
तामस्य ॥ १४ ॥ ऊर्ध्वात् उत्कृष्टजन्मनः अधः निकृष्टः पश्चादिजन्म ॥ १५ ॥ श्रीरामचंद्रो जयति ॥ श्रीकृष्णपरब्रह्मणे नमः ॥ श्रीविश्वेश्वराय॰

एवमनर्थसहस्रनिदानं जीवद्भावं प्रपंच्य तन्मूलं स्मारयंस्तन्निवृत्त्युपायमाह ॥ बह्विति ॥ बहवः सुखदुःखकराणां जन्मानां आकरा खनीभूता रागादयो
यस्यां तथाविधा इयं जीवता परमपदस्य स्वात्मनस्तस्यास्मरणात् अपर्यालोचनदोषात् समागता ॥ १६ ॥ इति श्रीवासिष्ठतात्पर्ये० स्थिति० द्वादशः सर्गः ॥
उपवर्ण्य मनःशान्तीरथात्र गुरुकालयोः ॥ शुक्रस्य संनिधौ गंतुमुद्यानं प्रतिपद्यते ॥ उक्तासु जीवजातिषु जीवन्मुक्तानामेव कृतार्थः ॥ तानान्येषामित्याह
एतासामित्यादिना सागरात् आविर्भूतानामिति शेषः एतासां मध्ये ये जितमनोमोहास्ते भवंतीति शब्द्याः कृतार्था इति परेणान्वयः ॥ अव्ययगेय प्रवचनीये

बहुसुखदुःखकराकराक्षयेयं परमपदास्मरणात् समागतेह ॥ परमपदावगमाद्याति नाशं विहगपतिस्मरणाद्विषव्यथेव ॥ १६ ॥ मार्गबोपा
ख्याने संसारोपत्तिविस्तारवर्णनं द्वादशः सर्गः ॥ १२ ॥ काल उवाच एतासां भूतजातीनामूर्मिणामिव सागरात् ॥ विविधानां विचित्राणां ततानामिव
माधवे १ भव्याजितमनोमोहान् दृष्टलोकपरावराः ॥ जीवन्मुक्ता भ्रमंतीह यक्षगंधर्वकिन्नराः ॥ २ ॥ अन्ये तु काष्ठकुड्याभा मूढाः स्थावरजंगमाः
अपरेक्षीणमोहास्ते किं तेषां प्रविचार्यते ॥ ३ ॥ लोके प्रबुध्यमानानां भूतानामात्मसिद्धये ॥ विहरंतीह शास्त्राणि कल्पितान्युदितात्मभिः ॥ ४ ॥
संप्रबुद्धाशया ये तु दुष्कृतानां परिक्षये ॥ तेषां शास्त्रविचारेषु निर्मला धीः प्रवर्तते ॥ ५ ॥ विलीयते मनोमोहः सच्छास्त्रप्रविचारणात् ॥ नभसो विह
रणाज्ज्ञानोः शार्वरं तिमिरं यथा ॥ ६ ॥ अक्षीयमाणां हि मनोमोहायैव न सिद्धये ॥ नीहार इव संघाद्य वेताल इव वल्गति ॥ ७ ॥ सर्वेषामेव देहानां सुख
दुःखार्थभाजनं ॥ शरीरं मन एवेह न तु मांसमयं मुने ॥ ८ ॥

त्यादिना कर्तरि यत्तू यक्षादित्रितयोपादानमुदाहरणार्थं न तु परिगणनाय मनुष्यादिष्वपि संभवात् ॥ १ ॥ २ ॥ साधनचतुष्टसंपन्ना अज्ञा एव शास्त्रविचारेऽधिका
रिणो न तत्त्वज्ञा इत्याशयेनाह ॥ किं तेषामिति ॥ ३ ॥ किमर्थं नहि तेषां देहधारणमिति चेत् ॥ शास्त्रप्रकल्पनेनाज्ञोद्धारार्थमेवेत्याशयेनाह ॥ लोक इति ॥ ज्ञानमुत्पद्यते पुं
सः क्षयात्पापस्य कर्मण इति स्मृतेः ॥ शास्त्रमपि शुद्धचित्तेष्वेव सफलं नान्येष्वित्याशयेनाह ॥ संप्रबुध्येति ॥ ५ ॥ शर्वर्यां भवं शार्वरं ॥ ६ ॥ नीहार इवेत्यावरणे वेताल
इवेति विक्षेपे दृष्टांतौ वल्गति नृत्यति ॥ ७ ॥ देहानां नाशात्संतापन्नजीवानां ॥ ८ ॥ श्रीरामाय नमः ॥ श्रीवेदव्यासाय नमः ॥ श्रीकृष्णाय नमः ॥ श्रीविश्वेश्वर

॥९॥१०॥११॥ मनोवासनया अनुसंधानमात्रेण पिष्टपादयः क्रियंते तदस्माभिर्महतापि यत्नेन चिरेणापि कर्तुं न शक्यते इति नास्मासु अपराधसंभावना नार्पीया
शयेनाह स्वानुसंहितमिति ॥१२॥ समनन्नात्मको निर्झरः ईषच्चलनमपि दुःखदः ॥१३॥ शब्दसंग्रहः श्रवणांतःकारिणा नत्वर्थप्रदर्शकेनेत्यर्थः । यामइत्यस्मदो द्वयो
श्चेति वा अनुचरस्याहि स्याद्बहुवचनं ॥१४॥ सर्वस्वर्गभोगं चित्तकल्पितशरीरेण भुक्त्वा अथ आकाशादिक्रमेण भूमावतीर्णः इंदुरश्मिसंपर्कात् ओषधीः प्रविश्य ।
न्नादिभावक्रमेण जन्मपरंपराः प्राप्य संप्रति समंगायां तापसो भूत्वा स्थित इत्यर्थः ॥१५॥ इंदुरश्मिसंघट्टादिति यदुक्तं तद्विशदयति । तदाप्नोति । तस्य शुक्रस्य

योयं मांसास्थिसंघातो दृश्यते पांचभौतिकः ॥ मनोविकल्पनं विद्धि तदेहः परमार्थतः ॥९॥ मनःशरीरेण तवपुत्रोयं हतवान्मुने । तदेव प्राप्तवानाशु
वयं नात्रापराधिनः ॥१०॥ स्वयावासनया लोको यद्यत्कर्म करोति यः ॥ स तथैव तदाप्नोति नेतरस्येह कर्तृता ॥११॥ स्वानुसंहितमंतर्यन्मनोवासनया
स्वया ॥ को नाम भुवने सोस्ति तत्कर्तुं यस्य शक्तता ॥१२॥ ये स्वर्गनरका भोगा या जन्ममरणोषणाः ॥ स्वमनोमननेनेदं स निष्पंदोपि दुःखदः ॥१३॥
बहुनात्र किमुक्तेन शब्दसंग्रहकारिणाः ॥ उत्तिष्ठ भगवन्यामो यत्र तेन तनयं स्थितः ॥१४॥ सर्वे चित्तशरीरेण भुक्त्वा शुक्रः स्वर्णादिवा ॥ अथेंदुरश्मि
संघट्टात् समंगास्तापसः स्थितः ॥१५॥ तदाप पावनश्चित्तान्मुक्त इंदुस्तु वत्सलं ॥ अवश्यायतया भूत्वा वीर्यं तेनांतरा स्थितः ॥१६॥ इत्युक्त्वा भग
वान्कालो हसन्निव जगद्गतिं ॥ हस्ताद्धस्तेन जग्राह भृगुमिंदुमिवांशुमान् ॥१७॥ अहो नु चित्रा नियतेर्व्यवस्थेति वदन्नुच्चकैः ॥ भगवान्भृगुरुत्त
स्थावुदयाद्रेर्यथा रविः ॥१८॥ तेजोनिधी हसमंगसमुत्थितौ तौ प्रातस्तदांबरतले सतमालजाले । तुल्योदयाविव नभस्यमले विहर्तुमभ्युत्थितौ सज

॥६॥१८॥ वै० स० टी० स० टि० ६॥

प्रायापवनश्चित्तात् चेतनशक्तेर्मुक्तः संमूर्छितः सन् अवश्यायतया नीहारभावेन इंदुरश्मिसंपर्कात् तद्वत् भूत्वा सस्यद्वारा तत्फलं व्रीह्यादि भूत्वा पुरुषं प्रविश्य वीर्यं
रेतो भूत्वा अंतरा स्त्रीगर्भे स्थित इत्यर्थः ॥१६॥ हस्तादिति ल्यब्लोपे पंचमी हस्तं प्रसार्येत्यर्थः । दृष्टांतपक्षे तु हस्तिन् लक्षणया हस्तशब्देन करशब्दवाच्यकि
रणपरिग्रहः ॥१७॥ नियतेः दैवस्य कर्मणो वा ॥१८॥ ह इति किलेत्यर्थे निपातः ॥ अंगेति संबोधने सतमालजाले मंदरे समं युगपत् समुत्थितौ तेजोनिधी
तौ भृगुकालौ सजलदे अंबरतले तुल्योदयौ सकलः संपूर्णः इंदुश्च सूर्यश्च ताविव भातः प्रकाशत इत्यर्थः ॥१९॥ श्रीरामचंद्रो जयति । श्रीविश्वेश्वराय०

२० इतिश्रीवासिष्ठतात्पर्य०स्थितिप्रकरणेत्रयोदशः सर्गः॥१३॥ गताला ध्यांसमाधिस्थशुकस्यात्र प्रबोधनं स्मरणं पूर्ववृत्तस्यगमनेद्याचकीर्त्यते॥१॥ अवनौ अवतीर्येति शेषः॥१॥ नमश्चरान्देवान्पक्षिणश्च॥२॥ हरिणीनामिवमुग्धमुग्धैः अपेक्षितैः कटाक्षैः स्मारितान्युत्सलानियैः सदृशदर्शनस्यस्मृतिहेतुत्वात् सादृश्यंगम्यते॥२॥ अध्यासिताप्याश्रितान्युत्तुंगशिलाशकलान्येवविष्टराआसनानियैः धृताकारान्स्वीकृतशरीरान्उत्साहानिवस्थितान् हेलया ली

॥वाल्मीकिरुवाच॥ इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमिनोजगाम॥ स्नातुंसभाकृतनमस्करणाजगामश्यामाक्षयेरविकरैश्च सहाजगाम॥२०॥ दिवस॥ १४ इत्यार्षेमुमाश्वासनंसर्गः॥१३॥ श्रीवसिष्ठउवाच॥ अथकालकरगृदेवौमंदराचलकंदरात्॥ गंतुंप्रवृत्तावचनौसमंगासरित स्तटं॥१॥ तौशैलदवरोहंतौदृष्टवंतौमहाद्युती॥ नवहेमलताजालकुंजसुमनमश्चरान्॥२॥ वल्लीवलयदोलाभिः क्रीडतोगगनांगणे॥ हरिणीमुग्धमुग्धाक्षिप्रेक्षितस्मारितोत्पलान्॥३॥ सिद्धानध्यासितोत्तुंगशिलाशकलविष्टरान्॥ धृताकारानिवोत्साहान्हेलादृष्टजगत्त्रयान्॥४॥ लताजस्रपतत्पुष्पधारासारनिमज्जनान्॥ तालोत्तालकृतोद्दस्तहस्ताहस्तिघटापतीन्॥५॥ मदावलेपनिद्रालून्मदान्मूर्तानिवस्थितान्॥ पुष्पकेसरसक्तांगपवनारुणवालधीन्॥६॥ चंचलांश्चामरांश्चारून्स्फुरन्मंडलचामरान्॥ लताजस्रपतत्पुष्पधारसारनिमज्जनान्॥७॥ किन्नरान्भूमखर्जूरान्शाखासरलतांगतान्॥ परस्परफलाघातक्ष्वेडावर्जितकीचकान्॥८॥

लयादृष्टंजगत्त्रयंयैः॥४॥ तालवृक्षाइवोत्तालाः स्थूलदीर्घाः कराः शुंडादंडायेषांतान् हस्तिघटापतीन् गजयूथपान् तौदृष्टवंतौ इतिसर्वत्र संबध्यते॥५॥ तानेवविशिनष्टि मदेति॥ पुष्पकेसरैः रक्तांगेनरंजितेनतेनपवनेनपरागैः पूरणाद्दरुणावालधीनित्तिदेहलीदीपन्यायेनपूर्वेणराभ्यांसंबध्यते॥६॥ चमरान्मृगविशेषान् स्फुरन्मंडलस्यपर्वतराजस्यमूहस्यचामरानिवस्थितान्॥७॥ किन्नरान्दृष्टवंतावितिपूर्वत्रसंबंधः भूमखर्जूरान्खर्जूरीलमजातिभेदान्शाखापर्यंतंसरलतांऋजुतांगतान्परस्परस्यखर्जूरफलैराघातास्ताउनानितत्प्रक्षणाभिः क्रीडाभिरावर्जिताः सफलीकृताः अधःप्ररूढकीचकावेणवोयस्तान्मर्कटान्॥८॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥, श्रीविश्वेश्वर

धातुगैरिकमिव पटत्वान्नि दुर्वर्क्षाणि विहृतमुखानि येषां तान् नटने अवस्यंदने उत्कटान् शौंडान् ॥९॥ सिद्धान् देवयोनिविशेषान् अमरनारीभिरप्सरो
भिः रतिकालज्ञापनाय मंदारकुसुमैराहतान् अत एव धातुपाटलैर्निर्धारैरछिद्रैः पयोदपटैः संवृतान् ॥१०॥ तटान् प्रपातदेशान् ॥ अजनसंसर्गान् ज
न संचारानर्हान् बौद्धप्रव्रजितदृष्टांतोत्प्रेक्षा पतनयोग्यता विवक्षया ॥ सागरैकांते उत्कटतया सोत्कंठतया हेतुनेव आतानि गृहीतानि मधुमासश्चैत्रस्तत्संबंधि
नि प्रसाधनानि पुष्पपल्लवाद्यलंकरणाया भिस्ताः उत्कटता चांतमधुमासप्रसाधना इति पाठे तु सागरस्योत्कटतायै उपभोगमदाय आचांते रूपमुक्ते मधु

धातुपाटलदुर्वृक्षान्मर्कटान्नटनोत्कटान् ॥ लताविताननसंछन्नसानूपवनमंदिरान् ॥९॥ सिद्धानमरनारीभिर्मंदारकुसुमाहतान् ॥ धातुपाटलनि
र्झरपयोदपटसंवृतान् ॥१०॥ तटानजनसंसर्गान् बौद्धान् प्रव्रजितानिव ॥ सरितः कुंदमंदारपिनद्धलहरीघटाः ॥ सागरोत्कलयैर्वांतमधुमांसप्र
साधनाः ॥११॥ पुष्पभारपिनद्धांगान् वृक्षान्पवनकंपितान् ॥ क्षीबानिव मधुप्राशैर्घूर्णान्मधुकरेक्षणान् ॥१२॥ शैलराजश्रियं स्फीतां पश्यंतो
ताविलस्तनः ॥ प्राप्तवंतो वसुमतीं पुरपत्तनमंडितां ॥१३॥ क्षणादवापतुस्तत्र पुष्पलोलतरंगिणीं ॥ समं गां सरितं साधु सर्वपुष्पमयीमिव ॥१४॥
ददर्शाथ तटे तस्मिन् कस्मिंश्चित्तनयं प्रभुः ॥ देहांतरपराबृत्तं भावमन्यमुपागतं ॥१५॥ शांतेंद्रियं समाधिस्थमचंचलमनोमृगं ॥ सुचिरादिव वि
श्रांतं सुचिरश्रमशांतये ॥१६॥ चिंतयंतमिवानंतान् स्थिरमुक्तचिरोज्झितान् ॥ संसारसागरगतान् हर्षशोकनिरंतरान् ॥१७॥ नूनं निश्चलतां यात
मतिभ्रमितचक्रवत् ॥ अनंतजगदावर्तविवर्तातिशयादिव ॥१८॥ एकांतसंस्थितं कांतं कांत्यैकाकिनमाश्रितं ॥ उपशांतेहसंभग्नचित्तसंभ्रम
संगमं ॥१९॥ निर्विकल्पसमाधिस्थं विरतं द्वंद्ववृत्तितः ॥ हसंतमखिलं लोकगतिं शीतलया धिया ॥२०॥

मांसैः प्रसाधनं यासां ताः ॥११॥१२॥१३॥ पुष्पलोलतरंगा मिलितबहुश्रीहिपोवृमत्वर्थलाभेऽतिशय नित्ययोगद्योतनार्थेनि लिप्रत्ययः ॥ न देवस्पष्टीकर्तु
माह ॥ सर्वपुष्पमयीमिवेति ॥१४॥ अन्यं भावं अप्रभुक्तं ॥१५॥ सुचिरश्रमः अनादिसंसारश्रमस्तस्य शांतये ॥१६॥ चिरंप्रमुक्ताः अचिरात् उज्झिता स्सहन्काः
अतिभ्रमितचक्रवदिति दृष्टांतो रागोपरम क्रमेण चित्तं स्वयमेव विश्राम्यतीति द्योतनाय ॥१८॥ चक्रदृष्टांताभिप्रायमेव स्पष्टमाह उपशांतेहेति ॥१९॥
द्वंद्ववृत्तितः नशीतोष्णसुखदुःखादेः ॥२०॥

वृत्तांता निःप्रवृत्तयः मोक्षवृत्तास्तत्कृत्यानि ॥ महापदं अपरिच्छिन्नात्मसुखं ॥ २१ ॥ २४ ॥ शिखंडः फल्गु मयूरः ॥ २५ ॥ अंते अंतिके समोदयोः सन्मुखो दितो ॥ २६ ॥ विप्रो विप्र देवो ॥ २७ ॥ मिथः अन्योन्यं कृताः समाचारास्तत्कालोचित गौरवाभिनंदनाद्याचारा येः ॥ २८ ॥ शांत जपः समापितसमाधिः जपमानसे चेति धात्वर्थदर्शनात् इदमर्द्दीपा

विगताखिलवृत्तांतं विगताशेषमोक्षकृतं ॥ निरस्तकल्पनाजालमालंबितमहापदं ॥ २१ ॥ अनंतविश्रांतितत्ते पदे विश्रांतमात्मनि ॥ प्रतिबिंबमगरवृत्तं सि तमपि मिवास्थितं ॥ २२ ॥ हेयोपादेयसंकल्पविकल्पाभ्यां समुज्झितं ॥ संप्रवुद्धमतिं धीरं ददर्श तनयं फल्गुः ॥ २३ ॥ तमालोक्य फल्गोः पुत्रं कालो फल्गुमुवाच ह ॥ वाक्यमब्धिध्वनिनिभं तव पुत्र स्तसाविति ॥ २४ ॥ विबुध्यतामिति गिरा समाधेर्विरराम सः ॥ भार्गवो मोदघोषेण शनैरिव शिखंडः फल्गुः ॥ २५ ॥ उन्मील्य नेत्रे सो पश्यदंते कालस्य रूपकं ॥ समोदयाविवायातो देवौ शशिदिवाकरौ ॥ २६ ॥ कदंबलतिकापीठादथोत्थाय ननाम तौ ॥ समौ समागतौ कांतौ विप्रो हरिहराविव ॥ २७ ॥ मिथः कृतसमाचाराः शिलायां समुपाविशन् ॥ मेरुपृष्ठे जगत्स्रष्ट्राब्रह्माविष्णुहराइव ॥ २८ ॥ अथ शांतजपो रामस सस मंगात टे द्विजः ॥ तावुवाच वचः शांतममृतस्पंदसुंदरं ॥ २९ ॥ भवतो दर्शनेनाहमद्य निर्वृतिमागतः ॥ समागतयोर्लोके शीतलोष्णरुचोरिव ॥ ३० ॥ यो न शास्त्रेण तपसा न ज्ञाने नापि विद्यया ॥ विनष्टो मे मनोमोहः क्षीणोसौ दर्शनेन वां ॥ ३१ ॥ न तथा सुखयंत्यंतर्निर्मलामृतवृष्टयः ॥ यथा प्रहर्षयंत्येता महतामेव दृष्टयः ॥ ३२ ॥ चरणाभ्यामिमं देशं भवंतौ भूरितेजसौ ॥ कौ पवित्रितवंतौ नः शशांकार्काविवांबरं ॥ ३३ ॥ इत्युक्तवंतं प्रोवाच फल्गुर्जन्मांतरात्मजं ॥ स्मरात्मानं प्रबुद्धो सि नाज्ञोसी निरघूद्वह ॥ ३४ ॥ प्रबोधितो सौ फल्गुणा जन्मांतरदशां निजां ॥ मुहूर्तमात्रं सस्मार ध्यानोन्मीलितलोचनः ॥ ३५ ॥ अथासौ विस्मयात्स्मेरमुखो मुदितमानसः ॥ वितर्कमंथरां वाचमुवाच वदतां वरः ॥ ३६ ॥ जयत्सविदितारंभा नियतिः परमात्मनः ॥ यद्वशादिदमाभोगि जगच्चक्रं प्रवर्तते ॥ ३७ ॥ ममान्यं तान्यतीतानि जन्मान्यविदितान्यपि ॥ दशाफलान्यनंतानि कल्पांतकलितादिव ॥ ३८ ॥

उत्क्रमादार्थक्रमबलीयस्त्वात्कदंबलतिकापीठादित्युत्तं प्राग्योज्यं ॥ २१ ॥ निर्वृतिं सुखं ॥ ३० ॥ ज्ञानेन उपासनेन विद्यया ब्रह्मविद्यया अतिशयोक्तिरियं प्रशंसार्थाः ॥ वां युवयोः ॥ ३१ ॥ ध्यानेन उन्मीलितं उद्घाटितं दिव्यं लोचनं यस्य सः ॥ ३५ ॥ विस्मयात् आश्चर्यदर्शनात् ॥ ३६ ॥ नियतिः कर्मफलव्यवस्थाहेतुर्मायाशक्तिः ॥ ३७ ॥ दशाफलानि मरणमूर्च्छादिदुर्दशाफलानि दुःखमोहादीनि कल्पांतप्रलयस्तेन कलिता संपन्ना दर्षवान दाहादेरिव ॥ ३८ ॥

कठिनः संरंभः क्रोधः उद्योगश्च येषु ते विभवोपार्जनः द्रव्यार्जनश्रमा अपि ॥ ३९ ॥ पयो वारि ॥ ४० ॥ ४१ ॥ नतदस्तीति ॥ सर्वं कृतं भुक्तं दृष्टं चेत्यर्थः ॥ इष्टानिष्टासु अ
नुकूलप्रतिकूलासु वृत्तिषु दशासु एकविज्ञानेनापि सर्वविज्ञानं दर्शयति ज्ञातमिति ॥ ४२ ॥ चिरं शांतोहं संप्रति विश्रांतः ॥ ४३ ॥ किं तेन यातनत्वासमीहितं तत्राह ने
ति ॥ ४५ ॥ ननु नियतेरचनां द्रष्टुं विहरतस्तव तत्राभिनिवेशात्पुनः पूर्ववदप्रसरो मनोरथानुगमनादिसंसारापत्तिरित्याशंक्य दृढतरतत्त्वज्ञानबाधितानुवृत्तिमात्र
त्वान्न पूर्ववदभिनिवेशप्रसक्तिरित्याह ॥ यदिति ॥ यद्यस्मात्कारणादहं एकभावबुध्या एक एवात्माभावः ॥ परमार्थसत्यो नान्यदिति दृढनिश्चयेन यत्नू चरितं अतिसु

दृष्टाः कठिनसंरंभा विभवोप्यर्जनश्रमाः ॥ विह्वलं वीतशोका सुचिरं मेरुस्थलीषु च ॥ ३९ ॥ पीतमामोदि मंदारकेसरारुणितं पयः ॥ मंदाकिन्याः
सकल्हारं तटीभ्रमरभूकृतः ॥ ४० ॥ भ्रांतं मंदरकुंजेषु फुल्लहेमलतादिषु ॥ मेरोः कल्पतरुच्छायापुष्पसुंदरसानुषु ॥ ४१ ॥ न तदस्ति न यद्भुक्तं न तद
स्ति न यत्कृतं ॥ न तदस्ति न यन्नू दृष्टमिष्टानिष्टासु वृत्तिषु ॥ ४२ ॥ ज्ञातं ज्ञातव्यमधुना दृष्टं द्रष्टव्यमक्षतं ॥ विश्रांतोथ चिरं श्रांतो गतो मे सकलो भ्र
मः ॥ ४३ ॥ उत्तिष्ठ तात गच्छामः पश्यामो मंदरस्थितां ॥ तां तनुं तावदाशुष्कां शुष्कां वनलतामिव ॥ ४४ ॥ न समीहितमस्तीह नासमीहितमस्ति मे ॥
नियतेरचनां द्रष्टुं केवलं विहराम्यहं ॥ ४५ ॥ यदिति सुभगमार्यसेवितं तत्स्थिरमनुयामियदेकभावबुध्या ॥ तदलमभिमतामतिर्ममास्तु प्रकृतमिमं व्य
वहारमाचरामि ॥ ४६ ॥ भार्गवजन्मांतरस्मरणं नाम चतुर्दशः सर्गः ॥ १४ ॥ श्रीवसिष्ठ उवाच ॥ विचारयंतस्तत्त्वज्ञा इति ते जागतीं गतीः ॥ समं गाया
स्तटात्तस्मात्ते चेलुश्च्यवनाश्रवः ॥ १ ॥ क्रमादाकाशमाक्रम्य निर्गत्यांबुदकोटरे ॥ संप्रापुः सिद्धमार्गेण क्षणान्मंदरकंदरं ॥ २ ॥

भगं अत्यंतसुभावहं आर्यैरन्यैश्च जीवन्मुक्तैः सेवितं तदेव स्थिरं यथा स्यात्तथा अनुयाम्यनुसरामि न पूर्ववन्मूढवत्तं तत्तस्मात्तव मम च अभिमता पूर्वदे
हजीवनादिरूपा मतिरलं साम्यगस्तु नाम नका चिंतया क्षितिः तया प्रकृतं प्रारब्धशेषभोजकं व्यवहारमाचरामि न मूढवदभिनिवेक्ष्यामीत्यर्थः ॥ ४६ ॥ इति श्रीवा
सिष्ठतात्पर्यप्रकाशे चतुर्दशः सर्गः ॥ १४ ॥ अत्र तां तनुमात्मनो भ्युशुकस्य परिदेवनं तन्निमित्तविशेषोत्थ्यास्वभावश्चोपदिश्यते ॥ १ ॥ इति प्रागुक्तप्रकाराः जाग
तीः सांसारिकीर्गतीर्विचारयंतः ॥ समं गातटात् भृगवाश्रमं प्रति चेलुः प्रचलिताः श्च्यवनाश्रव इत्यनेन प्राणक्रिययैव तेषां चलनोपचारो न तात्मनि क्रियास्ती
ति द्योतनाय ॥ १ ॥ अंबुदकोटरैः मेघच्छिद्रैः ॥ २ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीसीतारामाभ्यान्नमः ॥ श्रीवेदव्यासायनमः ॥ श्रीवेंकटेशायनमः ॥ ७

॥वा॰ गी॰ स्खि॰॥
॥२२॥

अधित्यकायां ऊर्ध्वभागभूमौ ॥३॥ इदं वक्ष्यमाणप्रकारवाक्यं ॥४॥ तन्वी कृशा सुखसंभोगैरितियद्वत्कं नत्वपंचयन्ति कर्पूरैरित्यादिना ॥५॥६॥ सरिसृपसु
रेवुः सर्पवृश्चिकप्रभृतिभिः कीटैः क्षुणा संचूर्णिता छिद्रितेति यावत् ॥७॥ चंदनानां हरिचंदनानां उद्यानखंडेषु विलसितं क्रीडाभिः शोभितं नंदनेति
पाठे स्पष्टं ॥८॥ उत्तुंगाः अनंगभंगाः कामतरंगा यस्यां तथाविधया चेतोवृत्त्या रहितया स्वत्कृमा शुष्यति भावेत्वत् ॥९॥ इदानीं देहमेव संबोध्यानुशोचति
तेषु तेष्विलसादिना तेषु तेषु विचित्रेषु अवकाशेषु देवोद्यानादिप्रदेशेषु तासु तासु विचित्रासु बाल्ययौवनादिदशासु तथा प्रागनुभूतप्रकारास्तत्तत्सौंद

अधित्यकायां तस्याद्रेराद्रपर्णावगुंठितां ॥ ददर्श भार्गवः शुष्कां पूर्वजन्मोद्भवां तनुं ॥३॥ उवाचेदं च हे तात तन्वी तनुरियं हि सा ॥ यालयासु
खसंभोगैः पुरासमभिलालिता ॥४॥ इयं सा मत्तनुर्यस्याः कर्पूरागरुचंदनैः ॥ अंगमंगीकृतस्नेहा धात्री चिरमलेपयत् ॥५॥ इयं सा
मत्तनुर्यस्या मंदारकुसुमोत्करैः ॥ रचिता शितला शय्या मेरूपवनभूमिषु ॥६॥ इयं सा मत्तनुर्मत्तदेवस्त्रीगणलालिता ॥ सरिसृपमुखक्षुण्णा पश्य
शेते धरातले ॥७॥ चंदनोद्यानखंडेषु मम तन्वाययानया ॥ चिरं विलसितं सेयं शुष्ककंकालतां गता ॥८॥ सुरांगनांगसंसर्गादुत्तुंगानंगभंग
या ॥ चेतोवृत्त्या रहितया तन्वाद्य मम शुष्यते ॥९॥ तेषु तेषु विलासेषु तासु तासु दशासु च ॥ तथा तज्ञावनाबंधः कथं स्वस्थोसि देहक ॥१०॥ हा तनो
शवनामासि तापसंशोषमागता ॥ कंकालतां प्रयातासि मां भीषयसि दुर्भगे ॥११॥ देहे नालं विलासेषु येनैव मुदितो भवं ॥ कंकालतामुपग
तात स्मादेव बिभेम्यहं ॥१२॥ ताराजालसमाकारो यत्र हारो भवत्सुरा ॥ समीरक्षिप्तिलीयंते तत्र पश्य पिपीलिकाः ॥१३॥ द्रवत्कांचनकांतेन लोभं नी
ता वरांगनाः ॥ येन मद्वपुषा तेन पश्य कंकालतोद्यते ॥१४॥ पश्य मे वितलास्येन तापसंशुष्कतालिना ॥ मत्कंकालकुवक्रेण विज्ञास्यंते वने मृगाः ॥१५॥
पश्यामि संशुष्कतया शवोदरदरीमम ॥ प्रकाशांशुजालेन विवेकेनेव शोभते ॥१६॥

यल्लिंकारगीतहास्यरतिविलासादिभावानां संबधाय स्युः तथाविधो भूत्वा संप्रति कथं स्वस्थोसि कुतस्तत्रानुशोचसीत्यर्थः ॥१०॥ कंकालतां अस्थिमात्रावशे
षतां ॥११॥१२॥ द्रवत्कांचनं द्रुतसुवर्णमिव कांतेन भासुरेणालोभं कामभोगस्पृहां ऊढ्वसुरे धार्यते पश्येति पुनः पितरं प्रत्युक्तिः ॥१४॥ कुवक्रेण विहृतेन मुखेन ॥१५॥
अंतः प्रविष्टत्वात् प्रकाशेन प्रकाशमानेनांशुजालेन शोभते ॥ पश्यामित्यस्य पश्य मृगो धावतीत्यत्रेव वाक्यार्थः कर्म ॥१६॥ श्रीरामचंद्रो जयति ॥ ७

चतुर्थः ॥

॥२२॥

आत्मनः स्वस्यास्तु च्छत्वेन फल्गुत्वेन कुत्सितरूपताप्रदर्शनेनेति यावत् नयस्फप दिशतिव ॥१७॥ गंधांतानां लोभात् अभिलाषाद्विमुक्तया मत्तत्वात् एतावत्कालं मत् परोक्षं पततु इदानीं महत्सुखं च निर्विकल्पः समाधिर्यस्यास्तयैव क्षुभ्यते न प्यते ॥१८॥ सुखं स्वस्थं दैवनोपादितेभ्यो भोगेभ्यो विपत्प्रयः ॥१९॥ आनंदस्य कलां च मत्कृतिं जागतेन त्रैलोक्यसंबंधिनापी सन्वयः ॥२०॥२१॥ संरंभेण कामादिचापलेन संक्षुब्धः न केवलं विवेकसद्वासनादि शाखापल्लवादीन्येव स्वस्य यथा विशातयति तथाचलति किंतु आमूलाद्यथा निकृंतति उन्मूलितो भवति तथाचलति विवेकाद्यन धिक्तन स्थावरादियोनिष्वेव जीवं पातयतीत्यर्थः ॥२२॥ अद्रौ अस्मिन्मंदरे मे देहश्चित्तलक्षणो नानर्थेन विमुक्तः सन् अद्य गजानां अश्वै में ठेर्हरि भिः सिंहै श्व विग्रहं वैरं युयुत्साप्रतिगर्जनादिलक्षणं न पश्यति प्राक्कौतुक

मत्तनुः परिशुद्धेयं स्थितो नानाचल्लोपल्ले वैराग्यनयतीवात्मतुच्छत्वेनांतरं सतां ॥१७॥ शब्दरूपरसस्पर्शगंधल्लोभाद्विमुक्तया ॥ निर्विकल्पसमाध्येव तदेन क्षुभ्यते गिरौ ॥१८॥ मुक्ताचित्तपिशाचेन नूनं सुखमिवास्थिता ॥ ननु दैवत्संगेभ्यो न विपत्तेति मनागपि ॥१९॥ सशांते चित्तवेताल्ये यामानंदकल्लांतनुः ॥ याति तामपि राज्येन जागतेन न गच्छति ॥२०॥ पश्य विश्रांत संदेहं विगताशेषकौतुकं ॥ निरस्तकल्पना जालं सुखं शेते कथं वने ॥२१॥ चित्तमर्कटसंरंभसंक्षुब्धः कायपादपः ॥ तथा वेगेन चलति यथामूलान्निकृंतति ॥२२॥ चित्तानर्थविमुक्तोद्रौ गजाश्वहरिविग्रहं ॥ नाद्य पश्यति मे देहः परानंद इव स्थितः ॥२३॥ सर्वाशाजनसंमोहमिहिकाशरदागमं ॥ अचित्तत्वं विनान्यच्छ्रेयः पश्यामि जंतुषु ॥२४॥ ना १

दर्शनपरानंदे स्थित इव यथा प्राग्बहिः कौतुकदर्शनेन नंदति तथाद्य नेत्यर्थः ॥ अथवा अद्रौ स्फटिकशिलासु प्रतिबिंबितं गजाश्वहरीणां विग्रहं युद्धं मूर्तिं वाद्य न पश्यति इत्यर्थः नाद्यं पश्यतीति पाठे तु यथा परानंदे परमात्मनि स्थितो जीवन्मुक्तः प्रथमं गजमिव स्थूलं अश्वमिव सूक्ष्मं हरिमिव कारणं च विग्रहाः शरीराणि यस्मिंस्तथाविधं आत्मनटस्य नाट्यं पश्यति न थाम मदेहोपि चित्तानर्थविमुक्तत्वादेव पृथक् स्थितेन मरात्मना अस्मिन्नद्रौ क्वचिद्गजाः क्वचिदश्वाः क्वचिद्धरयः सिंहमर्कटादय इति नानाविग्रहमात्मनटस्य नाट्यं पश्यतीत्यर्थः ॥२३॥ सर्वे आशारूपाः ये ज्वरास्तन्निदानभूतो यो मोहस्तल्लक्षणाया मिहिकाया अस्त्रबीजस्य शरदागमभूतं सर्वासां आशानां दिशां वा सर्वास्वाशासु दिक्षु वा ज्वरभूता मोहमिहिकायाः शरदागमं अचित्तत्वं मनोनाशं विना ॥२४॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥

सुखसंभोगाः हैरण्यगर्भानंदान्ता विषयसुखभोगास्तेषां सीमांतं परमावधिं भूमानंदं अपरिच्छिन्नब्रह्मसाक्षात्कारत्वान्महाधियः रागादिधीकार्योपशमाच्छांतधियः २५ स्वदेहजीवन्मुक्तदेहसाम्यं संभाव्याभिनंदति॥ सर्वैति दिष्ट्याभाग्योदयेन॥ २६॥ रामस्य प्रश्नाशयः स्पष्टः॥ २७॥ ननु तेभ्यः शरीरेभ्यस्तस्मिन्काये किं कस्मादितो महान्प्रवृद्धः अतिशयः स्नेहस्येति शेषः॥ २८॥ शुक्रस्य सांप्रतिकग्रहपदाधिकारोपभोगप्रयोजककर्मप्रवृत्त्यानुष्ठितसत्कर्मणामुत्क्रांतिकाले एतत्कल्पभाविभृगुसाद्यशरीराकारेण परिपालनां तादृशाकारवासनात्मनैव प्रलये चिरमवस्थानादाकाशादिक्रमेणैतत्कल्पे भृगुशरीरोसत्तौ अन्नद्वारा प्राणापानप्रवाहेन तद्धृदयं प्रविश्य रेतोरूपपरिणामद्वारा चिराभ्यासदृढीकृतप्राक्तनकर्मवासनानुसारेणैव शुक्रदेहारंभात्तेन कल्पित पयकर्मभोगेपि भोक्तृव्यापारबंधकर्मणां बहूनामवशिष्टत्वाद्युक्तस्तस्मिन्

तएव सुखसंभोगसीमांतं समुपागताः॥ महाधियः शांतधियो येयाता विमनस्कतां॥ २५॥ सर्वदुःखदशामुक्तां संस्थितां विगतज्वरां॥ दिष्ट्या पश्याम्यमननां वनेतनुमिमामहं॥ २६॥ श्रीराम उवाच॥ भगवन्सर्वधर्मज्ञ भार्गवेण तदा किल॥ सुबहून्युपभुक्तानि शरीराणि पुनः पुनः॥ २७॥ भृगुपुत्रोसादितेकायेतत्तस्मिंस्तस्य किं पुनः॥ महानतिशयो जातः परिदेवनमेव वा॥ २८॥ श्रीवसिष्ठ उवाच॥ शुक्रस्य कलनारामयासौ जीवदशां गता॥ कर्मोत्थिका समुत्पन्ना भृगोर्भार्गवरूपिणी॥ २९॥ सा हीदं प्रथमत्वेन समुपेत्य परात्पदात्॥ भूताकाशपदं प्राप्य वातव्यावल्गितासती॥ ३०॥ प्राणापानप्रवाहेण प्रविश्य हृदयं भृगोः॥ क्रमेणावीर्यतामेत्य संपन्नौशनसी तनुः॥ ३१॥ विहितब्राह्मसंस्कारा तत्र सा पितुरग्रगा॥ कालेन महता प्राप्ता शुष्ककंकालरूपतां॥ ३२॥ ७॥

स्नेहातिशयो न देहांतरेषु तद्भोग्यकर्मणामनवशेषादित्याशयेनोत्तरं वसिष्ठ आह शुक्रस्येत्यादिना॥ कलना प्राक्तनो आंतिकालिकी भाविदेहाकारकलना॥ भार्गवरूपिणी भृगुसाद्यदेहाकारया प्राक्कल्पे आसीदिति शेषः॥ २९॥ सा हि सैवेदानीं औशनसी तनुः संपन्नेति परेणान्वयः केन क्रमेणेत्यत आह॥ इदं प्रथमत्वेनेत्यादिना॥ परात्पदात् प्रलयकालपरिशिष्टान्मायाशबलेश्वरादिदं प्रथमत्वेन एतत्कल्पीयं प्रथमभावं ३० प्राणक्रियाविशेषात्मना अन्नग्रासिना अपानप्रवाहेण॥ ३१॥ विहिता विधिवदनुष्ठिताः ब्राह्माः ब्राह्मणजन्मोचिताः गर्भाधानपुंसवनजातकर्मान्नप्राशनचौलोपनयनादयः संस्कारा यस्य॥ न ह्यसंस्कृततया यज्ञादिहाधिकारो भोक्तुं शक्यत इति भावः॥ ३२॥ शरीरभावेन समुपेत्य सिक्तो च्छूनबीजांतरांकुरात् शक्तिवदीषदाविर्भूय क्रमादाकाशादिपदं तत्तद्भूतसाम्यं प्राप्य वातेन रश्मिद्वारा अन्नादिभावेन व्यावल्गिता अंतर्भाविता सती॥ ३०॥ ३

ब्रह्मरूपाः सत्काशादुत्करीत्या इदं प्रथमं यथा स्यात्तथा यदा यस्माद्धेतोरायाता अतः अकालेपंचम्या अपि छांदसो दाप्रत्ययः ॥३३॥ ज्ञानिनोपि न प्रारब्धमति
वर्तनं इत्याशयेनाह जीवेति ॥३४॥ यावद्देहं यावज्जीवं नं सदा सर्वकाले क्रमो मर्यादानियमः न कदाचित्त्व्यभिचरतीत्यर्थः ज्ञस्य शान्त्या अज्ञस्य तु अशान्त्ये
ति विशेष इत्यर्थः ॥३५॥ अत एव तत्र व्यवहारेष्वपि तयोस्तुल्यत्वेवेत्याह येइति ॥३६॥ तर्हि द्वयोः साम्ये एकस्य बंधोऽपरस्य मोक्ष इति विशेषः कुतस्तत्रा
ह वासनेति ॥३७॥ दुःखे दुःखनिमित्तप्राप्तौ दर्शयंति विडंबयंति ॥३८॥ दुःखवत्तिषु दुःखनिमित्तेषु दुःखिता इव दृश्ये व्यवहारविषये एवाप्रबुद्धवर्तंते स्वा ६

इदं प्रथममायाता यदासौ ब्रह्मरूपस्तनुः ॥ अतस्तां प्रतिमुक्तेन तदा तत्परिदेवितं ॥३३॥ वीतरागोऽप्यनिक्षोपि समंगाविप्ररूपवान् ॥ सस्तु शोचत तनुं मुक्तः
स्वकाचोत्थेषदेहजः ॥३४॥ ज्ञस्याज्ञस्य च देहस्य यावद्देहं मयं क्रमः ॥ लोकवद्व्यवहारोयं शान्त्याशान्त्याथवा सदा ॥३५॥ ये परिज्ञाततत्त्वा ये ये चाज्ञाः पशु
धर्मिणः ॥ लोकसंव्यवहारेषु ते स्थितास्तोककज्जालवत् ॥३६॥ व्यवहारे यथैवाज्ञस्तथैवाखिलपंडितः ॥ वासनामात्रभेदोऽत्र कारणं बंधमोक्षदं ॥३७॥
यावच्छरीरं तावद्धि दुःखे दुःखं सुखे सुखं ॥ असंसक्तधियो धीरा दर्शयंत्यप्रबुद्धवत् ॥३८॥ सुखेषु सुखिता नित्यं दुःखिता दुःखवत्तिषु ॥ महात्म
नोऽपि दृश्यंते दृश्य एवाप्रबुद्धवत् ॥३९॥ सूर्यस्य प्रतिबिंबानि क्षुभ्यंति न वपुः स्थिरं ॥ चलाचलतया तज्ज्ञो लोके वर्तिषु तिष्ठति ॥४०॥ अवस्थित इव स्व
स्थः प्रतिबिंबेषु भास्करः ॥ संसक्तलोककर्मापि बुद्ध एवाप्रबुद्धधीः ॥४१॥ मुक्तबुद्धींद्रियो मुक्तो बद्धकर्मेंद्रियोपिहि ॥ बद्धबुद्धींद्रियो बद्धो मुक्तकर्मेंद्रियो
पिहि ॥४२॥ सुखदुःखदशो लोके बंधमोक्षदशस्तथा ॥ हेतुर्बुद्धींद्रियाण्येव तेजांसीव प्रकाशने ॥४३॥

त्तलतेतु सुस्थिराः नाज्ञवद्वर्तंत इत्यर्थः ॥३९॥ एकस्यैकदैव स्थिरास्थिरवृत्तिविरोधवारणाय दृष्टांतमाह सूर्यस्येति ॥ यथा सूर्यस्य जलस्थानि प्रतिबिंबवपूंष्येव
क्षुभ्यंति संचलंति न तु नभस्स्थं स्थिरं बिंबं च पुनस्तद्दृष्टिस्थैर्ये पुनः शब्दः ॥४०॥ यथा प्रतिबिंबे ध्रुवस्थितो भास्करः स्वस्थ एवास्वस्थो भिन्नश्चल इव भवति तद्वद्बु
द्ध एव व्यवहारस्थो प्रबुद्धधीर्भवतीत्यर्थः ॥४१॥ तर्ह्यज्ञवदेव विहितनिषिद्धकर्मभिस्तस्य बंधोपि स्यादित्याशंक्य बुद्धींद्रियासंगपूर्वककर्मणामेव बंधकतानान्ये
षामित्याशयेनाह मुक्तेति इदमेव भगवतोक्तं कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते इत्यादिना ॥४२॥ सुखदुःखद
॥शः सुखदुःखभोगस्य ॥४३॥ श्री ॥

ननु तर्हि मया कथं स्थेयं तत्राह बहिरिति ॥ आचारवर्जितः कूटस्थात्मदृष्टिर्निष्क्रियः ॥ अत एव समो वैषम्यशून्यः ॥ ४४ ॥ एषणा कर्मफलासंगस्तद्विमुक्तेनात्मनि ब्रह्मणि तिष्ठता प्रतिष्ठितेनात्मना मनसा कर्माणि कुरु नूनमिति हेतौ यतो देहस्य कार्याणि कर्माणि संस्थितिः स्वभाव इत्यर्थः न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत इति भगवताप्युक्तं ॥ ४५ ॥ आधयो मानसदुःखानि व्याधयः शरीरदुःखानि महांत आवर्ता मरणजन्माद्याः परिवर्तनानि तान्येव गर्ता स्थानानि यस्मिन् तथाविधे संसारवर्त्मनि ममतोग्रांधकूपे मा पत ॥ ४६ ॥ तत्पतने उपायमाह त्वमित्यादिना भावेषु दृश्यवस्तुषु देहादिषु तिष्ठसीत्यर्थः त्वयी

बहिर्लोके चित्ताचारस्त्वं तराचारवर्जितः ॥ समो ह्यतीव तिष्ठ त्वं संशांतसकलैषणः ॥ ४४ ॥ सर्वैषणाविमुक्तेन स्वात्मनात्मनि तिष्ठता ॥ कुरु कर्माणि कार्याणि नूनं देहस्य संस्थितिः ॥ ४५ ॥ आधिव्याधिमहावर्तगर्ते संसारवर्त्मनि ॥ ममतोग्रांधकूपेस्मिन्मा पतनातपदायिनि ॥ ४६ ॥ न त्वं भावेषु नो भावास्त्वयि तामेरसे हृषणा ॥ शुद्धबुद्धस्वभावस्त्वमात्मा सांतः सुस्थिरो भव ॥ ४७ ॥ त्वं ब्रह्म ह्यमलं त्वं शुद्धं त्वं सर्वात्मा च सर्वहृत्त्वं ॥ सर्वशांतमजं विश्वं भावयन्नेव सुखी भव ॥ ४८ ॥ व्यपगतममतामहांधकारः पदममलं विगतैषणं समेत्य ॥ प्रभवसि यदि चेतसो महात्मंस्तदनिधिये महते सते नमस्ते ॥ ४९ ॥ भार्गवपरिदेवनप्रसंगेनोपदेशप्रकरणं सर्गः ॥ १५ ॥ श्रीवसिष्ठ उवाच ॥ अथाक्षिप्य वचस्तस्य तनयस्य तथा भृगोः ॥ उवाच भगवान्कालो वचो गंभीरनिस्वनः ॥ १ ॥ काल उ० ॥ समं गता तपसी मे तात ननु संस्मन्य भार्गव ॥ प्रविशेमां ननु साधो नगरीमिव पार्थिवः ॥ २ ॥ कालेपूर्वजया तन्वा तपः कृत्वा तया पुनः ॥ गुरुत्वमसुरेंद्राणां कर्तव्यं भवतानघ ॥ ३ ॥

सती लिशेषः ॥ ४७ ॥ भावयन्विचारेणानुभवन्सन् ॥ ४८ ॥ हे महात्मन् विगतैषणं सकलैषणानिवर्तकं पूर्णानंदं अमलं अविद्यादिशून्यं पदं समेत्य सम्यगनुभावेन प्राप्य व्यपगतममतामहांधकारः सन् चेतसश्चित्तस्य यदि वधे प्रभवसि समर्थस्यास्तर्हि अतिधिये अपरिमितबुद्धये महते पूर्णाय सते परमार्थसते ब्रह्मभूताय ते नमः ॥ अस्मदादीनामपि सदा वंद्यो भविष्यसीत्याशयः ॥ ४९ ॥ इति श्रीवासिष्ठतात्पर्ये स्थितिप्रकरणे पंचदशः सर्गः ॥ १५ ॥ कालवाक्याद्भृगोः कालप्रवेशः स्वतनौ पुनः ॥ शुक्रस्य दैत्यगुरुता जीवन्मुक्तिश्च वर्ण्यते ॥ १ ॥ तथा प्राग्वर्णितप्रकारं भृगोस्तनयस्य शुक्रस्य दैत्यगुरुता जीवन्मुक्तिश्च वर्ण्यते ॥ तथा प्राग्वर्णितप्रकारं भृगोस्तनयस्य शुक्रस्य वचः परिदेवनवाक्यं आक्षिप्य अयुक्तत्ववर्णनेन निरस्य ॥ १२ ॥ काले आधिकारिकप्रारब्धोद्बोधकाले पूर्वजया इदं प्रथमया ॥ २

कदा न हिंसायास्त्यानदात् महाकल्पांते ति॥ महतः सहस्रयुगपरिमितस्य कल्पस्य ब्रह्मदिनस्यांते॥ अपुनर्ग्रहणाय पुनः शरीरांतरंग्रहणाय उपभुक्तम्लानपुष्पवत्॥ ४
प्राक्तनरूपया पूर्वकल्पार्जितकर्मारब्धया॥ ५ कल्याणांशुभं वां युवाभ्यामस्तु वयमिति यस्मदो द्वयोश्चैकस्मिन् बहुवचनमनुचरसाहित्यविवक्षया वा अभिमतामिति दिग्वि
शेषणं अनभिमतव्यावृत्तये नोपात्तं पूर्णात्मनो नाभिमतस्यैवाप्रसिद्धेः यस्य तु चित्तस्येदमभिमतमिदं नाभिमतमिति विकल्पो भवेत्तत्र यत्र अनभिमतं विहायाभिमत
मुपसर्पेच्चित्तं पर्यात्तोच्यमानं न किंचिद्वस्तुरूपमस्ति नस्यादभिमतां दिशमित्यस्य परमप्रेमास्पदमात्मभावावस्थानं याम इति स्वाशयसूचनाय विशेषणामुपात्तमि

महाकल्पांत आयाते भवता भार्गवी तनुः॥ अपुनर्ग्रहणायैषा त्याज्या म्लानपुष्पवत्॥ ४॥ जीवन्मुक्तपदं प्राप्तस्त्वं प्राक्तनरूपया॥ महासुरेंद्रगु
रुतां कुर्वंस्तिष्ठ महामते॥ ५॥ कल्याणमस्तु वां यामो वयं त्वभिमतां दिशं॥ न किंचिदपि यच्चित्तं यस्य नाभिमतं भवेत्॥ ६॥ इत्युक्त्वा मुंचतोर्बाष्पं तयोस्संत
रधीयत॥ तस्मांग्योरिव रोदस्योः समं मंक्षु भिरंशुमान्॥ ७॥ गतेऽतस्मिन् भगवति कृतां तेन भवितव्यतां॥ विचार्य भार्गवो मेधां नियते नियतां गतिं॥ ८॥
कालकारणसंशुष्कां भाविपुष्पसुखोदयां॥ विवेश तां तनुं बालां सुलतामिव माधवः॥ ९॥ सा ब्राह्मणी तनुर्भूमौ विवर्णवदनांगिका॥ पपात कंपिता नूर्णं
छिन्नमूला लता यथा॥ १०॥ तस्यां प्रविष्टजीवायां पुत्रतन्वां महामुनिः॥ चकाराप्यायनं मंत्रैः सकमंडलुवारिभिः॥ ११॥ सर्वनाड्यस्ततस्तत्वास्तस्याः
पूर्णा विराजिरे॥ सरितः प्रावृषीवांबुपूरपूरितकोटराः॥ १२॥ नलिनी प्रावृषीवासौ माधवि वनवालता॥ यदा पूर्णा तदा तस्याः प्रांताः पल्लविता बभुः॥ १३॥
अथ शुक्रः समुत्तस्थौ वहद्घ्राणसमीरणः॥ रसमागतसंयोगादापूर्ण इव वारिदः॥ १४॥

तिं दर्शयन्नाह न किंचिदिति॥ ६॥ तयोर्भृगुशुक्रयोः स्नेहाद्बाष्पं मुंचंतोः षष्ठी चानादरे इति भावलक्षणे षष्ठी सप्तमी वा॥ ७॥ कृतां तेन कालेन भवितव्यतामवश्यंभाविकर्मगतिं
नियतेरीश्वरेच्छाया नियतां अनिवार्यां गतिं च विचार्येत्यर्थः॥ ८॥ कालः शिशिरकालो हेमंतशिशिरकालस्तेन कारणेन निमित्तेन संशुष्कां माधवो वसंतः॥ ९॥ सा वासुदे
वाभिधाना समंगा तापसतनुः॥ १०॥ तस्यां शुक्राख्यायां पुत्रतन्वां प्रविष्टो जीवो यस्यां तथा विधायां सत्यां॥ ११॥ ततः आप्यायनानंतरं॥ १२॥ प्रांताः अंगुलिनखकेशा
दयः पल्लविताः पल्लववन्निर्गताः संतो बभुः॥ १३॥ रसस्य जलस्य मारुतस्य पुरोवातस्य च संयोगात्॥ १४॥ श्रीरामाय नमः॥ श्रीकृष्णाय नमः॥ श्री

॥ वा॰ री॰ स्थि॰

॥२६॥

॥चतुर्थः॥

स्तनितेनेवेति दृष्टांतबलान्नाम गोत्रकीर्तनपूर्वकतया अभिवादने गम्यते ॥१५॥ तन्वाः पुत्रतन्वाः शोषविशीर्णाह्नस्य पेलवया प्राक्तनीं पूर्ववद्यौवनसौंदर्यादिशालिनी
मितियावत् आकृतिं आकारं ॥१६॥ बालत्वात्तनुः सूक्ष्मा सेवलतानवीनां तनुं पुत्रदेहं ॥ तत्तदृशा अनैश्चित्तचिंतनाद्धसन्नपि चकंरेति शेषः ॥१७॥ यावदाकृतियावज्जी
वं भाविनी आवश्यकेपि निः प्रारब्धप्राबल्यादवश्यभाविनी सर्थः ॥१८॥१९॥ चक्राह्वदंपती चक्रवाकजायापती ॥ घनशब्देन तत्कालोल्लक्ष्यते बभूवतुरित्सनुषंगः

पुरोभिवादयामास पितरं पावनाकृतिं ॥ प्रथमोल्लासितो मेघस्तनितेनेव पर्वतं ॥१५॥ पिताथ प्राक्तनीं तन्वामालिलिंगाकृतिं ततः ॥ स्नेहार्द्रवृत्तिर्ज
लदश्चिरादद्रितटीमिव ॥१६॥ भृगुर्ददर्श सस्नेहं प्राक्तनीं तानवीं तनुं ॥ मत्तो जातेयमित्यास्थां हसन्नपि महामतिः ॥१७॥ मत्सुतोयमिति स्नेहो भृगु
मप्यहरत्तदा ॥ परमात्मीयता देहे यावदाकृतिभाविनी ॥१८॥ बभूवतुः पितापुत्रौ तावथान्योन्यशोभितौ ॥ निशावसानमुदितावर्कपद्माकरा
विव ॥१९॥ चिरसंगमसंबद्धाविव चक्राह्वदंपती ॥ घनागमनसस्नेहौ मयूरजलदाविव ॥२०॥ चिरकालदृढोत्कंठौ तुल्ययोग्यतयालया ॥ स्थितावत्र
मुहूर्तं तावथोत्थाय महामती ॥२१॥ समं गाद्विजदेहं तं भस्मसात्तत्र चक्रतुः ॥ को हि नाम जगज्ज्ञानमाचारं नानुतिष्ठति ॥२२॥ एवं तौ काननेतस्मि
न्यावने भृगुभार्गवौ ॥ संस्थितौ तापसौ दीप्तौ दिवीवाशशिभास्करौ ॥२३॥ चरतुर्ज्ञानविज्ञेयौ जीवन्मुक्तौ जगद्गुरू ॥ देशकालदशौघेषु सुसमौ
सुस्थिरौ ततः ॥२४॥ अथासुरगुरुत्वं स शुक्रः कालेन लब्धवान् ॥ भृगुरप्यात्मनो योग्ये पदे तिष्ठदनामये ॥२५॥ शुक्रोसौ प्रथमगमितिक्रमेण जालस्त
स्मात्स परमपदादुदारकीर्तिः ॥ स्वेनाशुस्मृतिपदविभ्रमेणापश्यादन्येषु प्रविलुलितो दशांतरेषु ॥२६॥ शुक्रस्य पुनर्जीवनसर्गः ॥१६॥०

२०॥ चिरकालवियोगात्तदृढोत्कलसमागमोत्कंठौ तयाजगत्प्रसिद्धया वर्णितरूपया ॥ तुल्यानंदभरयोग्यतया मुहूर्तं स्थित्वा उत्थाय ॥२१॥ आचारं सदाचारं तथा
चाचारपरिपालनमेव दाहादिफलं न फलांतरमत्रेत्यर्थः ॥२२॥२३॥ देशकालानां शुभाशुभादिदशौघेषु समो हर्षविषादवैषम्यरहितो यतः स्वरूपे सुस्थिरा
वित्यर्थः ॥२४॥ असुरगुरुत्वग्रहणां ग्रहाधिकारस्याप्युपलक्षणं ॥ पदे प्राजापत्याधिकारे ॥२५॥ उक्तां शुक्रगतिं संक्षिप्योपसंहरति शुक्र इति ॥ स्वेन स्वीये
न स्मृतिपदं पुनः पुनः स्मरणारूढा अप्सराललनया युक्तेन मनोराज्यविभ्रमेण ॥२६॥ इति श्रीयोगवासिष्ठे स्थि॰ शुक्रपुनर्जीवनं नाम षोडशः सर्गः ॥१६॥

॥२६॥

शुद्धानामिह चित्तानां सत्यसंकल्पतोच्यते ॥ वासना दृष्टतुल्यत्वे मेलनं च परस्परं ॥१॥ ननु शुक्रस्याप्सरःस्वर्गादिमनोराज्यस्य चिरभोगेन साफल्यमिवान्येषा
मपि तस्य तथात्वं किं न स्यादिति रामः शंकते भगवन्निति ॥ यामानोरथिकी प्रतिभासैषा यथा स्वर्गाद्यनुभूतितः सफला जाता तथा अन्येषामपि किं न भवेदित्य
न्वयः ॥१॥ प्रतिभासानां भूतोपभोगसंवादेन सफलत्वे हेतून् सत्यसंकल्पत्वयोग्याचित्तशुद्धिरूपं कालिकालोद्बुद्धपरिपक्वभाविभोगप्रदकर्मोद्भावितत्वं च तत्राद्यं शुक्र
स्य दर्शयन् समाधत्ते इयं प्रथममित्यादिना शुक्रस्य प्राक्कल्पीयसर्वदोषाणां तत्रजन्मानुष्ठितकर्मोपासनैः क्षयादस्मिन् कल्पे सेयं तनुः प्रथममुत्पन्नेत्येतत्कल्पी

॥श्रीरामउवाच॥ भगवन्भृगुपुत्रस्य प्रतिभासानुभूतितः ॥ यथैषा सफला जाता तथान्यस्य न किं भवेत् ॥१॥ श्रीवसिष्ठउवाच ॥ इयं प्रथममु
त्पन्ना सा तनुर्ब्रह्मणः पदात् ॥ शुद्धजातिर्भार्गवस्य नान्यजन्मकलंकिता ॥२॥ सर्वेषणानां संशांतौ शुद्धचित्तस्य या स्थितिः ॥ न सत्यमुच्यते से
षा विमला चिदुदाहृता ॥३॥ मनो निर्मलसत्वात्म यद्भावयति यादृशं ॥ तत्तथाशु भवत्येव यथावर्तो भवेत्पयः ॥४॥ यथा भृगुसुतस्यैष विभ्रमः प्रो
त्थितः स्वयं ॥ प्रत्येकमप्येवमेव दृष्टांतो भार्गवोः सुतः ॥५॥ बीजस्थांकुरपत्रादि स्वं च मकुरुते यथा ॥ सर्वेषां भूतसंघानां भ्रमखंडास्तथै
व हि ॥६॥ यदिदं दृश्यते विश्वमेवमेवाखिलं जगत् ॥ प्रत्येकमुदितं मिथ्या मिथ्यैवास्तमुपैति च ॥७॥ नास्तमेति न चोदेति जगत्किंचन कस्य
चित् ॥ भ्रांतिमात्रमिदं मायामुग्धे विपरिजृंभते ॥८॥

यदोषाप्रसक्तेः ब्रह्मणः पदादेवाधिकारभोगार्थं धातुः ॥ संकल्पाज्ञातत्वेन तत्सांकल्पिकदोषस्याप्रसक्तेः स्वयं कुलशुद्धा ब्राह्मणजातिरिति बीजगर्भजा
सादिदोषस्याप्यप्रसक्तेर्नासत्यसंकल्पताप्राप्तिरित्यन्येभ्योऽस्य विशेष इत्यर्थः ॥२॥ अन्येषां ब्रह्मविदामपि सत्यसंकल्पत्वे रागादिदोषक्षयप्रयुक्ता शुद्ध्या चित्त
स्य सत्यात्मभावापत्तिरेव हेतुरित्याशयेनाह सर्वेषणानामिति ॥३॥४॥ अन्येषां चित्तशुद्ध्यभावात्सत्यसंकल्पतासिद्ध्या आद्यकल्पासंभवेऽपि द्वितीयक
ल्पानुसारात्प्राक्तनभरणोद्बुद्धकर्मवासनाद्यनुगुणसुखदुःखभोगानुकूलं जगत्प्रतिभासे शुक्रसाम्यमस्त्येवेत्याशयेनाह यथेति ॥५॥ भ्रमखंडा भ्रांति
कृतद्वैतविभागाः ॥६॥ दृश्यते अस्माभिरिति शेषः प्रत्येकं प्रतिजीवं ॥७॥ परमार्थदशायां तु नास्तमिति ॥ मुग्धउन्मत्तेव ॥८॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः

एकैकस्यापि जीवस्यानेकं जगदनुभवसिद्धमित्याह यथेति। संप्रति जागरे भासोऽपरोक्षावभासस्तत्र निष्ठनीति भासस्थः अस्माकमिति शेषः तेषां संसारखंडानां संति
सम्भवितिमादावित्यर्थः अथ कथं प्रति जीवं संसाराः प्रत्येकमुदितास्तर्हि कुतो न भासंत इति चेद्भासंत एवेत्याह यथेति। सम्यक्प्रतिभासः स्फुटानुभावस्तत्स्थः अ
स्माकमिति शेषः तेषां जीवांतराणां सहस्राणि संसारा यामिति शेषः ॥९॥ तर्हि सर्वैः परस्परं संसाराः पृथक्कुतो न दृश्यंते तत्राह स्वप्नेति। यथान्यस्य स्वप्नोऽन्यैः न दृश्य
ते तद्वदित्यर्थः ॥१०॥११॥१२॥ एवमेवमुक्तवदेव ॥१३॥ व्यष्टेः परे हिरण्यगर्भेपि एवमंधपरंपरयैव संस्थिता ॥१४॥ सर्वजगदाकारेण ब्रह्मैवोदितमित्याह प्रत्येकमिति ॥१५

यथा संप्रतिभासस्थः स्वयं संसारखंडकः। तथा तेषां सहस्राणि मिथ्या दृष्टानि संति हि ॥९॥ स्वप्नसंकल्पनगरव्यवहाराः परस्परं। पृथग्यथा न
दृश्यंते तथैते संसृतिभ्रमाः ॥१०॥ एवं नगरवृंदानि नभःसंकल्परूपिणां। संति तानि न दृश्यंते मिथ्याज्ञानदृशं विना ॥११॥ पिशाचयक्षरक्षांसि
संत्येवं रूपकाणि हि। संकल्पमात्रदेहानि सुखदुःखमयानि च ॥१२॥ एवमेव वयं चेमे संपन्ना रघुनंदन। स्वसंकल्पात्मकाकारा मिथ्यासत्यत्वभावि
ना ॥१३॥ एवंरूपैव हि परे विद्यते सर्गसंततिः। नवास्तवी वस्तुतानु संस्थितेवमवस्तुनि ॥१४॥ प्रत्येकमुदितं विश्वमेवमेवमुधैव हि। वनगुल्म
करूपेणावसंतैकरसो यथा ॥१५॥ प्रथमोयं स्वसंकल्पः प्रथमभ्यागतो यथा। तथा तिपरमार्थेन दृष्टेनेत्थं विभाव्यते ॥१६॥ प्रत्येकमुदितं चित्तं स्व
स्वभावोदरस्थितं। इदमित्थं समारंभं जगत्सत्यं न्विनश्यति ॥१७॥ प्रतिभासवशाद्स्ति नास्तिव स्वावलोकनात्। दीर्घस्वप्नो जगज्जा
लमालानं चित्तदंतिनः ॥१८॥ चित्सत्तैव जगत्सत्ता जगत्सत्तैव चित्तकं। एकाभावाद्द्वयोर्नाशः सच सत्यविचारणात् ॥१९॥ शुद्धस्य प्रतिभासो
हि सत्योभवति चेतसः। प्रमार्जनादिव मणेर्मलिनस्येह युक्तितः ॥२०॥

प्राथमिकः स्वसंकल्प एव जगदाकारप्रथामभ्यागत इति कथं ज्ञायते तत्राह प्रथम इति। तत्त्वदर्शनेन ज्ञायत इत्यर्थः ॥१६॥ स्वस्य स्वभावः अनाद्यज्ञानं तदुदरस्थितं चित्तमे
व जगदिति पश्यति स्वयमित्यर्थः ॥१७॥ तथा च प्रतिभासकाले क्वैव जगत्सत्ता न वास्तवाधिष्ठानदर्शने स्थातुमर्हतीत्याह प्रतिभासेति ॥१८॥ तर्हि जगति किं प्राक्
प्रतिभाता सत्ता असत्ता सतीनेत्याह। चित्सत्तैवेति। चित्तसत्तैव हि जगदिति पाठे आलानं चित्तदंतिन इति यदुक्तं तदाशयं स्फुटयति। चित्तसत्तैवेति तत्कृत्स्न
मात्। एकाभावादिति ॥१९॥ चित्तसत्तया जगत्सत्ताकदर्शनेति चेत् शुद्धचित्तानां सत्यसंकल्पोऽस्य वस्तुनिदृष्टेत्याशयेनाह शुद्धस्येति। मणेः प्रमार्जनात्मणिकार्यस्य प्रक्षा
शविषनिर्हरणादेरिवेत्यर्थः। युक्तितः उपायतः ॥२०॥०

पकदृढाभ्यासपेक्षा न्यद्रागद्र्याभ्यासः प्रतिभास्वच्छताप्रयुक्तभास्वरता ॥ २१ ॥ सुवर्णशोभनवर्णरंजकद्रव्यं कुलसुवर्णमिलवत्संशुके मलिनवस्त्रे ॥ एकाग्रदृष्टिरेव्हे
तात्मज्ञानं ॥ २२ ॥ वासनानुसारी जगत्क्रम इत्युक्तं तत्रानुभूते स्वर्गाप्सरो जन्मपरंपरादिवैचित्र्यक्रमे वासनानुरूपबीजासंभवाच्छुकस्य कथं तदारोपक्र
मः संपन्न इत्याशयेन रामः पृच्छति ॥ प्रतिभासात्मनीति ॥ शुकस्य चेतसश्चित्तस्य प्रतिभासात्मनि प्रतिभासिककल्पनात्मके जगति ॥ कथं केन हेतुना जाताः
सोदयास्तमया इत्यनेन प्रतिभासोदयास्तमययोः प्रतिभासकाले प्रहणायोगाद्यप्रतिभासकाले चतयोरप्यनुभवासिद्धेः सुतरां तद्गोचरवासनासिद्धि

चिरमेकदृढाभ्यासाच्छुद्धिं प्रविततिचेतसः ॥ अनाक्रांतस्य संकल्पैः प्रतिभोदेतिचेतसः ॥ २१ ॥ सुवर्णं नस्थितिं याति मलवत्संशुको यथा
एकाग्रदृष्टिः स्थितिं याति न म्लाने चित्तके तथा ॥ २२ ॥ श्रीराम उवाच ॥ प्रतिभासात्मनि जगत्येते कान्तक्रियाक्रमाः ॥ सोदयास्तमया जा
ताः कथं शुकस्य चेतसः ॥ २३ ॥ श्रीवसिष्ठ उवाच ॥ यादृग्जगदिदं दृष्टं शुकेनापितृशास्त्रतः ॥ तादृक्तस्य स्थितं चित्ते मयूरांडे मयूर
वत् ॥ २४ ॥ स्वभावकोशस्थमिदं तद्देतेन क्रमोदितं ॥ बीजे नांकुरपत्रादिलतापुष्पफलं यथा ॥ २५ ॥ जीवो यद्वासनाबद्धस्तद्देवांतः प्र
पश्यति ॥ स्वरूपं चात्र दृष्टांतो दीर्घस्वप्नस्थिदं जगत् ॥ २६ ॥ प्रत्येकमुदितो राम नूनं संसरति स्वं उक्तः ॥ रात्रौ सैन्यनरः स्वप्नजालवत्स्वात्म
॥ नि स्फुटः ॥ २७ ॥

स्तदसिद्धौ क्रमस्याप्यसिद्धिरित्याशयः सूचितः ॥ २३ ॥ पितृतः पितृजन्यचक्षुरादिवशात्पितृवाक्याच्च शास्त्रतः श्रुतिस्मृत्यादिभ्यश्च यादृक्यादृशोत्पत्तिनाशा
दिविशिष्टं स्वलीसवगतं ऐहिकं पारलौकिकं च ॥ तस्य चित्ते तादृगेव संस्काररूपेण स्थितं तथा च पितृशास्त्रादिप्रमायां तदाभासैरेव वासनोदयास्तस्याप्यासीदे
वेत्यर्थः उत्पत्तिनाशक्रमगोचरसंस्कारः साक्षिप्येव सेत्स्यतीति भावः ॥ २४ ॥ स्वभावकोशश्चिद्दधिष्ठिता स जीवाश्र अविद्या एतेन पितृशास्त्रनिमित्तेन ॥ २५ ॥ स्वरूपं
स्वप्ने स्वकल्पितं शरीरं ननु नायं स्वप्नः नेत्याह दीर्घेति ॥ २६ ॥ यथा सैन्यस्थानराः दिवा सैन्यवासनावासिताः रात्रौ स्वप्ने प्रत्येकं सैन्यं स्वस्ववासनाकल्पितं नाना
॥ सैन्यं पश्यंतोपि पिपैक्यं मन्यते तद्वदित्यर्थः ॥ २७ ॥ ६९

नन्वेवंसतिनरस्तदीयसंसारस्यपरैर्नद्रष्टुं शक्यइतिगुरूणांशिष्योद्धारायप्रवृत्तिः शास्त्रप्रणयनंचस्वभ्रकृतपरोपकारइवनशिष्यंप्राप्नुयात्तथाचोपादेशलाभा
द्धिष्यस्यानिर्मोक्षप्राप्तौतुल्ययुक्त्यागुरोरपिस्वगुरोरुपदेशलाभादनिर्मोक्षदोषानिर्मोक्षइतिमूलघातिन्येवेयंकल्पनेत्याशयेनरामःपृच्छतिएषइति॥ यदिन
मिलतितदोक्तदोषः यदिमिलतितर्हिसाधारणोयंसंसारोनैकैकस्यज्ञानेनबाधितुंशक्यइत्युभयतःपाशारज्जुरित्याशयः॥२८॥ दोषद्वयास्पर्शीयव्यवस्थेयो
त्तरमाहमलिनमिति अयंभावः मलिनंहिमनःशुद्धेमनसिमिथःपरस्परंसंश्लेषंमेलनंनार्हतिकुतः यतोअवीर्यंशुद्धमेलनयोग्यसौक्ष्म्यसामर्थ्यहीनं

॥श्रीरामउवाच॥ एषसंसृतिखंडोयोमिथःसंमिलतिस्वयं॥ नोवामिलतितन्मेत्वंयथावद्वक्तुमर्हसि॥ २८॥ श्रीवसिष्ठउवाच॥
मलिनंहिमनोवीर्यंनमिथःश्लेषमर्हति॥ अयोऽयसिसंतप्तेशुद्धेनसंलुलीयते॥ २९॥ चित्ततत्वानिशुद्धानिसंमिलंतिप
रस्परं॥ एकरूपाणितोयानियांत्यैक्यंनाविलानिहि॥ ३०॥ शुद्धिर्हिचित्तस्यविवासनत्वमभूतसंवेदनरूपमेकं॥ तस्याशु
शुध्याभवतिप्रबुद्धस्तन्मात्रयुक्त्यापरसंगमेति॥ ३१॥ इतिश्रीयोगवासिष्ठेस्थितिप्रकरणेमनोराज्यसंमेलनंसर्गः॥ १७॥

ततंकषायपाचनशुद्धंतुसंतप्तेअयसिसंतप्तमयइवलीयतेऐक्यंगच्छतियतस्तत्समाधिज्ञानाभ्यस्तसौक्ष्म्येणसवीर्यमित्याशयः॥ तथाचसवीर्य
त्वाद्देवानांपरकीयस्वप्नप्रवेशेनवरदानुग्रहइवशिष्यमनः॥ कृत्स्नंजगदंतःप्रवेशनबोधनसमर्थमेवेतिनाद्योदोषः साधारणत्वानभ्युपगमान्नद्वितीय
दोषोपीतिभावः॥ २९॥ ३०॥ चित्तशुद्धेःपरांकाष्ठांदर्शयंस्तत्साध्यैवतत्वज्ञतादृढपरमपदप्राप्तिश्चप्रतिष्ठिताभवतिनान्यथेत्युपसंहरति॥ शुद्धिर्हीति॥ वि
वासनत्वमासंतिकवासनाक्षयएवचित्तस्यपरमाशुद्धिरित्यर्थः॥ तस्यचित्तस्यतन्मात्रस्यतादृशचिन्मात्रपरिशेषलक्षणाशुद्धिमात्रस्ययुक्त्यातल्लाभेन
परेणपरमकैवल्यात्मनासंगंमोक्षमेतीतियावत्॥ ३१॥ इतिश्रीयोगवासिष्ठेस्थितिप्रकरणेसप्तदशःसर्गः॥ १७॥ श्रीरामायनमः॥ श्रीकृष्णाय॰

मलिनानां तु मलिनैर्योगो वस्त्रादिविशोधनः ॥ तन्मात्रयुक्तिर्विज्ञस्य परसंगश्च वर्ण्यते ॥ ७ ॥ शुद्धमनोराज्यस्य शुद्धैर्मलिनैश्च संमेलनप्रकार उक्तः ॥ ३ ॥ दा
नीं मलिनानां मलिनैर्मेलनप्रकारं जाग्रदाद्यवस्थानां द्रष्टृदृश्यादीनां च विशोधनेन चरमश्लोकोक्तं तन्मात्रयुक्तिं तया परसंगप्राप्तिं च व्युत्पादयितुं प्रागुक्तं
जाग्रदादिप्रपंचभेदमसाधारणस्वात्मप्रतिभासाधीनप्रतिभासेन साधयति ॥ सर्वेषां जीवानां स्वकल्पितसंसृतिरूपेषु समष्टिं संसृतेः खंडेषु सकलेषु भूता
त्मनः स्थूलस्य बीजात्मनः सूक्ष्मस्य कलनं कल्पालिंगभावोन्मुखता तदात्मनः कारणरूपस्य प्रपंचस्य प्रतिजीवं भिन्नतायोक्तासास एव तन्मात्रः प्रतिभास
तेनान्यादिति तन्मात्रप्रतिभासः स्वप्रकाशचिदेकरसः आत्मा तस्य प्रतिभासेन प्रतिनियताकारकल्पनया न वस्तुच्छेत्यर्थः ॥ १ ॥ तत्कुतो वगम्यते तत्राह प्रवृत्तिरि

॥ श्रीवसिष्ठ उवाच ॥ सर्वसंसृतिखंडेषु भूतबीजकलात्मनः ॥ तन्मात्रप्रतिभासस्य प्रतिभासेन भिन्नता ॥ १ ॥ प्रवृत्तिर्वा निवृत्तिर्वा तन्मात्रावृत्ति
पूर्वकं ॥ सर्वस्य जीवजातस्य सुषुप्तादनंतरं ॥ २ ॥ प्रवृत्तिभाजो ये जीवास्ते तन्मात्रप्रदर्शिनः ॥ तन्मात्रैकतया सर्गान्मिथः पश्यंति कल्पितान् ॥ ३ ॥
तन्मात्रैक्यप्रणालेन चित्राः सर्गजलाशयाः ॥ परस्परं संमिलंति घनतां यांति चाभितः ॥ ४ ॥ केचित्पृथक्स्थिता गताः पृथगेव लयं गताः ॥ केचि
न्मिथः संमिलिता जगद्गुंजा स्थिता स्तताः ॥ ५ ॥ जगद्गुंजासहस्राणि यत्रासंख्यान्यणावणौ ॥ अपरस्परलग्नानि काननं ब्रह्म नाम तत् ॥ ६ ॥

ति यतः सर्वस्य जीवजातस्य सुषुप्तादनंतरमव्यवहितोत्तरक्षणेऽज्ञानादिद्वैतव्यवहाराय या प्रवृत्तिर्या च स्वप्ने जागरे च वनन याया भिमुखी प्रवृत्तिस्ततो निवृत्तिः
परा वृत्तिर्वा सा सर्वापि तन्मात्रस्य चिदेकरसस्य या आसमंतादावृत्तिर्व्याप्तिस्तत्पूर्वकमेव प्रसिद्धा अतो हेतोरित्यर्थः ॥ २ ॥ प्रवृत्तिं भजंते व्यवहरंति ये ये जीवास्ते स
र्वेपि तन्मात्रैकप्रदर्शिनः अर्थप्रकाशवंतः नान्येन ज्योतिषा ॥ अस्त्वेवं तथापि कथमन्यस्यान्यमनोराज्यप्रपंचदर्शनसिद्धिस्तत्राह ॥ तन्मात्रेति तन्मात्रस्य स
र्वसाक्षिचिन्मात्रस्योपाधिमेलनेन ब्रह्मैक्यदार्ढ्येन वा एकतया एकलक्षणया मिथः परस्परसर्गान्पश्यंतीति नान्यथेत्यर्थः ॥ ३ ॥ उक्तलक्षणे चिन्मात्रैक्यप्रणा
लेन एकमार्गेणेति यावत् घनतां परकीयव्यवहारसंवादादिना ससनाम्नांति दार्ढ्यमतिनिविडतां ॥ ४ ॥ पृथक्सर्गांतरमेलनं विनैव केचिन्मिथः संवलिताः
एवं रीत्या जगत् ब्रह्मांडं तत्क्षणगुंजा प्रसिद्धा ॥ ५ ॥ अणावणौ प्रतिपरमाणु ब्रह्ममायाशबलं काननं वनं ॥ ६ ॥ श्रीरामाय नमः ॥ श्रीकृष्णाय नमः ॥ श्री

एताः जगज्जीवाः घनतां निबिडीभावात् साधारणव्यवहारयोग्यतां किं सर्वभावाः सर्वेषां दर्शनयोग्याः नेत्याह यद्यदिति। यावतां प्राणिनां यादृशकर्मभोगा
नुकूलं यत्र यथारूढं तत्र तावदेव पश्यति नेतरत् देशांतरीयं लोकांतरीयमित्यर्थः॥७॥ अत एव चित्तभेदस्तदुपाधिजीवभेदश्च सिध्यतीत्याशयेनाह वर्तमान
मिति॥ एकस्य मनसो मनोंतरं वर्तमानं मनोराज्यं प्रति नैष्फल्यं तद्दर्शनोपभोगाद्यसमर्थता तल्लक्षणां निष्फलतां समुपागताया स्थितिः सैव वृत्तिर्विच्छित्तिर्मनो
भेदहेतुर्ज्ञेयेत्यर्थः॥ तस्या एव सकाशात् जीवपरंपरा जीवभेदा अपि ज्ञेया इत्यनुषज्यते॥८॥ एवं विभिन्नमनोराज्यरूपाणां सर्गाणां तुल्यकर्मवासनादी
नां युगपत्फलोन्मुख्येन मेलनेन व्यष्टिसमष्टिस्थूलदेहसत्तापि निरूढा ज्ञेया न हि स्मृतौ तु देहाभाव एव स्वभाविकइत्यर्थः॥९॥ स्थूलदेहभावे निरूढे स्वाभाविकात्मस्थि
तिर्विस्मृता काल्पनिकी सांसारिकी स्थितिः स्वीकृता चेत्याह देहत्वेति॥ चिदेव हेम चिद्धेम तेन विस्मृता तत्तया अशुद्धा केवला कटकता मिता कटकत्वं सदृशीं संसार

मिथः संमिलने नैता घनतां समुपागताः॥ यद्यद्यत्र यथारूढं तत्तत्पश्यति नेतरत्॥७॥ वर्तमानं मनोराज्यं नैष्फल्यं समुपागता॥ साहृत्ति
र्मनसो ज्ञेया तस्या जीवपरंपराः॥८॥ परस्परं संमिलितानां सर्गाणां रूढभाविनां॥ देहसत्ता परं रूढा देहभावस्तु विस्मृतिः॥९॥ देहत्वपरिरू
ढत्वाच्चिद्धेम्ना विस्मृतात्मना॥ मिथ्यानुभूता विद्यानुअशुद्धा कटकता मिता॥१०॥ यथा शुद्धः प्राणमरुत्सर्प्राणादिवेदनात्॥ वेत्ति वेद्यं मनोराज्यं
तथा सर्गांतराश्रयं॥११॥ सर्वेषां जीवराशीनामात्मावस्थात्रयं श्रितः॥ जाग्रत्स्वप्नसुषुप्त्याख्यमत्र देहो न कारणं॥१२॥

लक्षणा अविद्या मिथ्यैवानुभूतेत्यर्थः॥१०॥ एवमशुद्धानामपि परस्परं क्वचिन्मेलनमुपपाद्य शुद्धानां परमनोराज्यवेदने दृष्टांतमाह यथेति॥ यथात्रत्यो गाभ्यासेन
शुद्धः प्राणमरुत्परकाय प्रवेशेन परप्राणानां आदिपदात्तदीयदेहेंद्रियाणां च स्ववश्यतावेदनात्तैर्वेद्यं शब्दादि वेत्ति तथा शुद्धं मनोपि सर्गांतराश्रयं मनोरा
ज्यं वेत्तीत्यर्थः॥११॥ ननु यदि मनोराज्यानां परस्परसंमेलनादेव स्थूलदेहसत्तारूढा तर्हि संमिलने देहभावान्नेत्रस्थं जाग्रतं विद्यात्कंठे स्वप्नं समाविशेत्॥ सु
षुप्तं हृदयस्थं तु तुरीयं मूर्धि संस्थितमिति श्रुतिबोधित देहप्रदेशभेदाधीना जाग्रदाद्यवस्था अपि न स्युरित्याशंक्याह सर्वेषामिति॥ जीवत्वस्वभावादेवावस्थात्र
यकल्पना न देहमपेक्ष्य जाग्रत्कल्पनां विना देहासिद्धावन्योन्याश्रयापत्तेः श्रुतिस्तु परदृष्टिसिद्धदेहानुवादेन तदेकदेशदृश्यत्वान्न जाग्रदादिप्रपंचवि
स्तारः सत्सइ एवं परान देहस्य तद्धेतुत्वपरेति भावः॥१२॥ श्रीरामचंद्रो जयति॥ श्रीकृष्णपरब्रह्मणे नमः॥ श्रीवासुदेवाय नमः॥ श्रीविश्वेश्वराय॰

अंशएव वीच्याद्यात्मकं प्रथते इति न तद्दर्शने सति ततः पृथग्वीच्यादिवस्त्विव जीव एवावस्थात्रयात्मेति पर्यालोचनेपि न जीवादन्यादेहतावस्कभूता परिशिष्य
तइत्याह ॥ एवमिति ॥ १३ ॥ एवमेव बुद्धस्तत्वविस्मृ सुषुप्तस्यांतमवसानभूतंयच्चतुर्थपदं स्वरूपं तत्र स्थितं चित्कलापदं चेतत्यैककरसस्वभावमासाद्य ज्ञानेन प्राप्य जीवभावा
न्निवर्तते ॥ यस्तु मूढः अनतत्वविस एव स्वकल्पनया पुनर्देहाद्याकारकल्पनारूपे सर्गे प्रवर्तत इत्यर्थः ॥ १४ ॥ तर्हि किं ज्ञाज्ञयोः सुषुप्तिरपि भिद्यते नेत्याह द्वयोरिति एक
स्वरूपैव सुषुप्तिरिति शेषः ॥ स्वस्याज्ञस्यापि सौहार्दस्य संप्रसादस्य श्रुतौ निरतिशयानंदमोक्षनिदर्शनत्वेनोपन्यासात् ॥ तर्हि सैकस्य सर्गबीजमन्यस्य नेति कुतो विशे
षस्तत्राह अज्ञ इति तयोर्मध्ये अज्ञः सुषुप्तः असंबुद्धो वास्तवात्मज्ञानहीनो देहाद्यात्मताभ्रमवासनावासितस्तस्मादेव विशेषात्स जीवः सर्गभागित्यर्थः ॥ १५

एवमात्मनि जीवत्वे सत्यवस्थात्रयात्मनि ॥ न चांशसी वीचित्वमस्मिन्कचति देहता ॥ १३ ॥ चित्कलापदमासाद्य सुषुप्तांतपदस्थितं ॥ बुद्धो निवर्त
ते जीवो मूढः सर्गे प्रवर्तते ॥ १४ ॥ द्वयोरेकस्वरूपैव स्वसौहार्दनिदर्शनात् ॥ अज्ञः सुषुप्तो संबुद्धो जीवः कश्चित्स सर्गभाक् ॥ १५ ॥ सर्वगत्वाच्चितः
कश्चित्स रससर्गेण नीयते ॥ सर्गे सर्गे पृथग्रूपं संति सर्गांतराण्यपि ॥ १६ ॥ तेष्वप्यंतस्थसर्गौघाः कदलीदलपीठवत् ॥ सर्वसर्गांतरा दूरपत्रपीव
रवृत्तिमत् ॥ १७ ॥ स्वभावशीतलं ब्रह्मकदलीदलमंडपः ॥ कदल्यामन्यता नास्ति यथा पत्रशतेष्वपि ॥ १८ ॥ ब्रह्मत्वेन्यता नास्ति तथा सर्गशतेष्वपि
बीजमेव रसात्फुल्लं भूत्वा बीजं पुनर्भवेत् ॥ १९ ॥ तथा ब्रह्ममनो भूत्वा बोध[illegible] परं भवेत् ॥ रसकारणकं बीजं फलभावेन नष्टं मते ॥ २० ॥ ५१ ॥

तत्राप्यवांतरविशेषमाह सर्वगत्वादिति नीयते अंतः प्रवेश्यते पृथग्रूपमिति क्रियाविशेषणं ॥ १६ ॥ कदलीदलस्य पीठान्याधारभूतस्तंभकोशास्तद्वदंतरतः संती
त्यर्थः ॥ ब्रह्म तु सर्वसर्गेष्वप्येकरूपेण सन्निहितं कदलीवनमंडपवदित्याह सर्वेषामांतरांतरसर्गाणां बाह्यसर्गांतराणां च अदूरं बहिर्विरलीभूतैः पत्रैरिव पीवरवृत्तिमत्
इत्यादिति परेणान्वयः ॥ १७ ॥ दृष्टांतं विवृणोति कदल्यामिति ॥ १८ ॥ इत्थं जगद्भावापन्नस्य ब्रह्मणः पुनः स्वभावापत्तौ दृष्टांतमाह बीजमिति यथा वटादिबी
जमेव रसात् जलादिसंसर्गात्फुल्लं वृक्षादिभूतात द्विटप्रसरफलादिद्वारा पुनः प्राक्तनबीजभावेन विपरिवर्तते तथा ब्रह्मापि कामकर्मादिरससंप
र्कान्मनो भूत्वा जन्ममरणादिकल्पना अधिकारिदेहप्राप्तौ श्रवणमननादिक्रमेण बोधोदयात्प्राक्तनब्रह्मभावेन विपरिवर्तत इत्यर्थः ॥ १९ ॥ यदि तस्यापि
बीजस्य रससंपर्के पुनर्वृक्षभाववन्मुक्तस्यापि पुनर्जीवभावः स्यादिति बीजमदृष्टांतमन्यसे तर्हि रस एव दृष्टांतोस्त्वित्याह रसकारणकमिति ॥ २० ॥

एवं च सति ब्रह्मणः कारणं किं स्यादिति शंकायाम् अपि न प्रसर इत्याह रसस्येति ॥ २१ ॥ ननु पनसकांड वृक्षपुष्पफलादीनां सरसत्वादर्शनात्तत्स्वभावभूतो रसस्ते षां कारणमिव जगत्कारणं ब्रह्मापि जगद्धर्मस्वभावविशेष एवं स्यात् तथा च ब्रह्मकारणतासाधनं स्वभावकारणतावादेनार्थांतरितं स्यादित्याशंक्याह स्वभा व इति न युज्यते कुतः ॥ निर्विशेषत्वात् कारणस्य कार्यसहोत्पत्तिकासाधारणधर्मविशेषरूपत्वात् स्वभावरूपत्वायोगादित्यर्थः ॥ २२ ॥ न हि चिद्ब्रह्ममात्रे ण कारणेन जगति जाड्यादिस्वभावत्वासिद्धेर्जाड्यदुःखादिस्वभावं ब्रह्मणि जगतः कारणांतरं वै चिच्यहेतू निनिमित्तांतराणि चाभ्युपेयानि स्युरिति चेन्नेत्याह नेति ॥ निर्विकाराद्वितीयासंगत्वाद्वस्तुतोऽकारणे सर्वप्रपंचारोपस्यादिकारणे ब्रह्मणि कारणानिमित्तादिवस्त्वपि न संभवतीति न स्वभाववि रो

ब्रह्मकारणको जीवो जगद्रूपेण जृंभते ॥ रसस्य कारणं किं स्यादिति वक्तुं न युज्यते ॥ २१ ॥ ब्रह्मणः कारणं किं स्यादिति वक्तुं न युज्यते ॥ स्वभावो निर्विशेषत्वात् सरो वक्तुं न युज्यते ॥ २२ ॥ नाकारणो कारणादिपरैव स्वादिकारणो ॥ विचारणीयः सारो हि किमसारविचारणैः ॥ २३ ॥ बीजं जह द्वीजवपुः फली भूतं विलोक्यते ॥ ब्रह्मा जहन्निजवपुः फलं बीजं च संस्थितं ॥ २४ ॥ बीजस्याकृतिम त्सर्वं तेनानाकृति मत्सदं ॥ न युज्यते समीकर्तुं तस्मान्नास्त्युपमा शिवे ॥ २५ ॥ स्वमेव जायतेऽस्वाप्नं न च तज्जायतेऽन्यतः ॥ अतो न जातं नाजातं विद्धि ब्रह्म न तो जगत् ॥ २६ ॥ दृश्यं पश्यन् स्वमात्मानं न द्रष्टा संप्रपश्यति ॥ प्रपंचाक्रांतसंवित्तेः कस्योदेति निजा स्थितिः ॥ २७ ॥

धादेवेत्युक्तकारणं विवर्तरूपं जगदन्नत्वमेवेत्यर्थः तर्हि जडान्तदुःखरूपस्य जगतो जडान्तदुःखमेवादिकारणमुचितमिति तदेव विचार्यतां किमकारकं ब्रह्म विचारेणेति चेत्तत्राह ॥ विचारणीय इति ॥ असारविचारणैः किं कः पुरुषार्थ इत्यर्थः ॥ २३ ॥ अकारणमादिकारणमिति यदुक्तं तदाशयोद्घाटनाय प्रागुक्तबी जदृष्टांतापेक्षया ब्रह्मणि यो विशेषस्तमाह बीजमिति बीजं बीजवपुर्बीजाकारं जहत् त्यजत् अंकुरादिफली भूतं लोके विलोक्यते न तथा ब्रह्मेति अत एव तद्विवर्तोपादानं स्वसमसत्ताककार्याभावादकारणमित्युक्तमित्याशयः ॥ २४ ॥ विशेषांतरमपि दर्शयन्निर्विशेषस्योपचारादेवोपमोपन्यस्तानवस्तुवृत्त्येत्याह ॥ बीजस्येति ॥ सर्वस्वरूपं अवयवगुणादि च आकृतिमत् इतरव्यावर्तकजातिसंस्थानादिमत् तेन बीजेन समीकर्तुं तुलयितुं ॥ २५ ॥ तर्ह्युपमोपचारस्य किंफ लं तदाह स्वमेवेति ॥ अस्वाप्नं अनात्माभासं ॥ २६ ॥ यदि स्वमेव जगदाभासं पश्यति तर्हि कुतोऽस्यानर्थप्राप्तिर्यतस्तत्परिहाराय शास्त्रं सफलं स्यात्तत्राह दृश्यमिति

भ्रांस्फुरद्ये स्वाभाविकस्याप्यस्य पूर्णानंदस्वप्रकाशत्वादृष्टासंपन्नेत्याशयेनाह मृगतृष्णेति विदग्धताविद्वत्ता ॥२८॥ निर्मलस्वप्रकाशसर्वगतस्वभावत्वात्स
र्वेषां सर्वदा स्फुटदर्शनार्होप्यात्मा कदापि केनापि तत्त्वतो न वीक्ष्यते अहो बहिर्मुखानां भ्रांतिप्राबल्यमित्याह ॥ आकाशेति ॥ यथा नेत्रं पराक्षवणत्वात्स्वमात्मानं
न पश्यति तद्वत् ॥२९॥ ननु बहिर्मुख आंतरं स्वमात्मानं न पश्यतु बाह्यानां तु परेषामात्मानं पश्यत्विति चेन्नेत्याह ॥ आकाशेति ॥ निजात्मानमिव तेषां सर्वेषां बाह्या
नामप्यात्मानं पारमार्थिकं रूपं न पश्यति यथा अभ्रमः निःशेषनिवृत्तभ्रांतिः मुक्तः दृशीभूतं दृश्यतापन्नं द्वैतं न पश्यति तद्वदित्यर्थः ॥३०॥ तथा च दृश्यं दृश्यते
यान द्रष्टव्यं किंतु द्रष्टा तत्र येति भावः ॥३१॥ ननु प्रमातुरांतर आत्मा विषयाभिमुखेन तेन न दृश्यतां घटादिविषयाधिष्ठानभूतस्तु बहिर्व्याप्त्या दृश्यतां तत्र प्रस

॥ मृगतृष्णाजलभ्रांतौ सत्यां कैव विदग्धता ॥ विदग्धतायां सत्यां तु कैवासौ मृगतृष्णिका ॥२८॥ आकाशविशदो द्रष्टा सर्वगोपि न पश्यति ॥ तेषामिव
॥ निजात्मानं दृशीभूतमिवाभ्रमः ॥३०॥ आकाशविशदं ब्रह्म यत्तेनापि न लक्ष्यते ॥ दृश्ये दृश्यतया दृष्टे तस्याल्पाः सुदूरतः ॥३१॥ तादृग्भावस्वरूपेणावि
॥ नायत्र न दृश्यते ॥ तत्रापि दूरोदस्तेव द्रष्टुः सूक्ष्मस्य दृश्यता ॥३२॥ दृश्यं च दृश्यते तेन द्रष्टारामनदृश्यते ॥ द्रष्टैव संभवत्येको न तु दृश्यमिहास्ति हि ॥३३॥०
॥ द्रष्टा सर्वात्मको दृश्ये स्थितः स्वैहैकेव द्रष्टृता ॥ सर्वशक्तिमता राज्ञा यद्यत्संपद्यते यथा ॥३४॥ तत्तथानुभवत्याशु स एवोदेति तत्तथा ॥ यथा मधुरसोल्लासः खं
॥ ओभवत्विभासुरः ॥३४॥

अनु खलु तस्यानुपयोगादित्याशंक्याह ॥ नादृगिति ॥ यत्र घटादिविषयप्रदेशोवस्थस्य वछिन्नस्य द्रष्टुर्वृत्ते र्बाह्यघटाद्याकारानुरंजनात् स्वस्यापि तादृग्भावस्वरूपे
पा घटादिद्रष्टुं न शक्यते तत्रापि द्रष्टुर्दृश्यता दर्शनार्हता दूरोदस्ता दूरं निरस्तेव ॥ तत्र हेतुगर्भं विशिनष्टि ॥ सूक्ष्मस्येति ॥ विषयवृत्तितादूप्येनुरक्तस्वरूपाद्विविच्य
सूक्ष्मचिन्मात्रस्यावधारणाशक्तेरिति भावः ॥३२॥ यदि सर्वथा द्रष्टा न दृश्यते तर्हि कथं तन्मात्रयुक्त्या तल्लाभसिद्धिरित्याशंक्य तदुपायमाह ॥ द्रष्टैव संभवती
त्यादिना ॥३३॥ कुतो नास्ति न दाह द्रष्टेति दृश्यप्रदेशास्थितस्य द्रष्टुस्तेत्रातिप्रसंगात् सर्वभूताधिवासः साक्षी चेत्यादिश्रुतेभ्यः सर्वात्मदृश्ये स्थितः स्वद्रष्टा वश्यं वाच्यः ॥ ए
वं चेतस्य स्वात्मभूते सर्वस्मिन् दृश्ये स्वात्मनि क्रियाविरोधात् कुतो द्रष्टृतेत्यर्थः ॥ यदि तु सर्वशक्तिमहात्म्य समर्थेत राजेव दृश्यं संपाद्य तत्तथानुभवन् द्रष्टा भविष्यतीति ब्रूयास्तर्हि स्वातिरिक्तो
पकरणापेक्षत्वे शक्तिसंकोचापत्तेरविकलः स एव तत्तदृश्यरूपेण तथा तथोदेतीति पक्षस्यैव परिशेषान्न द्रष्टुरन्यस्य तिरिक्तवस्तुसिद्धिरित्याशयेनाह ॥ सर्वशक्तिमतेति
॥३४॥

॥ वा॰री॰ टि॰ ॥२१॥

२

उक्तेर्थे सम्मतं संदृष्टांतमुपवर्ण्य प्रकृते योजयति यथेत्यादिना मधुरैरसस्येक्षुकारसस्य प्रसिद्धमधुररूपस्य वा रसस्य देशविशेषे मधुनोपि खंडशर्करोत्पत्तिप्रसिद्धेः खंडः खंडशर्करा ॥३५॥ मधुमाक्षिकाहृतैः फलपुष्पादिरसैः रूनतः अथवा मधुररसो वसंतकाले वृक्षप्रविष्टरसः फलपुष्पलतात्मना उन्नतो वृन खंडो यथा भवति तद्वदिति व्याख्येयं ॥३६॥३७॥ आत्मनि अहंतादिर्भौमे रसे लवणादौ खंडकलमिवेति प्रतिज्ञातस्यार्थस्य नानाखंडसहस्रौघैरित्यादिचित्तथोदेसंत्र

लं तथानुभवत्यात्मस एवोदेति तत्तथा ॥ यथा मधुररसोल्लासः खंडो भवति शर्करः ॥३५॥ रसनाम जहत्त्वैव फलपुष्पलतोन्नतः ॥ चिदुल्लासस्तथा जीवो भूयो भवति देहकः ॥३६॥ चिन्मात्रतां नाम जहद्देववदर्शनाद्दृशयीं ॥ अंतः स्वानुभवत्येव जगत्स्वप्नं प्रपश्यति ॥३७॥ अहंतादिरसो भौमे खंडकलमिवात्मनि ॥ नानाखंडसहस्रौघैरद्वितीये निजात्मनः ॥३८॥ यथोदेति रसो भौमश्चित्तथोदेति संभ्रमा ॥ चिद्रसोल्लासवृक्षाणां कचतां मात्मनात्मनि ॥३९॥ दृश्यशाखाशताढ्यानां मिलतां लोकगम्यते ॥ खंडः प्रत्येकमेवायं यथा रसचमत्कृतिं ॥४०॥ स्वादयत्येवमेषापि पृथक्पश्यति संस्थितिं ॥ यायोदेति यथा यस्या जीवशक्तेः स्वसंस्थितिः ॥४१॥ तां तां तथैति सा स्वात्मचिद्रूपभुवनस्थितिं ॥ जीवसंसृतयः काश्चित्संमिलंति परस्परं ॥४२॥ स्वयं विहृत्य संसारे शाम्यंति चिरकालतः ॥ सूक्ष्मया परया दृष्ट्या तं पश्य ज्ञानचेतसा ॥४३॥ जगज्जालसहस्राणि परमाण्वंतरेष्वपि ॥ चितेन भासि पाषाणे ज्वालायामनिले जले ॥४४॥ संति संसारलक्षाणि तिलतैलमिवाखिले ॥ बुद्धिमेति यदा चेतस्तदा जीवो भवेद्धितिः ॥४५॥०

मभिसंतमुपपादनं निजात्मनो लवणादेरद्वितीये रश्मिन्नैः ॥३८॥ नानाखंडखंडसहस्रौघैरित्यनेन ब्रह्मांडानां संदर्शितमित्याशयेनाह चिद्रसेति ॥३९॥ तेषु तेषु भोगचमत्काराश्रय्यनंताइ तिदर्शयति खंडइति अयं दृश्यमानः खंडः यथा यथा स्वरसचमत्कृतिं स्वादयति अनुभवयति एवं तथा लथा एषा चित्स्वयमनुभवती तिपरेणान्वयः ॥४०॥ पृथगिति वीक्षितं वोध्यं प्रतिब्रह्मांडमित्यर्थः चमत्कृतिवैचित्र्ये तत्कल्पकविचित्रतत्तज्जीवसंस्कारोद्बोध एव हेतुरित्याह यायेति ॥४१॥ तत्र समानाकारवासनोद्भवेः ज्ञजीवानामपि संसृतयो मिलंतीति जीवसंसृतिमेलनमुपवर्णितमुपसंहरति जीवसंसृतयइति ॥४२॥ भ्रमतः हि परस्परति सहस्रदर्शने कउपायस्तमाह सूक्ष्मयेत्यादिना ज्ञानचेतसेत्यप्रागुक्तेन शुद्धचित्तानां दर्शनोपायेनेत्यर्थः ॥४३॥४४॥४५॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः ॥ श्रीविश्वेश ॥

चतुर्थः ॥

॥२१॥

पद्मजादीनामस्मदादिसंसारदर्शनं बुद्धिवशादेवेत्यात् शुद्धा चेति सर्वगतत्वादेकरसत्वात्सर्वगतानामेलनमपि स्वकीयपरकीयस्वप्नानंदैवात्क चित्सं
वादवस्त्वांतःकल्पनात्मकमेवेत्याशयेनाह सर्वेषामित्यादिना ॥ ४६ ॥ ४७ ॥ तेन स्वप्नपरंपराक्रमणेन तद्वासनादार्ढ्यात् दृढतरः चित्तो वासनोद्भवानुरूप
विवर्तसामर्थ्यं सार्वत्रिकमिति निदर्शयति यद्यत्रेति ॥ ४८ ॥ अतएव चित्सत्तायास्तत्तदनुबोधानुभवदृत्यात् तयेति अनुभवाणवः सूक्ष्मीभूतानुभवाः जग
दाकारवासनाइतियावत् ॥ ४९ ॥ परमाण्विति तथा च चिज्जगतोः कार्त्स्न्येन परस्परांतःप्रविष्टत्वमाश्चर्यं मन्ये इत्यर्थः अथवानेन माश्चर्यं चिदाकाशस्थैव जगद्भ्र
मैर्भेदेव गृहीतस्य स्वात्मनि त्विन ता दित्याशयेनाह लीनमिति ॥ ५० ॥ उक्तमेव प्रपंचयति देशेत्यादिना अणुभिः सूक्ष्मैः स्वैरेव चिदंशैः स्वात्मभूतानेवेतराणी

शुद्धा च सा सर्वगता तेन तन्मेलनं मिथः ॥ सर्वेषां पद्मजादीनां स्वसत्तात्मरूपकः ॥ ४६ ॥ जगद्दीर्घमहास्वप्नः सोयमंतः समुत्थितः ॥ स्वप्नात्स्वप्नांतरं
यांति काश्चिद्भूतपरंपरा ॥ ४७ ॥ तेनोपलंभः कुड्यादावसौ दृढतरः स्थितः ॥ यद्यत्र चिज्ज्ञापयति तत्तत्रानुभवत्यलं ॥ ४८ ॥ तया स्वप्नेपि यत् दृष्टं तत्कालेस
त्यमेव तत् ॥ चिद्द्व्योरंतरे संति समस्तानुभवाणवः ॥ ४९ ॥ परमाणुजगत्संतर्मन्ये चित्सरमाणवः ॥ लीनमाकाशमाकाशेद्वैतैक्यभ्रममुत्सृज ॥ ५० ॥ देश
कालक्रियाद्रव्यैः स्वैरेवाणुभिरेव चित् ॥ अणूननुभवसंतरितराण्यनसंभवात् ॥ ५१ ॥ स्वयं सर्गस्य कचितः स्वप्ने चिदणुखंडकः ॥ ब्रह्मादेः कीटनिष्ठ
स्य देहदृष्ट्यानुभावितः ॥ ५२ ॥ कचितं किंचिदेवेह वस्तुतस्तु न किंचन ॥ स्वयं सत्यस्वादयंते द्वैतं चित्सरमाणवः ॥ ५३ ॥ स्वयं प्रकचति स्वारदेहश्चिदणुखंडकः ॥
नेत्रादिकुसुमद्वारैः संविदामोदमुज्झिरन् ॥ ५४ ॥ संपश्यति तरां कश्चिद्बहीरूपेण चित् घटः ॥ सर्वगत्वादनाशित्वात् दृश्यबीजस्य वै चितेः ॥ ५५ ॥ अंतरेवाखिलं
कश्चित्पश्यत्यविमलं जगत् ॥ तत्रातिकालकलनादुन्मज्जति निमज्जति ॥ ५६ ॥ स्वप्नात्स्वप्नांतरं तत्र तथा पश्यन्पुनः पुनः ॥ मिथ्यावटेषु लुठति शिलेव शिखरच्युता ॥ ५७ ॥

वानुभवति न तु वस्तुत इतराणि इतरेषां न संभवात् संभवात् ॥ ५१ ॥ ब्रह्मादेः कीटनिष्ठस्य कीटांतस्य साधारणास्ततदंतःकरणोपाधिवशान् चिदणुखंडकः प्रलयकाले
अस्फुटोपि सर्गस्य स्वप्नेप्रसक्तेन तद्देहदृष्ट्यानुभावितो भवतीत्यर्थः ॥ ५२ ॥ यदनुभूयते किं तदित्यत आह कचितमिति ॥ किंचिदेवेत्यनिर्वचनीयमित्यर्थः तर्हि किं तत्रा
ह स्वयं सत्यमिति ॥ यथा कश्चिद्भ्रांतः स्वयं स्वस्कंधमारूढस्तद्वच्चित्सरमाणवो जीवाः स्वयं सत्यमात्मरूपमेव द्वैतं मन्यमानाः भ्रांत्या स्वादयंतीत्यर्थः ॥ ५३ ॥ चिदेवाणवं
तःकरणपरिच्छेदादणुखंडकः ॥ ५४ ॥ कश्चित् व्यष्टिरूपः चिदेव घटसदृशस्थूलदेहपरिच्छेदात् चित् घटः देशतः कालतश्च बहीरूपेण तत्क्रमाद्वै तत्सर्वगत्वादना
शित्वाच्चेति ॥ ५५ ॥ कश्चित्समष्ट्यात्मा ब्रह्मांडरूपः अतिकालकलनात् चिराभ्यासात्तादात्म्याभिमानेन निमज्जति लीयते उन्मज्जति पुनराविर्भवति ॥ ५६ ॥ ५७ ॥ ६५

श्रेनदृश्यदर्शनयोः तन्मिथ्यात्वज्ञानं विशेषइत्याशयेनाह स्वयमिति ॥५४॥५५॥ तेषामंतरेव विश्वोदये चांतर्मुखसत्ता हेतुर्बहिः केषांचिद्दर्शनेतु बहिरेव न सत्ता हेतुरिति बीजव्यवस्थां हृदि निधायाह सर्वात्मत्वादिति ॥६०॥ जीवांतर्जीवांतरस्य तत्र तत्र च जीवांतरस्य सप्रपंचस्यानवस्थितस्योदयेपि तत्र त्यचितितत्त्सत्तेव ज्ञानसहिता हेतुर्ज्ञानेतु न किंचित्क्वाप्यासीदस्ति भविष्यति वेत्याशयेनाह जीवांतरित्यादिना ॥६१॥६२॥ बुद्धेः परावृत्तौ पराक्प्रवणत्वात्तां स्वात्मप्रत्यक्प्रवणत्वे सति समं युगपदेव चेतनांतरं बाह्यं च तत्त्व

केचित्संमिलिता केचिदात्मन्येवात्मनि स्थिता। मग्नाः स्वसंविन्नस्रसरे स्फुरंतो देहखंडकाः ॥५८॥ स्वयमंतः प्रपश्यंति येजगज्जीवविभ्रमं ॥ ते स्वैः केश्चित्ततं दृश्यमसत्स्वप्नवदाश्रितं ॥५९॥ सर्वात्मत्वात्स्वभावस्य नदृश्यं सत्सदात्मनि ॥ सर्वगं विद्यते यत्र तत्र सर्वमुदेति हि ॥६०॥ जीवांतः प्रतिभासस्य सर्वस्य पुनरंतरे ॥ जीवखंडउदेत्येवं स्वस्यांतरितरोपि च ॥६१॥ जीवांतर्जायते जीवस्तस्यांतरपि जीवकः ॥ सर्वत्रैवं भात्यलंव जीवो जीवांतरे बहिः ॥६२॥ दृश्यबुद्धिपरावृत्तौ सममेतदनंतरं ॥ हेमजीवकरत्नादि सर्वं परिज्ञातं विनश्यति ॥६३॥ विचारो यस्य नोदेति कोहं किमिदमित्यलं ॥ तस्यांतर्नैव मुक्तोसौ दीर्घो जीवज्वरभ्रमः ॥६४॥ विचारः सफलस्तस्य विज्ञेयो यस्य सन्मतेः ॥ दिनानुदिनमायाति तानवं भोगगृध्नुता ॥६५॥ यथा देहोपयुक्तं हि क्रौसारोग्यमौषधं ॥ तथेंद्रियजये भ्यस्ते विवेकः फलितो भवेत् ॥६६॥ विवेकोस्ति वचस्येव चित्रेग्निरिव भास्वरः ॥ यस्य तेनापरित्यक्ता दुःखायैवाविवेकिता ॥६७॥ यथास्पर्शेन पवनः सत्तामायाति नो गिरा ॥ तथेच्छा तानवेनैव विवेकोस्य विबुध्यते ॥६८॥

तः परिज्ञातं सद्विनश्यति ॥६३॥ एवं तत्त्वदर्शनलक्षणं तन्मात्रयुक्तिं दर्शयित्वा तत्प्राप्तिप्रतिष्ठोपायानींद्रियजयादिविचारांतान्व्युत्क्रमेण वक्तुमुपक्रमते विचार इति ॥६४॥ वैराग्यपूर्वक विचार एव फलपर्यवसायी न रागी हत इत्याह सफल इति ॥६५॥ इंद्रियजयाभ्यासपूर्वकमेव वैराग्यं विवेकहेतुर्नान्यादृशमित्याह यथेति देहेनोपयुक्तं पथ्याशनादिनियमैः सेवितं ॥६६॥ विवेकोपि वैराग्यमुमुक्षोत्क्रम्यापादनेन संन्यासश्रवणादिफलपर्यवसितः एव तन्मात्रयुक्तिजन्मप्रतिष्ठयोरुपयुज्यते न वाङ्मात्रपक्ष इत्याह इति दर्शयति विवेक इत्यादिना यस्य वचस्येव विवेकोस्ति न मनसि तेन अविवेकिता अपरित्यक्तेति सा दुःखायैव भवतीत्यर्थः ॥६७॥ तर्हि मनः प्रतिष्ठितेऽस्य विवेके किं लिंगमिति चेद्वैराग्यदार्ढ्यमेवेत्याह यथेति यथा प्रत्यक्षः स्पर्शः पवनलिंगं न वाङ्मात्रं तद्वदित्यर्थः तानवं अपक्षयक्रमेण नाशः ॥६८॥ श्रीरामायनमः ॥६॥

रागिणा वाऽग्रात्र दर्शितो विवेकस्तु अविवेकशाखोपशाखात्मकत्वाद् विवेक एवेति तुल्योन्याद् दर्शयति ॥ चित्रामृतमिति ॥ चित्रलिखितममृतं पियूषं वा रिवा
६९ ॥ यत्नइष्टानिष्टप्राप्तिपरिहारानुकूलाप्रवृत्तिज्ञानोदयेन मूलोच्छेदात्सरिक्षीयत एव न स्माद्यत्र विवेकिता स्ति स एव पुमांस्तन्मात्र युक्तिप्रतिष्ठायो ग्यः पा
वन इत्यर्थः ॥ ७० इति श्रीयोगवासिष्ठे स्थितिप्रकरणे अष्टादशः सर्गः ॥ १८ ॥ यथोपास्तिफलावाप्तिर्बोधात्स्यात्मसंस्थितिः ॥ जाग्रत्स्वप्नसुषुप्तीनां स्थितिस्तु
र्यस्य चोच्यते ॥ १ ॥ ननु जीवां तर्जीवपरंपराकल्पनायां ब्रह्मबाह्यजीवा आंतरांतरजीवा जगतामधिष्ठानत्वाद्बीजं स्युस्तथांतराणां बाह्यजीवात्मभावबोधा
त्तत्तद्भावप्राप्तिक्रमेणा सर्वबाह्यजीवस्य ब्रह्मबोधोदये मुक्तिर्युक्तानांतराणां साक्षाद्ब्रह्मपास्त्वत्र तत्रासन्निधानेनाधिष्ठानत्वलक्षणबीजत्वात्तत्संभवे च सर्वे

चित्रामृतं नामृतमेव विद्धि चित्रानलं नानलेन विद्धि ॥ चित्रांगनानूनमनंगनेति वाचाविवेकस्त्वविवेक एव ॥ ६९ ॥ पूर्वं विवेकेन तनुत्वमेति
रागोथ वैरं च समूलमेव ॥ पश्चात्सरिक्षीयत एव यत्नः स पावनो यत्र विवेकितास्ति ॥ ७० ॥ इति श्रीयोगवासिष्ठे जीवनखंडावता० सर्गः ॥ १८ ॥ ६७ ॥
॥ श्रीवसिष्ठ उवाच ॥ जीवबीजं परं ब्रह्म सर्वत्र खमिव स्थितं ॥ तेन जीवोदरजगत्यपि जीवोस्त्यनेकधा ॥ १ ॥ चिद्घनैकघनात्तत्तज्जीवांतर्जीवजा
तयः ॥ कदलीदलवत्संति कीटा इव धरोदरे ॥ २ ॥ योयो नाम यथा ग्रीष्मे कल्कस्वेदाद्भवेत्कृमिः ॥ यद्यद्दृश्यं समुदेति चित्त्वं तज्जीवो भवति स्वतः ॥ ३ ॥ यथा
यथा यतंते ते जीवकास्वात्मसिद्धये ॥ तथा तथा सर्वेसास्तु विचित्रोपासनक्रमैः ॥ ४ ॥ देवान्देवयजो यांति यक्षायक्षान्ब्रजंति हि ॥ ब्रह्म ब्रह्मयजो यांति
यदत्तुच्छं तदाश्रयेत् ॥ ५ ॥ स मुक्तो भृगुपुत्रो हि निर्मलत्वात्स्वसंविदः ॥ बद्धः प्रथमदृष्टेन दृश्येनाप्सरसा बलात् ॥ ६ ॥

षांतुल्यतया तत्तदंतः सत्वकल्पना निर्मूला स्यादित्याशंक्य जीवोदरगतजगज्जीवानामपि ब्रह्मैवाधिष्ठानत्वाद्बीजमिति साधयति ॥ जीवबीजमिति ॥ तेन सर्वत्र स्थित
त्वेन हेतुना ॥ १ ॥ एकांतरेकस्तदंतरप्येक इति परंपराकल्पनायां कदलीदलवदेकैकांतर्बहव इति परंपराकल्पनायां तु धरोदरे कीटा इवेति भेदः ॥ २ ॥ तुल्याधिष्ठानक
त्वे आंतरत्वकल्पना निर्मूलेत्यस्य कः परिहार इति चेत्तमाह ॥ योय इति ॥ ग्रीष्मे कल्कान्मलात्स्वेदाद्वा देहांतरवर्तिनो निमित्ताद्योयः कृमिः सतत्तदंतरेव भवति तथा शुद्ध
चित्त्वमपि आंतरं बाह्यं वा यद्यदेव यत्र दृश्यं भवति तत्तद्भोक्ता तत्र तत्र जीवो भवतीत्यर्थः ॥ ३ ॥ प्राक्तनपुरुषप्रयत्नरूपकर्मवशाद्वा सर्वव्यवस्था सिद्धिरित्याशयेनाह
यथेति ॥ ४ ॥ क्रमैरुपासनतारतम्यानुसारिदेवताजीवसायुज्येष्वपि तत्तद्देवजीवांतस्तारतम्येन भोगप्रसिद्धिः शास्त्रप्रामाण्यात्सिद्धेत्याशयेनाह ॥ देवानिति ॥ ब्रह्म हिर
ण्यगर्भाख्यं परं च तेषु किं हेयं किमुपादेयं तदाह ॥ यदिति ॥ ५ ॥ मार्गवोपाख्यानमप्युक्तेर्थेनुकूलमित्याह ॥ स इति ॥ प्रथमदृष्टेनाप्सरोरूपेण शुक्रो बद्धो भूदित्यर्थः ॥ ६ ॥

तथा चाप्युसन्नावालासं विद्यथैव व्युत्साद्यते न तथैव भवतीति वास्तवब्रह्मात्मभावेनैव साव्युत्साद्या न मिथ्याजीवादिभावेनेत्याशयेनोपसंहरति ॥भुवीति॥ सांसारिक व्यसनतापैर्यविरूपरिम्लाने इत्यर्थः॥७॥ संविल्लूदावाल्लक्षूदावाप्नोदेति विशेषं ज्ञातुं जाग्रत्स्वप्नदशाविलक्षण्यहेतुं श्रीरामः पृछति॥ जाग्रदिति॥ अपरोक्षावभासत्वाविशेषेपि जाग्रत्कथं केन हेतुना जाग्रत्सत्यताव्यवहारे हेतुः स्वप्नस्तु जाग्रदाकारोप्यमत्र इति कथमित्यर्थः॥८॥ स्थिरप्रतीतियोग्यत्वेन पुनःपुनः संवादिप्रत्यभिज्ञोपनीतता जाग्रदर्थेषु सत्यताव्यवहारहेतुरिति वसिष्ठः समाधत्ते स्थिरेति॥९॥ स्वप्नोपि चेत्कालांतरे स्थितः स्यात्तदा जाग्रत्वेक्षणेन जाग्रदेवेदमिति प्रत्यक्षानुभवेन दृष्टः स्यादेव॥ जाग्रदपि का-

भुविजालापरिम्लाना बालालायस्थमंपुरः॥ संविद्याम्भोनिलतद्रूपा भवत्यन्या न काचन॥७॥ श्रीराम उवाच॥ जाग्रत्स्वप्नदशाभेदं भगवन्वक्तुमर्हसि॥ कथं च जाग्रज्जाग्रत्स्यात्स्वप्नो जाग्रच्च मे कथं॥८॥ श्रीवसिष्ठ उवाच॥ स्थिरप्रत्यययुक्तं यत्तज्जाग्रदिति कथ्यते॥ अस्थिरं प्रत्ययं यत्स्यात्तत्स्वप्नः समुदाहृतः॥९॥ जाग्रत्वेक्षपादृष्टः स्यात्स्वप्नः कालांतरे स्थितः॥ तज्जाग्रत्स्वप्ननामेति स्वप्नो जाग्रत्वमृछति॥१०॥ जाग्रत्स्वप्नदशाभेदोन स्थिरास्थिरते विना॥ समः सदैव सर्वत्र समस्तोनुभवोनयोः॥११॥ स्वप्नोपि स्वप्नसमये स्थैर्याज्जाग्रत्वमृछति॥ अस्थैर्याज्जाग्रदेवास्ते स्वप्नस्तादृशबोधतः॥१२॥ स्वप्नोपि जाग्रद्बुध्यंशो जाग्रत्वमनुगछति॥ स्वप्नतास्वप्नबुध्या तु यथासंवेदनं स्थिरं॥१३॥ यत्तु यावत्स्थिरं बुद्धं तत्तावज्जाग्रदुच्यते॥ क्षणभंगात्तु तत्स्वप्नो यथा भवति तच्छृणु॥१४॥ जीवधातुं शरीरेंतर्विद्यते येन जीव्यते॥ तेजोवीर्यं जीवधातुरित्याद्यभिधमंगयत्॥१५॥ व्यवहारी यदा कायो मनसा कर्मणा गिरा॥ भवेत्तदा मरुत्तेजो जीवधातुः प्रसर्पति॥१६॥

लांतरे यदि न स्थितं स्यात्तर्हि स्वप्न एव स्यादिति जाग्रत्स्वप्नस्य जाग्रत्वं ऋछति गछतीत्यर्थः॥१०॥ अनुभवः अनुभवांशस्तनयोः समः॥११॥ अस्थैर्यादिति॥ यथा जाग्रन्मनोरथादिः॥१२॥ जाग्रद्बुध्यंशो जाग्रद्बुद्धिग्राह्यस्थैर्यांशः यथा हरिश्चंद्रस्य द्वादशवार्षिकः॥ तर्हि तस्य कथं स्वप्नता तत्राह स्वप्नेति॥१३॥ यथासंवेदनं स्थिरमित्येतद्विशदयति॥ यत्तु यादिना॥१४॥ प्रतिज्ञातवर्णनोपोद्घातेन तत्तद्दृष्टजीवभावं साधयति॥ जीवधातुरिति॥ येन जीव्यते उत्तमेन जीवनमेव तत्सद्भावसाधकं लिंगं दर्शितं तेजइति॥ नाम्नाशरीरोष्मा तल्लिंगं वीर्यमिति नाम्नाशरीरचेष्टानिमित्तं बलं तल्लिंगमुक्तं जीवधातुरित्यनेन जीवनहेतुः सारो निरुपाधिप्रेमा तल्लिंगमुक्तं आदिपदादहमित्यभिमाननिमित्तं ज्ञानाद्यपि तथा प्रसिद्धं दर्शितं बोध्यं॥१५॥ अस्तु देहे जीवस्तस्य रूपादिदर्शनार्थप्रवृत्तौ किं निमित्तं तदाह॥ व्यवहारीति॥ प्रसर्पति हृदयात्कुल्याद्वारा सरोजलमिव निर्गत्य संचरतीत्यर्थः॥१६॥०

तत्रास्यवासनोद्भवात्स्वप्नदर्शनमित्याह॥ तस्मिन्निति॥ अंगेषु अंगांतर्गतनाडीषु॥ १७॥ तस्य जागरणमाह॥ ईक्षणादिष्विति॥ १८॥ अनुभवकाले प्रसयस्य
स्वप्नाविशेषेप्यथ प्रासहिकप्रत्यभिज्ञानं तरं स्थिरत्वकल्पना ज्जाग्रदिसवगम्यत इत्यर्थः॥ सुषुप्त्यादिपरान्तुरीयक्रमंच॥ १९॥ वाचिककायिकविक्षे
पोपरमे स्वप्नोदयः मानसविक्षेपस्याप्युपरमेतु सुषुप्तिरित्याशयेनाह॥ मनसेत्यादिना॥ २०॥ आलोकैककारकः निर्विक्षेपप्रकाशमात्रनिमित्तं॥ २१
पूर्वार्द्धेन स्वप्ननिमित्ताभाव उत्तरार्द्धेन जाग्रन्निमित्ताभावउक्तः॥ २२॥ ननु सता सोम्यतदा संपन्नो भवति स्वमपीतो भवतीति श्रुत्या सुषुप्तौ जीवस्यब्र

तस्मिन्न्युपशान्तेऽङ्गेषु सर्वासु विद्युदेति हि॥ दृश्यत्वादेवेति चित्ताख्यं मंतर्लीनं जगद्भ्रमं॥ १७॥ ईक्षणादिषु रंध्रेषु प्रसरंतीव हिर्मयं॥ नानाका
रविकाराढ्यं रूपमात्मनि पश्यति॥ १८॥ स्थिरत्वान्नत्वथैवायं जाग्रदित्यवगम्यते॥ जाग्रत्क्रम इति प्रोक्तः सुषुप्त्यादिक्रमं शृणु॥ १९॥ मन
सा कर्मणा वाचा यदा क्षुभ्यति नो वपुः॥ शांतात्मा तिष्ठति स्वस्थो जीवधातुस्तदा त्वसौ॥ २०॥ समत्वमागतैर्वर्तिं क्षोभ्यते न हृदंबरे॥ नि
र्वातसदने दीपो यथालोकैककारकः॥ २१॥ ततः सरंति नांगेषु संविद्धक्ष्यति ते न नो॥ नवेक्षणादीन्यायांति रंध्राण्यायांति नो बहिः॥ २२॥
जीवोंतरेव स्फुरति तैलं संविग्धयाति ले॥ शीतसंविद्धिम इव स्नेहसंविद्यथा घृते॥ २३॥ जीवाकाराकलाकाचिच्छित्तिः स्वच्छतया समनि
दृशामायाति सौषुप्तीं सौम्यवातां विचेतनां॥ २४॥ ज्ञातांवै चित्स्वरूपरते साम्यं व्यवहरन्नपि॥ जाग्रत्स्वप्नसुषुप्तेषु संबुद्धस्तुर्यवान्स्मृतः॥ २५॥

त्सप्ययः॥ श्रूयते तत्कथं तदा दीपवज्जीवावस्थानमुच्यते तत्राह जीव इति॥ जीवोहमिति संस्कारसाचिव्यएव ब्रह्माप्येति न तद्विमुक्त इति तिलेतैलं संविदि
वतद्भावापन्नः स्फुरतीत्यर्थः॥ २३॥ ननु तीर्योहि तदा सर्वाघोकान्हृदयस्य भवति सलिल एको द्रष्टाऽद्वैतो भवतीत्यादिश्रुतिभिरासंतिकब्रह्मैक्योक्तेस्तर्हि
कागतिस्तत्राह॥ जीवाकारेति॥ प्राग्जीवाकाराया काचिच्छित्तिः साकलाउपाधिविलयात्स्वच्छतया ब्रह्मात्मनि विचेतनां पृथक् चेतनशून्यां दशामायातीत्यंश
मादायतः श्रुतयः प्रवृत्तान भेदवासनाविलयस्मि प्रायेणेत्यर्थः॥ प्रायावात्तस्तु विक्षेपमाशंक्य विशिनष्टि सौम्यवातामिति॥ २४॥ प्रसंगतस्तस्यतुर्यवि
स्थां दर्शयति॥ ज्ञातेति॥ चित्ते उपरते सर्वव्यवहारोपरमवतिसति चितिसाम्यत्रवैषम्यं शास्त्रतो ज्ञात्वा विचारैकाग्र्याभ्यांस्वभयलेः संबुद्धः प्राप्तसाक्षात्का
रोयोगी जाग्रत्स्वप्नसुषुप्तेषु प्रसिद्धेषु प्रागुक्तभूमिकाभेदेषु वाव्यवहरन्नपि शब्दात्समाधिस्थोपि बोधदार्ढ्यबलात्तुर्यात्स्वभावादप्रच्युतः सदैवतुर्यवि

॥ स्वानन्दसाम्राज्ये॥ ४९॥

प्रस्तुतां सुषुप्तिमेवानूद्य ततः प्रागुक्तस्वप्नावतारं प्रपंचयितुं चित्तोपशांतिमाह। सुषुप्तेति। सौम्यता प्राप्तैः प्राणैरुपलक्षितः स जीवधातुर्यदा भोजकादृष्टपरिपाकापादितवैषम्यैस्तैरेव चाल्यते तदा सा जीवचित्ततड्डोगानुकूलप्राक्तनसंस्कारोद्बोधाच्चित्ततयोदिता आविर्भूता भवतीत्यर्थः। २६। ततः स्वप्नदर्शनमाह। स्वांतःसंस्थेति। बीजइव यथा योगी बीजे स्थितं द्रुमं योगशक्त्या भाविविस्तारयुक्तं विविच्य पश्यति तद्वत्। २७। उक्तमेव स्फुटमनूद्य चित्तादहंकारोत्पत्तिं भ्रांतिप्रेरनिमित्तानि चाह। जीवेति। सुप्तः पुरुषो यदा वातैः किंचित्संक्षुभ्यते तदा अहमस्मीति पश्यति यदा तु प्रशंसं क्षुभ्यते तदा खेगतिं आकाशगमनं पश्यतीत्यर्थः। २८।

सुषुप्ते सौम्यतां याते प्राणैः संचाल्यते यदा॥ स जीवधातुः सा संवित्तत्तश्चित्ततयोदिता॥ २६॥ स्वांतःसंस्थं जगज्जालं भावाभावैः क्रमभ्रमैः॥ पश्यति स्वांतरेवाशु स्फारं बीज इव द्रुमं॥ २७॥ जीवधातुर्यदा वातैः किंचित्संक्षुभ्यते भृशं॥ ततोऽस्म्यहं सुप्त इति पश्यत्यात्मनि खेगतिं॥ २८॥ यदांभसाप्लाव्यते सोंतदा वायादि संभ्रमं॥ अंतरेवानुभवति स्वामोदं कुसुमं यथा॥ २९॥ यदा पित्तादिनाक्रांतस्तदा ग्रीष्मादिसंभ्रमं॥ अंतरेवानुभवति स्फारं बहिरिवाखिलं॥ ३०॥ रक्तापूर्णो रिक्तवर्णान्देशकालान्बहिर्यथा॥ पश्यत्यनुभवात्मत्वात्तत्रैव च निमज्जति॥ ३१॥ सेवते वासनायां तां सोंतः पश्यति निद्रितः॥ पवनः क्षोभितोऽरं ध्रैर्बहिरक्षादिभिर्यथा॥ ३२॥ अनाक्रांतेंद्रियच्छिद्रो यतः क्षुब्धोंतरेव सः॥ संविदाऽनुभवत्याशु स स्वप्न इति कथ्यते॥ ३३॥ समाक्रांतेंद्रियच्छिद्रो यः क्षुब्धो वायुना यदा॥ परिपश्यति तज्जाग्रदित्याहुर्मुनिसत्तमाः॥ ३४॥ इति विदितावनात्तयाधुनांतः प्रथितमहामतिनेह संसृतारव्या॥ असति जगति नैव भावनीया मतिरिह नित्यं हतदोषभावनीया॥ ३५॥ इतिश्री॰ जाग्रत्स्वप्नसुषुप्तितुर्यास्वरूपविचारः सर्गः॥ १९॥

अंभसा नाड्यंतर्गतश्लेष्मद्रवेण॥ २९॥ ३०॥ रक्तेन नाड्यंतर्गतरुधिरेण पूर्णः आस्तुतः सन् देशान्गेरिकादिव्याप्तदेशान् कालान् रक्तास्रव्याप्तसंध्यादिकालान्॥ ३१॥ ३२॥ न आक्रांतानींद्रियच्छिद्राणि चक्षुरादिस्थानानि येन स तथाविधः सन् सः अंतरा अर्थाननुभवः॥ ३३॥ तस्य जाग्रत्त्वाभिलक्षणमाह। समाक्रांतेति। यो जीवो यदा क्षुब्धः सन् समाक्रांतेंद्रियच्छिद्रोऽभूत्वा बहिः शब्दादीनुपरिपश्यति तद्दर्शनं जाग्रदित्याहुरित्यर्थः॥ ३४॥ जाग्रदादिभेदैः प्रपंचिते जगति ससत्ताबुद्धिरेवाभिनिवेशहेतुत्वादनर्थ इति सैव हेयेत्याह। इतीति। इह असति जगति संसृतारव्या दृष्टिर्नैव भावनीया कुतः यतो याद्दृष्टिर्मतिराध्यासिका निमित्तैर्मरणांहतिराधिभौतिकैर्निमित्तैर्मरणं संहतिर्दैविकैर्निमित्तैर्मरणांतदेव अस्य ये दोषास्तेषां भाविनी अवश्यं संपादनीत्यर्थः॥ ३५॥ इतिश्री यो॰ स्थि॰ सर्गः १९॥

विश्वं हि मनसो भ्रांतिः सत्यात्मानविलंबिनः ॥ सत्यात्मालंबने चेतो विश्वं चात्मेति वर्ण्यते ॥ १ ॥ प्राग्वर्णितजाग्रदादिस्वरूपवर्णनप्रयोजनेनेत्यर्थः ॥ १ ॥ अनेन मनसः कीदृशः स्वभावः परिज्ञात इति चेत् दृढभाविताद्यकारणधारणास्वभाव इत्याह दृढेति ॥ २ ॥ तेन सदसद्रूपेण हेयोपादेयं प्रसयविषयाः सर्वे मनःकल्पनामात्रत्वात् सदसद्विलक्षणा इति सिद्धमित्याह भावेति ॥ ३ ॥ तत्र मनसो व्यष्टिरूपेण भ्रांतिकर्तृतां समष्टिरूपेण तद्विषयजगदुपादानतेति विशेषमाह मन इति विश्वरूपतया व्यष्टिसमष्टिरूपतया ॥ ४ ॥ तत्र कर्तृंशः शुभे पथि नियुक्तश्चेदुपादानांशमतः अपि मादिमूलयः तत्त्वबोधश्च

श्रीवसिष्ठ उवाच ॥ एतत्तेकथितं सर्वं मनोरूपनिरूपणं ॥ मया राघव नान्येन केन चिन्नाम हेतुना ॥ १ ॥ दृढनिश्चयवच्चेतो यद्भावयति भूरिशः तत्तांयासनत्वाश्लेषादयः पिंडो ग्निना मिव ॥ २ ॥ भावाभावग्रहोत्सर्गदृशश्चेतनकल्पिता ॥ नासत्या नापि सत्यास्ता मनश्चापल्लकारिताः ॥ ३ ॥ मनो मोहेतुकर्तृस्यात्कारणं च जगत्स्थितेः ॥ विश्वरूपतयैवेदं ततो निमलिनं मनः ॥ ४ ॥ मनो हि पुरुषो नाम तं नियोज्य शुभे पथि ॥ न ज्ञेये कांतसाध्या हि सर्वा जगतिभूलयः ॥ ५ ॥ पुरुषश्चेच्छरीरं स्यात्कथं शुक्रो महामतिः ॥ अगमद्विविधाकारं जन्मांतरशतक्रमं ॥ ६ ॥ अतश्चित्तं हि पुरुषः शरीरं चेत्यमेव हि ॥ यन्मयं च भवत्येतत्तदवाप्नोत्यसंशयः ॥ ७ ॥ यत्तदुद्यमनायासमनुपाधिगतक्रमं ॥ यत्नात्तदनुसंधानं कुरु तत्तामवाप्स्यसि ॥ ८ ॥ अपि पतति मनः स्थितं शरीरं ननु वपुरा चरितं मनः प्रयाति अपि पततु तत्त्ववात्तेन सत्संसुभगमनः प्रजहात सत्यमन्यत् ॥ ९ ॥ इति श्रीयोगवासिष्ठे स्थितिप्रकरणे मोक्षोपाये मनोरूपवर्णनं नाम विंशतितिः सर्गः ॥ २० ॥

वशे भवंतीत्याह मन इति ॥ ५ ॥ मनु देह एव पुरुषोस्तु न मन इति चेन्नेत्याह पुरुष इति ॥ ६ ॥ शरीरस्य पुरुषत्वासंभवे घटकुड्यादिवच्चेत्यत्वेपरिशेषादित्याह अतइति एतच्चित्तं ॥ ७ ॥ मनः सर्वबाप्तिसमर्थमस्तु तत्तोममक्वोत्वाभस्त्वचाहयदिति मोक्षप्रयत्नेहतेनवतत्वाभो भविष्यतीत्यर्थः ॥ ८ ॥ उक्तमेवार्थं संक्षिप्योपसंहरति अपि पततीति मनः स्थितं मनोभिलषितं देशं विषयं वा शरीरमपि पतति वपुषां चरितं तु देशं विषयं मनो नियमेन प्रयाति अतो मनसः स्वाभिलाषितसिद्धौ देहेंद्रियादिनियमनसमर्थत्वात्तवापि मनः सत्संपरमार्थम्नमाप्तत्वमपि पततु तत्त्वासंपेयं तत्तेन देहेंद्रियाद्यसत्देतं प्रजहाहीत्यर्थः ॥ ९ ॥ इति श्रीयोगवासिष्ठतात्पर्ये स्थितिप्रकरणे विंशतितिः सर्गः ॥ २० ॥ श्रीरामचंद्रो जयति ॥ श्रीकृष्णपरब्रह्मणे नमः ॥ श्रीविश्वेश्वराय नमः

विशुद्धे कल्पकाभावान्मनः क्लृप्तिर्न युज्यते॥ अविशुद्धे मनः सिद्धे नानामतविकल्पनाः॥१॥ यदस्तु चमनायासमनुपाधिगलत्त्वमं॥ यत्नात्तद
नुसंधानं कुर्विति गुरूणोक्तो रामः॥ स्वबुद्धिकौशलेन तदनुसंधाय तत्र मनः कल्पनायोग्यतामपश्यन्आगुक्तायां तत्र मनः॥ कल्पनायामाश्वासम
लभमानो द्विविकल्पितमतिः प्रष्टुकामो गुरुमभिमुखीभूतः संशयं दर्शयति॥ भगवन्निति सर्वधर्मज्ञेति शिष्याशयपरिज्ञानकौशलद्योतनाय विशेष
णा॥१॥ दिक्कृतपरिच्छेदाभावात्तत्ते कालपरिच्छेदाभावान्नित्ये आदिपदोपात्तवस्तुकृतपरिच्छेदविरहान्निरामये॥ म्लाना विषयाकारकलुषाकुलइत्तिकारणा
संभवः इयमित्सपरोक्षताच मनसोदर्शिता॥२॥ यद्यविद्याकलंकवशादिति ब्रूयास्तत्राप्याह॥ यस्मादिति॥ यत्र कालत्रयेपि द्वितीयं नास्ति तत्र निमित्ततः स्व

॥श्रीराम उवाच॥ भगवन्सर्वधर्मज्ञ संशयो मे महानयं॥ हृदि व्यावर्तते लोलः कल्लोल इव सागरे॥१॥ दिक्कालाद्यनवच्छिन्ने तते नित्ये निरामये
म्लानसंविन्मनोनाम्नी कुतः केयमुपस्थिता॥२॥ यस्मादन्यन्न नामास्ति न भूतं न भविष्यति॥ कुतः कीदृक्कथं तत्र कलंकः स्यस्य विद्यते॥३॥
॥श्रीवसिष्ठ उवाच॥ साधु राम त्वया प्रोक्तं ज्ञाता ते मोक्षभागिनी॥ मतिरुत्तमनिष्पंदानंदनस्येव मंजरी॥४॥ पूर्वापरविचारार्थालसरे
यमतिस्तव॥ संप्राप्स्यसि यद्प्रोद्यैर्यथा शंकरादिभिः॥५॥ प्रश्नस्यास्य तु हे राम न कालस्तव संप्रति॥ सिद्धांतः कथ्यते यत्र त
त्रायं प्रश्न उच्यते॥६॥ सिद्धांतकाले भवता प्रष्टव्योहमिदं परं॥ करामलकवत्तेन सिद्धांतस्ते भविष्यति॥७॥

तः प्रकारतोपि कलंकसद्भावो न संभावित इत्यर्थः॥३॥ एवं पृष्टो वसिष्ठो वस्तुपरिचयचमत्कारि रामबुद्धिकौशलं प्रथमं प्रशंसति॥ साध्विति॥ उत्तमो मकरंदनिष्पंद
इव वस्त्वनुभवचमत्कारो यस्याः॥४॥५॥ शुद्धे चिदात्मनि अविद्याकलंको न युक्त इति प्रश्नः॥ शुद्धात्मानमनुभूतवतः शोभेत न च त्वं प्रति वयं मनोनिरूप्याया
मो येन सत्त्वथा पृच्छेत् यस्तु शुद्धं नानुभूतवान विद्वांसमेवात्मानमन्यमानस्तेन स्वानुभवविरुद्धा आत्मनः शुद्धिरेव कथमिति शंकितव्यं न त्वनुभवविरुद्धां
शुद्धिमभ्युपगम्य शुद्धे मालिन्यं कथमिति ज्ञानोपदेशकाले विज्ञवत् प्रश्नावसर इत्याशयेनाह॥ प्रश्नस्येति॥ यत्र निर्वाणप्रकरणे तत्त्वात्मदर्शनसमाधिप्रतिष्ठानं
तरं सिद्धांतः॥ अनुभवारूढ एवार्थोभिया स्वानुभवसंवादाय कथ्यते तत्रायं प्रश्न उच्यते समाधीयत इत्यर्थः॥६॥ वक्ष्यामि निर्वेदाल्लानाश्वासे पुनर्वा अहं प्रष्टव्य
इत्याह॥ सिद्धांतकाले इति॥ तेन प्रश्नेन मया समाहितेन सिद्धांतः अनुभवारूढतत्त्व आत्मा भविष्यति॥७॥

चतुर्थः॥

शारदि तु हंसगीर्युक्ता न तु केकोक्तिः स्वच्छदशानुरूप एव प्रश्नो युक्तः ॥ सर्वेषां श्रोतॄणां मध्ये आप्यात्मनः तत्प्रतिबोधानुदयादिति भावः ॥ ८ ॥ सांप्रतं त्वयं प्रश्नः ॥ प्रावृषि नभस्सहजनीलिमवर्णनवदित्याह सहज इति ॥ ९ ॥ एवं समाधाय प्रस्तुतश्रवणे राममनुकूलयति ॥ अयमिति ॥ १० ॥ एवं प्रागु[illegible]दिशा मालिन्यस्याज्ञानुभवसिद्धत्वात्तदुपाहिता इयं चित् व्याक्रियमाणा प्रकृतिरूपा भवति मननधर्मिणी सती मनो भवति ॥ पश्यंती चक्षुर्भवति शृण्वंती श्रोत्रं ॥ पश्यंश्चक्षुः शृण्वन् श्रोत्रं मनो इत्यादिश्रुतेः ॥ एवं कर्मेंद्रियभावापन्ना व्यापारेण धर्माधर्माख्यकर्मापि स्वयमेव भ

सिद्धांतकाले प्रश्नोक्तिरेषा न तव विराजते ॥ प्रावृषीव हि केकोक्तिर्युक्ता शारदि हंसगीः ॥ ८ ॥ सहजो नीलिमा व्योम्नि शोभते प्रावृषक्षये ॥ प्रावृषि त्वलनूदग्रपयोदपटलोत्थितः ॥ ९ ॥ अयं प्रकृत आरब्धो मनोनिर्णय उत्तमः ॥ यद्दशाज्जनता जन्मतदरा कर्पायसुब्रन ॥ १० ॥ एवं प्रकृतिरूपेयं मनो मननधर्मिणी ॥ कर्मेति राम निर्णीतं सर्वैरेव मुमुक्षुभिः ॥ ११ ॥ शृणु दर्शनभेदेन तन्नामाभिमताकृतिं ॥ वाग्मिनां वदतां यातं चित्राभिः शास्त्रदृष्टिभिः ॥ १२ ॥ यं यं भावमुपादत्ते मनो मननचंचलं ॥ तत्तामेति घनामोदमंतस्थः पवनो यथा ॥ १३ ॥ तत्तस्तमेव निर्णीयि तमेव च विकल्पयन् ॥ अंतस्थयारंजनया रंजयन् स्वामहंकृतिं ॥ १४ ॥ ७ ॥

वतीति मुमुक्षुभिः ॥ श्रुत्यादिप्रमाणैः निर्णीतमित्यर्थः ॥ ११ ॥ बहुभिर्वादिभिः स्वस्वाभिमतनामरूपाकारेणान्यथान्यथाप्युक्तेस्समापां तदेवेत्याह शृणु इति ॥ १२ ॥ तर्हि एकमूलत्वे कुतस्तेषां सिद्धांतभेद इति शंकापरिहारव्याजेन कर्मेति निर्णीतमिति यदुक्तं तद्दर्शयति ॥ यं यमित्यादिना ॥ यं यं भावं यादृशवासनोद्भवं यथा सुरभिपूत्युयनिहार्यादिनानागंधवत्कुसुमांतस्थः पवनस्तत्तद्गंधात्मकतामेति तद्वत् ॥ १३ ॥ तं स्वस्ववासनाकल्पितमेव युक्तिभिर्निर्णीय रंजनया स्वकल्पितार्थे स्वीयत्वारागेण स्वामहंकृतिं रंजयन् तद्भावमिवापादयन् ॥ १४ ॥ श्रीरामाय नमः ॥

॥वा॰टी॰स्थि॰ ॥३६॥

रसं पुनः पुनरास्वादनचमत्कार विषयिणां विषयास्वादरसे प्येषैव गतिरित्याशयेन तदनुरूपदेहधारणमाह। यन्मयत्वमिति ॥ १५ ॥ गंधवत्द्रव्यां
तः प्रविष्टः पवनस्तद्गंधरूपतामिव ॥ १६ ॥ मनोनुसारिदेहधारणे तत्रज्ञानेंद्रियाविर्भावेत सर्यात्मनो चित विषयप्राप्तिहेतु क्रियानिमित्त कर्मेंद्रियप्रादु
र्भाव इत्याह। बुद्धींद्रियेष्विति। वल्गत्स्फुरत् आविर्भूतत्स्व स्वविषये वल्गत्सु रजोलोले अनिले वल्गति तदंतर्गत रजोरूपाउर्वीवा ॥ १७ ॥ स्वशक्तिं क्रियाशक्तिं
प्रणायति प्रकटयतीत्सति ॥ १८ ॥ उपपादितक्रमां मनसः कर्मरूपतां प्रासंगिमुपसंहरन् कर्ममनसोः परस्परबीजतामभिन्नसत्तांचाह। एवमिति ॥ १९ ॥

तन्निश्चयमुपादाय तत्रैवरसमृच्छति। यन्मयत्वं शरीरे तु ततो बुद्धींद्रियेषु च ॥ १५ ॥ यन्मयं हि मनोरामदेहस्तदनु तद्वशः। तत्तामायां
ति गंधांतः पवनो गंधतामिव ॥ १६ ॥ बुद्धींद्रियेषु वल्गत्सु कर्मेंद्रियगणस्ततः। स्फुरति स्वत एवोर्वी रजोलोल इवानिले ॥ १७ ॥ कर्मेंद्रि
यगणो क्षुब्धे स्वशक्तिं प्रणाय स्फुटं। कर्म निष्पद्यते स्फारं पांसुजालमिवानिले ॥ १८ ॥ एवं हि मनसः कर्म कर्मबीजं मनः स्मृतं। अभि
न्नैव तयोः सत्ता यथा कुसुमगंधयोः ॥ १९ ॥ यादृशं भावमादत्ते दृढाभ्यासवशान्मनः। तथा स्पंदाख्य कर्माख्य प्रथा शाखा विमुंचति
॥ २० ॥ तथा क्रियां तत्फलतां निष्पादयति चादरात्। ततस्तमेव चास्वादमनुभूयाभिबुध्यते ॥ २१ ॥ यं यं भावमुपादत्ते तं तं वस्त्विति विंदति। त
तच्छ्रेयो न्यन्नास्तीति निश्चयोस्य च जायते ॥ २२ ॥ धर्मार्थकाममोक्षार्थप्रयत्नं ते सदैव हि। मनांसि दृढभिन्नानि प्रतिपत्तिपरास्थ ये वच ॥ २३ ॥ म
नोवैकापिलानां तु प्रतिपत्तिनिजामलं। उररीकृत्य निर्णीय कल्पिताः शास्त्रदृष्टयः ॥ २४ ॥०

एवं वासनाकर्मतत्फलानुभवानामपि समानरूपत्वादेकसत्त्वेत्याह। यादृशमिति द्वाभ्यां ॥ २० ॥ २१ ॥ अस्त्वेवं तथाप्यसारेपि स्वस्यामिते कथं पक्षपातः
प्राणिनां वादिनां च तत्राह। यंयमिति ॥ २२ ॥ २३ ॥ तत्र कापिलानां मनस्तु विवेकित्वादसंग चिन्मात्रत्वं पदार्थमात्रप्रतिपत्त्या निजया अमलं निर्म
लमेव तत्पदार्थविषये तु असुसनवलंबनेन व्यामोहात्स्वबुध्यैव सुखदुःखमोहात्मकस्य जडस्य जगतस्तादृशमेवोपादानं त्रिगुणात्मकं प्र
धानं भवितुमर्हतीत्युररीकृत्य पुनः पुनरास्वादनेन तदेव तत्त्वमिति निर्णीय तथैव तेषां शास्त्रदृष्टयः कल्पिता इत्यर्थः ॥ २४ ॥

चतुर्थः ॥

॥३६॥

अन्यथास्वोक्तोपायमंतरेणमोक्षेकस्यापिप्राप्तिर्नास्तीतिनिश्चितचेतसः॥स्वकल्पितनियमक्रमैःस्थिताःउपायांतरमतिभ्योनिवृत्ताःसंतः
स्वांदृष्टिंग्रंथनिर्माणादिनाप्रकाशयंतःप्रतिबिंबितिपरबुद्धिषुसंक्रामयंतीत्यर्थः॥२५॥एवंवेदांतिनोपीत्याह॥वेदांतवादिनइति॥श्रुतिप्रामा
ण्यादध्यारोपवादन्यायेनेदंजागद्ब्रह्मैवनान्यद्ब्रह्मणोणुमात्रमप्यस्तीतिरूढ्याशमःसर्वानर्थनिर्वृत्तिः॥दमोवास्तवनिरतिशयानंदापरिच्छिन्न
ब्रह्मात्मभावेनाविर्भावस्तद्रूपेणउपसमीपेस्वस्थानएवइत्याप्राप्ताचतर्चिरादिमार्गेणादूरागमनेनेत्यर्थः॥शमदमोपेतावेदांतिनइतिवापरिरू

मोक्षेतुनान्यथाप्राप्तिरितिभावितचेतसः॥स्वांदृष्टिंप्रतिबिंबंतिस्थिताःस्वनियमक्रमैः॥२५॥वेदांतवादिनोबुध्याब्रह्मैद
मितिरूढ्या॥मुक्तिःशमदमोपेतानिर्णीयपरिकल्पिता॥२६॥मुक्तौतुनान्यथाप्राप्तिरितिभावितचेतसः॥स्वांदृष्टिंप्र
विवृण्वंतिस्वैरेवनियमक्रमैः॥२७॥विज्ञानवादिनोबुध्यास्फुरत्स्वक्रमपूरया॥मुक्तिःशमदमोपेतानिर्णीयपरिकल्पिता
॥२८॥मुक्तौतुनान्यथाप्राप्तिरितिभावितचेतसः॥स्वांदृष्टिंप्रविवृण्वंतिस्वैरेवनियमक्रमैः॥२९॥आर्हतादिभिरन्यैश्च
स्वयाभिमतयेच्छया॥चित्राश्चित्रसमाचारैःकल्पिताःशास्त्रदृष्टयः॥३०॥

पर्यर्थेसर्वोत्कृष्टतयासमर्थितेत्यर्थः॥२६॥नियमक्रमैरित्यनेनवेदांतिनामुपेयतत्त्वमात्रंवास्तवमुपायप्रक्रियातत्त्वभेदास्तुपाधिनेरिव
कल्पिताएवेतिसूचितं॥२७॥शमेनसांवर्तकोपप्लवोपशमेनदमेनेंद्रियद्वारसंवरणेनचोपेतायुक्तासर्वज्ञबुद्धिधारानुप्रवेशलक्षणाशम
दमादिप्रसिद्धसाधनेरूपेणाप्राप्तेतिवा॥२८॥नियमक्रमैःप्रक्रियानियमक्रमैस्तप्तशिलारोहणादिसाधननियमक्रमैर्वा॥२९॥आर्ह
तादिभिरित्यादिपदाक्षपिताकौलिकारयोगृह्यंते॥जीवाजीवास्रवसंवरनिर्जरसंबंधमोक्षादिपदार्थविभागकल्पनैःस्यादस्तिस्यान्नास्ति
चस्यादस्तिचनास्तिचस्यादवक्तव्यस्यान्नास्तिचावक्तव्यश्चस्यान्नास्तिचावक्तव्यश्चस्यादस्तिचावक्तव्यश्चेत्यादिसप्तभंगीनयकल्पनैः॥चि

॥क्षणिकैःस्मार्तैर्विवसनसिद्धचार्वाकैः॥३०॥

अत्रार्हमन्यंते जीवो जीवश्चेति द्वौ पदार्थौ जीवश्चेतनः शरीरपरिमाणः सावयवः जीवः षड् विधः तत्र महीधरादिरेकः आस्रवसंचार निर्जरबंधमोक्षा
ख्याः पंच आस्रवणेनेन जीवो विषये ष्विति आस्रवः इंद्रियसंघातः संवृणोति विवेकमिति अविवेकादिः संचरः शेषेण जीर्यतेनेन कामक्रोधादिरिति केशो
लुंचनतप्तशिलारोहणादिकं तयोर्निर्जरः कर्माष्टकेनपादिताः जन्ममरणपरंपराबंधः चत्वारि विद्यानि कर्माणि पुण्यविशेषरूपाणि शास्त्रोक्तो
पायेन तेभ्योष्टभ्यः कर्मभ्यो विनिर्गतस्य जीवस्य ततो धर्वगमनं मोक्षः त एते सप्तपदार्थाः सप्तभंगीरूपेण न्यायेन व्यवस्थाप्यंते स्यादस्ति स्यान्ना
स्ति च स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चवक्तव्यश्च स्यादस्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यादस्ति
च नास्ति चावक्तव्यश्चेति सप्तभंगी नयः ॥ अस्यायमर्थः स्याच्छब्द ईषदर्थवाची निपातः प्रतिवादिनो हि चतुर्विधाः ॥ सद्वादिनो सद्वादिनः स
दसद्वादिनो निर्वचनीयवादिनश्चेति पुनरप्यनिर्वचनीयमतेन मिश्रितानि सदादिमतानि त्रिधावादिनः तानेतान् सप्तविधानवादिनः प्रति
सप्तविधाः स्यागाः प्रयोक्तव्याः तद्यथा सद्वादी समागत्यार्हतं प्रति किं तन्मते मोक्षोस्तीति पृच्छति तत्रार्हत उत्तरं ब्रूते ईषदस्तीति एवमन्यानपि
वादिनः प्रतिनास्तीत्याद्यन्युदाहरणानि उदाहर्तव्यानि तावता वादिनः सर्वे निर्विण्णास्ततो नोत्तरं प्रतिपद्यते ॥ अतो स्य सप्तभंगीरूपस्य साधक
न्यायस्य सद्भावात् जीवादीनां सप्तपदार्थानां सिद्धौ किमत्राश्चर्यमिति प्राप्ते ब्रूमः सप्तभंगीरूपोयमन्यायः ॥ एकस्य जीवपदार्थस्य सद्वादिनं प्र
ति सद्भवत्वमसद्वादिनं प्रत्यसद्भूयत्वं चेत्येवमादि विरुद्धधर्मप्रतिपादकत्वात् न च जीवस्य सावयवत्वं युज्यते नित्यत्वप्रसंगात् तदनित्यत्वे च मोक्षः क
॥ स्य पुरुषार्थः स्यात्तस्मान्न्यायाभ्यासेन सप्तभंगात्व्येन जीवादिपदार्थानां न सिद्धिः यस्तु रसामंनस्या

सर्वेषां कल्पनावैचित्र्याणां नमानमेयेमूलं किंतु चिराभ्यासरूढमानः कल्पनैवेसाह निर्निमित्ते निद्राभ्यां ॥ ३१ ॥ ३२ ॥ शीतोष्णाविति ॥ अत एव हि चं द्रमंडले अर्काग्निमंडलादिषु च वसतां देवानां न शीतोष्णादि पीडेति भावः परमाभ्यस्तं भोजकादष्टफलोत्पादपर्यंतमभ्यस्तमित्यर्थः ॥ ३३ ॥ एवं तु च्छेपि फले दृढाभ्यासापेक्षवे किं वाच्यमनादिसांसारिकविपरीतभावनानिरस्कृते अकृत्रिमानंदमोक्षफले दृढाभ्यासापेक्षेतीत्याशये नाह यस्तेति ॥ ३४ ॥ कस्यत

निर्निमित्तो यसोम्यांबुबुद्बुदो धैरिवोत्थितैः ॥ स्वनिश्चितैरिति प्रोढा नानाकारा हि रीतयः ॥ ३१ ॥ सवसिमेव चैतासां रीतीनामेवमाकर ॥ मनो नाम महाबाहो मणीनामिव सागरः ॥ ३२ ॥ न निंबे क्षुकटु स्वादु शीतोष्णे नेंदुपावको ॥ यद्यथा परमाभ्यस्तमुपलब्धं तथैव तत् ॥ ३३ ॥ यस्याकृत्रिमआनंद स्तदर्थं प्रयतैर्नरैः ॥ मनस्तन्मयतानेयं येनासौ समवाप्यते ॥ ३४ ॥ दृश्यं संपरिडिंभं स्वं तु च्छेपरिहरन्मनः ॥ तज्ज्ञाभ्यां सुखदुःखाभ्यां नावश्यं परिक्लिष्यते ॥ ३५ ॥ अपवित्रमसद्रूपं मोहनं भयकारणं ॥ दृश्यमाभासमाप्नोपि गिबंधमाभावयानघ ॥ ३६ ॥ मायैषा साह्यविद्यैषा भावनैषा भयावहा ॥ संविदस्तन्मयत्वं यत्तत्कर्मेति विदुर्बुधाः ॥ ३७ ॥ दृष्याद्दृश्यैकतानत्वं विद्धि त्वं मोहनं मनः ॥ प्रमार्जयैव तन्मिथ्या महामलिनकर्दमं ॥ ३८ ॥ दृश्यतन्मयतायेषा स्वभावस्यानुभूयते ॥ संसारमदिरा सेयम विद्येत्युच्यते बुधैः ॥ ३९ ॥ अनयोपहतो लोकः कल्याणं नाधिगच्छति ॥ भास्वरं तापनालोकं पटलांधेक्षणो यथा ॥ ४० ॥ स्वयमुत्साद्यते साच संकल्पाद्व्योमवृक्षवत् ॥ असंकल्पनमात्रेण भावनायां महामते ॥ ४१ ॥ क्षीणायां स्वरसादेव विमर्शेन विलासिना ॥ असंसंगः पदार्थेषु सर्वेषु स्थिरतां गतः ॥ ४२ ॥

हि दृढाभ्यासो मुक्तये कार्य इति चेत् दृश्यमार्जनस्यैवेत्याशयेनाह ॥ दृश्यमित्यादिना ॥ सम्यक्परिरभ्य डिंभमर्भकमिव स्नेहात्करोतीति संपरिडिंभं ॥ एवंरूपं सं मनस्तत् दृश्यं परिहरत्त्यजत् सत् दृश्यजाभ्यां सुखदुःखाभ्यां न परिक्लिष्यते अविष्यमिति अवधारणे ॥ ३५ ॥ ३६ ॥ तन्मयत्वं दृश्यप्रायत्वं यत्तदेव प्रागुक्त क्रमेण बंधकं कर्म भवतीति विदुरित्यर्थः ॥ ३७ ॥ ३८ ॥ दृश्येन किमपराद्धं यदर्थं तन्मार्जनमुच्यत इति चेत्तत्राह ॥ दृश्येति ॥ ३९ ॥ तपनः सूर्यस्तस्येदं तापनमालोकं ॥ ४० ॥ दृश्यमार्जने चासंकल्पनं हेतुरित्याह स्वयमिति ॥ ४१ ॥ विचारेण श्रवणमननात्मना विलासिना समाध्यभ्यासदार्ढ्यविलासवता ॥ ४२ ॥ ५४

आश्चात्मा स्वस्वभावः सपरमार्थसत्य आत्मा । अहंसा आत्मा हंस आत्मेति विपर्यासं तं रेछेदः उभयत्रापि प्रत्यगात्मेत्यर्थः ॥ ४३ ॥ सत्ताव्यक्तता असत्ता अ
व्यक्तता सुखं सात्विकचित्तवृत्तिरूपं अंतः स्वहृदि स्वानुभवादेवोपलभ्यते ॥ ४४ ॥ अप्रत्यया अन्यर्थहेतुभूतया देहाद्यहंभावनया । यः नोपलभ्यत इत्यनुषज्ज
ते आत्मनस्तादात्म्याध्यासादनन्यभूताभिः ॥ ४५ ॥ अपिशब्दानुकर्षाद्वासनाभिरपि परिवर्जितः इति पूर्वेणान्वयः । एतदंतं विशेषणानां सर्वेषां स आत्मा स
मवाप्यते इत्यनेन संबंधः बंधनिरासोपायं प्रपंच्य बंधकल्पनाकर्तारमाह संदिग्धायामित्यादिना सर्पतत्वं सर्पत्वं ॥ ४६ ॥ चिदाकाशात्मना स्वात्मनो

सत्यदृष्टौ प्रपन्नायामसत्ये क्षयमागते निर्विकल्पचिदच्छात्मा स आत्मा समवाप्यते ॥ ४३ ॥ न सन्नायस्य नासत्ता न सुखं नापि दुःखिता
केवलं केवलीभावो यस्यांतरुपलभ्यते ॥ ४४ ॥ अप्रत्ययाभावनया नचित्तेंद्रियदृष्टिभिः आत्मनोनन्यभूताभिरपियः परिवर्जितः
॥ ४५ ॥ वासनाभिरनंताभिर्व्योमेव घनराजिभिः संदिग्धायां यथा रज्वां सर्पतत्वं तथैव हि ॥ ४६ ॥ चिदाकाशात्मना बंधस्त्वं बंधेनैव कल्पि
तः कल्पितं कल्पितं वस्तु प्रतिकल्पनयान्यथा ॥ ४७ ॥ नदेवान्यत्समादत्ते खमहोरात्रयोरिव यदतुच्छमनाया समनुपाधिगतामम
मं ॥ ४८ ॥ तत्तत्कल्पनयातीतं नत्तत्खात्मैव कल्प्यते शून्य एव कुसूलेतु सिंहोस्तीति भयं यथा ॥ ४९ ॥ शून्य एव शरीरेंतर्बद्धोस्मीति भ
यं तथा शून्य एव कुसूलेतु प्रेक्ष्य सिंहोन लभ्यते ॥ ५० ॥ तथा संसारबंधार्थः प्रेक्षितोसौ न लभ्यते इदं जगदयं चाहमिति संभ्रांतमु
त्थितं ॥ ५१ ॥ बालानामध्यमे काले छायावेतालिकी यथा कल्पनावशतो जंतोर्भावाभावशुभाशुभाः ॥ ५२ ॥ क्षणादसत्तामायांति स
त्तामपि पुनः क्षणात् मालेव गरुहिणी भावं गृहीतांकंठलंबिनी ॥ ५३ ॥

तिशेषः कल्पितवस्त्वनुवेधात्मलिवस्तु ब्रह्मैव नानात्वैचित्र्यमिव गतं दुःखसंसारात्मना विभाव्यत इत्याशयेनाह कल्पितं कल्पितमिति ॥ ४७ ॥ नदेव
कल्पनात्यागे परमपुरुषार्थसुखं परिशिष्यत इत्याह यदतुच्छमिति ॥ ४८ ॥ ४९ ॥ अभयेप्यज्ञानाद्भयदर्शने प्रेक्षणमात्रेण तन्निवृत्तौ च दृष्टांतमाह शून्य
एवेत्यादिना ॥ ५० ॥ अयं देहादिसंघातः ॥ ५१ ॥ अतिशैशवयौवनयोर्मध्यमे त्रिचतुर्हायनादिकाले प्रकाशनिशयोर्मध्यमे मंदांधकारकाले वा छायावृक्ष
मूलादिप्रदेशस्थगाढांधकारः वैतालिकी वेतालाकारा भावो वैभवमभावो दारिद्र्यं तद्रूपाः शुभाशुभाभावाः ॥ ५२ ॥ असत्तां तिरोभावं पुनः सत्तामाविर्भा

॥ वमप्यायांतीत्यर्थः पदार्थानां कल्पनानुसार्यर्थक्रियाकारिता ॥
॥ प्रसिद्धेवेत्याह मालेवेत्यादिना ॥ ५३ ॥

॥५४॥५५॥५६॥५७॥भावित॥आकाशेमातंगो येन तथाविधं मनः॥तस्मिन्कल्पितया व्योमहस्तितया आकाशगजभावेन कामातुरं सत्
व्योमकल्पितकाननचारिणीं स्वसंकल्पितमातंगीं करेणुमनुधावत्यनुसरतीति परेणान्वयः॥५८॥तस्मात्संकल्पत्यागेनैव स्वाभाविकात्म
भावेन स्थितिरित्युपसंहरन्नुपदिशति॥तस्मादिति॥५९॥आत्मनः स्वस्य पारमार्थिकेनाद्वयानंदात्मनैव भवनं तत्पारमार्थिकदुःख्यात्मनेत्य

करोति गृहिणीकार्यं सुरतानंददा सती॥कांतैव मात्तभावेन गृहीता कंठलंबिनी॥५४॥नूनं विस्मारयत्येव मन्मथं मात्तभावनात्
भावानुसारि फलदं पदार्थैर्यमवेक्ष्य च॥५५॥नज्ञेनेह पदार्थेषु रूपमेकमुदीर्यते॥दृढभावनया चेत्तो यद्यथा भावयत्यलं॥५६॥तत्तत्फ
लं तदाकारं तावत्कालं प्रपश्यति॥न तदस्ति न यत्सत्यं न तदस्ति न यन्मृषा॥५७॥यद्यथा येन निर्णीतं तत्तथा तेन लभ्यते॥भाविताका
शमातंगं व्योमहस्तितया मनः॥५८॥व्योमकाननमातंगीं व्योमस्थामनुधावति॥तस्मात्संकल्पमेव त्वं सर्वभावमयात्मकं॥५९॥त्य
जरामरसुषुप्तस्थः स्वात्मनैव स्वात्मनः॥मणिर्हि प्रतिबिंबानां प्रतिषेधक्रियां प्रति॥६०॥न शक्तो जडभावेन न तु राम भवादृशः॥
यदात्मनि जगद्भ्रामं तवेह प्रतिबिंबति॥६१॥तदवस्थितिनिर्णीयमानेनागद्धरंजनं॥तदेव सत्यमिति वाप्यभिन्नं परमात्मनः॥६२॥
मत्वां तत्स्वमनाद्यंतं भावयात्मानमात्मना॥चेतसि प्रतिबिंबंति ये भावास्त्व राघव॥६३॥रंजयंत्यन्यसक्तत्वान्मातेतां स्फटिकं यथा॥स्फटिकम
मननं यथाविशंति प्रकटतया न च रंजना विचित्राः॥इह हि विमननं यथाविशंतु प्रकटतया भुवनेषणा भवंतं॥६४॥इति विज्ञानवादः सर्गः॥२१॥

र्थः॥ननु मया सह संकल्पे त्यक्ते अपि द्वैतभावा अनिद्धे पिम यिमणौ प्रतिबिंबाइव दुर्वाराः स्फुरित्याशंक्य विशेषमाह॥मणिरिति॥६०॥निरुद्धे चेतसि दैवा
त्कदाचित् द्वैतप्रतिबिंबने पितस्य मिथ्यात्वानुसंधानेन ताद्रूप्यरंजनं त्याज्यमित्याह॥यदेति॥६१॥तस्य चिद्वैक्यानुसंधानेन प्रविलापनं कार्यमित्याह॥तदेवे
ति॥एवकारोभिन्नक्रमः न तत्संबद्धमेवेत्यर्थः॥६२॥६३॥ते त्वां मा रंजयंतु॥अस्तु वा द्वैतप्रतिभासस्तथापि निर्विकारात्मबोधात् स्फटिकस्येव न ते त्वद्रंजना
स्त्वित्याह॥स्फटिकमिति॥मननं प्रतिबिंबितार्थानां पुनः पुनरनुसंधानेरागादिवासनाधानं तद्रहितं॥भुवनेषणाः प्रारब्धभोगेच्छितजगद्व्यवहारेच्छाः॥६४॥

इह प्ररूढबोधस्य सर्वदोषपरिक्षयः॥ प्रसादः सुविशुद्धात्मादर्शनं चोपवर्ण्यते॥ १॥ ज्ञानफल जीवन्मुक्तावस्थानुभवप्रकारं प्रपंचयिष्यं छु
वणमननाद्युपचक्रमेणाययायथा ज्ञानदार्ढ्यं तथा तथा दोषक्षयप्रकर्षं प्रथमं दर्शयति॥ जंतो रित्यादिना॥ समाध्यभ्यासेन क्रमाद्धाह्यमनन
मात्ममननं च स जतः किंचित्सरिणाति विशुद्धात्माकारतया विश्रांत आत्मा मनो यस्य तथाविधस्य जंतोरधिकारिणो जीर्णजाड्ये आत्मांभ
साएकत्वं व्रजतीति सति विज्ञानवशात्स्वभावः संप्रसीदतीत्यनेनान्वयः॥ १॥ हेयमज्ञानभूमिकाभेदं संत्यजतः उपादेयं ज्ञानभूमिका विशेष
मुपेयुषः॥ द्रष्टारं प्रमातारमपि दृश्यं साक्षिचिद्विद्यं पश्यतः॥ अथवा सर्वं दृश्यं द्रष्टारं भासकं चिन्मात्रमेवेति पश्यतः अद्रष्टारं भासकं चिन्

॥श्रीवसिष्ठ उवाच॥ जंतोः कृतविचारस्य विगलद्वृत्तिचेतसः॥ मननं त्यजतो ज्ञाता किंचित्सरिणातात्मनः॥ १॥ दृश्यं संत्यज
तो हेयमुपादेयमुपेयुषः॥ द्रष्टारं पश्यतो दृश्यमद्रष्टारमपश्यतः॥ २॥ जागर्तव्ये परे तत्त्वे जागरूकस्य जीवतः॥ ३॥
सुप्तस्य घनसंमोहमये संसारवर्त्मनि॥ ३॥ पर्यंतात्यंतवैराग्यात्सरसेष्वरसेष्वपि॥ भोगेष्वाभोगरम्येषु विरक्तस्य निरा
शिषः॥ ४॥ व्रजत्यात्मांभसैकत्वं जीर्णजाड्यनभस्यलं॥ गलत्यपगतासंगे हिमापूर इवातपे॥ ५॥ तरंगितासु कल्लोल
जललोलांतरासु च॥ शाम्यंतीष्वथ तृष्णासु नदीष्विव घनात्यये॥ ६॥ ७॥

व्यतिरिक्तमपश्यतः॥ २॥ घने संमोहमये अज्ञानविकारात्मके सुषुप्तस्य॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति भगवद्वचनात्॥ ३॥ सर्वसुखाव
धि विरिंचिपदपर्यंतमत्यंतं वैराग्यात् सरसेषु क्रमसुक्चिर सवत्सु अरसेषु तद्रहितेषु आभोगं भोगकालपर्यंतमेव रम्येषु भोगेषु भोगसाधनेषु स्रक्चंद
नादिषु विरक्तस्य॥ अतएव लोकसंग्रहार्थं क्रियमाणकर्मफलेषु प्रारब्धोपनीतभोगेषु च निराशिषः॥ आविरिंचसुखेषु वैराग्यतत्साधनाभ्यासतो विमा
नादिविषयेषु ऐहिकभोगेषु च विरक्तस्येति पिंडितार्थः॥ ४॥ जीर्णजाड्ये अनादिजडत्वनभसि अज्ञानाकाशे गलति सति किं जलं सैंधवखंडवद्रसावशे
षणेनेत्याह॥ आत्मांभसा एकत्वं व्रजतीति॥ आतपे हिमखंडवन्निरवशेषमित्यर्थः॥ ५॥ तरंगितास्विति द्वेन दीर्घतृष्णयोरपि विशेषणे तृष्णापक्षे कल्लोलजलमि

खगजाले पक्षिबंधनानाये ॥ आखुना मूषकेण ॥ ७ ॥ कानकं कनकसंबंधि फलं तत्र जड इति यावत् स्वभावोत्र मनः ॥ ८ ॥ रागः कामः उप आसंजयति
षि २

प्रसंजयति विषयैः रूपासंगो विषयगुणानुसंधानं ॥ द्वंद्वं भार्यादि जनसाहित्यं उपाश्रयः पुनः पुनर्भोगिलाभभूमिरिये तेभ्यः प्रथमं निर्गतं पश्चान्मोहाद
ज्ञानादि निर्याति ॥ ९ विनिर्गतस्य पुनः कीदृशी स्थितिस्तां वर्णयति ॥ शांतेत्यादिना ॥ १० ॥ समता समदृष्टिता ॥ ११ मूका बोधवाग्व्यवहारशून्या ॥ क्षपापक्षे

संसारवासनाजाले खगजालइवाखुना ॥ त्रोटिते हृदयग्रंथौ श्लथे वैराग्यरंहसा ॥ ७ ॥ कानकं फलमासाद्य यथा वारि प्रसीदति ॥ तथा
विज्ञानवसतः स्वभावः संप्रसीदति ॥ ८ ॥ नीरागं निरुपासंगं निर्द्वंद्वं निरुपाश्रयं ॥ विनिर्याति मनो मोहाद्विहगः पंजरादिव ॥ ९ ॥ शां
ते संदेहदौरात्म्ये गतकौतुकविभ्रमं ॥ परिपूर्णांतरं चेतः पूर्णेंदुरिव राजते ॥ १० ॥ जनितो नमसौंदर्या दूरादस्तमलोन्नता ॥ समतो
देति सर्वत्र शांते वात इवार्णवे ॥ ११ ॥ अंधकारमयी मूका जाड्यजर्जरितांतरा ॥ तनुतामेति संसारवासनैवोदये क्षपा ॥ १२ ॥ दृष्टचिद्भा
स्करा प्रज्ञापद्मिनी पुण्यपल्लवा ॥ विकसत्यमलोद्योता प्राप्तद्यौरिव रूपिणी ॥ १३ ॥ प्रज्ञा हृदयहारिण्यो भुवनाल्हादनक्षमा ॥ सत्वलब्धा
प्रवर्द्धंते सकलेंदोरिवांशवः ॥ १४ ॥ बहुनात्र किमुक्तेन ज्ञातज्ञेयो महामतिः ॥ नोदेति नैव यात्यस्तमभ्रलाकाशकोशवत् ॥ १५ ॥ विचारणा
परिज्ञातस्वभावस्योदितात्मनः ॥ अनुकंप्या भवंतीह ब्रह्मविष्णिंद्रशंकराः ॥ १६ ॥

जाड्येन तुषारशैत्येन ॥ वासनापक्षे मौर्ख्येण जर्जरितांतरा ॥ तनुतामपक्षयं उदये सूर्योदये स्वपेवेयन्वयः ॥ १२ ॥ दृष्टः चिद्भास्करो यया पुण्यानि गुरुसेवा
श्रवणासमाध्यभ्यासादि सुकृतान्येव पल्लवाः किसलया नियस्याः तथाविधा हृदयसरसि प्रज्ञापद्मिनी विवेकपद्मिनी विलसति द्यौर्व्योमेव ॥ १३ ॥ हृदयहारि
ण्यो मनोहराः सत्वगुणोपचयाल्लब्धाः प्रज्ञा वर्धंते ॥ १४ ॥ अभ्रलो वाय्वादिभूतचतुष्टयरहितो य आकाशकोशस्तद्वदपरिच्छिन्न इत्यर्थः ॥ १५ ॥ तस्य महाप्र
भावतामाह ॥ विचारणेति ॥ सर्गविनाशाद्यधिकारक्लेशदर्शनादनुकंप्या ॥ १६ ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवेदव्यासायनमः ॥ श्रीविश्वेश्वर

तस्य पुनः प्रमादात्पूर्ववद्विक्षेपप्रसक्तिं वारयति ॥ प्रकटाकारमिति मृगतृष्णां तत्सलिलपानं लक्षणया ॥ १७ ॥ एवं जन्ममरणप्रसक्तिमपि
वारयति तरंगवदिति ॥ आयांति जायंते प्रयांति म्रियंते ॥ चेतसः स्वचित्तवासनावशात् ॥ १८ ॥ इतरस्मिन्नज्ञभिन्ने तत्त्वज्ञे ॥ क्रमते इति क्रमस्तथा
विधेक्रम इति ज्ञात्वेति शेषः ॥ सम्यगात्मालोको वस्तुतत्त्वदर्शनं यस्य स तत्त्ववित् मायाव्याघ्रादिकौतुकदर्शनेनेव रमते सोऽज्ञस्तु निबध्यते ॥ १९ ॥ २० ॥

प्रकटाकारमप्यंतर्निरहंकारचेतसं ॥ नाप्नुवंति विकल्पास्तं मृगतृष्णामिवैणकाः ॥ १७ ॥ तरंगवदिमे लोकाः प्रयांत्यायांति चेतसः
कोटीकुर्वंति चाज्ञं तेन तज्ज्ञं मरणजन्मनी ॥ १८ ॥ आविर्भावतिरोभावैः संसारो नेतरः क्रमः ॥ इतितथ्यां समालोक्य रमते स निबध्यते ॥ १९ ॥ न जाय
तेन म्रियते कुंभे कुंभनभो यथा ॥ भूषिते दूषिते वापि देहे तद्वद्विहात्मवान् ॥ २० ॥ विवेकउदिते शीते मिथ्याभ्रममरुदिता ॥ क्षीयते वासना साग्रे मृग
तृष्णा मराविव ॥ २१ ॥ कोहं कथमिदं चेति यावन्न प्रविचारितं ॥ संसाराडंबरं तावदंधकारोपमं स्थितं ॥ २२ ॥ मिथ्याभ्रमभरोद्भूतं शरीरं पदमापदां
आत्मभावनयानेदं यः पश्यति स पश्यति ॥ २३ ॥ देशकालान्तवशोत्थानि नममेति गतभ्रमं ॥ शरीरे सुखदुःखानि यः पश्यति स पश्यति ॥ २४ ॥ अपार
पर्यंतनभोदिक्कालादिक्रियान्वितं ॥ अहमेवेति सर्वत्र यः पश्यति स पश्यति ॥ २५ ॥ वालाग्रलक्षभागात्तु कोटिशः परिकल्पितात् ॥ अहं सूक्ष्म इति
व्यापी यः पश्यति स पश्यति ॥ २६ ॥ आत्मानमितरं चैव द्रष्ट्यानि त्याविभिन्नया ॥ सर्वं चिज्ज्योतिरेवेति यः पश्यति स पश्यति ॥ २७ ॥

साग्रे अग्रभोगोदितचंद्रसहिते प्रदोषे सायेइति वा पाठः ॥ २१ ॥ २२ ॥ कीदृशस्थितस्तत्त्वविन्निःसंसारांधकारं पूर्णात्मानं पश्यतीत्याह ॥ मिथ्येत्यादिना नेदमिति बाधित
मित्यर्थः ॥ २३ ॥ देशवशोत्थान्याधिभौतिकानि कालवशोत्थान्याधिदैविकानि शरीरे उत्थान्याध्यात्मिकानि च सुखदुःखानि न ममेति यः पश्यति ॥ २४ ॥ अपारपर्यंतं यन्नभो
दिक्कालादि यच्च तत्त्रपरिच्छिन्नमुत्पत्तिचलनादिक्रियान्वितं तत्र सर्वत्रात्ममेवेति यः पश्यति ॥ २५ ॥ यः व्यापी सन् कोटिशः परिकल्पितात् वालाग्रलक्षभागात् तु शब्दोऽ
प्यर्थे ॥ २६ ॥ आत्मानं स्वात्मत्वेन प्रसिद्धं जीवं इतरत् तत् दृश्यं च सर्वं चिज्ज्योतिरिति तत्त्वेन नियमविभिन्नया दृष्ट्या यः पश्यतीत्यर्थः ॥ २७ ॥ श्रीरामायनमः ॥ श्री ॥ श्री ॥

॥२८॥२९॥ महिमा विस्तारः ॥३०॥ चिदेव तंतुस्तेन प्रोतं सर्वमहमेवेति वा चित्तं अंतःकरणं तु नाहमेवेति वा ॥३१॥ अहमेवेति पश्यतीत्युक्ते चित्सरित्यागे न अहंकारए
वपरिगृहीतो मा भूदिति सहाहंकारेण जगन्निषेधेन चिदेकरसं ब्रह्मैव परिशेष्य द्रष्टव्यमित्याह नाहमिति सतो वर्तमानस्यासतोऽतीतभविष्यतश्च मध्ये सतो
व्यक्तस्यासतोऽव्यक्तस्येति वा ॥३२॥ अवयव इति पादोस्य सर्वा भूतानीति श्रुतेः विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवद्वचनाच्चेति भावः ॥३३॥ स्व
तः सत्ताशून्यत्वेन मलप्रायत्वाच्छोच्या अत एव स्वसत्तास्फूर्तिप्रदानेन पाल्या ॥ स्वसा अनुजा कनीयसी अल्पायुर्वाल्पयोः कन्यतरस्यामिति कनादेशः ॥ दृष्टिमा

सर्वशक्तिरनंतात्मा सर्वभावांतरस्थितः ॥ अद्वितीयश्चिदित्यंतर्यः पश्यति स पश्यति ॥२८॥ आधिव्याधिभयोद्विग्नो जरामरणजन्मवान् ।
देहोहमिति यः प्राज्ञो न पश्यति स पश्यति ॥२९॥ तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा मम ॥ द्वितीयो नाममस्तीति यः पश्यति स
पश्यति ॥३०॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ चित्तं तु नाहमेवेति यः पश्यति स पश्यति ॥३१॥ नाहं न चान्यदस्तीति ब्रह्मैवास्मि
निरामयं ॥ इत्थं सदसतोर्मध्ये यः पश्यति स पश्यति ॥३२॥ यन्नाम किंचित्त्रैलोक्ये स एवावयवो मम ॥ तरंगोब्धाविवेत्यंतर्यः पश्य
ति स पश्यति ॥३३॥ शोच्या पाल्या मयैवेयं स्वसेयं मे कनीयसी ॥ त्रिलोकीपेलवेत्यंतर्यः पश्यति स पश्यति ॥३४॥ आत्मतापरतेत्यक्ता मत्ते
यस्य महात्मनः ॥ स वाडुपरते नूनं स पश्यति सुलोचनः ॥३५॥ चेत्यानुपातरहितं चिद्रूपैरवमयं वपुः ॥ आपूरितजगज्जालं यः पश्यति
स पश्यति ॥३६॥ सुखदुःखभवोभावो विवेककलनाश्रयाः ॥ अहमेवेति वा नूनं पश्यन्नपि न हीयते ॥३७॥

त्रेणापि पीड्यमानत्वात्सेत्यन्वा ॥३४॥ भवः सांसारिकदेहादिस्तस्मादुपरते विवेकबाधाभ्यां निवृत्ते ॥३५॥ चेत्यानुपातो दृश्यसंवलनं तद्रहितं
अत एव निःप्रसूतस्वभावस्फूर्त्या आपूरितं प्रभया तमइव सर्वतो व्याप्तं जगज्जालं येन ॥३६॥ भवः अधिकारिदेहस्तत्प्रभावो गुरुदैवतशास्त्रा
दिश्रद्धा ॥ तत्र नित्यानित्यादिविवेकः ॥ तेन कलनाः श्रवणादिक्रमेणात्मपरिचयतारतम्यभेदाश्च सर्वे अहमेवेति यः पश्यति ॥३७॥ श्रीरामचंद्राय॰

वा॰ टी॰ स्थि॰
॥४१॥

आत्मसत्तयैवपरया।निरतिशयानंदघनया।आपूर्येब्रह्मादिस्तंबपर्यंते।आनंदलवार्पणेनतर्पितेजगति।अंशेनैकदेशेनवर्तिनाऐहिकपारलौ
किकभोग्यवस्तुनामेकिंदुःखमस्तियद्धेयंकिंवान्यत्सुखमस्तियदुपादेयमितिपश्यन्सुहृत्कुअभ्रांतदृष्टिरित्यर्थः॥३८॥अतर्क्यंतर्कागम्यंअना
भासंवृत्तिभेदप्रतिफलनरहितंनिर्विक्षेपमितियावत्॥३९॥महानीश्वरःनिरतिशयस्वानंदोपभोगसमर्थःशिवइत्यर्थः॥४०॥नमःसुषुप्तिःप्रका
शोजागरःकलनास्वप्नस्तैर्मुक्तः॥कालत्रयमध्योरप्यात्मनोनिरतिशयप्रेमास्पदत्वांगतःस्वस्थःतुरीयावस्थाप्रतिष्ठोयस्तं॥४१॥सकलेपिजगत्ये

स्वात्मसत्तापरापूर्णेजगत्यंशेनवर्तिना॥किंमेहेयंकिमादेयमितिपश्यन्सुहृद्भूनरः॥३८॥अप्रतर्क्यमनाभासंसन्मात्रमिदमत्य
लं॥हेयोपादेयकलनायस्यक्षीणासवैपुमान्॥३९॥यआकाशवदेकात्मासर्वभावगतोपिसन्॥नभावरंजनामेतिसमहात्माम
हेश्वरः॥४०॥नमःप्रकाशकलनामुक्तःकालत्रमतांगतः॥यःसोम्यःसुसमःस्वस्थःस्तन्नोमिपदमागतं॥४१॥यस्योदयास्तम
यसकलनाकलासुचित्रासुचारुविभवासुजगद्गतासु॥वृत्तिःसदैवसकलैकमतेरनंतातस्मैनमःपरमबोधवतेशिवाय॥४२॥
इतिश्रीयोगवासिष्ठेस्थितिप्रकरणेअनुत्तमपदविश्रांतिवर्णनंसर्गः॥२२॥श्रीवसिष्ठउवाच॥यउत्तमपदालंबीचक्रमश्रमवरास्थि
तः॥शरीरनगरीराज्यंकुर्वन्नपिनलिप्यते॥१॥तस्येयंभोगमोक्षार्थंतज्ज्ञस्योपवनोपमा॥सुखायैवनदुःखायस्वशरीरमहापुरी॥२॥

कंब्रह्मेतिमूलेर्यस्यजगद्गतासुचित्रासूदयःसर्गःअस्तमयःप्रलयःसंकलनास्थितिस्तल्लक्षणासुवृत्तिःब्रह्माकारदृष्टिःअनंताअपरिच्छिन्ना
तस्मैपरमबोधवतेजीवन्मुक्तविग्रहायसाक्षाच्छिवायनमइत्यर्थः॥४२॥इतिश्रीवासिष्ठतात्पर्येस्थितिप्रकरणेद्वाविंशःसर्गः॥२२॥शरीरेन
गरेराज्यंप्रबुद्धस्यात्रवर्ण्यते॥विनोदोऽसक्तसङ्गोगैर्मनोजयसुखोदयः॥१॥जीवन्मुक्तस्यशरीरनगरीराज्यंवर्णयिष्यन्रामस्यतच्चित्ता
संप्रश्नप्रयोजिकामुत्थापयति॥शरीरेति निवृत्तेघटोत्पादनप्रयोजनेयावद्वेगंकुलालचक्रमत्रमवद्यावत्प्रारब्धक्षयंदेहधारणाव्यवहारमास्थि
तोजीवन्मुक्तइत्यर्थः॥नलिप्यतेसस्यत्वाभिमानाभावादितिभावः॥१॥क्रीडाविनोदहेतुत्वादुपवनोपमा॥२॥श्रीरामचंद्रायनमः॥श्रीहृच्छाय

चतुर्थः
॥४१॥

एतां त्वदुक्तां शरीरनगरीं अधिवसन् अधिष्ठाय पालयन् ॥ एकपदस्वारस्यात् सुखमेव प्रजने न तु राजा न इव न दुःखलेशमपीत्यर्थः ३
स्वालोक आलज्योतिः सपर्याकैः ॥ ४ नेत्रे एव वातायने ताभ्यां उद्योताभ्यां इंद्रियप्रदीपाभ्यां प्रकाशंतइति प्रकाशानि भुवनांतराणि यस्यां क
रावेव प्रतोल्यौ रथ्ये तत्द्विस्तारेण प्राप्तं ॥ जानुपर्यंतलालक्ष्यपांपादोपजांगलं यस्याः ॥ ५ ॥ त्वचा गतैः शिराजालकैर्मालिता ॥ गुल्फो पादजानुसंधिग्रं
थीनाभ्यां पार्ष्णिर्लक्ष्यते तत्सहितायां मंगुल्यां जातावेकवचनं ॥ ६ ॥ पादाग्रपदेनात्र पादाधस्तनी कठिनात्वगुच्यते सैव स्तंभमूलाधारशिलारेखा मि

श्रीराम उवाच ॥ नगरीत्वं शरीरस्य कथं नाम महामुने ॥ एतां चाधिवसन्योगी कथं राज्यसुखैकभाक् ॥ ३ ॥ श्रीवसिष्ठ उवाच ॥ रम्येयं दे
ह नगरी राम सर्वगुणान्विता ॥ अस्यानंदविलासाढ्या स्वालोकार्कप्रकाशिता ॥ ४ ॥ नेत्रवातायनोद्योतप्रकाशभुवनांतरा ॥ करप्रतोल्यौ
विस्तारप्राप्तपादोपजांगला ॥ ५ ॥ रोमराजीलतागुल्मात्वचाजालकमालिता ॥ गुल्फांगुल्यां प्रविश्रांतजंघोरुस्तंभमंडला ॥ ६ ॥ रेखावि
भक्तपादाग्रशिला प्रथमनिर्मिता ॥ चर्ममर्मशिरासारसंधिसीमा मनोरमा ॥ ७ ॥ उरूरूतनुभागाग्रनिर्मितोपस्थनिम्नगा ॥ कचकेश
वल्लीकाचदलप्रस्थवनारता ॥ ८ ॥ फूलललाटोष्ठसद्धायावदनोद्यानशोभिता ॥ दृष्टिपातोत्सलाकीर्णकपोलविपुलस्थली ॥ ९ ॥

विभक्ता या नानात्वप्रपायातया प्रथमनिर्मिता प्रथमाधारनिर्माणेन निर्मितेत्यर्थः ॥ बहिश्चर्म अंतर्मर्माणि सीमानः मध्ये मध्ये शिराणां साराः शाखाप्ररो
हाः सीमानः अस्थिषु तु संबंधयः सीमानस्ताभिर्मनोरमा ॥ ७ ॥ उर्वोः ऊर्वोस्तनोर्मध्यकायस्य च यः संधिभागः तस्याग्रे पुरोभागे निर्मिता उपस्थेंद्रिय
रूपा निम्नगा नगरमध्य नदी यस्याः कचं नीकेशावल्येव काचवन्नीलानि दलानि येषु तथाविधैः कौंतशैलप्राय शिरःप्रस्थेन श्मश्रुकटाक्षादि रोमवनैश्चा
रता ॥ ८ नीलच्छबलसदृशाभ्यां पांडुनवच्छदसदृशेन ललाटेन पुष्पसदृशाभ्यामोष्ठाभ्यां च सच्छायं कांतिमद्यद्वदनं तल्लक्षणमुद्यानं कदलीवनं तेन शो
भिता दृष्टिपाताः कटाक्षास्तल्लक्षणैरुत्पलैराकीर्णौ यो कपोलौ तल्लक्षणे विहारस्थल्यौ यत्र ॥ ९ ॥ ८७

स्कंदावेव क्रीडाशिलोच्चयो यस्यां ॥१०॥ उदरलक्षणे कोशागारमध्ये निक्षिप्तानि स्वप्रारब्धप्रापितान्यन्नानि तान्येव स्वानि धनानि अन्नानि धान्यादीनि इष्टानि प्रियाणि वासना यस्यादीनि च यस्यां ॥ कंठं अनिषिद्धविषयोपभोगं तनं ति ति भक्षनतो रसनश्रोत्रादयः परः शिरः सौधवतायनोपविष्टनागरस्थानीया यस्यां दीर्घ ऊर्ध्वमुखं यत्कंठबिलं तद्द्वारा उद्गीर्णोपि यः प्राणवातस्तत्कृते न संरंभेण कंठद्वारकपाटोद्घाटनेन शब्दिता ॥११॥ हृदयापणशब्दाभ्यां तस्य विचारलक्षणा रत्नादिपरीक्षक जनागृह्यां तैस्तैर्निर्णीताः परीक्ष्य गृहीताः श्रुत्यादि द्वारा यथायोग्यं प्राप्तायेशब्दाद्यर्थास्तैर्वासि

वक्षस्थलसरः स्तनकुचपंकजकोरका ॥ घनरोमावलीछिन्नस्कंधक्रीडाशिलोच्चया ॥१०॥ उदरस्थान्न निक्षिप्तस्वान्नोष्टाभक्षनसरा दीर्घकंठबिलोद्गीर्णवातसंरंभशब्दिता ॥११॥ हृदयापणनिर्णीतयथाप्राप्तार्थभूषिता ॥ अनारतनवद्वारप्रवहत्प्राणनागरा ॥१२॥ आस्यस्फारवदाहष्टदंतास्थिशकलाकुला ॥ मुखास्पदाग्रमजिह्वाचंडीचर्वितभोजना ॥१३॥ रोमशष्पतरच्छन्नाकर्पीकोटरकूपका स्फिक्कुभ्रंखलास्थितोपांतपृष्ठविस्तीर्णजंगला ॥१४॥ गुदोत्थानारघट्टांतप्रहतानंतकर्दमा ॥ चित्तोद्यानमहीवल्लीदासचिंतावरांगना ॥१५॥ धीवरत्रादृढाबद्धचपलेंद्रियमर्कटा ॥ वदनोद्यानहसनपुष्पोद्गममनोरमा ॥१६॥

नारूपैः पण्यैर्भूषिता ॥१२॥ आस्ये स्फारवत्तद्वारभुक्तिरचनाजगदंतविभागवदीषत् दृष्टैर्दंतलक्षणैरस्थिशकलैराकुला ॥ मुखास्पदया आसमंतादभ्रमंत्या जिह्वालक्षणया याचंड्या कालन्याचर्वितानि आस्वादितानि भोजनानि चतुर्विधान्यन्नानि यस्यां ॥१३॥ रोमलक्षणैः शष्पतरैः दीर्घतृणैश्छन्ना ॥१४॥ गुदद्वारोत्थानमुद्गमो यस्य मलस्य तदेव मूत्रस्थानलक्षणस्य आरघट्टस्य घटीयंत्रस्यांते प्रांते प्रहतुलः प्रवहत्ननंतरं ततः कर्दमो यस्यां ॥ चित्तलक्षणाया मुद्यानमह्यां वल्ल्यां ॥ लीलसदाक्रीडमाना आत्मचिंतालक्षणा वरांगना पुरस्वामिनी यस्यां ॥१५॥ धीरेव वरत्रा चर्मरज्जुस्तया दृढाबद्धा अस्य चपलेंद्रियमर्कटा यस्यां वदनोद्यानेहसनमेव पुष्पोद्गमस्तेन मनोरमा ॥१६॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीवासुदेवायनमः ॥ श्री

स्वशरीरमनसी जानातीति स्वशरीरमनोज्ञस्तत्त्ववित्तस्य सुखायैव परमं हितमुपदेशादिना परोद्धारस्तस्मै च ॥ १७ ॥ १८ ॥ ज्ञस्यानंत सुखायेति यदुक्तं तद्दर्शयति ॥ किंचिदिति किंचिदल्पं तु छमेव न तं न सत्स्वस्तीत्यर्थः ॥ सर्वमोक्षसुखं ॥ १९ ॥ ज्ञस्यरथ इत्वरथः ॥ २० ॥ २१ ॥ सर्वपूर्णमात्मानं जानातीति सर्वज्ञस्तत्त्ववित्तस्य सर्वेषां भोगमोक्षोपायवस्तूनां परं परं संग्रहस्तत्क्षमा ॥ २२ ॥ व्यग्रशब्दो भावप्रधानः तथा च गतव्यग्रः स्वस्थ

स्वशरीरमनोज्ञस्य सर्वसौभाग्यसुंदरी ॥ सुखायैव न दुःखाय परमाय हिताय च ॥ १७ ॥ अज्ञस्येयमनंतानां दुःखानां कोशमालिका ॥ ज्ञस्य त्वियमनंतानां सुखानां कोशमालिका ॥ १८ ॥ किंचिदस्यां प्रनष्टायां ज्ञस्य नष्टमरिंदम ॥ स्थितायां संस्थितं सर्वं तेनेयं ज्ञसुखावहा ॥ १९ ॥ यदेनां ज्ञः समारुह्य संसारे विहरत्यलं ॥ अशेषभोगमोक्षार्थं तेनेयं ज्ञरथः स्मृतः ॥ २० ॥ शब्दरूपरसस्पर्शगंधबंधुप्रियो यतः ॥ अनयैव हि लभ्यं तेन तेनेयं ज्ञस्य लाभदा ॥ २१ ॥ सुखदुःखक्रिया जालं यदेषा वहति स्वयं ॥ तदेषा राम सर्वज्ञसर्ववस्तुभरक्षमा ॥ २२ ॥ तस्यां शरीरपुर्यां हि राज्यं कुर्वन्गतज्वरः ॥ ज्ञस्तिष्ठति गतव्यग्रः स्वपुर्यामिव वासवः ॥ २३ ॥ न क्षिपत्यवराटोपे मनोमत्ततुरंगमं ॥ न लोभदुर्द्रुमादाय प्रज्ञां पुत्रीं प्रयच्छति ॥ २४ ॥ अज्ञानपरराष्ट्रं च न रंध्रं तस्य पश्यति ॥ संसारारिभयस्यांतर्मूलान्येव निहंति ॥ २५ ॥ ७ ॥

त्यर्थः ॥ २३ ॥ अवटे योनिगर्ते आटोपः पराक्रमो यस्य कामस्य तद्विषये ॥ न क्षिपति न प्रेरयति ॥ लोभ एव दुर्द्रुमो विषवृक्षः तमादाय शुल्कत्वेन गृहीत्वा प्रज्ञालक्षणां पुत्रीं कन्यां मोहादधर्मादिदोषकुलेभ्यो न प्रयच्छति अथवा दुर्द्रुमशब्देन तत्फलं लक्ष्यते लोभलक्षणादुर्द्रुमफलं अत्ति अनुभवतीति लोभदुर्द्रुमादः अधार्मिकजनस्तस्मै प्रज्ञाविवेकवती बुद्धिस्तल्लक्षणां पुत्रीं न प्रयच्छति तेषु प्रज्ञां गूहमानश्चरतीत्यर्थः ॥ २४ ॥ संसारलक्षणारिभयमूलानि स्नेहास्तानि निहंतीति ॥ २५ ॥ ७ ॥

तृष्णानद्याः सरणं सारः। प्रवाहस्तस्य मलत्वावर्त्ते कामसंभोगग्रहलक्षणदुष्टग्राहवति अंतर्मुखत्वात् सर्वस्तो बहिर्मुखः सन् न निमज्जति॥ सुखलवलक्षणे दुःखैः प्रदेवने परिदेवनसाधने॥२६॥ बहिरंतश्चास्य वासुदेवस्य परमात्मन ईक्षणादाधिभौतिके चाध्यात्मिके च सरित्संगमतीर्थेषु अविरतं सार्वकालिकं स्नानं करोति॥ तथा चातुर्वेद्याः स्नानं तेन समस्ततीर्थसलिले सर्वा अपि दत्ता अवनिर्यज्ञानां चरूतं सहस्रमयुतं देवाश्च संपूजिताः संसाराच्च समुद्धृताः स्वपितरः सर्वस्य पूज्यो ह्यसौ यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मन इति मनोरथोत्र मानसब्रह्माकारवृ

तृष्णासारपरावर्त्तकामसंभोगदुर्ग्रहे॥ न निमज्जति पर्यस्तः सुखदुःखप्रदेवने॥२६॥ करोत्यविरतं स्नानं बहिरंतरवीक्षणात्॥ सरित्संगमतीर्थेषु मनोरथगतः क्रमात्॥२७॥ सकलाक्षजनादृश्यसुखप्रेक्षापराङ्मुखः॥ ध्याननाम्नि सुखं नित्यं तिष्ठत्यंतःपुरांतरे॥२८॥ सुखावहैषा नगरी नित्यं वै विदितात्मनः॥ भोगमोक्षप्रदा चैषा शक्रस्येवामरावती॥२९॥ स्थितया संस्थितं सर्वं किंचिन्नष्टं न नष्टया यथा पुर्या महीयस्या सा कथं न सुखावहा॥३०॥ विनष्टे देहनगरे तस्य नष्टं न किंचन॥ आक्रांतकुंभाकाशस्य खस्य कुंभक्षये यथा॥३१॥ विद्यमानं घटं वायुः किंचित्स्पृशति नाखिलं॥ यथा तथैव देही स्वां शरीरनगरीमिमां॥३२॥ अत्रस्थः पुरुषो भोगानात्मा सर्वगतोपि सन्॥ विम्बकल्पकृतान् भुक्त्वा पुंसामधिगतार्थभाक्॥३३॥ कुर्वन्नपि न कुर्वाणः समस्तार्थक्रियोन्मुखः॥ कराचित्साक्षात्कृतान्सर्वान् कार्यार्थी न नु तिष्ठति॥३४॥

त्तिस्वकृतस्त्वदारूढः॥२७॥ सकलैरक्षलक्षणैर्जनैरादृश्येषु आपातदृश्येषु विषयेषु सुखानां प्रेक्षायां पराङ्मुखः॥२८॥२९॥३०॥ आक्रांतः स्वसात्कृतः कुंभाकाशो येन तस्य खस्य॥३१॥ यस्य स्थितिदशायामपि न सम्यक् स्पर्शस्तस्य नाशे स्पर्शो नेति किं वाच्यमिति दृष्टांतेनाह॥ विद्यमानमिति॥३२॥ अत्रास्यां शरीरनगर्यां तिष्ठतीत्यत्रस्थ आत्मा तत्त्वविद्बिम्बकल्पनं बिम्बकल्पस्तत्कृतान् प्रारब्धभोगान् भुक्त्वा अधिगतं प्राक् साक्षात्कृतं पूर्णस्वात्मस्वरूपमर्थं मोक्षं भजते इत्यधिगतार्थभाग्भगवतीति शेषः॥३३॥ व्यवहारदशां कुर्वन्नपि परमार्थदृशा न कुर्वाणः॥३४॥ श्री

तस्य देहनगर्यां कांतादिभोगफलान्याह कदाचिदिति ॥ विमानं विमानतुल्यं हसुंडरीकं कांतं भोगकौतुकवन्मनो विहर्तुं विनोदयितुं ॥ ३५ तत्र रखुः पूर्ववत् ॥ मैत्र्या मैत्रीलक्षणया रामया प्रियया ॥ ३६ ॥ ३७ ॥ स्वर्गियोनारकिदुःखदर्शिनामिव तस्याज्ञजनदुःखदर्शिता माल ॥ क्षपितेति वल्ली भिर्वनमिव परस्परं संवेष्ट्या स्थितान् ॥ नभसः पृष्ठे स्थितो र्क इवेति दृष्टांतात्तत्त्वविदोपि संसारवनविप्रकर्षेण गम्यते ॥ ३८ ॥ आशा दिशः म

करा चिक्वीलया लोलं विमानमधिरोहति ॥ अनाहलगतिः कांतं विहर्तुं मम तं मनः ॥ ३५ ॥ तत्र स्थो लोकसुंदर्यासनतं शीतलां गया ॥ रमते रामया मैत्र्या नित्यं हृदयसंस्थितः ॥ ३६ ॥ देकांते तिष्ठतः सम्यक्पार्श्वयोः सत्यतेकते ॥ इंदोरिव विशाखे हे समाल्हादितचेतसी ॥ ३७ ॥ क्षपितानखिलांल्लोकानदुःखककचदारितान् ॥ वल्लीवनस्थान्नभसः पृष्ठादर्क इवेक्षते ॥ ३८ ॥ चिरं पूरितसर्वाशः सर्वसंपत्तिसुंदरः ॥ अपुनः खंडनायेंदुः पूर्णां गइव राजते ॥ ३९ ॥ सेव्यमानोपि भोगौघो न खेदायास्य जायते ॥ कालकूटः क्लिेशस्य कंठे प्रकृतराजते ॥ ४० ॥ परिज्ञातोपि भुक्तो हि भोगो भवति तुष्टये ॥ विज्ञायसेवितो मैत्री मेति चौरो न शत्रुतां ॥ ४१ ॥ नरनारीनटौघानां विरलेदूरगामिनां ॥ क्षेन मात्रेव सुभगा भोगश्रीरवलोक्यते ॥ ४२ ॥ अशंकितोपसंप्राप्ता ग्रामयात्रा यथाध्वगैः ॥ प्रेक्ष्यंते तद्वदेव ज्ञैः

नोरयाभ्य ॥ सर्वाः संपत्तयः ताभिः सर्वात्मभावसंपत्त्या च सुंदरः अपुनः खंडनाय पुनः क्षयाभवाय ॥ ३९ ॥ भोगौघः स्रक्चंदनादिभोगौघः खेदाय पुनर्जन्मादिदुःखाय अथवा भोगौघो दुष्प्रारब्धभोगौघः खेदाय तात्कालिकदुःखाय प्रकृते नितत्त्वविदोपि न प्रादिक्लेशः प्रकृतः अज्ञजनशिक्षामाहात्फलोराजतेइतिभावः ॥ ४० ॥ परिज्ञाय भोगे प्रकृतं तस्य सुखहेतुत्वे साशये नाह परिज्ञात इति ॥ ४१ ॥ तत्कुतस्तत्राह नरेति ॥ विरले समाजविघटने दूरगमनशीलानां समाज मिलितनरनारीनटौघानां यात्रां समाजइव भोगश्री र्भोग्यपुत्रधनादिश्रीः ॥ ४२ ॥ ४३ ॥ ०

योगवासिष्ठटीका ॥ २६ ॥

यथाश्रक्षिचक्षुरयत्नोपनते यत्नाविरचिते पर्वतवनपुष्करिण्यादौ तद्गततरुगुल्मनामरसादिपदार्थेषु मम त्वाभिमानाभावाच्छेदभेदा
पहारादिदर्शने पिडुःखादर्शनान्नीरागमेव पतन्ति तद्वद्धरिस्य विदुषः धीः स्वपुत्रमित्रादिव्यवहारकार्येष्वपि नीरागमेव पतन्तीत्यर्थः ॥४४॥ कु
र्थं तर्हि प्राज्ञो वर्ततेतत्राह इंद्रियाणामिति ॥ प्राप्तं प्रारब्धोपस्थापितमर्थं विषयं न हरन्ति न वारयन्ति अप्राप्तं च यत्नपूर्वकं नाददाति न संपादयति
यथाप्राप्तोपयोगेन जीवतीत्यर्थः ॥४५॥ तत्कुतस्तत्राह अप्राप्तेति यतः अप्राप्तचिंताः प्राप्तोपेक्षाः पश्चात्तापाश्च तं न कं पयंति न तरलीकुर्वंति

अयत्नोपनतेष्वक्षिपदार्थेषु यथा पुनः ॥ नीरागमेव पतन्ति तद्वत्कार्येषु धीरधीः ॥४४॥ इंद्रियाणां न हरति प्राप्तमर्थं कदाचन
नाददाति तथाप्राप्तं संपूर्णो ज्ञो वतिष्ठते ॥४५॥ अप्राप्तचिंताः संप्राप्तसमुपेक्षाश्च सन्मतिं ॥ न कं पयंति तरलाः पिच्छाघाता
इवाचलं ॥४६॥ सशांतसर्वसंदेहो गलिताखिलकौतुकः ॥ संक्षीणकल्पनादेहो ज्ञः सम्राडिव राजते ॥४७॥ आत्मन्येव नमात्यं
तः स्वात्मनात्मनि जृंभते ॥ संपूर्णोपारपर्यंतः क्षीरार्णव इवार्णवे ॥४८॥ भोगेच्छाकृपणानूनं जंतून्दीनान्दीनेंद्रियाणि च ॥ अनु
न्मत्तमनाः शांतो हसन्नुन्मत्तकानिव ॥४९॥ इच्छतोन्यो ज्झितां जायां यथैवान्येन हस्यते ॥ इंद्रियस्येच्छतो भोगं तद्वज्ज्ञेन विहस्यते ॥५०॥

त मिवेत्यर्थः ॥ पिच्छाघाताः मयूरबर्हपाताः ॥४६॥ सर्वसंदेहकारणाज्ञाननाशादेव सशांतसर्वसंदेहः सर्वभोगेषु मिथ्यात्वदर्शनाद्गलिताखिल
कौतुकः संक्षीणोतदुभयकल्पनाहेतू स्थूलसूक्ष्मदेहौ यस्येति हेतुगर्भं विशेषणं सम्राट् राजसूयफलं स्वराज्यपदं प्राप्तवानिव स स्वराड्भवतीतिश्रु
तेः ॥४७॥ पामरदशास्वराज्यं दृष्टांतः तद्वद्देशातुनास्तिदृष्टांतः परिच्छेदाभावादित्याशयेनाह आत्मन्येवेति ॥ अपर्विस्तात्मनीत्यर्थः ॥४८॥ अनुन्मत्त
मानाः प्रशांतचित्तः सभोगेच्छाकृपणानूजंतून्दीनानि स्वपरेंद्रियाणि च उन्मत्तकानिव हसति ॥४९॥ तत्वविदो ज्झितं भोगमिच्छन इंद्रियस्य हस्यते प्र
वृत्तिरिक्रमयत्र शेषः ॥५०॥ ॥७॥

ननुमंदज्ञानेनपुरुषेणविषयेषुद्रुतंमनःकथंनिग्राह्यंतत्राहस्रजदिति ॥५१॥ दीयतेयेषयाभोगतृष्णयेतिशेषः ॥५२॥ ननुनिग्रहपीडितंमनोरुष्टोबालइव
स्यात्सन्न्यपिनरज्यतेतिचेत्तत्राहताडितस्येतिचिरोन्मादलालितस्यसहसानिग्रहेपुनःपरित्यागेहितथास्याच्चिरनिग्रहेणनिराशतांनीतस्यतुनतथेति
भावःकुसेकोपीसपिशब्दात्सकृत्सेकेकिंवाच्यमितिगम्यते ॥५३॥ उक्तमेवभावंप्रकाशयति अनातैर्नेति ॥५४॥ ॥५५॥ अभिगृहीतस्यसर्वतोनिग्रही

स्रजत्स्वात्मसुखंसौम्यंमनोविषयविह्वलं ॥ अंकुशेनेवनागेंद्रंविचारेणवशंनयेत् ॥५१॥ भोगेषुप्रसरोयस्यामनोदत्तेष्वदीयते ॥ साप्यादावे
वृहंत्याविषयस्येवांकुरोद्गतिः ॥५२॥ ताडितस्याहियःपश्चात्सन्मानःसोप्यनंतकः ॥ शालेर्ग्रीष्माग्नितप्तस्यकुसेकोप्यमृतायते ॥५३॥ अना
तैर्नहिसन्मानोबहुमानोनबुध्यते ॥ पूर्णानांसरितांप्रावृट्पूरःस्वल्पोनराजते ॥५४॥ पूर्णास्तुप्राकृतोप्यन्यत्पुनरप्यभिवांछते ॥ जगत्सूरणा
योग्यांबुगर्टप्हासेवार्णवोजलं ॥५५॥ मनसोपिगृहीतस्ययापश्चाद्भोगमंडना ॥ तामेवालब्धविस्तारान्क्लिष्टत्वाद्बहुमन्यते ॥५६॥ बंधु
मुक्तोमहीपालोग्राममात्रेणतुष्यति ॥ परैरबद्धोनाक्रांतोनराज्यंबहुमन्यते ॥५७॥ हस्तंहस्तेनसंपीड्यदंतैर्दंतान्विचूर्ण्यच ॥ अंगान्यंगैरिवा
क्रम्यजयेदादौस्वमिंद्रियशात्रवान् ॥५८॥ नेतुमन्यंसुनोत्साहैःपुरुषैरिहपंडितैः ॥ पूर्वंहृदयशत्रुत्वाज्जेतव्यानींद्रियाण्यलं ॥५९॥ एतावतिधरणीतले
सुभगास्तेसाधुचेतनाःपुरुषाः ॥ पुरुषकथासुचगण्यानजितायेचेतसास्वेन ॥६०॥

तस्य भोगमंडनाभिक्षाशनाद्यल्पविषयार्पणेनत्वालब्धविस्ताराल्लाभान्नभोगाद्बहुअधिकंमन्यते ॥५६॥ उक्तेर्थेदृष्टांतमाह बंधमुक्तइति ॥५७॥ न
साच्चिरनिग्रहेयावबोधेनचसमूलंमनोजयायप्रथममिंद्रियजयएवसर्वप्रयत्नैःकार्यइत्याह हस्तमिति ॥५८॥ नमनोजयार्थमेवबाह्यशत्रुजयार्थमपीं
द्रियजयआवश्यकइत्याह जेतुमिति ॥२९॥ इंद्रियनिग्रहफलंमनोजयंआश्रयंप्रशंसावंदनाभ्यांप्रशंसति ॥ एतावतीतिद्वाभ्यां ॥ येचेतोजयंतितएवचेत
सानिजितास्तएवसुभगाःपुरुषाणांकथासुसबंधमोक्षकोशल्येषुगण्याइत्यर्थः ॥ ॥६०॥

हृदयबिले कृतया कुंडलनया विवशो गर्वपरवशो महाभुजगो मनो यस्य उपशांतिं आत्यंतिकनाशमागतं महामुनिं अत्यंतं स्वेन रूपेणोदितमाविर्भूतं मुनिं निर्मलं तं तत्त्वविदं वंदे इत्यर्थः ॥६१॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे स्थि॰ त्रयोविंशः सर्गः ॥२३॥ इत्थं प्राबल्यमक्षाणां जयोपायं च वर्ण्यते ॥ तेन प्रसादबोधाभ्यां वासनाक्षय ईर्यते ॥१॥ तत्रेंद्रियजये उपायप्रयत्नाधिक्यं विधित्सुरिंद्रियाणां दुर्जयत्वमाह महानरकेति तपनावीचिमहारौरवसंघातकालसूत्रसंज्ञकमाह नरकभेदलक्षणो साम्राज्ये प्रत्येकमभिषिक्ता इति शेषः मत्ताः दुःकृतान्येव वारणाः गजा येषां ॥ आशा तृष्णा सा एव शरशलाका सा भिरा ख्याः

हृदयबिले कृतकुंडलकल्पना विवशो मनोमहाभुजगः ॥ यस्योपशांतिमागतमत्मुदितं तं सुनिर्मलं वंदे ॥६१॥ मोक्षोपाये शरीरनगरविभूतियोगो नाम सर्गः ॥२३॥ श्रीवसिष्ठ उवाच ॥ महानरकसाम्राज्ये मत्तदुष्कृतवारणाः ॥ आशाशरशलाकाढ्या दुर्जया हींद्रियारयः ॥१॥ स्वाश्रयं प्रथमं देहं कृतघ्ना नाशयंति ये ॥ ते कुकार्यमहाकोशा दुर्जयाः स्वेंद्रियारयः ॥२॥ कलेवरालयं प्राप्य विषयामिषगृध्नकाः ॥ अक्षगृध्रा विवल्गंति कार्याकार्योग्रपक्षिणः ॥३॥ विवेकतंतुजालेन गृहीता येन ते शठाः ॥ तस्यांगानि न लुंपंति पाशा नागबलं यथा ॥४॥ आपातरमणीयेषु रमते विषयेषु यः ॥ विवेकधनवानस्मिन्कुकलेवरपत्तने ॥५॥ इंद्रियादिभिरंतस्थैरवशो नाभिभूयते ॥ न तथा सुखिता भूपा मन्मयोग्रपुरीजुषः ॥६॥ यथा स्वाधीनमनसः स्वशरीरपुरीश्वराः ॥ आक्रांतेंद्रियपक्षस्य सुगृहीतमनोरिपोः ॥७॥

१ कुकार्याणि पापानि तान्येव महांतः कोशा धनसंचया येषां ॥ २ कलेवरलक्षणमालयं कुलायं विषयलक्षणो यो आमिषे गृध्नवः अभिकांक्षिणः अक्षाणींद्रियाण्येव गृध्राः कार्यं कर्तुं योग्यमनिषिद्धं कर्म अकार्यं निषिद्धं कर्म ते एव उग्रपक्षौ ताभ्यामुग्रपक्षिणः ॥३॥ शठाः धूर्तास्ते इंद्रियारयः येन गृहीतास्तस्य पुंसो गानि शांत्यादीनि न लुंपंति ॥ नागबलं गजघंटा ॥४॥ तान्नरीन्जेतुं प्रथमं विवेकधनसंचयः कार्य इत्याशयेनाह ॥ आपातेति ॥५॥ मन्मयो ग्रत्नाभ्यां पुरीविशेषणं स्वशरीरपुर्यास्तद्विलक्षणत्वेनोत्कर्षप्रतिपादनार्थं ॥६॥ इंद्रियादिनिग्रहस्य फलान्याह आक्रांतेत्यादिना ॥७॥ श्रीविश्वेश्वरायनमः

८॥ निशीथपदेनाज्ञानांधकारो गम्यते॥ ९॥ स्वदेहनगरीसाम्राज्ये स्वस्य मंत्रिसामंतादिकार्यं सुहृन्मन एव निर्वाहयतीत्याह स्वस्येति॥ १०॥ स्निग्धा स्नेहवती लल्लना भार्या॥ ११॥ मनसः पितृत्वे हेतुं स्मरयत्याह स्वालोकितइति शास्त्रदर्शितया देवतादृशा अनुल्लंघ्यशासनत्वेन चिन्मात्रस्यं दृष्टे न च स्वालोकितः बुध्या स्नेहबुध्या च॥ १२॥ परां स्वार्जितधनादिलक्षणां तत्वज्ञानलक्षणां च सिद्धिं॥ आत्मानं देहं मनोरूपं चतुर कासुदृढ इति शेषणावज्ञमपि रिति गम्यते॥ आर्यैः शास्त्रदर्शित्तिपरीक्षादृशा सुदृष्टः स्वनिष्ठाने भाग्यात् दृष्टस्य॥ ततस्त्वाचार्यसितीत्यादि

वसंते इव मंजर्यो वर्द्धंते शुद्धबुद्धयः॥ प्रक्षीणा चित्तदर्पस्य निग्रहीतेंद्रियद्विषः॥ ८॥ पद्मिन्य इव हेमंते क्षीयंते भोगवासनाः तावन्निशीथवेताला वल्गंति हृदि वासनाः॥ ९॥ एकतत्वदृढाभ्यासाद्यावन्न विजितं मनः॥ प्रत्योभिमतकर्तृत्वान्मंत्री सत्कार्यकारणात्॥ १०॥ सामंतश्चेंद्रियाक्रांतेर्मनो मन्ये विवेकिनः॥ लालनात्स्निग्धलल्लनालालनासावनः पिता॥ ११॥ सुहृदुत्तम विश्वासान्मनो मन्येम मनीषिणां॥ स्वालोकितः शास्त्रदृशा बुध्यांतः स्वानुभाविनः॥ १२॥ प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनः पिता॥ सुदृष्टः सुपरामृष्टः सुदृढः सुप्रबोधितः॥ १३॥ सुगुणो योजितो भाति हृदि हृद्यो मनोमणिः॥ जन्मवृक्षकुठाराणि विलयोदर्कोदयानि च॥ १४॥ ७॥

सहायेन स्वानुभवपर्यंतं सुपरामृष्टः सम्यक्कुशाणोल्लेखनपरामृष्टस्य॥ ततो निदिध्यासनेन सुदृढः घनघातसहस्त्वात्मेघस्य॥ ततस्तत्साक्षात्कारेण सुप्रबोधितः तेजोव्यंजकस्सक्षालनेन सुप्रबोधितस्य॥ १३॥ ततः सुगुणे पंचमादिभूमिकाभेदे योजितः॥ शोभनगुणावर्तिस्वर्णहारादौ योजितस्य॥ मणिरूपकप्रस्तावे पि राम स्यांतरामंत्रीसत्कार्यकारणादिनि प्रागुक्तेः सत्कार्यविशेषजिज्ञासायामुपलक्ष्याह जन्मेति॥ शुभकर्माणि शास्त्रीये प्रवृत्तस्येति शेषः॥ अनर्थपरंपरालक्षणानां जन्मवृक्षाणां कुठाराणि छेदकानि तथा उदर्कः तदुत्तरफलभूत उदयः निरतिशयानंदाविर्भावो येभ्यस्तथाविधानि च साधनचतुष्टयसंपत्त्यादि साक्षात्कारांतानि कर्माणि सत्कार्याणि दिशति कारयतीत्यर्थः॥ १४॥ ७॥ श्रीरामचंद्राय नमः॥ श्रीदत्ताय नमः

इत्थं रामं समाधाय प्रस्तुतं मणिरूपकमेवावत्नं ब्योपसंहरति ॥ एवमिति ॥ अथवा मणिमंत्रौषधीनामचिंत्यप्रभावत्वान्मंत्रिकार्यसिद्धिर्वैचित्र्याणां मणिना
पि संभवान्मनो मणिरेव मंत्री सक्तः ॥ तस्य जन्मवृक्षच्छेदो निरतिशयानंदोदयश्च सिद्धिवैचित्र्ये इनिनासर्येणमणिरूपकानुसारेणैव योज्यं ॥ १५ ॥ एवं
विवेकस्य निरतिशयसुखोदर्कतामुक्त्वा महानर्थोदर्कं निःप्रमादाद्रामं वारयति भवभूमिष्वित्यादिना ॥ १६ ॥ उत्तूऊर्ध्वासा तयंती त्यक्ता तारागादय
स्तेषु पूर्णासु ॥ १७ ॥ मा अवधीरय महारोगमिव नोपेक्षया वमंस्था इत्यर्थः ॥ प्रस्तुतमिंद्रियारिजयोपदेशमुपसंहरति विवेकमिति ॥ १८ ॥ ननु उप

दिशत्येवं मनोमंत्री कर्मणि शुभकर्मणि ॥ एवं मनोमणिं राम बहुपंककलंकितं ॥ १५ ॥ विवेकवारिणा सिद्ध्यै प्रक्षाल्यालोकवान्भव
भवभूमिषु भीमासु विवेकविकलो वसन् ॥ १६ ॥ मा पतलोसान्त पूर्णासु विवशः प्राकृतो यथा ॥ संसारमायामुदितामनर्थशतसंकुलां ॥
॥ १७ ॥ मामहामोह मिहिकामिमां त्वमवधीरय ॥ विवेकं परमाश्रित्य बुध्यासत्यमवेक्ष्य च ॥ १८ ॥ इंद्रियारीनलं जित्वा तीर्णो भवमवार्णवा
त् ॥ असत्येव शरीरेऽस्मिन्सुखदुःखेष्वसक्तश्च ॥ १९ ॥ दामव्यालकटन्यायो मा ते भवतु राघव ॥ भीमभासदृढस्थित्या लीलयास्य सि विशोकता ॥ २० ॥
अयमहमितिनिश्चयो वृथा यस्तमलमपास्य महामते स्वबुध्या ॥ यदितरदवलंब्य तत्सदंतं न जपिब सुखं न बध्यसे मनस्कः ॥ २१ ॥ मन
॥ स्यसत्ताप्रतिपादनं नाम सर्गः ॥ २४ ॥

त्तिप्रकरणोदेहेंद्रियादीनामसत्त्वमुपपादितुं तत्कुतोऽत्र तज्जयोपाय उपदिश्यते तत्राह ॥ असत्येवेति ॥ १९ ॥ तत्र दृष्टा असत्येपि मोहदशात सत्त्वस्या
नुभवविकृतत्वात्अचिकित्सनेवासनादार्ढ्येन दामव्यालकटन्यायेनानर्थप्राप्तिर्दुर्वारा विवेकाद्यभ्यासेन तच्चिकित्सने तु भीमभासदृढन्यायान्ना
नर्थप्राप्तिरित्याह दामेति ॥ २० ॥ अयं दृश्यभूतो देहादिरेवाहमिति योवृथानिश्चयो मिथ्याभिमानस्तं स्वबुध्यास्वतत्त्वनिश्चयेन अलं अपास्य यदितं
वस्तु न इतरत प्रत्यगेकरसं तदेवावलंब्य तत्स्वभावेन स्थितत्वात् मनस्कः सन्व्रजनादिव्यवहारं कुर्वन्नपि न बध्यसे सुक्त एवासीत्यर्थः ॥ २१ ॥०
इति श्रीयोगवासिष्ठे स्थितिप्रकरणे चतुर्विंशतिः सर्गः ॥ २४ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीसांबसदाशिवायनमः

सेनांपतीनां त्रिदशेः शंबरस्यात्र सूदनं ॥ दामव्यालकटोसन्तिरस्तेर्जयाशाचवर्ण्यते ॥ १ ॥ निर्वासनस्यापि शनैर्वासनासंचयेन देहाद्यभिमान जननेजन्ममरणपरंपरा भवतिकिंतुपुनर्नविवेकु विरलवासनस्येति कैमुतिकन्यायप्रदर्शनमुखेनेषदासव्युत्पन्नानां अल्पबुद्धपूर्णा निष्टा नांमंदमध्यमाधिकारिणांवासनोछेदप्रयत्नदार्ढ्यावश्यकताप्रदर्शनपरांदामव्यालकटाख्यायिकां विवक्षुर्वसिष्ठो रामस्यतच्छुश्रूषोत्पादना योक्तमेव विविच्यपुनरनुवदति अस्मिन्निति द्वाभ्यां ॥ लोकाजनाआरमंते विश्राम्यंत्यस्मिन्निति लोकारामस्तस्यतेयत्नंतिष्ठतः अनुतिष्ठतः

॥ श्रीवसिष्ठ उवाच ॥ अस्मिन्निहरतो लोके लोकारामस्य धीमतः ॥ श्रेयसे तिष्ठतो यत्नमुत्तमार्थाभिधायिनः ॥ १ ॥ दामव्यालकटन्यायो मातेभवतु राघव ॥ भीमभासदृढस्थित्या त्वं विशोको भवेति च ॥ २ ॥ श्रीराम उवाच ॥ दामव्यालकटन्यायो मातेभूदित्युदाहृतं ॥ ब्रह्मन्निमेन द्भवता भवतापापहारिणा ॥ ३ ॥ भीमभासदृढस्थित्या त्वं विशोको भवेति च ॥ प्रभो किमुक्तं भवता भवतापापहारिणा ॥ ४ ॥ उदारयैतया शुद्धं संप्रबोधय मां गिरा ॥ घनस्तापापहारिण्या प्रावृषीव कलापिनं ॥ ५ ॥ श्रीवसिष्ठ उवाच ॥ दामव्यालकटन्यायं भीमभासदृढस्थितिं शृणु राघव लघुतायदिष्टं तत्समाचर ॥ ६ ॥ आसीत्पातालकुहरे सर्वाश्चर्यमनोरमे ॥ शंबरो नाम दैत्येंद्रो मायामणिमहार्णवः ॥ ७ ॥ आका शनगरोद्यानरचितासुरमंदिरः ॥ कृत्रिमोत्तमचंद्रार्कभूषितालीयमंडलः ॥ ८ ॥

उत्तमानुशमदमाद्यर्थानभिधत्ते स्वात्मनिप्रकाशयतितच्छीलस्य ॥ १ ॥ दामव्यालकटन्यायो माभूदिति भीमभासदृढस्थित्या विशोको भवेति च उदाहृतं प्रागितिशेषः ॥ २ ॥ एवं पुनरनुवादेनोत्थापितजिज्ञासो रामस्तदुभयोक्तेर्विस्तरं पृच्छति दामेत्यादिना ॥ ३ ॥ ४ ॥ एतयापूतलक्ष्याद्वयवर्णनरूपया घनोमेघः कलापिपक्षेसंप्रबोधनंउल्लासनं ॥ ५ ॥ ६ ॥ मायानुरूपाणां महार्णवइवाकारः ॥ ७ ॥ तत्तमेव प्रपंचयति ॥ आकाशेत्यादिना आकाशकल्पितेनगरेउद्यानेषुरचितान्यसुरमंदिराणियेन ॥ ८ ॥

वा॰री॰स्थि॰

४८

चतुर्थः

शिलाशकलानिविसंभूतैः सुलभैः पद्माद्यैर्पद्मरागाद्यैर्मणिभिर्निधिभिश्च अमराचलः मेरुरिव संपन्नः ॥ ९ ॥ गृहे रत्नभूलानामंगनानां गेयैर्गीतैर्जि-
ताः अमरवधूनां ध्वनयो गीतिसंपदो यस्य ॥ १० ॥ फुल्लै र्निर्मलैः नीलोत्पलव्यूहैः करालः कामिभयंकरो रमणालयः क्रीडागृहं यस्य ॥ ध्वननं ध्वनो ध्वनिस्ते-
नाहूतः ॥ ११ ॥ १२ ॥ नर्कुयंत्रं कर्तरीयंत्रं तन्मयैरनंतैर्बहुभिर्दैत्यैर्निर्जितो वासवो येन ॥ हिममिव शीतैरनलज्वालैर्निर्मितो रचितः ॥ उद्यानमंडपो ये-
न ॥ १३ ॥ मायया सर्वापिहिता निर्व्यालसहिता निर्मलया चलचंदनानि येन ॥ १४ ॥ हेम्नः श्रीर्लोकैर्लावण्यानि च निर्जितानि याभिस्ता विधा अंतः

शिलाशकलसंभूतपद्माद्यैरमराचलः ॥ अनंतविभवारंभपरिपूरितदानवः ॥ ९ ॥ गृहरत्नांगनागेयजितामरवधूध्वनि ॥ चंद्रबिंब-
कलापूर्णक्रीडोपवनपादपः ॥ १० ॥ फुल्लनीलोत्पलव्यूहकरालरमणालयः ॥ रत्नहंसध्वनाहूतहेमांबुरुहसारसः ॥ ११ ॥ हेमपादपशा-
खाग्रहलांभोरुहकुड्मलः ॥ करंजजालप्रपलमंदारकुसुमोत्करः ॥ १२ ॥ नर्कुयंत्रमयानंतदैत्यनिर्जितवासवः ॥ हिमशीतानलज्वाल-
निर्मितोद्यानमंडपः ॥ १३ ॥ सर्वत्रकुसुमोद्यानजितानंदननंदनः ॥ मायासर्वहिलव्यालमलयाचलचंदनः ॥ १४ ॥ हेमश्रीलोकलाव-
ण्यनिर्जितांतःपुरांगनः ॥ नानाकुसुमसंभाराजानुदघ्नगृहांगणः ॥ १५ ॥ क्रीडार्थमन्मयेशानजितचक्रगदाधरः ॥ अजस्रोड्डीन-
रत्नौघतारादृश्यखपुरांतरः ॥ १६ ॥ निशीथाखिलपातालशातचंद्रनभस्स्थलः ॥ खशालभंजिकालोकगीतगीतिरणोत्कटः ॥ १७ ॥

पुरांगनायस्य निष्ठापरनिपातश्छांदसः ॥ १५ ॥ क्रीडार्थेन मन्मयेनेशानेन जितश्चक्रगदाधरो विष्णुर्येन ॥ अजस्रमुड्डीनैः खद्योतवद्भ्रमद्भिः रत्नौघैः
तारादृश्यं तारकितं खं पुरांतरं च यस्य ॥ १६ ॥ अमावास्यादिनिशीथेष्वखिलेपाताले शातचंद्रं नभस्स्थलं यस्य स्वर चितशालभंजिकाः मंचीः आलोक्य-
यंतीति खशालभंजिकालोकास्तैः खशालभंजिकालक्ष्यैर्लोकैर्वा गीतगीतिः प्रबंधो यस्य तथाविधो रणोत्कटे युद्धशौंडीर्यं यस्य ॥ १७ ॥ श्री

४७

विश्वेषु स्त्रीहस्त्यश्वादिषूत्कर्षैः रत्नमूतैः स्त्रीरत्नादिभिः ॥१८॥ १९॥ वनग्रहणादिछायामायिकसहस्रायुतादिभुजसंपत्तिर्गम्यते ॥२०॥ तस्य शंबर

मायैरावणनागेंद्रविद्रुतामरवारणः ॥ त्रैलोक्यविभवोत्कर्षपूरितांतःपुरांतरः ॥१८॥ सर्वसंपत्तिसुभगः सर्वैश्वर्यनमस्कृतः ॥ समस्तदैत्यसामंतवंदितोग्रानुशासनः ॥१९॥ महाभुजवनछायाविश्रांतासुरमंडलः ॥ सर्वबुधिगणाधाररत्नमंडलमंडितः ॥२०॥ तस्योत्सादितदेवस्यकठिनोद्दामरात्कृते ॥ बभूव विपुलं सैन्यमासुरं सुरनाशनं ॥२१॥ तस्मिन्मायाबलेसुमेदेशांतरगतेतथा ॥ तत्सैन्यंतरसाजघ्नुरिंद्रप्राप्य किलामराः ॥२२॥ अथ शंबरदैत्येनमुंडिक्रोधद्रुमादयः ॥ रक्षार्थमथसामंताः स्वसेनासु नियोजिताः ॥२३॥ ज्ञानपर्यंतरमासाद्य जघ्नुर्देवाभयानकाः ॥ व्योमांतरगताः सेनाः कल्पविंका निवाकुलान् ॥२४॥ सेनापतीन्पुनश्चान्यांश्चक्रारासुरसत्तमः ॥ चपलानुद्भटारावांस्तरंगानिव सागरः ॥२५॥ देवस्तानपितस्याभुः जघ्नुस्तेन सकोपवान् ॥ जगामामरनाशाय परिपूर्णं त्रिविष्टपं ॥२६॥ तस्मात्तन्मायया भीताः सुरास्तेनर्द्धिमाययुः मेरुकाननकुंजेषु मृगा गौरीहरेरिव ॥२७॥ क्रंदत्सुद्रामरगणं बाष्पक्लिन्नाप्सरोमुखं ॥ शून्यं ददर्श सस्वर्गं कल्पवृक्षीयाजगत्समं ॥२८॥ विहरत्कुपितस्तत्रत्नब्धमाहृत्य सुंदरं ॥ लोकपालपुरीं दग्ध्वाजगामासीयमालयं ॥२९॥ एवं दृढतरीभूतेद्वेषे दानवस्तेबयोः ॥ देवाः स्वर्गं परित्यज्य दिक्षु जग्मुर[illegible]त ॥३०॥ [illegible]रदैत्येन ये ये सेनाधिनायकाः ॥ क्रियंते यत्नतस्तांस्तु नघ्नुर्यत्नपराः सुराः ॥३१॥ ७॥

स्यकठिनाडुः स[illegible] [illegible]रीवा आकृतिर्यस्य ॥२१॥ मायाबलं यस्य तथाविधे तस्मिन्मये ॥२२॥ सामंताः सेनापतयः ॥२३॥ २४॥ २५॥ परिपूर्यंदैत्य[illegible] [illegible]रीवाहनसिंहात् भीता मृगाइव ॥२७॥ २८॥ तत्रस्वर्गे लुंठने नत्नब्धं सुंदरं रत्नादि आहृत्य आराय ॥२९॥ [illegible]खंबरः उद्वेगमायातस्सन् जघ्नाले निपरेणान्वयः ॥३१॥ श्रीरामचंद्रायनमः ॥ श्रीविश्वेश्वराय॰

तेसोऽल्पोपि ॥३२॥ ३३॥ बलं सैन्यं तस्य रक्षार्थमुदितान्युद्युक्तान् कालान् भूतो भविष्यान् वर्तमा

...रातत्रि... पान्वहंति तच्छीलानित्यर्थः ॥ ३४ ॥ दमयतिशत्रून्निति दमः स एव दामः व्याल इव वेष्टतिप

चतुर्थः

यावदुद्वेग... तः शंबर... पवान् स्पर्शं ॥ तार्णोतिमात्रमनल इव जज्वाल सोच्छ्वसन् ॥ ३२ ॥ त्रैलोक्यमपि चान्विष्यन देवां

लब्धवानथ ॥ परेणापि प्रयत्नेन निधानमिव दुष्कृती ॥ ३३ ॥ ससर्ज मायया घोरान् खुरांस्त्रीन्महाबलान् ॥ बलरक्षार्थमु

दितान्कालान्मूर्तिमिव स्थितान् ॥ ३४ ॥ निर्दन्नामायया भीमाबलपादपवाहिनः ॥ उदगुस्ते महामायाः पक्षसु ध्या इवाद्र

यः ॥ ३५ ॥ दामो व्यालकटश्चेति नामभिः परिलांछिताः ॥ यथाप्रासैक कर्तारश्चेतनामात्रधर्मिणः ॥ ३६ ॥ अप्रवाहकर्म

णां ते च प्राक्तनानन च वासनाः ॥ निर्विकल्पकचिन्मात्रपरिस्पंदैकधर्मकाः ॥ ३७ ॥ श्री ॥

परानितिव्यालः कटत्यावृणोति पराक्रमेभ्यः स्वानि निकट इति व्युत्पत्त्यान्वर्थैर्नामभिः परिलांछिताश्चिह्निताः ॥ ३६ ॥ पूर्वेभ्यस्तेषु को तिशये

हेतुस्तमाह ॥ अप्रवाहादित्यादिना ॥ ते दामादयः प्राक्तनाः पूर्वसिद्धजीवाः न ॥ न च वासनास्तेषां संति ॥ कुतः कर्मणां धर्मादीनां अभावा

त् किंतु निर्विकल्पकः भयशंकापलायनादिशून्योयश्चिन्मात्रसन्निधाननिमित्तदेहपरिस्पंदः तदेकधर्मकाः ॥ ३७ ॥

ननु यदि तेषां कर्मकामवासना न संतिर्हि जन्मबीजाभावाज्जन्मैव न स्यात्॥ यदि च बीजाभावेपि जन्म स्यात्तर्हि मुक्तानामपि पुनर्जन्म स्यादिति तथा चाग्रेपि वक्ष्यति विद्यते वासना यत्र तत्र सा याति पीनतामिति॥ अतोऽसंगतं कर्माद्यभाववचनमित्याशंक्याह॥ कर्मजीवकलामिति नैते स्वतंत्रा जीवाः॥ किंतु अंतः स्थोदयति प्रेरयतीत्युंतःस्थोदा अंतर्यामिचितूलया निमित्तभूतया कर्मजीवस्य शंबरस्य कल्नां कौशल्यरूपां तन्वीं अल्पपरिमाणां अपुष्टां कर्मवासनाद्यनुचितां कृत्रिमां मायाकल्पनारूपां अत एवासारां भोगसारशून्यां मनोभिधां संकल्पवृत्तिमादाय उदयमाविर्भावं मागताः॥ तथा चेंद्रजालिकसृष्टपुरुषांतराणामिव स्वतंत्रकर्माभावेप्याविर्भावलक्षणं जन्मोपपद्यत इति भावः॥

॥ कर्मजीवकलां तन्वीमसारां च मनोभिधां॥ अपुष्टां कृत्रिमामंतःस्थोदयोदयमागताः॥ ३८॥ नेह्यंधपारंपर्येण काकतालीयवद्भुटा॥ प्राक्तनामनुवर्तंते क्रियामुज्झितवासनाः॥ ३९॥ अर्द्धसुप्ता यथा बालाः स्वांगे रिंगंति केवलं॥ वासनात्माभिमाना॥ त्यां हीनास्ते तद्वदेव हि॥ ४०॥ नाभिपातं न चापातं न विद्रुस्ते पलायनं॥ न जीवितं न मरणं न रणं न जयाजयौ॥ ४१॥ ७॥

अथवा विपश्चिद्रुपाख्यानं वक्ष्यमाणान्यायेन शंबरजीवस्येवाग्निविस्फुलिंगवदंतःचाद्धतिश्च्य विभागात् कर्मजीवस्य कल्नां अंशभूतां तत्र कर्मवासनादीनामत्यल्पत्वादपुष्टां मनोमनःप्रायां कृत्रिमां भिदां प्राप्य देहाद्युपाध्युदयाडुदयं जन्म आगताः प्राप्तास्तथा च योगिदेहभेदवच्छंबरकामकर्मवासनाबीजवशादेवैषां जन्मसिद्धेन पृथक् तदपेक्षास्ति॥ एतावांस्तु विशेषः॥ योगिनां देहभेदे न तत्वज्ञानेन बाधितत्वान्न प्रतिशरीरं कामादिबीजोपचयः॥ दामव्यालकटादिदेहे तज्ज्ञत्वात्तदुपचये जन्मपरंपराप्राप्तिरिति न कदाचिदनुपपत्तिरिति भावः॥ ३८॥ अत एव योगिवदेव तेषां यावद्वासनोपचयं व्यवहार इत्याह॥ नेहीति॥ ३९॥ अप्रबुद्धवासना नां कचेष्टा दृष्टिरिति चेत्तत्राह॥ अर्द्धसुप्ता इति रिंगंति चेष्टंते॥ ४०॥ अभिपातं युद्धकाले आभिमुख्येन शत्रूणां पातनं आपातं विश्रांतं विमृस्ते तेषु अकस्मात् घतूणांपतनं॥ ४१॥ ७॥

यदिन विदुस्तर्हिस्वयंकथंशत्रूनपि पेतुस्तत्राह केवलमिति अभिपत्य प्रहर्तव्यमिसेनादृशशंबरसंकल्पवासनामात्रशरीरत्वादपि मुखशत्रुदर्शनेन तावन्मात्रोद्बोधादभिजग्मुरितिभावः॥४२ मायाकृतैरसुरैः सुरक्षिता॥४३ अमरवारणादिग्गजास्तेषांदंतविघट्टने घमरपर्वतोमेरुस्तदीयाहेमशिलेवशत्रुप्रहरेष्वपि अलमसंतंस्थिरतांएष्यतिप्राप्स्यति॥४४॥ इतिश्रीवसिष्ठ॰स्थि॰पंचविंशतिसर्गः॥

केवलंसेनिकानग्रेदृष्टानाहननोद्यतान्॥ अभिजग्मुःपरानाजौप्रहारदलिताद्रयः॥४२॥ शंबरश्चिंतयामासपरितुष्टमनाः परं॥ विजेष्यतेहिमेसेनामायासुरसुरक्षिता॥४३॥ अतिबलाःसुरदोर्द्रुमपालितामममचमूःस्थिरतामलमेष्यति॥ अमरवारणदंतविघट्टनेघमरपर्वतहेमशिलायथा॥४४॥ दामव्यालकटोसत्तिःसर्गः॥२५॥ श्रीवसिष्ठउवाच॥ इतिनिर्णीयदैत्येंद्रोदामव्यालकटान्विता॥ सेनांसंप्रेषयामास भूतलंदेवनाशिनी॥१॥ दैत्याःसागरकुंजेभ्यःकंदरेभ्यश्चसायुधाः॥ उदगुर्घनिर्ह्रादाःसपक्षगिरिलीलया॥२॥ रोदसीकोटरंहस्तप्रहारहतभास्करं॥ दानवाःपूरयामासुर्दामव्यालकटैधिताः॥३॥ अथोत्तस्थुर्निकुंजेभ्यःकंदरेभ्यःसुराचलात्॥ प्रलयांतइवक्षुब्धाभीमाःसर्वासिनांगणाः॥४॥ देवासुरपताकिन्योस्तद्युद्धमभवत्तयोः दामव्यालकटादीनामुद्धतानांरसालसात्॥ दैत्यैःसहसंग्रामोवर्ण्यतेत्रमहोद्भटः॥॥ अकालोल्बणकल्पांतभीषणंभुवनांतरे॥५॥ ॥छ॥

इतिविजेष्यतेहीत्यादिपूर्वोक्तप्रकारेण॥१ सागरेभ्योवेलावनकुंजेभ्योगिरिकंदरेभ्यश्चयथामार्गतापूर्वंउदगुःऊर्ध्वनिश्चक्रमुः॥२ हस्तप्रहारैर्हतोनिस्तेजस्कःकृतोभास्करोयस्मिंस्तथाविधंरोदस्योर्द्यावापृथिव्योःकोटरमंतरालाकाशं॥ दामव्यालकटैरेधितावर्धिताः॥३ उत्तस्थुःयुद्धायेतिशेषः॥४ अकालेउल्बणोद्भुःसहकल्पांतःप्रलयइवभीषणं॥५॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥ श्रीविश्वेश्वराय॰

स्फुटनं स्फुटः
कुंडलोद्योतलते जोभिः पीततमांसि शिरांसि प्रलयपर्यस्तचंद्रार्कदीप्तय इव कबंधा पेतुः ॥ ६ ॥ प्रलयानिलानां संपूरैर्महाप्रवाहैः स्फुटनं स्फुटः
घस्यार्थे कि विधानात्वः सएवांतरधातुर्वैचित्र्यदंतप्रकाशसाम्याद्धासोयेषां ॥ ७ ॥ भीरवः अत एव विश्रांताः अंतर्निलीना हरिमंडलाः सिंहसमूहा येषु त
था विधाः शैलशिलासदृशहेतीनां घातेरस्त भिन्नयः भग्नवप्राः कुलाचलानां हिमवदादीनां तटाः रेणुः दध्वनुः रणातेर्लिह ॥ ८ ॥ ९ ॥ कल्पस्संवर्त

पेतुः प्रलयपर्यस्तचंद्रार्का दिव दीप्तयः ॥ शिरांसि कुंडलोद्योतलते जः पीततमांस्यथ ॥ ६ ॥ जुघूर्णुर्घर्ट निर्मुक्त सिंहनादा विरा विला ॥
प्रलयानिलसंपूरैः स्फुटहासा इवाद्रयः ॥ ७ ॥ रेणुः शैलशिलातुल्यहेतिघातास्तभित्तयः ॥ कुलाचलतटा भीरु विश्रांतहरिमंडलाः ॥ ८ ॥
प्रलयानिलसंपूरैः स्फुटहासा इवाद्रयः ॥ ७ ॥ रेणुः शैलशिलातुल्यहेतिघातास्तभित्तयः ॥ कुलाचलतटा भीरु विश्रांतहरिमंडलाः ॥ ८ ॥
चेरुः परस्पराघातहलहेतिसमुत्थिताः ॥ लोलानलकणाः कल्पविशीर्णा इव तारकाः ॥ ९ ॥ विलेसूरक्तमांसौघपूर्णैकार्णवतीर
गाः ॥ कल्पलालवडुत्तालावेतालास्तालतालिताः ॥ १० ॥ प्रस्फुरद्रुधिरासारशांतपांसुपयोधरे ॥ व्योम्नि हेतिहतक्षुण्णमौलिकुं
उलकोटयः ॥ ११ ॥ बभ्रूर्भास्कराकारैः कल्पभूरुह धारिभिः ॥ प्रहारदलिताद्रींद्रैर्दैत्यैर्निर्विवरा दिशः ॥ १२ ॥ जग्मुर्ज्वलदसिप्रांत
वातपातितभित्तयः ॥ कृपाप्रकारतां शैलाः कल्पाग्निदलिता इव ॥ १३ ॥ देवास्ते च समाजग्मुरश्वमेधे धिला इव ॥ असुरानस्त्रविभ्र
ष्टान्जलनरा निववायवः ॥ १४ ॥ जग्रहुस्तानथाक्रम्य जरादारवृनिवौलव ॥ ते पितान्जगृहुर्मत्तान्दृष्टारूढा निवद्रुमान् ॥ १५ ॥ ६

स्तदीयो सालभूलतालवृक्षवडुत्तालाः प्रांशवो वेतालाः तालैः करतालैस्ताडिताः ॥ नर्तने संजाततालाः ॥ १० ॥ शांताः पयोधरा इव पांसवो यस्मिन्
व्योम्नि मौलिकुंडलकोटयो भास्कराकारैरूपलक्षिताबभूवुरिति दैहल्लीदीपन्यायेन संबध्यते ॥ ११ ॥ प्रहरणायो साटितकल्पभूरुह धारिभिः
॥ १२ ॥ वातैर्झंझापवनैः पातिता भित्तयो वप्रा यियेषां कृपाप्रकरतां चूर्णसमूहतां ॥ १३ ॥ १४ ॥ तानसुरान्जरद्वाखून् वृद्धमूषकान् ॥ औतवोमा
र्जाराइव ॥ ते असुरास्तान्देवान् द्रुमानारूढानारूढान्मत्तान्प्रमत्तपुरुषान् ऋक्षाप ऋक्षाइव जगृहुः ॥ १५ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः

दोर्दण्डस्पर्शोत्थपुलकेषु विलसन्तः हेलया शस्त्राण्येव कुसुमानि येषां ॥१६॥ १७॥ रोदोरन्ध्ररूपो य उदुम्बरान्तः प्रदेशस्तत्र महामशकः संघप्रायययो देवदानवसेनयोः ॥१७॥ इदानीं दिग्गजादिप्रमृद्यमानजननरणकोलाहलं वर्णयन्ति अथ सेत्यादि समभिः ॥१८॥ पिंडग्रहेणाघनीभावस्वीकारे पानभसिकुट्टिमं भूभागमिव कुर्वाणाः इति शेषः ॥ कुचित्प्रदेशे मुष्टिग्राह्य इव क्वचित् मेघानां मंथरं जलभारमंथरमुदरमिव पीवरः गम्भीर इति यावत् ॥२०॥ रथसंपाते न संपिष्टैः शस्त्रैः शैलैस्तु रटन्नटन्निव लालनलयानुसारी त्रुटद्हृदयानां निःसत्वानां निर्बलानां कर्कशाक्रंदैर्घर्घरः ॥२१॥

दोर्दण्डस्पर्शविलसद्धेतिकुसुमाः शस्त्रपल्लवाः ॥ रेजुः सुरासुराः फुल्लावनलोला इव द्रुमाः ॥१६॥ अन्योन्यं पूरयामासुः शस्त्रपूरैर्दिशो दश वनानि कुसुमव्रातैः सुमेराविव मारुतः ॥१७॥ घोरं समभवद्युद्धं देवदानवसेनयोः ॥ रोदोरन्ध्रोदुंबरान्तर्महामशकसंघयोः ॥१८॥ अथो दपतद्दन्तात्त्वै र्लोकपालैर्भ्रमं उल्लैः ॥ कृत्याप्तस्फूर्जिताकारो दारुणः समरारवः ॥१९॥ पिंडग्रहेणानभसि भूभागमिव कुट्टिमं ॥ मुष्टिग्राह्यो महामेघमंथरोदरपीवरः ॥२०॥ रथसंपातसंपिष्टशस्त्रशैलरटन्नटः ॥ त्रुटद्हृदयनिःसत्वकर्कशाक्रंदघर्घरः ॥२१॥ प्रलयप्रसयोल्लासि दैत्यानारावबृंहणः ॥ द्वादशादित्यसंघट्टद्रवत्कांचनपर्वतः ॥२२॥ ब्रह्मांडकुड्यसंघट्टात्परावृत्याच निर्गतः ॥ महास्रोतः पयःपूरसत्वाहत इवाकरः ॥२३॥ चंचलत्पक्षशैलेंद्रपक्षवातचलध्वनिः ॥ कठिनापूरणोद्भूतस्फुटच्छैलेंद्रकंदरः ॥२४॥ ५७ ॥

प्रलयस्य प्रलये कारयोरग्निवाय्वादिभिरुल्लासीयः कृत्यस्य ब्रह्मान्होन्ते प्रसिद्ध आरावस्तस्य बृंहणः प्रतिगर्जनप्रायः ॥ द्वादशादित्यानां संघट्टेनेन मेलनेन द्रवन्नूयः कांचनपर्वतस्तदीयशब्द इवेत्यर्थः ॥२२॥ संघट्टो दित्यल्लोपे पंचमी संघट्टं प्राप्य परावृत्या च कारेणास्वस्थानाच्च निर्गतः सत्वैः प्राणिभिराहतः ॥ आकरः सत्वाकरः महास्रोतसः पयःपूरध्वनिरिव ॥२३॥ चंचलां चलतां सपक्षशैलेंद्राणां पक्षवातेनेव चलन्नूध्वनिर्यत्र कठिनैर्दुर्भवैरापूरणो रुद्धूताउद्विग्नाः स्फुटंतः श्रोत्रप्रायाः शैलेंद्रकंदरा येन ॥२४॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीविश्वेश्वरायनमः ॥

अमृतार्थमंथने मंदरेणोद्धूतस्य दुग्धाब्धेः संक्षोभध्वनिना सादृश्यमंगं स्वरूपं यस्य ॥ तत्रैवामृतोत्पत्तौ रत्यालदास तत्या प्रएवं तियेदेवाः सुरास्तेषां ह
र्षोत्कर्षे घुंघुमाइव ध्वनंतं आस्फोटा भुजास्फालनशब्दास्तैर्घटिताः व्याप्ताः सप्तद्वीपलक्षणाः जंतुभुवः ॥ प्राण्यावासा येन ॥ २५ ॥ इत आरभ्य आस
र्गसमाप्तेर्युद्धमेव वर्णयति ॥ सेनयोर्योरित्यादिना ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ हेतय एवोग्रवातास्तैर्निष्पिष्टाः ॥ पतंतश्च वैमानिकव्रजा यत्र ॥ अस्त्रैर्वारुणास्त्रा
दिभिरुद्वेलस्याब्धेर्वार्योघैः प्लाविता निर्व्योमपत्तनान्यमरावसादीनि यत्र ॥ ३० ॥ शैलानां पक्षेषु पार्श्वेषु उद्भटैरास्फोटैर्लुठन् कंपमानः ब्रह्मांडमंडपो

मंदरोद्धूतदुग्धाब्धिसंक्षोभसदृशांगकः ॥ रत्निभृत् घुंघुमास्फोटघटितद्वीपजंतुभूः ॥ २५ ॥ सेनयोः क्षुब्धयोरासीद्युद्धमुद्धतदानवं ॥ निष्पिष्टनग
रग्रामगिरिकाननमानवं ॥ २६ ॥ महाहेतिशतच्छिन्नदानवाचलपूर्णदिक् ॥ अन्योन्याहतहेत्यादिचूर्णपूर्णांबरोदरं ॥ २७ ॥ भुशुंडिमंडलास्फो
टस्फुटन्मेरुशिरःशतं ॥ शरमारुतनिर्लूनदैत्यदेवमुखांबुजं ॥ २८ ॥ चक्रावर्तशतभ्रांतदेवदैत्यजरत्तृणं ॥ सेनाप्रहारकल्लोलवल्गनावलितांब
रं ॥ २९ ॥ हेत्युग्रवातनिष्पिष्टपतद्वैमानिकव्रजं ॥ अस्त्रोदिताब्धिवार्योघप्लावितव्योमपत्तनं ॥ ३० ॥ वहन्महास्त्रपातासिशूलशक्तिनदीशतं
शैलपक्षोद्भटास्फोटलुठद्ब्रह्मांडमंडपं ॥ ३१ ॥ दैत्यपार्ष्णिप्रहारोघपतल्लोकेशपत्तनं ॥ नारीहल्लहल्लारावरणत्कंकणमंडलं ॥ ३२ ॥ लुठद्दे
सबलोद्धूतमत्तास्त्रौघजल्पाचितं ॥ रक्तधौतनरौघौग्रमुक्तनादद्रवज्जनं ॥ ३३ ॥ लोकपानीकपांभोजच्छन्नाच्छन्नयमान्वितं ॥ पुनः सुरा
सुरैर्घातैर्दृष्टसैन्यकुलाकुलं ॥ ३४ ॥ सपक्षपर्वताकारदानवाद्रिगमागमैः ॥ वहच्छवशवाशब्दभूरिभांकारभीषणं ॥ ३५ ॥ आयुधा
ग्रविभिन्नोग्रदैत्यपर्वतनिर्झरैः ॥ रक्तैरुपिताशेषवसुधार्णवपर्वतं ॥ ३६ ॥ उत्सन्नराष्ट्रनगरविपिनंग्रामगह्वरं ॥ ध्वनासंख्यासुरेभाश्व
॥०॥ मनुष्यशवपर्वतं ॥ ३७ ॥

यत्र ॥ ३१ ॥ लोकपालानामिंद्रादीनामनीकपाः सेनानायकास्त एव हंसयोषांभोजेषु भ्रमर इव कदाचिन्मृतानां प्राणाह ॥०॥
रपायच्छन्नः कदाचिद्युद्धार्थमच्छन्नः प्रकटश्च यो यमस्तेनान्वितं पलायनकाले घातैः प्रहारैः पुनः परावृत्य दृष्टेनार्या प्रहरता सैन्यकुलेना
कुलं ॥ ३४ ॥ शवशवेत्यनुकरणशब्दरूपैर्भूरिभिर्भांकारैर्भीषकैरैः भीषणं ॥ २५ ॥ २६ ॥ ध्वनाश्वसंख्यासुरेभाश्वमनुष्यशवायेस्तथाविधाः पर्व
॥ तामेवंदियोयत्र ॥ ३७ ॥ ३८ ॥ ३९ ॥
॥ ३२ ॥ ३३ ॥

कुपितान्गनी ति देवपराक्रमः एकांजलीत्य सुरपराक्रमः॥४८॥ चंडैर्दैत्यैः शैल्ल शिलाद्यतिसंभारैः प्रक्षिप्तैः शिलीकृतः महानूज्वलतीति ज्वलो ग्निर्यत्रेति दैत्यपराक्रमः॥ वनव्यूहल्लक्षयोंधनप्रयुक्ताभिरग्न्यार्चिर्भिर्द्रीविताः॥ अतएवांबुप्रायाः शैल्लोच्चयायत्रेति देवपराक्रमः॥ एवमग्रेपि यथायोग्यंबोध्यं॥४१॥४२॥ कल्लामायाकौशल्लंतत्प्रयुक्तानाम स्त्राणांघनवर्षणं॥४३॥ संघर्षः पराभिभवः स एवावग्रहः॥ प्रागुक्तवर्षप्रतिबंध

सुताल्लोत्ताल्ल नाराचराजीरोचितवारणं॥ मुष्टिप्रहारपिष्टांसमत्तैरावणवारणं॥३८॥ कृत्याभ्रपटलासारधारादल्लितपर्वतं॥ महाशनिविनिष्पेषपिष्टोड्डीनकुलाचलं॥३९॥ कुपिताग्निजल्लज्वालाजाल्लज्वल्लितदानवं॥ एकांजलिपुटानीतसमुद्रोल्लासितानल्लं॥४०॥ चंडदैत्यानिसंभारशिलीकृतमहाज्वलं॥ वनव्यूहैर्धनाग्न्यर्चिर्द्रावितांबुशिलोच्चयं॥४१॥ अस्त्रनिर्मितदुर्वारतमःकृत्यांतरात्रिकं॥ मायासूर्यगणोद्योतैःपीतातनुतमःपटं॥४२॥ मायाग्निवर्षनिष्पीतकल्लाभ्रघनवर्षणं॥ ससीकरा ग्निवमनशस्त्रसंघट्टवर्षणं॥४३॥ वज्रवर्षास्त्रनिर्धूतशैल्लवर्षास्त्रसंभ्रमं॥ निद्राबोधास्त्रयुद्धाढ्यंसंघर्षावग्रहाश्रयं॥४४॥ वरुणकचवृक्षास्त्रजल्लाग्न्युस्मरणांधितं॥ अस्त्रास्त्रयुद्धविषमंतमस्तेजोस्त्रसारितं॥४५॥ अस्त्रोद्गीर्णायुधानीकनीरंध्रसकल्लांबरं॥ शिल्लावर्षास्त्रदल्लितंवह्निवर्षास्त्रभासुरं॥४६॥ पताकास्पष्टशशिकैश्यकचीत्कारगर्जितैः॥ मुहूर्तैनिरथोत्क्षिप्तैर्दारयास्त्रमयाचलं॥४७॥ वज्रप्रहारविरतम्रियमाणमहासुरं॥ शुक्रामरमहाविद्याजीवमानमहासुरं॥४८॥ विद्रवद्देवसंघातंजयप्रोड्डामरामरं॥ शुभग्रहमहाकेतुमालिकानामितस्तनः॥४९॥७॥

स्त्रदाश्रयं॥४४॥ जल्लाग्न्योरस्मरणेनव्यामोहेनांधितं॥४५॥ आसुरपैशाचाद्यस्त्रैरुद्गीर्णैस्तोमरमुसलमुद्गराद्यायुधानीकैर्निरंध्रंसकल्लांबरंयत्र॥४६॥ शुक्रस्यअमराख्यामहाविद्यामृतसंजीवनविद्यातयाजीवमानाः महासुरायत्र॥४८॥ क्वचिद्विद्रवद्देवसंघातंक्वचिज्जयप्रोड्डामरामरंक्वचिच्छुभग्रहाणांमहतीनांकेतुमालिकानांचवृंदेर्दर्शीनार्थमितिस्तनउद्धरकंधरंउन्नमितकंठं॥४९॥ श्रीवासुदेवायनमः॥ श्रीरामचंद्रायनमः॥ श्रीकृष्णाय॰

क्वचित्तु उत्ताला नामंगल्लोद्यानांच बुद्धे दर्शनार्थमुद्धरकंधरफलस्यापि हेतुत्व विलक्षणाद्बुद्धेरिति पंचमी अद्रिभिः खेन समुद्रेण दिवा च सहितं जगदे
व रुधिरवारिधिर्यत्र ॥ ५० ॥ जगदित्यनुवर्तते कुर्वन्नुइति पूर्वोत्तरार्द्धान्वयिउभयत्रापि रुधिरेणो तिशेषः ॥ शरव्रातस्य वनत्वेन रूपणाय विशिनष्टि दी
प्यमानैरित्यादि ॥ अर्करश्मिप्रतिबिंब पल्लवैर्दीप्यमानैः स्वस्य वेगवातेन नर्तैश्चलैः कंकादि पक्षागरुत एव पुष्पाणि येषां तैः लसंति फलानि लोहभागा

फुल्लैकिंशुकवनं कुर्वन्नूर्ध्वरिर्वैरतः
॥ उत्तालमंगल्लोद्यानां बुद्धेरुद्धरकंधरं ॥ साद्रिखोर्वी समुद्रद्यु जगद्रुधिरवारिधिः ॥ ५० ॥ दीप्यमानैः स्ववातानर्तैः पक्षपुष्पैर्लसि
॥ पर्वतप्रतिमासंख्य शवपूर्णमहार्णवं ॥ ५१ ॥ समग्रतरुशाखाग्रत्वं बल्लोलमहाशवं ॥ दीप्यमानैः स्ववातानर्तैः पक्षपुष्पैर्लस
॥ फलैः ॥ ५२ ॥ तालोत्तालैः शरव्रातवनैर्व्याप्तनभस्थलं ॥ पर्वतप्रतिमासंख्यकबंधशतबाहुभिः ॥ ५३ ॥ न्यस्तद्भिः पातितां भोदवि
॥ मानसुरतारकं ॥ शरशक्तिगदापाशपट्टिशप्रोतपर्वतं ॥ ५४ ॥ लोकसप्तकविभ्रष्टकुडयखंडचितांबरं ॥ अनारतरस
॥ न्मत्तकल्पान्तदृढडुंडुभिः ॥ ५५ ॥ एवं शब्दशतोन्मादपातालतलवारणं ॥ विनायककराकृष्टदीर्घदानवपर्वतं ॥ ५६ ॥
॥ एकदिक्करनिष्पंदसिद्धसाध्यमरुद्गणं ॥ पलायमानगंधर्वकिन्नरामरचारणं ॥ ५७ ॥ ७ ॥

पद्दिशां
पूर्वस्लेषाः फलानि येषां तैः ॥ ५२ ॥ तालेभ्योप्युत्तालैरुच्छ्रितैः ॥ ५३ ॥ कबंधशतबाहुभिः पातिताः अंभोदाः ॥ विमानानि सुरास्तारकाश्च यत्र ॥ ५५ ॥ ०
तैः प्रोताः संतताः पर्वता यत्र ॥ ५४ ॥ यद्यप्यूर्ध्वं षडेव लोकास्तथापि भूलोकसह कुडयखंडानामप्युडुपतनेन भ्रंशसंभवात्लोकसप्तकेत्युक्तं
एवं प्रागुक्तप्रकारैः शब्दशतैरुन्मादाः प्रतिगर्जितैः ॥ पातालतलवारयादिग्गजा यत्र ॥ ५६ ॥ दिग्गजकराणां सूर्येंद्रादीनामेकस्यां दिशि देवान्मिल
॥ ५७
०॥ नेपकदिक्कराः असुरभयान्निष्पंदाश्च सिद्धसाध्यमरुद्गणा यत्र

वा॰ री॰ स्थि॰
॥५२

इदानीमोस्त्विकं झंझापवनं वर्णयति वबुरिति॥ अशनिनिपातैर्वैद्युताग्निपातनैः खंडितप्राण्यंगाः दलितशिलाशकलाश्च सुरायां प्रलयसमय
स्य सूचकाः सुरतरुघर्घराणां कल्परक्षसंबंधिकुमरकोकिला दिध्वनीजां घस्मराः भक्ष्का स्तिरोधायका इतियावत् समीरा झंझामारुताः ववुः॥
५४ इति श्रीवासिष्ठतात्पर्य॰ स्थि॰ षड्विंशः सर्गः॥ २६॥ देवाः पराजितास्ते स्वयः प्रपन्नो स्योत्रपद्मभूः॥ प्राह दैत्यवधोपायं वासनोपचयं चिरात्॥ १॥
देवासुरशरीरेषु जातेषु गर्तेषु श्वभ्रेषु अस्रक्प्रवाहेषु वहत्स्विति परेणान्वयः॥ १॥ वेष्टितदेवौघं यथास्यात्तथा कृतः क्ष्वेडः सिंहनादरूपो महारवो येन २

ववुरशनिनिपातखंडितांगा दलितशिलाशकलाः ककुप्सु खेषु॥ प्रलयसमयसूचकाः सुराणां सुरतरुघर्घरघस्मराः समीराः॥ ५४॥ दामव्या
लकटसंग्रामवर्णनं सर्गः॥ २६॥ श्रीवसिष्ठ उवाच तस्मिंस्तदा वर्तमाने घोरे समरसंभ्रमे॥ देवासुरशरीरेषु गर्तेष्वंभोदरेष्विव॥ १॥ वहत्स्व
स्रक्प्रवाहेषु गंगापूरेष्विवांबरात्॥ दाम्नि वेष्टितदेवौघकृतक्ष्वेडं घनं रवे॥ २॥ व्याले निजकराकृष्टिपिष्टसर्वसुरालये॥ कटे कुंठि
तसंरंभसंगरक्षपितामरे॥ ३॥ ऐरावते क्षीयरवे पलायनपरायणे॥ प्रवृद्धे दानवानीके मध्याह्न इव भास्करे॥ ४॥ पतितांग
व्यथार्तानि प्रस्रवद्रुधिराणि च॥ पयांसीवावसेतूनि देवसैन्यानि दुद्रुवुः॥ ५॥ दामव्यालकटास्तानि चिरमंतर्हितानि च॥ अ
नुजग्मुर्ज्वलन्नादमिंधनानीव पावकाः॥ ६॥ अन्विष्टानपि यत्नेन नाप्त्वमंता सुराः सुरान्॥ घनजालवनोड्डीनान् सिंहाह
रिपाकानिच॥ ७॥ अलब्धेष्वमरौघेषु दामव्यालकटास्तदा॥ जग्मुः पातालकोशस्वं प्रभुं प्रमुदिताशयाः॥ ८॥ ॥छ॥

आकृष्टिराकर्षणं तया पिष्टाः संचूर्णिताः सर्वासुरालया येन॥ ३॥ ४॥ अवसेतून् निश्च्यवसन्नसेतूनि॥ ५॥ अंतर्हिता निदूरतिरोहिता निलसन्ना
दं भ्राजमाना धिक्षेप ध्वनिर्यथास्यात्तथा॥ ६॥ घनानि निबिडानि लता दिजालानि यस्मिंस्तथाविधे वने उड्डीनान् उत्पत्यलीनान्॥ ७॥ निर्वासनत्वा
त्स्वत एव प्रमुदिताशयला जयलाभानिमित्तकलेनोपचर्यते॥ ८॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥ श्रीवासुदेवायनमः॥ श्रीविश्वेश्वराय॰

चतुर्थः॥

जयोपायायजयोपायप्रश्नाय ॥ ९ रक्तैः रुधिरैः रक्ताशोणा आननानि श्रीर्येषां तेषां ॥ १० शंबरस्येहितं इच्छास्तस्या सकं दामव्यालकटक्रमं ॥ ११
॥ १२ तत्कालमितिकालाध्वनेरितिद्वितीया ॥ १३ ॥ १४ अहमित्याकाराप्रथमांतःकरणाहंत्तिरहंकाराचमत्कारः ॥ १५ तयाद्दसाग्रहीताः क्रमेणोप

अथदेवाविषण्णास्तेक्षयामाश्वास्यवैययुः ॥ जयोपायायविजिताब्रह्माणममितौजसं ॥ ९ तेषामाविरभूद्वल्गारक्तरक्ताननश्रियां
सायंरक्तीकृतांबूनामब्धीनामिवचंद्रमाः ॥ १० प्रणम्यतेसुरास्तस्मा अनर्थशंबरेहितं सम्यक्आकथयामासुर्दामव्यालकटक्रमं ॥ ११ ॥
तदाकर्ण्याखिलंब्रह्माविचार्यसविचारवित् ॥ उवाचेदंसुरानीकमाश्वासनकरंवचः ॥ १२ ब्रह्मोवाच ॥ शतवर्षसहस्रांतेशंबरेपात
रेःकरात् ॥ मर्तव्यममरेशस्यतत्कालंसंप्रतीक्षतां ॥ १३ दामव्यालकटानेतानद्यतममरसत्तमाः ॥ योधयंतःपलायध्वंमायायुद्धेनदान
वान् ॥ १४ युद्धाभ्यासवशादेषांमुकुराणामिवाशये ॥ अहंकारश्चमत्कारःप्रतिबिंबमुपेष्यति ॥ १५ ग्रहीतवासनास्तेतेदामव्यालकटाः
सुराः ॥ सुजेयावोभविष्यंतिलग्नजालाःखगाइव ॥ १६ अद्यतुवासनात्यक्तेसुखदुःखविवर्जिताः ॥ धैर्येणारीन्विनिघ्नंतोदेवादुर्जय
तांगताः ॥ १७ वासनातंतुबद्धायेआशापाशवशीकृताः ॥ वश्यतांयांतितेलोकेरज्जुबद्धाःखगाइव ॥ १८ येभिन्नवासनाधीराःसर्वत्रासक्त
बुद्धयः ॥ नहृष्यंतिनकुप्यंतिदुर्जयास्तेमहाधियः ॥ १९ यस्यांतर्वासनारज्ज्वाग्रंथिबंधःशरीरिणः ॥ महानपिबहुज्ञोपिसबालेनापिजीयते ॥ २० ॥
अयंसोहंममेदंतदित्याकल्पितकल्पनः ॥ आपदांपात्रतामेतिपयसामिवसागरः ॥ २१ ॥ ०

चितावासनायेषां ॥ १६ ॥ अवासनाःशंबरसंकल्पेनप्रतिबंधादनाविर्भूतवासनानत्वयंतावासनाःज्ञानंविना आत्यंतिकवासनोच्छेदासंभवात् निर्वासनानां
जन्मानुपपत्तेश्चेतिबोध्यं ॥ १७ ॥ १८ भिन्नवासनाःनष्टवासनाः ॥ १९ ॥ २० ॥ २१ ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवासुदेवायनमः ॥ श्रीविश्वेश्वराय॰

॥वा०टी०स्थि०
॥५३॥

सर्वदुर्वासनानां मध्ये आत्मनो देहादितादात्म्येन परिच्छिन्नताभ्रांतिवासनैव महामोहेर्ष्याकार्पण्यजन्ममरणादिबीजत्वान्महानर्थ इत्याह इयन्मात्रेत्यादि
ना ॥२२॥ अवशीकृतो विवशीकृतः संसारानर्थविकल्पीकृत इति यावत् ॥२३॥ यद्यदि आत्मनो व्यतिरिक्तं किंचिदस्ति तर्हि तत्र उपादेयभावेन उपादातुं योग्य
तया वासना भवतु नाम न तु तदस्तीत्यर्थः ॥२४॥ तथा च सद्वस्तु न्यास्था साज्येत्याशयेनाह आस्थामात्रमिति ॥२५॥ उक्तं प्रकृते योजयति रामेति ॥२६॥ देहाद्य

इयन्मात्रपरिच्छिन्नो येनात्मा भाव्यभाविनः ॥ स सर्वज्ञोपि सर्वत्र परां कृपणतां गतः ॥२२॥ अनंतस्याप्रमेयस्य येनेयत्ता प्रकल्पिता ॥ आत्मनस्तस्य
तेनात्मा स्वात्मनैवावशीकृतः ॥२३॥ आत्मनो व्यतिरिक्तं यत्किंचिदस्ति जगत्त्रये ॥ यत्रोपादेयभावेन बद्धा भवतु वासना ॥२४॥ आस्थामात्रम
नंतानां दुःखानामाकरं विदुः ॥ अनास्थामात्रमभितः सुखानामाकरं विदुः ॥२५॥ राम व्यालकटा यावदनास्थाभवसंस्थितो ॥ ताव
न्न नामजेया वो मशकानामिवानलाः ॥२६॥ अंतर्वासनया जंतुर्दीनतामनुयातया ॥ जितो भवत्यन्यथा तु मशकोप्यमराचलः ॥२७॥
विद्यते वासना यत्र तत्र सा याति पीनतां ॥ गुणो गुणिनि हि द्वित्वं सतो दृष्टं हि नासतः ॥२८॥ अयं सोहं ममेदं चेत्येवमंतः सवासनं ॥ य
था दामादयः शत्रुभावयंति तथा कुरु ॥२९॥ यया जनस्य विपदो भावाभावदशाश्रयाः ॥ तृष्णाकरंजवल्ल्यास्तामंजर्यः कटुकोमलाः ॥
॥३०॥ वासनातंतुबद्धो यो लोको विपरिवर्तते ॥ सा प्रवृद्धातिदुःखाय सुखायोच्छेदमागता ॥३१॥ स्वंतेन थानमुपायं कुर्वित्यर्थः

हंभावग्राहिण्यांतर्वासनया देहादिनाशेनात्मनाशसंभवानयादीनतां कातरतां ॥ अन्यथा तादृशवासनाभावे तु मशकोप्यमराचलः मेरुरिवा
प्रकंप्यो भवतीत्यर्थः ॥२७॥ हि यस्माद्गुणिनि धर्मिणि सति पीनत्वाख्यो गुणो भवति किंचोपचयमंतरा न पीनत्वसिद्धिः उपचयश्च द्वित्वादीयावयवसिद्धौ
तच्च द्वित्वं सतो द्रव्यस्य दृष्टं नासत इत्यर्थः ॥२८॥ दामादयः यथा येनोपायेन अयं देहादिरेव प्रसिद्धोहं जयपराजयपूजाजीवनादि मम इति भावयंत्यभिम
स्यंतीत्याह तथा तमुपायं कुर्वित्यर्थः ॥२९॥३०॥ यो विपरिवर्तते तस्य वासनातिदुःखायेत्यर्थः ॥३१॥

॥चतुर्थः॥
॥५३॥

३२ हृदयपुंडरीकमेवाल्ययोनीउंतङ्गामिनः ॥ चित्तोपल्लक्षित जीवखगस्य ॥ ३३ रज्वातंतुनेव ॥ ३४ वासनायाः शंबरसंकल्पाहिता निरभिमा
नवासनायाः विपर्यासं वैपरीत्यं अभिमानोपचयमितियावत् रिपोर्दमादेः ॥ ३५ शत्रोरंतः अक्षुभिते धैर्येसंती तिशेषः ॥ शास्त्राणिअौशन
सादीनिनीतिशास्त्राणि ॥ ३६ अहंकारमयीवासनांते एते संकल्पाद्गृहीष्यंति ॥ ३७ नतज्ञेभ्यस्तेषु कोपकार्षैयेन तेवासनांगृह्णीयुस्तत्राह अस्य

धीरोप्यतिबहुज्ञोपिकुलजोपिमहानपि ॥ तृष्णयाबध्यते जंतुः सिंहः शृंखलयायथा ॥ ३२ देहपादपसंस्थस्य हृदयालयगामि
नः ॥ तृष्णाचित्तखगस्येयं वागुरापरिकल्पिता ॥ ३३ दीनोवासनयालोकः कृतांतेनापकृष्यते ॥ रज्वेवबालेनखगो विवशोऽस्वशमुद्ध
सन् ॥ ३४ अलमायुधभारेण संगरे भ्रमणेनच ॥ वासनाया विपर्यासं युक्त्यायत्नाद्रिपोः कुरु ॥ ३५ अंतरक्षुभिते धैर्ये रिपोरमर
नायक ॥ नशस्त्राणिनचास्त्राणिनशास्त्राणि जयंतिच ॥ ३६ दामव्यालकटास्तेनेयुद्धाभ्यासवशेनच ॥ अहंकारमयींमत्तास्ते
ग्रहीष्यंतिवासनां ॥ ३७ यदाते सङ्गपुरुषाः शंबरेणाविनिर्मिताः ॥ वासनामाश्रयिष्यंतितदायास्यंति जेयतां ॥ ३८ तत्तावद्यु
क्तियुद्धेन तान्प्रबोधयतामराः ॥ यावदभ्यासवशतो भविष्यंतिसवासनाः ॥ ३९ ततोवश्याभविष्यंतिभवतां बद्धवासनाः ॥ तृष्णा
प्रेताशयालोकेनचकेचनपेलवाः ॥ ४० समविषममिदं जगत्समग्रं समुपनतं स्थिरतां सवासनांतः ॥ चलचललहरीभरोयथाब्धा
बत इह सैव चिकित्स्यतां प्रयाता ॥ ४१ ॥ इतिश्रीवासिष्ठतात्पर्ये स्थितिप्रकरणे पितामहवाक्यंनामसप्तविंशः सर्गः ॥ २७ ॥ ५ ॥

ज्ञेति ॥ ३८ प्रबोधयत व्यवहारपदेषु जागरूकान्कुरुत ॥ ३९ केचनकेचित् पितृष्णयाअप्रेताशयाश्चेत्नचपेलवाः ॥ ४० यथाजलाशयांतश्चलचला
नां मध्यं तचपलानां विचित्रलहरीणां भारोतिशयो जलात्मनैवास्तितयास्ववासनांतरिदं समविषमं स्थिरतां प्रवाहनित्यतां समुपनतं समुपा
गतं स्थितमित्यर्थः ॥ ४१ इतिश्रीयोगवासिष्ठे स्थितिप्रकरणे सप्तविंशः सर्गः ॥ २७ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीविश्वेश्वराय० ॥

विश्रांतानांपुनर्युद्धंविस्तरेणात्रवर्ण्यते॥देवानांदानवानांचचिरमावासनोदयात्॥१॥अंबुनस्तरंगाढ्ःः वेलापदसान्निध्यात्समुद्रतरंगाइ
तिगम्यते॥१॥स्वाभिमतांस्वस्वाभिप्रेतांतत्तदिक्पालाधिष्ठितदिशं॥स्वाभिमतामित्येतद्वनमालयात्रापिविशेषणं॥२॥विश्रमुर्विश्रांताः॥३॥४॥
अथदुंदुभिरवंश्रुत्वासन्नद्धदेहेपूर्वमागतेषुसत्सुमहाव्योम्यंतरिक्षे॥५॥आसर्गसमाप्तेर्युद्धमेवववर्णयति॥ववुरित्यादिना॥शंखाःशंखाकाराःआ
युधविशेषाःपरप्राणहारित्वादायुधप्रायाःशंखशब्दावागिरीणांशिला॥गिरिसहिताःगिरिप्रायाःशिलाःगिरयःशिला॥इतिवाद्दसांताः॥अ

॥श्रीवसिष्ठउवाच॥इत्युक्त्वाभगवान्देवांस्तत्रैवांतर्द्धिमाययौ॥वेलावनिलटेशब्दंहल्लेवांबुलरंगाढ्ः॥१॥सुरास्ताकर्ण्यतद्वाक्यंजग्मुः
स्वाभिमतांदिशं॥कमलामोदमादायवनमालामिवानिला॥२॥दिनानिकतिचित्तेषुकालेषुस्थिरकांतिषु॥द्विरेफाइवपद्मेषुमंदिरेषु
विशश्रमुः॥३॥कंचित्कालंसमासाद्यस्वालोदयकरंसुभं॥चक्रुर्दुंदुभिनिर्घोषंप्रलयाभ्ररवोपमं॥४॥अथदेवैर्महाव्योम्नितेःपातालत
लेस्थितैः॥कालक्षेपकरंघोरंपुनर्युद्धमवर्तत॥५॥ववुरसिशरशक्तिमुद्गरोघामुसलगदापरश्वध्चक्रशंखाः॥अशनिगिरिशिला
हुताशवृक्षाअहिगरुडादिमुखानिचायुधानि॥६॥मायाकृतायुधमहांबुधनप्रवाहाक्षिप्रावहाप्रतिदिशंकिलनिर्जगाम॥पाषाणपर्व
तमहीरुहलक्षक्षुब्धांबुपूरघनघोषवतीनदीद्राक्॥७॥मध्यप्रवाहवहदुल्मुकमूलशैलप्रासासिकुंतशरतोमरमुद्गरौघा॥गंगोपमां
बुवलितामरमिंदिरेयासर्वासुदिक्ष्वशनिवर्षनिकर्षणेन॥८॥गोपमामेर्वादिगिरिपृष्ठप्रवहद्गंगासदृशीसर्थः॥८॥

हिगरुडादिमुख्यान्यायुधानिचमहाव्योम्निववुःजग्मुः॥६॥नदेववर्णयति॥मायेति मायाकृतान्यायुधान्येवमहांबूनितेषांघनःप्रवाहोयस्याः॥अतएव
क्षिप्रान्शीघ्रहस्तानावहतिनायेतिक्षिप्रवाहापाषाणेःपर्वतैर्महीरुहलक्षैस्तेषपिप्रधानैर्वृक्षैश्च्यक्षुब्धांबुपूरेवघनघोषवतीनदीद्राक्॥निर्जगामेसर्थः॥७॥
तामेवनदींपुनर्वर्णयतिमध्येति॥अंबुभिर्जलैरिववलितंवेष्टितंअमरमंदिरंमेर्वादियेननथाविधेनाशनिप्रमुखायुधवर्षप्रयुक्तेननिकर्षणेनप्रच्छेदनेनगां

संप्रत्ति सुरासुराणां परस्परव्यामोहनाय विचित्रमायया निर्मार्याणां प्रतीकारैश्च्यवनदुपशामं पुनःपुनस्तत्सदृशमायांतरोद्भवोपशमं चाह पृथ्व्यादिति ॥
पृथिवीमहीतन्मयी आदिपदाज्जलतेजोवाय्वाकाशमयी च माया यथेयं पृथिवी भ्रमतीव पततीव निरुणाद्धीवापि सिव निमज्जंत्यग्निनेव दह्यंते वायुनेवोडी
यंते महागर्तोकाशइव निपतंति जना इति ॥ दारुणा निरक्षः पिशाचादिशरीराणि निपतंतीव धावंतीव युध्यंतीव खादंतीवेत्येवंरूपा दारुणशरीरम
यी प्रहाराणां दानग्रहो ग्रहणं च बहुशो यास्यां तथाविधान्यागहनानि परैर्दुस्तराणि राशीभूतानि बहुत्वमापन्नानि शरीरकाणि प्रतियोधशरीराणि

पृथ्व्यादिदारुणशरीरमयीप्रहारदानग्रहागहनराशिशरीरकेव ॥ मायोपशाम्यति सुरासुरसिद्धसन्ना मायाकृतिः पुनरुदेति न
चैव सैव ॥ ९ ॥ शैलोपमायुधविघट्टितभूधराणि रक्तांबुपूरपरिपूर्णमहार्णवानि ॥ देवासुरेंद्रशवशैलविरूढकुंतनालीवनानि ककुभां वद
नानि चासन् ॥ १० ॥ उद्गीर्णकुंतशरशक्तिगदासिचक्रहेलानिगीर्णसुरदानवमुक्तशैला ॥ काषोल्लसत्कचकचदंतनखाग्रमाला जी
न्विताल्पनदायससिंहसृष्टिः ॥ ११ ॥

यस्यां सा तथाविधे वान्या एवंविधापि प्रयुक्ता मायासुरैरसुरैः सिद्धैश्च प्रतीकारैः सन्ना विनाशिता सती उपशाम्यति पुनस्तादृश्येव मायाकृ
तिरुदेति सा किं सैव पूर्वोत्पन्नैव मायाकृतिरुत नैव च सा किं त्वन्यैवेति न तत्तो दुर्ज्ञेयेत्यर्थः ॥ ९ ॥ देवलक्षणेषु सुरेंद्रशवलक्षणेषु शैलेषु विरू
ढानि कुंतपंक्तिलक्षणानालीवनानि येषु तथाविधानि च ककुभां दिशां वदनानि मुखान्यासन् ॥ १० ॥ उद्गीर्णैः कुंतशरशक्तिगदासिचक्रैर्हे
लयैव निगीर्णाः सुरैर्दानवैश्च मुक्ताः शैला यस्यां ॥ काषेणाछेदनेनोल्लसतां कचानां दंतानां च नखाग्रमाला यस्यास्तथाविधा परजीवग्रहि
ता जीवान्विता आयसानां च यो विकारा आयुधमयानां हिंस्रत्वात् सिंहानां सृष्टिरपतत् निष्पातेत्यर्थः ॥ ११ ॥ ४ ॥

इदानीं सर्पास्त्रनिर्मितदृष्टिविषमायासर्पसमूहं वर्णयति॥ उज्ज्वालेति उद्गता ज्वाला येभ्यस्तथाविधानां लोचनविषज्वलनानां आ नपौघेन ये दिशां दाहास्तैर्दर्शिता युगांते युगपद्वदित द्वादशादिनेशानां सेना यया॥ तथाविधा विषधराणामावलिः॥ उड्डीयमानैः परितो दीर्घैः उच्छ्रयेण महद्भिर्महीध्रैर्मग्नेन व्याप्तेनाब्धिना तुल्यं मग्नाब्धिवत्॥ उल्लासमुपुपे॥ १२ इदानीं समुद्रास्त्रमायया समुद्रवेष्टनं वर्णयति॥ उन्मादेति वल्लितो वेष्टितो ऽचलेंद्रो मेरुर्यैस्तथाविधैर्हेतिनदीप्रवाहैः उन्मादस्य वन्नादिरत्नैर्मकरोत्करैश्च कर्कशस्यांतः

उज्ज्वाललोचनविषज्वलनातपौघदिग्दाहदर्शितयुगांतदिनेशसेना॥ उड्डीयमानपरिदीर्घमहामहीध्रमग्नाब्धिवद्विषधरावलिरुल्ललास॥ १२॥ उन्मादवन्नमकरोत्करकर्कशांतःक्षुब्धाब्धिवीचिवलयैर्वलिताचलेंद्रैः॥ आसीज्जगत्सकलमेव सुसंकटांगमावर्तिभिर्विविधहेतिनदीप्रवाहैः॥ १३॥ शैलास्त्रशस्त्रगरुडाचलचालितोद्धनागं महासुरगणांगणमंतरिक्षं॥ आसीत्क्षणं जलधिभिः क्षणमग्निपूरैः पूर्णं क्षणं दिनकरैः क्षणमंधकारैः॥ १४॥ ॥छ॥

क्षुब्धस्याब्धेर्वीचिवलयैः सकलमेव जगत्॥ आवर्तिभिः परिवर्तनैः सुसंकटांगं पीडितसर्वावयवमासीत्॥ १३॥ महतां सुराणामसुराणां च युद्धांगणाख्यमंतरिक्षं शैलास्त्रैर्मायारचितगरुडैर्बलाद्भुतात्यप्रक्षिप्तैरचलैश्च चालिताः पलायिताः प्राग्वर्णितदृष्टिविषनागा यस्मात्तथाविधं सत्क्षणं जलधिभिः पूर्णमासीत् क्षणं अग्निपूरैः पूर्णं क्षणं दिनकरैः पूर्णमासीत् क्षणं अंधकारैः पूर्णमासीदिति प्रागुक्तस्यैवानुवादः॥ १४॥ श्रीरामायनमः॥ श्रीगोविंदायनमः॥ श्रीकृष्णायनमः॥ श्रीवेदव्यासायनमः॥ श्रीलक्ष्मीवेंकटेशाय नमः॥ श्रीराम

गारुडास्त्रप्रभवैर्गरुडैर्गुडुगुडुइत्यव्यक्तानुकरणं गुडुगुडु इति ध्वनिभिराकुलेंतरिक्षे प्रविसृतैर्हेतिहुताशपर्वतानामोघैः प्रवाहैः पुनर
पि जगदसह्यैः कल्पकाल इव ज्वलितसुरालयभूतलांतरालं अभवत् ॥१५॥ असुरा वसुधातलात् गगनं उत्पत्य ऊर्ध्वं अपतन् ॥ विबुधास्तु
ऊर्ध्वदेशाद्भुवि अपतन् ॥१६॥ शरीरैः रूढैः रूढोन्नतहेतिवृक्षैः संपन्नासु वनावलीषु लग्नः महानग्निदाहो येषां तथाविधाः सुरासुराः कल्पा
निलैरांदोलितानां भ्राम्यमाणानामर्धज्वलितानां शैलानां शोभां प्रापुः ॥१७॥ अद्रेर्मेरोरभितश्चतुर्दिशं अंबरः ॥ आकाशो नायकः व्यत्ययेन

गारुडगुडुगुडाकुलांतरिक्षप्रविसृतहेतिहुताशपर्वतौघैः ॥ जगदभवदसह्यकल्पकालज्वलितसुरालयभूतलांतरालं ॥१५॥
उदपतन्नसुरा वसुधातलाद्गगनमद्रितटाद्दिवि पक्षिणः ॥ अतिबलादपतन्विबुधा भुवि प्रलयचालितशैलशिला इव ॥१६॥
शरीररूढोन्नतहेतिवृक्षवनावलीलग्नमहाग्निदाहाः ॥ सुरासुराः प्रापुरथांबरांतः कल्पानिलांदोलितशैलशोभां ॥१७॥
सुरासुराद्रींद्रशरीरमुक्तैः रक्तप्रवाहैरसितोत्तमाङ्गिः ॥ बभार पूर्णापरितोंबरोद्रेः संध्याकरौघक्षतमंगमंगं ॥१८॥ गिरिवर्ष
णामंबुवर्षणां विविधोग्रायुधवर्षणां तथा ॥ विषमाशनिवर्षणां च ते सममन्योन्यमथाग्निवर्षणां ॥१९॥७॥

पुंस्त्वं ॥ सुरासुरलक्षणानामद्रींद्राणां शरीरेभ्यो मुक्तैः असितोत्तमाङ्गिः रक्तप्रवाहैः पूर्णसंध्याया नायिकायाः करौघपदेन क्रूरजौघाल्लक्ष्यंते
तेषां क्षतं बभार अथवा तथाविधरक्तप्रवाहैः पूर्णं गांगं बभारेत्यत्रेक्षयो विकल्पः ॥ अंगेति संबोधनं ॥ पूर्णामित्येतन्नरवक्षतगंगयोर्द्वयोरपि विशे
षणं स्त्रीनपुंसकयोर्नपुंसकमनपुंसकेनैकशेषे एकवद्भावः ॥१८॥ ते सुरासुराः अनयन् इति परेणान्वयः ॥१९॥७॥१०

रा॰ दी॰ श्रि॰
५६

पुण्ये पुण्यके उत्सवविशेषे क्रीडार्थं नलिकायंत्रैर्लाक्षाकुंकुमचंदनादिरसवर्षया मिवेत्यर्थः ॥ २० ॥ अन्योन्यं समरसंभ्रमं युद्धोल्लासं हमक्षिपंतः ॥ अस्य जंतो देवासुराः अंगदलनेनाकुलाः व्यग्राः हेतियुक्ताहस्तायेषां तथाविधाः संतः नागेंद्राणां ऐरावतादिदिग्गजानां डिंभानां संततिमूलानां पृतनायाः समूहस्य पृथूनां पीनानां पीठसदृशपृष्ठानां पेषैरिव पीडाकरैः गुरुतरसंभारसंभृतारोहयोः क्षीर्णश्रियो विस्तारितशोभाः नभसि बभ्रमुरित्यर्थः ॥ २१ ॥ आकाशस्य काष्ठानां दिशां च समाहारः आकाशकाष्ठं तत्र शल्यभेः अत्यत्तिकरत्नपलंग विशेषफलैः आकाशस्यैव

अनयन्नयमार्गको विदारदलितारोषगिरींद्रभित्तयः ॥ स स ज्जुम्भ समं समंततः करिकुंभेष्विव पुण्यवर्षया ॥ १९ ॥ देवासुराः सम रसंभ्रममाकुलास्ते अन्योन्यमंगदलनाकुलहेतिहस्ताः ॥ नागेंद्रडिंभपृतनापृथुपीठपेषैः क्षीर्णश्रियो नभसि बभ्रमुरक्षिपंतः ॥ २१ ॥ छिन्नैः शिरःकरभुजोरुभरैर्भ्रमद्भिराकाशकाष्ठशल्यभैरशिविरुदानी ॥ आसीज्जगज्जठरमत्तभरैरिवोग्रैराभास्कर स्थगितदिक्तटशैलजालं ॥ २२ ॥ रटद्भरास्फोटकटिस्फुटद्भिः समीरितैर्हेतिकलासिलौघैः ॥ परस्पराघातहतैः पतद्भिर्जगाम शीर्णा दलशो धरित्री ॥ २३ ॥ अन्योन्यमायुधशिलाचलवृक्षवर्षैर्मेरुप्रमाणकठिनांगनिघर्षणोत्थः ॥ आसीदपांचटचटास्फुटदंतरिक्षं

फलपुष्पपर्णाघनवशेषान् काष्ठसदृशस्यु शल्यभैरितिवा ॥ अभ्रायां मेघानां भारैः ॥ २० ॥ कल्पक्षयांतमिव भीमभरोग्रनादैः ॥ २४ ॥ अतिशयैरिव अर्थैरिति पाठेपि अपांत्रमरैर्मेघैरित्येवार्थः ॥ आभास्करं भास्करपर्यंतं स्थगितान्याच्छादितानि दिक्तटानि शैलजालानि च यत्र तथाविधं आसीत् ॥ २२ ॥ सम्यगीरितैः रटतां भटानां भास्फोटेनास्फालनेन कटिप्रदेशेषु स्फुटद्भिस्त्रुट्यद्भिस्तथा परस्परास्फालहतैरतएव पतद्भिर्हेतिकलाभिर्यंत्रक्षेपण्यादिकौशलैररसितानां क्षिप्तानां शिलापर्वतादीनामोघैः इदुद्भांदसः धरित्रीशीर्यासितीदलशः खंडशो जगाम खंडिताभूदित्यर्थः ॥ २३ ॥ मेरुप्रमाणानां कठिनानामंगानां देहानां निघर्षणोः परस्परसंघट्टनैर्भ्यजनितैर्भीमः भरोतिशयो

भरै

चतुर्थः ॥
केषांचिद्रक्षसां रक्तनदीः रणे रक्षसां गिरिवाहिनी ॥ २१ ॥ विसृष्टः ॥ २४ ॥

५६

मत्तेन प्रचंडानिलेन क्षुब्धाज्जलानलो अधः अर्कश्च ऊर्ध्वं यत्र ॥ तथाविधं दलद्द्वयं यत्र दीर्घमायाविभवैः प्रवृद्धाः सुरासुरौघा यत्र ॥ आखं
डिता विदारिताः प्रांतकुड्यकोणा यत्र तथाविधं ब्रह्मांडं अकालप्रवृत्तकल्पांत इव करालं भीषणमासीत् ॥ २५ ॥ पुनस्तत्कीदृशमासीत्तदा
ह ॥ भ्रांतैरिति ॥ आसप्रमाणयोः स्वसदृशायामे घैर्घनैर्हेतिभिर्हतैः अतएव भ्रंशं भ्रांतैः भ्रमणं चरणाद्भिः उग्रगुहो अववातैः रात्रिभिः कूज
द्भिरिव अदभ्रैस्तारैः आपतित सिंहरवैः क्रंदद्भिरिव स्खलितैः रद्रिकूटैः भरितदिक्तटमासीत् ॥ २६ ॥ वालावकीर्णवनपर्णविदंतरं तः भ्रां

मत्तानिलक्षुब्धजलानलार्कदलद्द्वयं दीर्घसुरासुरौघं ॥ ब्रह्मांडमाखंडितकुड्यकोणमकालकल्पांतकरालमासीत् ॥ २५ ॥
भ्रांतैर्भ्रंशंभरितदिक्तटमद्रिकूटैरासप्रमाणघनहेतिहतैरणद्भिः ॥ कूजद्भिरार्तिभिरिवोग्रगुहो अववातैः क्रंदद्भिरापतितसिं
हरवैरदभ्रैः ॥ २६ ॥ मायानदीजलधियोधघनाग्निदाहैर्वृक्षैः सुरासुरशवैरचलैः शिलौघैः ॥ भ्रांतैः शरासिशितशक्तिगदास्त्र
शस्त्रैर्वालावकीर्णवनपर्णविदंतरं तः ॥ २७ ॥ अद्रींद्रपक्षपरिणामगमाक्षमोक्तदुर्वारहस्तिबलदारुणदेहकैद्राक् ॥ आसीसतद्भ
टशरीरगिरींद्रवातविभ्रष्टदेवपुरपूर्णजलार्णवौघं ॥ २८ ॥०

तैः शरादिभिर्भरितमासीदित्यनुवर्तते ॥ २७ ॥ पुनस्तत्कीदृशमासीत्तदाह ॥ अद्रींद्रस्य मेरोः पक्षाः प्रसंतपर्वतास्तत्सदृशपरिमाणयोः अ
तएव गमनं गमः मनुष्यादीनां संचारस्तन्निरोधकला तदक्षमैः पूर्वोक्तानां दुर्वारहस्तिबलानां हस्तियूथानां देहकैः शवैर्भरितादिक्त
टमासीत्किंच पतद्भिर्भटशरीरैर्गिरींद्रैर्वातविभ्रष्टदेवपुरपूर्यजलार्णवौघमासीत् ॥ २८ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्री

किंचन तदा भुवनाभोगस्य ब्रह्मांडस्योदरगुहा घनैर्घुंघुमैर्ध्वनिभिः पूरितांतरिक्षाः क्षतजैः क्षालिता भूधरास्तदधराः पृथ्वी पातालादयश्च यस्यां तथाविधा रुधिरह्रदप्रवृत्तिराहारो येषां ॥ रक्षःपिशाचादीनां तद्ववर्तनशीला वासती आकुलाभूत् ॥ २९ ॥ अनंतरशांइंद्रादिदेवानां प्रस्तुतभयादिविकारिणी अनंतायां त्रिविधपरिच्छेदशून्यायां दृशि आत्मचैतन्ये प्रस्तुततद्विकारकारिणी च ॥ क्षयोन्मुखानां उदयोन्मुखानां च युक्रमात् सुखदुःखशंसिनी ॥ असुराणामशास्त्रीयचित्तवृत्तीनां सुराणां शास्त्रीयतद्वृत्तीनां प्रसिद्धानां चासुरासुराणां घट्टनं घट्टः ॥ परस्परस

घनघुंघुमपूरितांतरिक्षा क्षतजाक्षालितभूधराधरा च ॥ रुधिरह्रदवृत्तिवर्तिनी वा भुवनाभोगगुहा तदाकुलाभूत् ॥ २९ ॥ अनंतदृश्यस्तविकारकारिणी क्षयोदयोन्मुखसुखदुःखशंसिनी ॥ रणक्रिया सुरसुरघट्टसंकटा तदाभवत् खलु सदृशी ह संसृतेः ॥ ३० ॥ इति॰ सर्गः ॥ श्रीवसिष्ठ उवाच ॥ एवंप्रायाकुलारंभैरसुरैरसुहारिभिः ॥ सहसाहलसंरब्धैरारब्धः सुमहान्रणः ॥ १ ॥ माययाथ विवादेन संधिना विग्रहेण च ॥ पलायनेन धैर्येणाच्छन्नगोपायनेन च ॥ २ ॥ कार्पण्येनास्त्रयुद्धेन सांतर्धानैश्च भूरिशः ॥ धृतः स संगरो देवैस्त्रिंशद्वर्षाणि पंचकं ॥ ३

मागमस्तेन संकटाद्दुस्तरा रणक्रिया संसृतेरविद्यादिसंसारस्य सदृशी अभवत् ॥ ३० ॥ इतिश्रीवा॰ सर्गः ॥ २४ ॥ आत्मदेहाभिमानानां दामादीनां सुरैर्मृधे विषादो वर्ण्यते पश्चात्पलायनपराजयौ ॥ १ ॥ एवंप्रायाः प्राग्वर्णितप्रकाराः आकुलाः व्यग्रप्राया आरंभा येषां तैरसुहारिभिरसुरैः समूहानूरणाः आरब्धः ॥ १ ॥ स संगरो देवैः कदाचिन्मायया विवादेन वाग्युद्धमात्रेणादानाद्युपायैः संधिना कदाचिद्विग्रहेण कदाचित्पलायनेन प्रच्छन्नतया स्थितास्वजनगोपायनेन ॥ २ ॥ कदाचित्कार्पण्येन रूपपावच्छरणागतियांचादीना संगरो विधृतः ॥ तत्राद्यः संग्रामस्त्रिंशद्वर्षाणि विधृतः ॥ द्वितीयस्तु पंचकं वर्षाणि अष्टौ मासान् दशदिवसान्विधृतः ॥ तृतीयस्तु सप्तपंचचेति द्वादशदिवसान्विधृतः तावत्कालं द्वयोरपि सेनयोर्दक्षाणां अग्नीनां तेनौनां एकेषां सुरव्यानामशनीनां भूभृतां पर्वतानां च वर्षाणि वृष्टयः पेतुरित्यर्थः ॥ ३ ॥ ७३ ॥

४ ग्रस्तचेतसो वासनयेति शेषः ॥५॥ अभिमानाभ्यासस्याहंकारदार्ढ्यहेतुतां दृष्टांतेन दर्शयति नैकधेति ॥ ६ ॥ उत्पन्नापि वासना चिरमभ्यासत्यागेन नश्यतीत्याशयेनाह यद्वदिति दूरगतं दूरपरित्यक्तं न प्रतिबिंबति प्रतिबिंबाभावादपैति अनभ्यासात् अभ्यासपरित्यागात् ॥ ७ ॥ अहंकार एवात्मेति वासनायेषां ते अहंकारात्मवासनाः जीवितं जीवनं मे स्यात् तदर्थं मे त्वर्थः धनं स्यादित्याशया दैन्यमुपागताः ॥ ८ ॥ ततो भवत्सस्मादिति भावः विहित निषिद्ध प्रवृत्ति

वर्षाणि दिवसान्मासानृदशाष्टौ सप्त पंच च ॥ वर्षाणि पेलुर्दह्ना ग्निहेयाकाश निष्फलतां ॥ ४ ॥ एतावता तु कालेन दृढाभ्यासादहंकृतेः ॥ दामाद योहमित्यास्थां जग्मुर्ग्रस्तचेतसः ॥ ५ ॥ नैकधाति शयाद्यद्वद्दर्पणां बिंबवद्भवेत् ॥ अभ्यासातिशयानद्वत्तेसाहंकारतां गताः ॥ ६ ॥ यद्वद्दूरतरं वस्तुनादर्शे प्रतिबिंबति ॥ पदार्थवासना तद्वदनभ्यासान्न जायते ॥ ७ ॥ यदादामादयो जाता अहंकारात्मवासनाः ॥ तदा मे जीवितं मेर्थ इति दै न्यमुपागताः ॥ ८ ॥ भववासनया ग्रस्ता मोहवासनया ततः ॥ आशापाश निबद्धास्ते ततः कृपणतां गताः ॥ ९ ॥ शुद्धैरप्यनहंकारैर्मम त्वमुप कल्पितं ॥ रज्वां भुजंगत्वमिव दामव्यालकटैस्ततः ॥ १० ॥ आपादमस्तकोदेहः कथं मे भवतु स्थिरः ॥ ममेति तन्तृष्णाकृपणादीनतां ते समाययुः ॥ ११ ॥ स्थिरो भवतु मे देहः सुखायास्तु धनं मम ॥ इति बद्धधियां तेषां धैर्यमंतर्द्धिमाययौ ॥ १२ ॥ सवासनत्वाद्वपुषामल्पसत्त्वाः कृतद्विषां ॥ यातु प्रहारपरतामार्जितेवाप्सुसाप्नवन् ॥ १३ ॥ कथं सुराजगत्यस्मिन् भवाम इति चिंतया ॥ विवशा दीनतां जग्मुः पद्मा इव निरंभसः ॥ १४ ॥ ५ ॥

स्तद्वासनया ग्रस्ताः देहो मे सदैवारोगदृढभोगक्षमो स्त्वित्यादि मोहवासनया ॥ ९ ॥ मुग्धेवद्यनहंकारैरिति पाठे मुग्धे वत्कृपणतां गता इति पूर्वेणान्वयः ॥ १० ॥ शुद्धैरप्यनहंकारैरिति पाठे तु वस्तुतः शुद्धैरपि दामादिभिर्ममत्वमुपकल्पितमिति स्पष्टोर्थः ॥ १० ॥ ममेति तन्तृष्णायाएव विवरया आपादमस्तक इति ॥ ११ ॥ सुरद्विषां दामादीनां या प्राक् प्रसिद्धा प्रहारपरता सा अल्पसत्त्वात् न्यूनबलत्वान्मार्जितेव लिपिः क्वापि समाप्रभवत् ॥ १३ ॥ सुराः अमराः कथं भवामः इति चिंताय ॥ १४ ॥ श्रीसीतारामचंद्राभ्यान्नमः ॥ श्रीकृष्णायनमः ॥ श्रीवेदव्यासायनमः ॥ श्रीविश्वेश्वरायनमः ॥ श्रीरामायनमः

भावा विषयास्तेषां भावनं भावस्तत्सखा॥ अतएवं भवं भाजयन्ति प्रापयन्तितादृशीला॥१५॥ सापेक्षत्वं जीवने इति शेषः॥ मत्तेभैर्युद्धाय घनं संरब्धे कुपिते॥१६॥ कुपितः ऐरावणः ऐरावतो यत्र॥१७॥ परैः शत्रुभिः॥१८॥१९॥ सामान्य इतरे सङ्गराइव सामान्यसङ्गराः॥२०॥ बल्गास्ते अभिपत्य॥२१॥

तेषां येषामन्नपानेन स्वात्तं कृतिमतां रतिः॥ बभूव भावभावसखाभीषयाभवभाजिनी॥१५॥ अथ तस्मिन्नपोभीत्या सापेक्षत्वमुपाययुः॥ मत्तेभधनसंरब्धे वनेहरिणकाइव॥१६॥ मरिष्यामो मरिष्याम इति चिंताहताशयाः॥ मंदं मंदं किलक्षेमुः कुपितैरावणोरणे॥१७॥ शरीरैकार्थिनां तेषां भीतानां मरणादपि॥ अत्यन्तसत्वतयामूर्द्धिकृतमेव परैः पदं॥१८॥ अथ प्रम्लानसत्वास्ते हंतुमग्रगतं भटं॥ नशेकुरिंधनेक्षीणेऽहविर्दग्धुमिवाग्नयः॥ विबुधानां प्रहरतां मशकत्वमुपागताः॥ क्षतविक्षतसंघातास्तस्थुः सामान्यसङ्गराः॥२०॥ बहुनात्र किमुक्तेन मरणाद्भीतचेतसः॥ दैत्यादेवैश्च वल्गास्ते दुद्रुवुः समराजिरात्॥२१॥ तेषु द्रवत्सु भीतेषु सर्वतोदानवादिषु॥ रामव्यालकटाक्षेषु विख्यातेषु सुरालये॥२२॥ तद्दैत्यसैन्यं न्यपतत् द्विद्रुतं खादितस्ततः॥ कल्पांतपवनोद्धूतं ताराजालमिवाभितः॥२३॥ अमराचलकुंजेषु शिखराणां शिखासु च॥ तटेषु वारिराशीनां पयोदपटलेषु च॥२४॥ सागरावर्तगर्तेषु श्वभ्रेषु सरित्सु च॥ जंगलेषु दिगंतेषु ज्वलत्सु विपिनेषु च॥२५॥ तद्ग्रामेच्छिन्नदेशेषु ग्रामेषु नगरेषु च॥ अटवीषूग्रपक्षासु मरुभूमिद्वाग्निषु॥२६॥ लोकालोकाचलांतेषु पर्वतेषु ह्रदेषु च॥ आंध्रद्रविडकाश्मीरपारशीकपुरेषु च॥२७॥ नानांबोधितरंगासु गंगाजलघटासु च॥ द्वीपांतरेषु जालेषु जंबूखंडतलासु च॥२८॥

२२॥ खादितस्ततः॥ २३॥ अमराचलकुंजे खिसादिसप्तम्यंतपदानां सर्वेषां पतिता स्ते सुरास्य इत्यत्र संबंधः॥२४॥ उद्यंतीषु प्रवृद्धासु कर्मधारये पुंवद्भावः॥२५॥ तेषां देवासुराणां बाणैरुच्छिन्नेषु देशेषु उग्राणां सिंहव्याघ्रराक्षसानां पक्षासु परिग्रहभूतासु॥२६॥२७॥ सुतस्त्रसुखे गंगायाः समुद्रप्रवेशादेकोप्यंभोधिः प्रदेशभेदेन नानेति नानांभोधिषु तरंगायासांतासु द्वीपांतरेषु मत्स्यवेधनाय प्रसारितेषु जालेषु जंबूखंडदे

२९ पतितानेव विशिनष्टि विस्फोटितांगा इत्यादिना ॥ मुक्ता रक्तसरच्छटा यैः निष्क्रांताः नितरां विक्षिप्तपादाः ॥ ३० बलेर्मायाभिरिषुभि
श्च छिन्नाः कंकटाः वारबाणा लेलयश्च येषां दूरमापातेन पलायनेन विपर्यस्ताः पतंतः नानायुधानां अंशुकानां च समाहारो येषां ॥ ३१ कंठत्वंबि
नां शिरस्त्राणानां च टनत्कारैरुग्यसी तिर्येषां ग्रंथिताग्रैः शिखाशतैः ॥ पर्वताग्रशिलासु प्रोताः अत एव देहभागे विलंबिनः लंबमानाः ॥ ३२ शा
ल्मलीषु सकंटकत्वात् दृढोपाते कटङ्क्रिः कंटकैः संकटं दुःखं येषां ॥ ३३ उपसंहरति सर्व एवेति इत्थं सर्व एवासुरेंद्राः सकलानामायुधानां शस्त्रा

सर्वतः पर्वताकाराः पतितास्ते सुरारयः ॥ विस्फोटितांगचरणा विभिन्नकरबाहवः ॥ २९ शाखालग्नांत्रतंत्रीका मुक्तरक्तभरच्छटाः ॥
व्यस्तशेखरमूर्द्धानो निष्क्रांताः कुपितेक्षणाः ॥ ३० स्वायुधाबलमायेषु छिन्नकंटकहेलयः ॥ दूरापाताविपर्यस्तपतन्नानायुधांशुकाः ॥
३१ कंठत्वंबिशिरस्त्राणचटत्कारोग्रभीतयः शिखाशतशिलाप्रोता देहभागविलंबिनः ॥ ३२ शाल्मल्युग्रदृढापातकटत्कंटकसं
कटाः ॥ सुशिलाफलकास्फालशतधाशीर्णमस्तकाः ॥ ३३ सर्व एव सकलायुधशस्त्रपातमात्रसमनंतरमेव दिक्षु नाशमगम
न्नसुरेंद्राः पांसवोंबुदनिधौ पयसीव ॥ ३४ इति • असुरपरिक्लेशः सर्गः २९ श्रीवसिष्ठ उवाच इति तु द्वेषु देवेषु दानवेषु हतेषु च ॥ दाम
व्यालकटादीनां बभूवुर्भयविह्वलाः ॥ १ जज्वाल कुपितः केतिकल्पांताग्निरिव ज्वलन् ॥ शंबरः शमितानीको दामव्यालकटान् प्रति ॥ २
शंबरस्य भयाद्गत्वा पातालमथ सप्तमं ॥ दामव्यालकटास्तस्थुस्त्यक्त्वाथ निजमंडलं ॥ ३ यमस्य किंकरा यत्र ये कालत्रासनक्षमाः ॥ कुत्
हलेन तिष्ठंति नरकापविपालकाः ॥ ४

पांचपातमात्रा युद्धारंभात् समनंतरमेव दिक्षु नाशमदर्शनमगमन् यथांबुदानां निधौ व
र्षतोपयसि जलेपांसवो नाशं गच्छंति तद्वदित्यर्थः ॥ ३४ इति • असुरपरिक्लेशः सर्गः ॥ २९ पातालेयमदग्धानामत्र जन्मपरंपरा ॥ काश्मीरदेशमस्यां
तारामादीनां प्रकीर्त्यते १ इत्थं नयारीत्यादानवेषु हतेषु संस्कदेवेषु तुष्टेष्विति पाठक्रमादर्थक्रमबलीयस्त्वाद्योज्यं दीनाविषाणाः ॥ १ शंबरः दामव्या
लकटान् प्रति कुपितः सन् ज्वलेति पृथक् जज्वालेत्यर्थः ॥ २ ३ सप्तमं पातालमेव विशिनष्टि यमस्येति तत्रापि शंबराद्भयं किं न स्यादिति शं
कां वारयितुं कालत्रासनक्षमा इति ॥ कालो मृत्युरिवान्येषां त्रासनक्षमा इत्यर्थः ४ श्रीरामचंद्रगुरवे नमः ॥ श्रीवासुदेवाय नमः ॥ श्री

यातानांशरयामितिशेषः ॥ त्रिभ्यस्तिस्रः कुमारीः कन्याः घनाकाराः मूर्तिमतीश्चिंताइव स्थिताइत्यर्थः ॥५॥ अविधिं आयुः शेषं ॥६॥ आत्तानंतकुवासनाः प्रपंचयंति इयमिति ॥७॥ धर्मराजोयमः ॥८॥ छत्रचामरादिलिंगादर्शनाद्यमराजोयमित्यपरिज्ञातं ॥९॥ ज्वलितासुरौरवाद्युग्रनरकभूमिषु ॥ नासुहिशतयोजनपर्यंतं जानुमितिज्वलदंगारादयः प्रसिद्धाः ॥१०॥ पर्णान्येवविटपाः शाखायेषां तेपर्णविटपाबालाइति

तेनेषामथयातानांदत्वाभयमभीरवः ॥ चिंताइवघनाकाराः कुमारीश्चददृशुः क्रमात् ॥५॥ तैः सार्द्धंनीतवंतस्तेतत्रदामोदयोविधिं ॥ दशवर्षसहस्रांतमात्तानंतकुवासनाः ॥६॥ इयंमेकामिनीकन्यामयेयंप्रसुतेतिच ॥ दुरूढस्नेहबंधानांकालस्तेषांव्यवर्त्तत ॥७॥ धर्मराजोथतंदेशंकदाचित्समुपाययौ ॥ महानरककार्याणांविचारार्थंयदृच्छया ॥८॥ अपरिज्ञातमेनंतेधर्मराजंत्रयोसुराः ॥ नप्रणेमुर्विनाशायसामान्यमिवकिंकरं ॥९॥ अथैवेवस्वतेनैतेज्वलितासूग्रभूमिषु ॥ विहितभ्रूपरिस्पंदमात्रेणैवनिवेशिताः ॥१०॥ तत्रतेकरुणाक्रंदाःससुहृद्दारबांधवाः ॥ प्रदग्धाःपर्णविटपाःवृक्षाइववनाग्निना ॥११॥ सयावासनयाजातास्तयैवक्रूरयापुनः ॥ बंधकर्मकराकाराः किराताराजकिंकराः ॥१२॥ तज्जन्माथपरित्यज्यजाताःश्वपचेषुवायसाः ॥ तदनंतरगृध्रतांयातास्ततोपिशुकतांगताः ॥१३॥ सूकरत्वंत्रिगर्त्तेषुमेषत्वंपर्वतेषुच ॥ मगधेषुथकीटत्वंबभ्रुस्तेवक्रबुद्धयः ॥१४॥ अनुभूयेतरामन्यांचित्रांयोनिपरंपरां ॥ अद्यमत्स्याः स्थितारामकाश्मीरारण्यपल्वले ॥१५॥ दावाग्निक्वथितात्यात्यपंककल्पांबुपायिनः ॥ नम्रियंतेनजीवंतिजरज्जंबालजर्ज्जराः ॥१६॥

यावत् ॥११॥ वधबंधकर्मकरयमकिंकरसहवासात्ताद्दशवासनयाबंधकर्मकराकाराः किंकराश्च एवमग्रेप्यूहं ॥१२॥१३॥ तेबभ्रुः दधुरित्यर्थः ॥१४॥ मत्स्याः भूत्वेतिशेषः ॥१५॥ जरज्जंबालंजीर्णपंकस्तेषुजर्ज्जराः क्षतदेहाः ॥१६॥ श्रीरामायनमः ॥ श्रीवासुदेवायनमः ॥ श्रीकृष्णाय ॰॥

उक्तमेवानुवदति विचित्रेति ॥ १७ ॥ उपसंहरति भवजलधीति ॥ वासनातंतुभिर्गुणाप्रेरिताः संतः देहरूपैस्तरंगैस्तृण्यामिव चिरं ऊढाः नाना
प्रदेशं प्रापिताः ते अद्यापि अनंतं अपरिछेद्यफलं उपशमं न उपयाताः वासनाया दारुण्यं महत्वं महानर्थरूपत्वमिति यावत्तु परिकल्पय अनेनैव दृ
ष्टांतेन सर्वत्र पश्येत्यर्थः ॥ १८ ॥ इति श्री॰ सर्गः ॥ ३० ॥ अर्थच्युतिरनर्थाप्तिरहंमानादिहोच्यते ॥ तथा दामादिभावानां सत्वासत्वनिराक्रिया ॥ १ ॥ पूर्वो
क्तं स्मारयन्प्रकृतकथां तत्र योजयति ॥ अतइति ॥ १ ॥ अविवेकानुसंधानाद्विवेकानुसंधानाभावात् ॥ ईदृशी अभिमानलक्षणां आपदं ॥ २ ॥ प्राक्तनेति

विचित्रयोनिसंरंभमनुभूय पुनः पुनः ॥ भूत्वाभूत्वा पुनर्नष्टास्तरंगा जलधाविव ॥ १७ ॥ भवजलधिगतास्ते वासनातंतुनुन्नास्तृण्यामिव चिर
मूढा देहरूपैस्तरंगैः ॥ उपशममुपयाता राम नाद्याप्यनंतं परिकलय महत्वं दारुणं वासनायाः ॥ १८ ॥ इति श्रीयोगवासि॰ दामव्याल॰ सर्गः ॥ ३० ॥
॥ श्रीवसिष्ठ उवाच ॥ अतः प्रबोधाय नववन्मिराम महामते ॥ दामव्यालकटन्यायो मा ते स्थितिमनुलीलया ॥ १ ॥ अविवेक्यनुसंधानाद्भिन्नमापदमीदृ
शी ॥ अनंतभवदुःखाय परिग्रहा निलीलया ॥ २ ॥ क्व किल्लामरविध्वंसिशंबरानीकनाथता ॥ क्व तापत्तप्रजंबालजालजर्जरमीनता ॥ ३ ॥ क्व धै
र्यमभरानीकविद्रावणाकरं महत् ॥ क्व क्रिरातमहीपालक्षुद्रकिंकररूपता ॥ ४ ॥ क्व नाम निरहंकारचित्तवीरारधीरता ॥ क्व मिथ्यावासनावेशाद
हंकारकुकल्पना ॥ ५ ॥ शाखाप्रतानगहना संसारविषमंजरी ॥ अहंकारांकुरादेव समुदेतीय मानता ॥ ६ ॥ अहंकारमतो राम मार्जयांतः प्रय
त्नतः ॥ अहं न किंचिदेवेति भावयित्वा सुखी भव ॥ ७ ॥ अहंकारांबुदच्छन्नं परमार्थेंदुमंडलं ॥ रसायनमयं शीतमदृश्यत्वमुपागतं ॥ ८ ॥ ७५ ॥

रभिमानितायाः पश्चात्तनाभिमानस्य च फलतो महदंतरं दर्शयति ॥ क्व किलेत्यादिना ॥ ३ ॥ ४ ॥ स्वरूपतोप्यंतरमाह ॥ क्व नामेति ॥ ५ ॥ मंजरीपदेन तत्प्रधानावल्लीगृ
ह्यते ॥ ६ ॥ केनोपायेन तन्मार्जनं तमाह ॥ न किंचिदेवेति ॥ दृश्ये जडे सर्वत्रेदंत्वस्यैव दर्शनादहंत्वायोगात् दृक्स्वरूपे अहंकारादिसर्वसाक्षिण्यभिमानधर्मक
ताघटनेनाहंत्वायोगात् दृक्दृश्यव्यतिरिक्तस्य चालीकत्वादहंत्वास्पदं न किंचिदेवेति तत्वतो भावयित्वेत्यर्थः ॥ ७ ॥ अहंकारस्यानर्थहेतुतामुक्त्वा अर्थ
विघातकतामाह ॥ अहंकारेति ॥ रसायनमयमानंदैकरसं अमृतमयं शीतं तापत्रयशून्यं च ॥ ८ ॥ श्रीरामाय नमः ॥ श्रीकृष्णाय नमः ॥ श्रीवासुदेव

वा॰ री॰ स्थि॰

६०

सत्तां जन्ममरणप्रवाहे स्थितिं प्राप्ता अत्रासंतोपि मायामाहात्म्यप्रयुक्तादानवादामादयः॥ ९॥ शैवाललवेषुलालसाः असंतं सामिलाषाः॥ १०॥ असंतोपि सत्तां गताइत्येतच्छ्रुत्वा रामस्तदनुपपत्तिं शंकते नासतइति॥ ११॥ स्वाभिप्रेतं विशेषं वक्तुं प्रथमं रामोक्तिमभ्युपगम्य वसिष्ठः परिहारमारभते॥ एवमेतदिति स एव दाचिदपि नासत्संभवति किं तु तनु सूक्ष्ममेव सदाविर्भवेन स्थूलं संपद्यते सैवोत्पत्तिः स्थूलस्य तिरोभावेन तनु संपद्यते स एव विनाश इत्यर्थः॥ १२॥ अस्त्वेवं तथाप्यनात्मवस्तुषु सत्त्वविभाग एव दुर्निरूप इति विवक्षू रामं पृच्छति किमिति॥ १३॥ ननु अस्मदादीनां सत्त्वं प्रत्यक्षादिप्रमाणसिद्धं दामादीनां मायामात्रत्वा

अहंकारपिशाचार्तादामव्यालकटास्त्रयः॥ गताः सत्तामसंतोपि मायामाहात्म्यदानवाः॥ ९॥ काश्मीरेषु महापद्मसरसीवनपल्वले॥ अद्य मत्स्याः स्थितारामशैवाललवलालसाः॥ १०॥ श्रीराम उवाच॥ नासतो विद्यते भावो नाभावो विद्यते सतः॥ ते ह्यसंतः कथं सत्तां संपन्ना इति मे वद॥ ११॥ श्रीवसिष्ठ उवाच॥ एवमेतन्महाबाहो नासत्संभवति क्वचित्॥ कदाचित्किंचिदप्येव स्थूलं भवति वा तनु॥ १२॥ किमसत्किं स्थितं ब्रूहि किं तत्सद्वाथ संस्थितं॥ सम्यग्दृष्टिं दर्शनेनैव करिष्ये तव बोधनं॥ १३॥ श्रीराम उवाच॥ संत एव स्थिताः संतो ब्रह्मन्वयमिमे किल॥ दामादयस्त्वसंतोपि वसिसंतः स्थिता इति॥ १४॥ श्रीवसिष्ठ उवाच॥ यथा दामादयो राम स्थिता मायामया इति॥ असत्या एव सत्याभा मृगतृष्णांबुपूरवत्॥ १५॥ तथैवेमे वयमपि ससुरासुरदानवाः॥ असत्या एव वल्गामो याम आयाम एव च॥ १६॥ अलीकमेव हन्ता वो मन्ता वो लीकमेव च॥ अनुभूतोप्यसद्रूपः स्वप्ने स्वमरणं यथा॥ १७॥ मृतो बंधुर्यथा स्वप्नेप्यनुभूतोप्यसन्मयः॥ मृतोयमिति चेन्नत्स्मि प्रवेदे वमिदं जगत्॥ १८॥

दसत्त्वमेवेत्युक्तं॥ तथा च कथं तेषां पुनः सत्त्वं विप्रतिषिद्धं वदसि कोवा लवाभिप्रायमित्यर्थः॥ १४॥ यद्यस्मदादिशरीराणां व्यावहारिकप्रमाणाव्यवहारयोग्यत्वात्सत्त्वं मन्यसे तर्हि दामादीनामपि तुल्यं अथ तत्त्वज्ञानबाध्यत्वात् दुर्वचत्वाद्वा असत्त्वं मन्यसे तदपि तुल्यमिति न विप्रतिषेध इत्याशयेन वसिष्ठ उत्तरमाह॥ यथेत्यादिना॥ १५॥ १६॥ हन्ता वो रामशरीरभावः मन्ता वो वसिष्ठशरीरभावः॥ १७॥ १८॥ श्रीरामचंद्रगुरवे नमः॥ श्रीकृष्णायन मः॥ ७

चतुर्थः

६०

जगत्सत्यतानिश्चयवानतिमूढस्तद्विषयेतं प्रतिएषाअलीकत्वोक्तिर्नराजन एव॥ कुतस्तत्राह॥ अभ्यासेनेति॥ परमार्थतत्वविचाराभ्या
सेन विनाजगत्सत्यत्वानुभूतेरपन्हवोपलापोनोदेति॥१९॥ एवंपूर्वोस्मिन्दुःखसंसारनाशोपिशास्त्रार्थतत्वाभ्यासंविनानोदेतीत्याह॥ निश्च
यइति॥ २०॥ अतएवत्वनधिकारिण्युपदेशवाक्यमुन्मत्तप्रलपितप्रायत्वादज्ञानामभिज्ञानांचोपहासयोग्यमेव भवतीत्याह॥ इदमिति॥२१॥
यद्यज्ञान्नोपदिशेत्तैःसहाज्ञचेष्टाभिरेवज्ञोपिव्यवहारेत्तर्हिज्ञोअज्ञोपिस्यात्तथाचानन्तज्ञस्यज्ञयोरैक्यंस्यादित्याशंक्याह॥ क्षीबोमदिरामत्तः

एषानितिमूढविषयउक्तिरेवनराजन्ते॥ अभ्यासेनविनोदेतिनानुभूतेरपन्हवः॥१९॥ निश्चयोंतःप्ररूढोयःसपन्नोभ्यसनंविना
नाशमायातिलोकेस्मिन्नकदाचनकस्यचित्॥२०॥ इदंजगदसद्ब्रह्मसत्यमित्येववक्तियः॥ तमुन्मत्तमिवोन्मत्तोविमूढोपिहसत्य
लं॥२१॥ अक्षीबक्षीबयोरैक्यंकुतःस्यादज्ञतज्ज्ञयोः॥ अंधप्रकाशयोर्बोधेस्याच्छायातपयोरिव॥२२॥ यत्नेनाप्यनुभूतोर्थःस
एवकर्तुमपन्हवं॥ अज्ञोनभ्यनशक्नोतिशवमाक्रमपांयथा॥२३॥ ब्रह्मसर्वंजगदितिवक्तुंनाज्ञस्ययुज्यते॥ तपोविद्यानतुभवेसतदे

अक्षीबोविमदःतयोरैक्यंकुतःस्यात्॥ अंधयतीत्यंधंतमः प्रकाशःसूर्यादिः॥२२॥ इतोप्यज्ञोनोपदेश्यइत्याह॥ यत्नेनेति॥ अतोमहतापियत्नेनबोध्य
मानोपिअंतर्बहिश्चमनोबुध्यादिभेदेनरूपरसादिभेदेनचानुभूतोद्वैतरूपोयोर्थस्तस्यसत्ये अधिष्ठाने अपन्हवंनेतिनेतीतिबाधंकर्तुंनशक्नो
तियथाशवंकुणपंआक्रमयांस्वपझ्यांभ्रमयांकर्तुंनशक्नोतितद्वत्॥ नचाध्यस्तापन्हवंविना अधिष्ठानतत्वंबोद्धुंशक्यमितिवार्थस्तद्उपदेशः
स्यादित्यर्थः॥२३॥ तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानशकेनेतिज्ञानाधिकारसिद्धयेतपउपासनाधिविधा
नादर्पितदसंस्कृतोऽज्ञानोपदेशार्हइत्याह॥ ब्रह्मेति॥ यतस्तपोविद्यादीनामननुभवे अनुभवप्रयुक्तसंस्काराभावेसतिसोऽज्ञस्तस्यसिद्धंसंसारि
देहाद्यात्मभावमेवानादिकालमनुभूतवान्नकदापिअसंसार्यात्माभावमित्यर्थः॥२४॥

इदंतुबोधनायायावस्थाद्वयसादृश्यकल्पनयोक्तं परमार्थतस्तात् ॥ नचेति ॥ कथंतर्हिविगंतव्यंतत्राह चिन्व्योमेति ॥ ४३ ॥ यदादृश्यंकेवलंचिन्व्योमैवतदा सर्ग
निर्वाणयोर्भेदोनिवृत्तइत्याह ॥ निर्वाणमेवेति ॥ ४४ ॥ मुक्तमुपपादयति ॥ परमार्थइतिद्वाभ्यां ॥ स्वयंअज्ञानोपहितआत्मा ॥ ४५ ॥ ४६ ॥ अध्यारोपदृष्टौसर्वत्रैरो
चिन्व्योम्निसर्वारोपसंभवात् सर्वत्रसर्वमस्ति अपवाददृष्टौतुक्वचिदपिकिंचिन्नास्ति इत्थमुक्तप्रकारद्वयमपि इदंजगत् शांतंनिरस्तभेदं अतएवएकं
सत्ततंपूर्णमास्ते ॥ अतस्त्वमपिसंत्यक्तशोकभयभेदंयथास्यास्तथापूर्णआस्स्वेत्यर्थः ॥ ४७ ॥ तदेवपुनःस्थिरीकुर्वन्नुपपादयति ॥ शिलेति ॥ स्फटिकशिला

नचतत्क्वचिदासुप्तंनप्रबुद्धंकदाचन ॥ चिन्व्योमकेवलंदृश्यंजगदित्यवगम्यतां ॥ ४३ ॥ निर्वाणमेवसर्गश्रीःसर्गश्रीरेवनिर्वृतिः नानयोश
ब्दयोरर्थभेदःपर्याययोरिव ॥ ४४ ॥ परमार्थोजगदितिरूपंवेत्तिस्वयंस्वकं ॥ यथातैमिरिकंचक्षुःकेशोंड्रकमिवेक्षते ४५ नतत्केशोंड्रकंकिं
चित्साहिदृष्टिस्तथास्थिता ॥ नेदंदृश्यमिदंकिंचिदित्थंचिन्व्योमसंस्थितं ॥ ४६ ॥ सर्वत्रसर्वमिदमस्तियथानुभूतंनोकिंचिनक्वचिदि
हास्तिनचानुभूतं ॥ शांतंतदेकमिदमाततमित्थमास्तेसंत्यक्तशोकभयभेदमतस्त्वमास्व ॥ ४७ ॥ शिलोदराकारघनंप्रशांतंमहाचितेरूप
मिदंस्वमच्छं ॥ नैवास्तिनास्तीतिदृशोक्वचित्तुयच्चास्तितत्साधुतदेवभाति ॥ ४८ ॥ सदसन्निराकरणंसर्गः ॥ ३१ ॥ श्रीरामउवाच ॥ सताम
प्यसतामेवबालयक्षपिशाचवत् ॥ दामव्यालकटादीनांदुःखस्यांतःकथंभवेत् ॥ १ ॥ श्रीवसिष्ठ० ॥ दामव्यालकुटुंबैस्तैस्तदैवयम
किंकरैः ॥ प्रार्थितेनयमेनोक्तमिदंशृणुरघूद्वह ॥ २ ॥ यदावियोगमेष्यंतिशोष्यंतिचनिजांकथां ॥ दामादयस्तदामुक्ताभविष्यंतीहसं

याउदरमिवशून्याकारंभासमानामपिघनंतत्रप्रतिबिंबवनगिरिनद्यादिस्वरूपइवास्तिनास्तीतिदृशोतुक्वचिन्नैवयच्चप्रतिभानमात्रेणास्ति
तत्तच्चित्तिरूपमेवतथाभातीत्यर्थः ॥ ४८ ॥ इतिश्रीयोग० स्थि० एकत्रिंशःसर्गः ॥ ३१ ॥ मत्स्यसारसजन्मभ्यांवियुक्ताराजसद्मनि ॥ मशकादितनुष्व
ज्ञानात्तेमुक्तिमाययुः ॥ १ ॥ अज्ञबुद्ध्यासतामपिपरमार्थतोऽसतामेवदुःखस्यांतोमोक्षःकथंभवेत्दामभविष्यतीतियावत् ॥ १ ॥ दामव्यालक
टानांकुटुंबैर्बांधवभूतैर्यमकिंकरैः ॥ २ ॥ निजांखियांशंबरमायाकल्पितजीवभावनिर्वासनाद्वयचिन्मात्रस्वस्वभावाव्यकथांतदास्वतत्वंबुध्वामुक्ताः

॥ मतिर्बभूवेति ॥ कृशसंयंयतिः संज्ञंयंयमेनोमितिसर्गः ॥ ४ ॥ ३ ॥

तेदामादयः त्वर्थेवाशब्दः कथयतेकथयतः सकाशात् व्यत्ययेनपंचम्यर्थेचतुर्थी ॥ ४ ॥ ५ ॥ आलोलितः ग्रीष्मेमहिषसूकरादिभिरालोडित
आशयः पल्वलं येषांतथाविधाः संतः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ लब्धबुद्धयः प्राप्तविचारबुद्धयः ॥ यथाराजः सत्वतमांसि विवेकदशापर्यालोच्यमानाः मु

॥ श्रीरामउवाच ॥ स्ववृत्तांतमिमंकुत्रकदाकथयतेकथं ॥ श्रोष्यंतिभगवंस्तेवावर्णयेदंयथाक्रमं ॥ ४ ॥ श्रीवसिष्ठउवाच ॥ काश्मीरेषुमहा
पद्मसरसीतीरपल्वले ॥ भूयोभूयोनुभूयैवमत्स्ययोनिपरंपरां ॥ ५ ॥ आलोलिताशयालोलाः कालेनलयमागताः ॥ तत्रैवपद्मसरसि
तेभविष्यंतिसारसाः ॥ ६ ॥ लत्रकल्हारमालासुसरोजपटलीषुच ॥ शैवालवरवल्लीषुतरंगवलनासुच ॥ ७ ॥ चलत्कुसुमदोलासु
नीलोत्पललतासुच ॥ सीकरौघाभ्रलेखासुशीतलावर्तवृत्तिषु ॥ ८ ॥ सारसाः सरसंभोगानभुक्त्वाभुवनभूषया ॥ विहृत्यसुचि
रंकालमलमागतशुद्धयः ॥ ९ ॥ तेवियुक्ताभविष्यंतिमुक्तयेलब्धबुद्धयः ॥ रजः सत्वतमांसीवभेदंप्राप्ययदृच्छया ॥ १० ॥ काश्मीर
मंडलस्यांतर्नगरंनागशोभितं ॥ नाम्नाधिष्ठानमित्येवश्रीमंतस्यभविष्यति ॥ ११ ॥ प्रद्युम्नशिखरंनामतस्यमध्येभविष्यति ॥ शृं
गंलघुसरोजस्यकोशचक्रमिवोदरे ॥ १२ ॥ तस्यमूर्ध्निगिरेर्गेहंकश्चिद्राजाभविष्यति ॥ अभ्रंकषमहाशालशृंगोशृंगमिवापरं ॥ १३ ॥ गृह
स्येशानकोणेस्मिशिरोभित्तिव्रणोदरे ॥ तस्यानिश्रमविश्रांतवाताधूततृणांतिके ॥ १४ ॥ छ ॥

त्कयेभेदंविवेकंप्राप्नुवंतितद्वत् ॥ १० ॥ नगोर्वृक्षैरद्रिभिश्चशोभितं ॥ ११ ॥ लघुलंघनार्हस्वारोहमितियावत् ॥ कोशचक्रंकर्णिकेव ॥ १२ ॥ तस्यगिरेर्मू
र्ध्निकश्चित्कोपिगृहं अन्येषांगृहाणांराजेवराजाभविष्यति ॥ अभ्रमाकाशंकषतिछिद्रीकरोतीवेत्यभ्रंकषेमहतिशालवृक्षस्यशृंगेमध्यमे
शाखाग्रेअभ्रंकषाः महत्यः शालाः प्रासादायत्रतथाविधेगिरिशृंगेअपरंशृंगमिवेत्युत्प्रेक्षा ॥ १३ ॥ शिरोभित्तेरूर्ध्वकुड्यस्य व्रणो विदीर्ण
शिलासंधिभागस्तस्योदरे अस्मिन्नीडमितिशेषः ॥ १४ ॥ श्रीरामायनमः ॥ छ ॥ श्रीवासुदेवायनमः ॥ श्रीवेदव्यासायनमः ॥ श्रीकृष्ण

आलये तस्मिन्नीडे कलविंकश्चटकः प्रथम मल्पं श्रुतं शास्त्रं येन तथाविधो द्विज इव अर्थरहितः निरर्थकः आरवो यस्य चीचीकूचीत्यव्यक्त
वाशित इतियावत्॥१५॥१६॥१७॥विहरंत्यस्मिन्जना इति विहारः क्रीडागृहं॥१८॥करामलकवत् दृष्टो श्रुतियुक्तिगुरूपदेशस्वानुभवैः परी
क्ष्य रत्नतत्वमिव निश्चितो बंधमोक्षौ येन॥१९॥तस्य मासस्य क्रीडनः क्रीडासाधनभूतः कर्कटः शारिकाभेदः कटोनाम मायासुर इत्यन्वयः

आलये दानवो व्यालः कलविंको भविष्यति॥प्रथमात्र श्रुताशास्त्र इवार्थरहितारवः॥१५॥तस्मिन्नेव तदा काले तत्र राजा भविष्यति॥
श्रीयशस्करदेवाख्यः शक्रः स्वर्ग इवापरः॥१६॥दानवो दामनामात्र मशकास्तस्य सद्मनि॥भविष्यति बृहत्स्तंभपृष्ठछिद्रे मृदुध्वनिः॥१७॥
अधिष्ठाना भिदे तस्मिन्नेवांतर्नगरे तदा॥रत्नावली विहाराख्यो विहारोपि भविष्यति॥१८॥तस्मिंस्तत्र मिपामासो नरसिंह इति श्रुतः॥
करामलकवत्दृष्टबंधमोक्षो निवत्स्यति॥१९॥भविष्यति गृहे तस्य क्रीडनः कर्करखगः॥कटो मायासुरो नाम कृतराजन्तपंजरः॥२०॥स
नरसिंहो नृपामात्यः श्लोकैर्विरचितामिमां॥दामव्यालकटादीनां कथयिष्यति सत्कथां॥२१॥स कटः कर्करः श्रुत्वा तत्कथां संस्मृतात्मभूः॥
शांतमिश्रमतां शांतंपरं निर्वाणमेष्यति॥२२॥प्रद्युम्नशिखरप्रांतवास्तव्यः कलविंककः॥तत्र तेभ्यः कथां श्रुत्वा परं निर्वाणमेष्यति॥२३॥
राजमंदिरदार्वंतर्गृयावास्तव्यतां गतः॥मशकोपि प्रसंगेन श्रुत्वा शांतिमुपेष्यति॥२४॥प्रद्युम्नशृंगाच्चटको मशको राजमंदिरात्॥वि
हारात्कर्करश्चेति मोक्षमेष्यंति राघव॥२५॥एष ते कथितः सर्वो दामव्यालकथाक्रमः॥मायैवमेव संसारभून्यैवात्यंतभासुरा॥२६॥

२०॥२१॥संस्मृतः आत्मैव सर्वतः सर्वदा भवति इत्यात्मभूः परिच्छिन्नात्मायेन॥शांतं बाधितशंबरकल्पितजीवरूपं इत्थमेवमतां शांतं मूलतः
शांतं संसाररूपं यत्र तथाविधं परं मोक्षं॥२२॥प्रद्युम्नस्य गिरेः शिखरप्रांते वसती निवास्तव्यः॥वसेस्तव्यत् कर्तरि णिच्चेति तव्यत्प्रत्ययः तत्र
तेभ्यः अन्येभ्यश्च वर्ण्यमानमिति शेषः कथां स्वपूर्ववृत्तांतघटितबह्यकथां॥२३॥दार्वंतः स्तंभपृष्ठे शांतिं मोक्षं॥२४॥२५॥२६॥श्रीराम॥

इतरपदेभ्यो महतोपि पदात् अपरिपक्वज्ञानवशात् ॥ २७ ॥ निर्वासनत्वप्रयुक्तप्राक्तनोत्कर्षस्य पश्चात्तनमशकादिजन्मनश्च महदंतरं दर्शयति क्वेत्यादिना ॥ २८ ॥ चपेटः करतलेन प्रहारस्तेन भुजामात्रेण बाहुमात्रेण विनैव प्रहरणानीति यावत् ॥ २९ ॥ पुष्पलीलया पुष्पवत् लोलेन करेण तोलितः भारेयत्तयावधारितः मेरुर्यैस्तद्भावः ॥ ३० ॥ क्व नरसिंहस्य मंत्रिणः इदानीं राजसाहंकाररंजनेन चिदाकाश

भ्रमयस्यपरिज्ञानान्मृगतृष्णांबुधीरिव ॥ महतोपि पदादेवं नानाज्ञानवशादधः ॥ २७ ॥ पतंति मोहिता मूढा दामव्यालकटा इव क्व भ्रूक्षेपविनिक्षिप्तमेरुमंदरसद्मता ॥ २८ ॥ क्व राजगृहदारांतर्व्रणो मशकरूपता ॥ क्व चपेटभुजामात्रपातितार्केंदुबिंबता ॥ २९ ॥ क्व प्रद्युम्नगिरौ गेहे क्षितिव्रणविहंगता ॥ क्व पुष्पलीलयालोलकरतोलितमेरुता ॥ ३० ॥ क्व वाप्यंगे नरसिंहस्य गृहे कूरपोतता ॥ चिदाकाशोहमित्येव रजसा रंजितप्रभः ॥ ३१ ॥ स्वरूपमत्यजन्नेव विरूपमपि बुध्यते ॥ स्वयैव वासनाभ्रांत्या सत्ययेवाप्यसत्यया ॥ ३२ ॥ मृगतृष्णांबु बुध्येव याति जंतुरिवांतरं ॥ तरंति ते भवांभोधिं स्वप्रवाहधियैव ये ॥ ३३ ॥ शास्त्रेण सदिदं दृश्यमिति निर्वाणसंस्थिताः ॥ नानादुःखविकाराणि शुष्कतर्कमतानि ये ॥ ३४ ॥ यांति भ्रष्टजलानीव स्वल्पाभं नाशयंति ते ॥ स्वानुभूतिप्रसिद्धेन मार्गेणागमगामिना ॥ ३५ ॥ ६७ ॥

स्य देहाद्याकाराभिमानावतारप्रकारं दर्शयति चिदाकाश इति ॥ ३१ ॥ स्वरूपं स्वभाविकस्वप्रकाशत्वं विरूपं अहंकारप्राणादेहेंद्रियादिरूपं ॥ ३२ ॥ अंतरं चिद्रूपाद्भेदमिव याति इदानीं तत्तरणोपायमाह तरंतीति ॥ स्वप्रवाहधिया प्रसक्तप्रणवबुध्या ॥ ३३ ॥ शास्त्रेण महावाक्यादिलक्षणेन किमिति महावाक्यमवलंबस्तैरेव न निर्णयः कुतो न स्यात्तत्राह नानेति ॥ ३४ ॥ स्वल्पाभं पारमार्थिकभावस्थितिलक्षणपरमपुरुषार्थलाभं औपनिषदं मार्गमनुभूतिरपि संवदति न तार्किकमित्याशयेनाह स्वानुभूतीति ॥ आगमगामिनाश्रुत्यनुसारिणा ॥ ३५ ॥ श्रीरामायन०

॥वा॰टी॰स्टि॰॥
॥६५॥

अंगेत्यामंत्रणे॥ केन तर्हि पुरुषार्थविनाशस्तदाह॥ इदमिति इति बुद्धेः पुरुषस्य॥ ३६॥ दौर्भाग्यप्रयुक्तेन दैन्येनेत्यर्थः॥ नष्टस्य
च पुरुषार्थस्य भस्मापि नोपतिष्ठत इति सर्वथा नैरास्यमित्यर्थः॥ एवं स्पृहाया अनर्थत्वमुक्त्वा वैराग्यस्य सर्वानर्थनिवर्तकत्व
माह॥ वेत्तीति॥ ३७॥ विरक्तस्य चेत् ज्ञानकलापि स्यात्तर्हि तस्य दूरे आपद्वंका प्रस्तुत सर्वदेवस्योपजीव्यं स्वाधारं ब्रह्मांडमिव स
दातं पात्यं संपीयाह॥ परिस्फुरतीति॥ ३८॥ नक्रम्यत इत्यक्रमे ऽसन्मार्गे॥ ३९॥

न विनाशोप्सवं संगराघस्तांपरमां गतिं॥ इदं मे स्यादिदं मे स्यादिति बुद्धेर्महामते॥ ३६॥ स्वेन दौर्भाग्यदैन्येन न भस्माप्युप
तिष्ठते॥ वेत्ति नित्यमुदारात्मा त्रैलोक्यमपि यस्तृणं॥ ३७॥ तं सजंत्यापदः सर्वाः सर्पा इव जरत्त्वचं॥ परिस्फुरति यस्यांत
र्नित्यं सत्वचमत्कृतिः॥ ३८॥ बालसमं उमिवाखंडं त्वोकेशाः पात्यं यं तितं॥ अप्याप दिद्धरं ताया नैव गंतव्यमक्रमे॥ ३९॥ राहु
मप्यक्रमेणैवं पिबन्त्यमृतं मृताः॥ सच्छास्त्रसाधुसंपर्कमर्कमुग्रप्रकाशदं॥ ४०॥ ये श्रयंते न ते यांति मोहांध्यस्य पुनर्व
शं॥ अवश्यावश्यतां यांति यांति सर्वापदः क्षयं ४१ अक्षयं संवति श्रेयः कृतं येन गुणोर्यशः॥ येषां गुणेषु संतोषो रागो
येषां श्रुतं प्रति॥ ४२॥

कस्तर्हि मार्गस्तमाह॥ सच्छास्त्रं उपनिषदस्तदुपबृंहणानि च तदर्थनिष्ठाः साधवस्तदुभयेन संपर्कः सदा तन्निषेवणं स एवार्कः सूर्यं
निर्दयं निःशेषसंसारसंहारकत्वादुग्रः शिवः परमात्मा तस्य प्रकाशदं साक्षात्कारहेतुं तमोनभिभवनीयप्रकाशदं च॥ ४०॥ मोहल
क्षणस्यांध्यस्य अंधकारस्य इदानीं वैराग्यादिगुणान्पुनः प्रशंसति॥ अवश्या इति॥ ४१॥ येन पुरुषश्रेष्ठेन वैराग्यशमदमादिगुणैः
र्यशः सत्कृ अग्रण्यत्वेन विख्यातिः॥ उक्तगुणेषु येषामसंतोषः अनलं बुद्धिः श्रुतं अध्यात्मशास्त्रश्रवणाभ्यासादि प्रति येषां राग

॥चतुर्थः॥
॥श्री॥४२
॥६५॥

येच सत्यं सत्यवाक्यं ब्रह्मचर्यं तयोर्व्यसनिनः त एव नरजन्मसार्थकीकरणान्नराः अपरे तु नरा अपि पशुवत् व्यर्थजन्मत्वात् पशव इत्यर्थः ॥ येषां यशोलक्षणास्य चंद्रस्य चंद्रिकया जंतूनां प्राणिनां हृत् हृदयलक्षणां सरः भासितं आल्हादकैरवोन्मेषैः प्रकाशितं ॥ ४३ ॥ त एव क्षीरसमुद्राः अत एव तेषां मूर्तौ हरिर्विष्णुः परमात्मा स्फुटं स्थित इत्यर्थः ॥ इदानीं जगतीहितैषी पितृमान् क्ष्योप्याप्ततमाः श्रीवसिष्ठः सर्वैरनादौ संसारे पुनः पुनः सहानर्थपरंपराफलैरनुभूतेषु विषयेषु दृश्यकौतुकविशेषेषु चनापूर्वं किंचिदवशिष्टमिति दर्शयन्वैराग्ययश

सत्यव्यसनिनो येच ते नराः पशवोपरे ॥ यशश्चंद्रिकया येषां भासितं जंतुहृत्सरः ॥ ४३ ॥ तेषां क्षीरसमुद्राणां नूनं मूर्तौ स्थितो हरिः ॥ भुक्तं भोक्तव्यमखिलं दृष्टं द्रष्टव्यदृश्यः ॥ ४४ ॥ किमन्यद्भवसंगाय भूयो भोगेषु लुब्धता ॥ यथाक्रमं यथाशास्त्रं यथा चारं यथास्थितिः ॥ ४५ ॥ स्थीयतां मुच्यतामंत भोगजालमवास्तवं ॥ संस्तवः क्रियतां कीर्त्या गुणै गगनगामिभिः ॥ ४६ ॥ त्रायेते मत्कृतो ह्यनेन कदाचन भोगकः ॥ गायंति सिद्धसुंदर्यो येषामिंदुसितं यशः ॥ ४७ ॥ छ ॥

स्वाचारनिष्ठामेव प्रशंसमानः प्ररोचयति भुक्तमित्यादिना ॥ ४४ ॥ अन्यद्भवेषु भाविजन्मपरंपरासु संगाय स्वात्मविनाशाय भूयोपि भोगेषु लुब्धता किं युक्ता सर्वथा न युक्तेत्यर्थः ॥ अन्यद्भवेत्यत्र दुकूखांदसः ॥ यथाक्रमं स्वस्वाश्रमक्रमानुरूपं यथाशास्त्रं तादृशाधिकारिकचित्तशुध्याद्यनुकूलशास्त्रानुरूपं ॥ तत्रापि यथाचारं पूर्वाचार्यप्रवर्तितसंप्रदायानुरूपं यथास्थितिः ॥ तत्राप्येकैकभूमिकायां यावत्परिपाकस्थितिमनतिक्रम्येत्यर्थः ॥ ४५ ॥ संस्तवः साधुजनमुखेषु स्वसाधुवादः गगनगामिभिः स्वर्गपर्यंतं प्रख्यातैः ॥ ४६ ॥ एते संस्तवकीर्तिस्त्री

॥ षट्कांकः सामान्यधुरसंकं ॥ ४७ ॥ ०॥

गगनभोगेर्गगनवत्सर्वदेशकालव्याप्तिमित्यर्थः कथं संपादयितुं शक्यते तत्राह ॥ परममिति ॥ ४८ ॥ आचरन् साधनानीति
शेषः ॥ ४९ ॥ अपयंत्रणं शीघ्रतानिर्बंधरहितं ॥ ५० ॥ ५१ ॥ भूरिसंगानां भवतां जीवः इंद्रियदामभिः अंतं मत्स्य इवागतः सन्
भवलक्षणेषु जीर्णांधकूपेषु माविनश्यतामिति पूर्वत्रान्वयः ॥ ५२ ॥ शितेः स्त्रीदृशोः शरश्रेणिः शातेः निर्लूना छिन्ना वारणा

गीतिभिर्गगनाभोगे स्वे जीवं निमग्नाः परे ॥ परमं पौरुषं यत्नमास्थायादाय सूद्यमं ॥ ४८ ॥ यथाशास्त्रमनुद्वेग
माचरन् कोन सिध्यभाक् ॥ यथाशास्त्रं विहरतां त्वरा कार्यनिसिद्धिषु ॥ ४९ ॥ चिरकालपरित्यक्ता सिद्धिः पुष्टफला
भवेत् ॥ वीतशोकभयायासमगर्वमपयंत्रयां ॥ ५० ॥ व्यवहारो यथाशास्त्रं क्रियतामा विनश्यतां ॥ जीवो जीर्णांध
कूपेषु भवेष्वंतमिवागतः ॥ ५१ ॥ भवतां भूरिसंघानामधुनेंद्रियदामतः ॥ इतः प्रपतितामाभूयो गम्यतामधमादधः
॥ ५२ ॥ इदं विचार्यतां शास्त्रमस्त्रमापन्नवारणं ॥ रणे शितशरश्रेणिशातनिर्लूनवारणे ॥ ५३ ॥ जीवमुद्राच किं पंके भोगगं
॥ धो निरस्यतां ॥ किमर्थमात्रयां कार्यमार्याः शास्त्रमवेक्ष्यतां ॥ ५४ ॥

गजा यत्र तथाविधे रणे सद्यः प्रसक्तमहाभयमरत्याम्ना ॥
द्यायदाम पि निवारणमजरामरनित्यनिरतिशयानंदात्मप्रदर्शकमिदं शास्त्रं अवश्यं विचार्यतामित्यर्थः ॥ ५३ ॥ किं पंके ग्रीष्मोष्मसंत
प्तपल्वलदुर्गंधिपंकसदृशसंसारे पुनः पुनर्मज्जनो जीविन जरमंडूकज्जीवमुद्रा जीविनाशे नियावत् ॥ किं अतितुच्छे स्वर्थः ॥ मुद्यसीतिपाठे
स्पष्टं ॥ अतः भोगगंधो भोगवासनाहृदयादपनीयतां ॥ तदर्थया अर्थमात्रया द्रव्यलेशेन किं कार्यं ॥ हे आर्याः सर्वपरित्यज्य मोक्षश
॥ स्त्रमेवावेक्ष्यतामित्यर्थः ॥ ५४ ॥

विषयाकारप्रतिफलितचिदाभासानामंतःकरणावच्छिन्नचैतन्यबिंबं अंतःकरणोपहितचिदाभासस्य तु शुद्धं ब्रह्मचैतन्यमेव बिं
बं प्रतिबिंबं तदुपाधी अत्र सत्येबिंबं तु स संलग्नांतःकरणोपाध्युपसत्वे तदवच्छिन्नबिंबचैतन्यस्य तत्समनियतचिदाभासबिंबभूतब्र
ह्मचैतन्यस्य च भेदो मिथ्यैवेत्यखंडं सत्यं ब्रह्माभिन्नं ब्रह्मचैतन्यमेव परिशिष्यत इति विचार्यतामित्यर्थः॥ ननु परे सांख्यपातंजलगौतम
कणादबुद्धार्हदादयो नोक्तप्रतिबिंबत्वप्रक्रियामिच्छंति किंत्वन्यथान्यथैव निरूपयंतस्तत्रैव जनान्प्रेरयंति तत्प्रेरणापि किमुपादेया नेत्याह

इदं बिंबमिदं बिंबमिति सत्यं विचार्यतां॥ धिया परप्रेरणया यायात मा पशवो यथा॥५५॥ दौर्भाग्यदायिनी दीना शुभहीनविचारणा
घनदीर्घमहानिद्रा त्यज्यतां संप्रबुध्यतां॥५६॥ सुसंमास्थीयतां स्वच्छकल्पेनेव पल्वले॥ उत्थानमंगीक्रियतां जरामरणशांत
ये॥५७॥ अनर्घ्यायार्थसंपत्तिभोगोद्योभवरोगदः॥ आपदः संपदः सर्वाः सर्वज्ञानादरो जयः॥५८॥ लोकतंत्रानुसारेण वि
चारात् व्यवहारिणां॥ शास्त्राचारानुसारेण कर्मणा सत्फलाय च॥५९॥ आचारचारुचरितस्य विविक्तवृत्तेः संसारसौख्यफल
दुःखदशास्वगृध्नोः॥ आयुर्यशांसि च गुणाश्च सहैव लक्ष्म्या फुल्लंति माधवलता इव सत्फलाय॥६०॥ इति श्री॰ द्वात्रिंशः सर्गः॥३२

धियेति॥ यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्नित्यादिस्वतंत्रश्रुतिप्रमाणानुसारिणां पशुवत्प्रेरणायायानमनुचित
मेवेति भावः॥५५॥ एवं शास्त्रार्थविचारणां विधाय संप्रति जीवनधनपशुपुत्रादिसांसारिकविचारणां दर्शनांतरविचारणां च त्याजयितुं निंदति॥ दौ
र्भाग्येति॥ उदर्के दौर्भाग्यदायिनी स्वकाले कार्पण्यहेतुत्वात् दीना तुच्छफलत्वात् फलहीना गाढतमोमात्रनिवेशात् घनदीर्घमहानिद्रा त्यज्यतां॥५६॥५७
पूर्वोत्तरार्द्धयोः राघवाक्यार्थयोः प्रथमौ विधेयौ द्वितीयवाक्यार्थयोस्तद्वैपरीत्यं॥५८॥ लोकतंत्रं जनवृत्तं तदनुसारेण तदविरोधिना शास्त्राचारो अनुस
रति तथाविधेन कर्मणा सत्फलाय चोत्थानमंगीक्रियतामिति व्यवहितानुषंगः॥५९॥ उक्तमर्थं संक्षिप्योपसंहरति॥ आचारेति॥ विविक्तबुद्धेः विवेकी
बुद्धेः अगृध्नोरनभिलाषस्य फुल्लंति विकसंति माधवलताः वसंतकालपल्लवितलता इव सत्फलाय उत्तमफलाय॥६०॥ इति॰ द्वात्रिंशः सर्गः॥३२

वर्ण्यते तत्र शुभो योगः साधुसंघास्त्रवैभवं । बंधो हंकारतस्तस्य त्यागान्मुक्तिश्च विस्तरात् ॥ १ ॥ वक्ष्यमाणस्य शुभो योगादेः सेवनोत्कर्षफलत्वावश्यंभावं दर्शयितुं सामान्यन्यायं दर्शयति ॥ सर्वेति ॥ सर्वेषां साधनातिशयानां साफल्यनियमः सर्वत्र दृष्टः कृषिसेवादिसाधने शास्त्रीयमोक्षसाधन शुभो योगादौ च सर्वस्वानुरूपं फलं संभवत्येव न कदापि वैफल्यं तस्मान्मोक्षफलार्थी त्वमपि शुभो योगं कदापि न संत्यजेत्यर्थः ॥ १ ॥ तत्र शास्त्रीयशुभो योगस्यासाध्यं किंचिन्नास्त्येवेति दर्शयितुं नंदीश्वरोपाख्यानादि संक्षिप्योदाहरति मित्रेत्यादिना ॥ शिलादनामा किल मुनिः सर्वज्ञं पुत्रं कामयमानस्तपसा भगवंतं रुद्रं प्रसादयामास तस्मै चिरेण तपसा प्रसन्नो वरं

॥ श्रीवसिष्ठ उवाच ॥ सर्वातिशयसाफल्यात्सर्वं सर्वत्र सर्वदा ॥ संभवत्येव तस्मात्त्वं शुभो योगं न संत्यज ॥ १ ॥ मित्रस्वजनबंधूनां नंदिना नंददायिना ॥ सरसो शानमासाद्य मृत्युरप्युपनिर्जितः ॥ २ ॥ सर्वोत्कर्षेण संपन्ना देवा अपि विमर्दिताः ॥ दानवैर्दानवार्थाढ्यैर्गजैः पद्माकरा इव ॥ ३ ॥ मरुत्तनृपतेर्यज्ञे संवर्तेन महर्षिणा ॥ अहैरेवापरः सर्गो भावितः ससुरासुरः ॥ ४ ॥

दास्यन्किल स भगवानुवाच न मत्तोन्यः सर्वज्ञः संभवत्यतोहमेवांशेनावतीर्णस्ते पुत्रो भविष्यामि ॥ स ते मदंशजः पुत्रः षोडशे वर्षे मृत्युपदं याते ति तद्धृत्वा शिलादस्तद्वचनं प्रतिकूलयितुमशक्नुवंस्तमेव शरणं गतस्तथास्त्वित्यनुमेने ॥ अथ तस्य सर्वज्ञः पुत्रो नंदिनामा बभूव स बाल एव पितुः सकाशात्स्वस्य प्राविमृत्युपाशबंधनं श्रुत्वा तपसा तमेव रुद्रमाराधयामास ॥ अथ षोडशवर्षे सरस्तीरे लिंगार्चनकाले मृत्युना पाशैर्बध्यमानस्तत्रैवाविर्भूतेन शिवेन मृत्युं वामपादाग्रेणाहत्वा पाशांश्छित्वा स जरामृत्युवर्जितः स्वानुचरः कृत इति लैंगे प्रसिद्धं ॥ २ ॥ दानवैर्बलिप्रभृतिभिर्दानवैः सैनिकैः रथैर्धनश्चाढ्यैः संपन्नतरैः ॥ ३ ॥ यद्यपि महाभारते मरुत्तयज्ञे विघ्नं चिकीर्षोः सुरसैन्यसहितस्येंद्रस्य संवर्तेन स्वसंकल्पमात्रेणावशीकृतस्य देवैः सह यज्ञपरिचारकत्वं कृतमित्येव प्रसिद्धं तथापि पुराणांतरे सुरासुरसर्गोपि भावि[illegible]त एवेति कल्पांतरकथाभिप्रायः ॥ ४ ॥

५ पिष्टसेकांबु पिष्टमिश्रितोदकं । तदपि रोदनादियत्नप्राप्यत्वात् दुःप्रापं । ईदृशेन दुर्भगेन भाग्यहीनेनाप्युपमन्युना क्षीरोदः क्षीरसमुद्रस्तपसा शिवप्रसादादाप्तः प्राप्त इति भारतादौ प्रसिद्धं ॥ ६ ॥ त्रैलोक्यमल्लान् अतिबलत्वेन ख्यातानिति यावत् तथाविधानपि विष्णुब्रह्मजादिकान् तृणवत् अश्नन् ग्रसन् तथा च भार्गवाख्याने कालवचनं संसारबलयो मुक्ता इत्यादि श्वेतेन श्वेताख्येन मुनिना । कालो मृत्युः कालितो निर्जितः इदमपि लैंगे प्रसिद्धं ॥ ७ ॥

महातिशययुक्तेन विश्वामित्रेण विप्रता । भूयो भूयः प्रयुक्तेन दुःप्रापा तपसार्जिता ॥ ५ ॥ पिष्टसेकांबु दुःप्रापं रसायनवदश्नता । दुर्भगेनेदृशेनाप्तः क्षीरोद उपमन्युना ॥ ६ ॥ त्रैलोक्यमल्लांस्तृणवदश्नन् विष्णुब्रह्मजादिकान् । भक्त्यातिशयदार्ढ्येन कालः श्वेतेन कालितः ॥ ७ ॥ प्रणायेन यमं जित्वा हृत्वा वचनसंगमं । परलोकादुपानीतः सावित्र्या सत्यवान्पतिः ॥ ८ ॥ न सोऽस्त्यतिशयो लोके यस्यास्ति न फलं स्फुटं । भवितव्यं विचार्यंतः सर्वातिशयशालिना ॥ ९ ॥

सावित्र्या राजकन्यया प्रणायेन भर्तृप्राणानुगमनस्तुत्यादिप्रीणनोपायेन यमं जित्वा वशीकृत्य । अतः स सत्यवतः प्राणादन्यं वरं वृणीष्वेति यमवचनस्य तस्याः सत्यवतः शतपुत्रोत्पत्तिवरप्रार्थनावचनेन संगमं संबंधं सावित्र्युपाख्यानमपि भारते प्रसिद्धमेव ॥ ८ ॥ अतिशयः शास्त्रीयशुभोद्योगातिशयः । तर्हि नानाविधशुभोद्योगेषु दर्शितेषु मादृशेन कुतो नातिशायिना भाव्यं तत्राह । भवितव्यमित्यादिना अधिकारिणा मूढवत् क्षुद्रफलप्रार्थनया फल्गुना न भवितव्यं किं तर्हि मनसि फलतारतम्यं विचार्य सर्वातिशायिफललाभेन सर्वातिशयशालिना भवितव्यमित्यर्थः ॥ ९ ॥

वा॰टी॰स्थि॰
६७

सर्वातिशयश्चात्मज्ञानादेव यतस्तदशेषाणां सुखदुःखजन्ममरणादिदशाभाजां तद्दृष्टीनां मूलोच्छेदकरं तस्मात्तेनैव श्रुमो योगातिशय
शालिना भाव्यमित्यर्थः ॥ १० ॥ तत्रादौ भोगरागदृष्टीनां विनाशाय तत्तद्विषयदोषदृष्ट्योरन्वेष्टव्या इत्याह ॥ नाशायेति क्षुत्तृष्णाकामाद्यापद्गतानन्
र्थयति विषयोपहारेणानुगृह्णाती सापद्गतार्थिन्याः दृष्ट्याः भोगदृष्टेर्नाशाय प्रथमं तद्विरोधिविषयदोषदृष्ट्योर्दृश्योः अन्वेष्टव्याः हि शब्दस्
दावश्यकत्वे द्योतनार्थः ॥ ननु तदन्वेषणे विषयत्यागपर्यवसानात्स द्योदुःखं स्यादिति चेत्तत्राह ॥ दुःखादिति ॥ वैराग्याभ्यासादिदुःखदत्तेन नि
राबाधं भूमानंदसुखं चित् किं अवाप्यते नावाप्यत एवेत्यर्थः किंचित् इति च्छेदे तु काकुर्बोध्यः ॥ ११ ॥ ननु सर्वविषयत्यागदुःखमप्यंगीकृत्य सर्वे

आत्मज्ञानमशेषाणां सुखदुःखदशादृशां ॥ मूलनाशकरं तस्मात्प्राव्यं तत्रातिशायिना ॥ १० ॥ नाशायापद्गतार्थिन्याः
दृष्ट्यादृश्या हि दृष्टयः ॥ दुःखाद्दत्ते निराबाधं सुखं किंचिदवाप्यते ॥ ११ ॥ प्रशमः परमं ब्रह्म प्रशमश्च परमं पदं
यद्यप्येनं तथाप्येनं प्रशमं विद्धि शंकरं ॥ १२ ॥ अभिमानं परित्यज्य शममाश्रित्य शाश्वतं ॥ विचार्य प्रज्ञयार्यत्वं कु[illegible]

राग्येण रागादिदोषप्रशमोवश्यं संपाद्यः स्यात् यदि प्राप्यं ब्रह्म सशममेव पुरुषार्थः स्यात् ॥ ननु तथा शमस्यापि सात्विकचित्त
वृत्तिभेदस्यांतःकरणधर्मस्याद्वितीये ब्रह्मण्यभावात् सुखैकरसब्रह्मातिरिक्तस्य दृश्यत्वया परमपुरुषार्थघटकत्वाभावाच्छेयासं
कामद्वंगीकारेणापरिहरन् शमस्यावश्यकत्वं दर्शयति ॥ प्रशम इति सत्यं प्रशमश्चिदात्मैव परमं ब्रह्म तथापि शमोपि संनिदानं सं
सारानर्थनिवृत्तिरूपः परमं पदं परमपुरुषार्थो भवत्येव ॥ यद्यप्येवं द्वयमपि सममिति प्राप्तं तथापि एनं शमं भूमानंदब्रह्मसुखं करो
त्यभिव्यनक्तीति शंकरं विद्धि न त्वनभिव्यक्तसुखस्य पुरुषार्थत्वमिति तदुपयोगितास्याधिकेति भावः ॥ १२ ॥ इदानीं प्रशमोपायमाह ॥ अ
भिमानमिति ॥ शाश्वतं यत्कैवल्यमविचालि आर्यत्वं मोक्षयोग्यत्वं हि जन्मादिशालितां स्वस्य विचार्य परिशी[illegible] ॥ १३ ॥

चतुर्थः

६७

चित्तशुध्यर्थंसेवितानांतपआदीनामपिसज्जनसेवनद्वारैवज्ञानोपयोगोनान्यथेत्याशयेनाह॥नेति॥जयंतिज्ञानोत्पत्तयेप्रभ
वंतीत्यियावत्॥१४॥इदानींसज्जनलक्षणमाह॥लोभेति यस्यसेवनादितिशेषः॥१५॥सदासज्जनसेवापरायपास्यकदाचिदात्मविलं
घ्यवश्यंभवतियेनज्ञानलाभइत्याह अथेति॥१६॥तेननतस्यपरमपुरुषार्थोपिसिध्यतीत्याह दृश्येति॥१७॥परमेवावशिष्यतेइति
यदुक्तंतत्दृश्यासत्ताभावोपपादनेनसमर्थयति॥नचेत्यादिना अवेधितमतोदितमपीडितमितियावत्॥१८॥यथोसत्यादिकंनसंभ

नतपांसिनतीर्थानिनशास्त्राणिजयंतिच॥संसारसागरोत्तारेसज्जनासेवनंविना॥१४॥लोभमोहरुषांयस्यतनुतानु
दिनंभवेत्॥यथाशास्त्रंविहरतिस्वकर्मसुससज्जनः॥१५॥अथात्मविदुषांसंगात्तस्यसाधोःप्रवर्त्तते॥अत्यंताभाव
एवास्ययथादृश्यस्यदृश्यते॥१६॥दृश्यात्यंताभावतस्तुपरमेवावशिष्यते अन्याभाववशादाशुजीवस्तत्रैवलीयते॥१७॥
नचोसन्नंनचैवासीन्नदृश्यंनचभविष्यति॥वर्त्तमानेपिनैवास्तिपरमेवास्त्ववेधितं॥१८॥एवंयुक्तिसतस्त्वपादशितंदृश्यतेपि
च॥सर्वैरेवानुभूतंचदर्शयिष्यामिचाधुना॥१९॥तथेदममलंशांतंत्रिजगत्संविदंबरं॥इदंतत्वमतत्वादिकुतोत्रस्यात्कथंचवा॥२०॥

वतितथोसत्तिप्रकरणेपियुक्तिभिरुपपादितमुपपादयिष्यतेचेत्याह॥एवमिति यथासर्वैर्विद्वद्भिरनुभूतंचतथात्वेइदंत्रिजगत्संविदंबरंअधुना
दर्शयिष्यामिचेतिपरेणासहान्वयः॥१९॥तदेवंदर्शयति॥इदंतत्वमिति॥इदंसंचिदंबरंतत्वंपरमार्थरूपं अत्रअतत्वंमायातद्देवआदिमूलकारणं
यस्यतद्विपदादिकुतःस्यात्॥किंसतःउतअसतःउतमायायाः आद्ययोरविकारत्वान्मायायोत्पादेमिथ्यत्वापत्तेरनुत्पत्तिपक्षस्यैवपरिशेषा
त्॥एवंकथंवास्यात् अछिद्रेकूटस्थचिदात्मनिछिद्रस्वभावस्यवियतःटंकसहस्त्रैरप्युत्पादयितुमशक्यत्वादित्यर्थः॥२०॥

॥ वा॰ टी॰ स्थि॰ ॥ ६८ ॥

यदि नोत्पन्नमेव कथं तर्हि जगदिति सर्वैरवबुध्यते । तत्राह चिदिति । अचंचलात्मनि कल्पिता चांचल्येन चंचला मायाप्रतिबिंबचिद्भ्रमु-
मकुरुते जगद्भावमिव कल्पयति तदेव जगदिति तथैवावबुध्यत इत्यर्थः ॥ २१ ॥ नन्वियं जगदवबोधचित् सविकल्पा ब्रह्मचिन्निर्विकल्पे-
ति जगद्भेदमपलपितुं प्रवृत्तस्य ते प्रकृतचित्स्वपि भेदः प्रसक्त इत्याशंक्याह । त्रैलोक्येति । त्रैलोक्ये यावाननुभूयाननुभूवः स सर्वो-
पि ब्रह्मचिदादित्यस्यांशुमंडलं किरणसमूह इव वस्तुतो न भिद्यत इत्यर्थः । स्वस्यांशुमंडलस्यांशुमतश्च को वा भेदः । विकल्पानां

चिद्भ्रममकुरुते चारु चंचलाचंचलात्मनि । यत्तथैव तदेवेदं जगदित्यवबुध्यते ॥ २१ ॥ त्रैलोक्यमनुभूयोनुभवश्चिदादित्यांशुमं-
डलं । को वा स्वांशुमतोर्भेदो निर्विकल्पः स कथ्यतां ॥ २२ ॥ स्वभावलोलस्याश्चिद्वृत्तेर्ये उन्मेषनिमेषयो । जगद्रूपानु-
भूतेस्तावेतावत्समयोदयौ ॥ २३ ॥ अहमर्थोपरिज्ञातः परमार्थांबरे जलं । परिज्ञातोहमर्थस्तु परमात्मांबरे भवेत् २४
अहंभावः परिज्ञातो नाहंभावो भवत्यलं । एकतामंबुनेवांबु याति चिन्मयसात्मना ॥ २५ ॥ श्री ॥

मिथ्यात्वेस त्रैलोक्यमनुभूयोनुभवोपि निर्विकल्पक एव कथ्यतामित्यर्थः ॥ २२ ॥ अस्याः सविकल्पायाश्चिद्वृत्तेश्चिदाभासस्य उन्मेषो जगद-
नुभूतेरुदयः निमिषोस्तमय इत्यार्थक्रमप्राबल्यात् पाठव्युत्क्रमे पायोज्यं । अथवा अस्या निर्विकल्परूपायाश्चिद्वृत्तेश्चरमसाक्षात्कार-
स्य उन्मेषो जगद्रूपानुभूतेरस्तमयः निमेषश्च ना विषयविस्तरोदय इति पाठक्रमेपि योज्यं ॥ २३ ॥ तस्मान्निमेष एव प्रतीचोऽविद्यामलत्वं उ-
न्मेषश्च नैर्मल्यलक्षणो मोक्ष इत्याशयेनाह । अहमर्थ इति ॥ २४ ॥ नन्वाहमर्थोऽहंकारः स कथं परिज्ञातोपि परमात्मांबरे स्यात्तत्रा-
ह । अहमर्थ इति । यावत्तत्त्वतो न परिज्ञातस्तावदेवाहंकारः । सः परिज्ञाते तु न तथेत्यर्थः ॥ २५ ॥ ० ॥ श्रीरामायनमः । श्रीकृष्णायनमः

चतुर्थः

यदि परिज्ञानो बाध्येत तर्हि किं शिष्यते तदाह ॥ अवश्यमेवेति ॥ ननु चिन्मात्रः शिष्यते परिशिष्यते विचारतः कोयमहं पदार्थः स्यादिति प्र
माणपूर्वक विचारजन्यज्ञानात् ॥ २६ ॥ अपि शाचे पिशाचधीः अमन्दधियां प्रौढबुद्धीनां बाध्यते ॥ आध्वांतः करणानां ईषन्मार्गप्रवृत्तबुद्धीनां
शिशूनां तु शांतशोनायं पिशाच इत्युपदिष्टे पि विचारणा संशय एव भवति न तु बाध्यत इत्यर्थः ॥ २७ ॥ यथा बालानां मोहो बोधनिरोधी तद्वतो

अहमादिजगद्दृश्यं किल्पना स्वेव वस्तुतः ॥ अवश्यमेव तत्तस्माच्छिष्यते ह विचारतः ॥ २६ ॥ बाध्यते चामन्दधियामपिशाचे पि
शाचधीः ॥ शिशूनां तावदाध्वांतकरणानां विचारणा ॥ २७ ॥ चिज्ज्योत्स्नायावदेवांतरहंकारघनावृता ॥ विकाशयति नैतावत्सरमा
र्थकुमुद्वती ॥ २८ ॥ प्रमार्जिते हमित्यस्मिन्पदे स्वार्थे स्वयं विना ॥ नरकस्वर्गमोक्षादितृष्णायाः कल्पनैव का ॥ २९ ॥ हृदियावदहंभा
वोवारिदः परिजृंभते ॥ तावद्विकाशमायाति तृष्णाकुटजमंजरी ॥ ३० ॥ आक्रम्य चेतनां नियमहंकारांबुदे स्थिते ॥ जाड्यमेव स्थि
तं याति न प्रकाशः कदाचन ॥ ३१ ॥ असन्नयमहंकारः स्वयं मिथ्याप्रकल्पितः ॥ दुःखायैव न हर्षाय बालसंभ्रमयक्षवत् ॥ ३२ ॥ मुधे
व कल्पितो मोह महंभावः प्रयच्छति ॥ अनंतसंसारकरंदामादिषु विदुर्मतौ ॥ ३३ ॥ अयं सोहमिति स्फारान्मोहादन्यतरस्तमः ॥ अनर्थ
मूलं संसारेन भूतं न भविष्यति ॥ ३४ ॥ यत्किंचिदिदमायाति सुखदुःखमलं भवे ॥ तदहंकारचक्रस्य प्रविकारो विजृंभते ॥ ३५ ॥ ७ ॥

दानामाभिमानोपि तन्निरोधीत्याशयेनाह ॥ चिज्ज्योत्स्नेति ॥ २८ ॥ अहमभिमानापाये भयरागमुमुक्षादिहेतुक द्वेषरागगोचरनरकस्वर्गमोक्ष
तृष्णाप्यपैतीत्याह ॥ प्रमार्जिते इति ॥ २९ ॥ ३० ॥ मोहं भ्रमं दुर्मतौ अभिमानदूषितांतःकरणे ॥ ३१ ॥ तत्राप्ययं देहोहमिति भ्रमः सर्वानर्थनिमित्त
मित्याह ॥ अयमिति ॥ ३४ ॥ प्रविकारः मुख्यः परिणामस्तदर्थत्वात्परिणामांतराणां ॥ ३५ ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीश्री

॥वा॰रा॰सि॰
॥६९.

येन अहंकारलक्षणो दुर्वृक्षांकुरः हृदयेन विचारपरिशुद्धमनसैव हस्तेन कृष्टः कर्षणेन मूलशैथिल्यमापादितः सन् अवरो
पितः उत्खाय निरस्तः तस्याधीरात्मक्षेत्रे संसृतिनाशनं ज्ञानसस्यं सहस्रशाखं प्रवृद्धं फलतीति शेषः॥३६॥ तदनुच्छेदे अनर्थ
माह ॥ अहंभाव इति ॥ अक्षयात्मनां ज्ञानकुठारमंतरेणानुच्छेद्यस्वभावानां ॥३७॥ ज्ञानमात्रोच्छेद्यत्वादि तिनिःसाराश्च ते इत्या
ह करटापातेति ॥ करटानां काकानामापातईषत्पतनं तेनापि विस्फुटंति विशीर्यंते इतिकरटापातविस्फोटाः विचार्यः विमृश्यश्चा

अहंकारांकुरः कृष्टो हृदयेनावरोपितः॥सहस्रशाखं दुःछेदं तस्यसंसृतिनाशनं॥३६॥ अहंभावांकुरोजन्मवृक्षाणा
मक्षयात्मनां॥ ममेदमिति विस्तीर्णा स्तेषांशाखास्सहस्रशः॥३७॥ करटापातविस्फोटाश्चांत्यर्थवासनादयः॥ विचा
र्यचारुरववत्तरंगवरपंक्तिवत्॥३८॥ अहंभावनया भाति तमहंभाववर्जितः॥ संसारचक्रवहनमात्मनः परिरोध
यां॥३९॥ अहंभावनमो यावज्जन्मारण्ये विजृंभते॥ तावदेव विवल्गंति चिंतामत्ताः पिशाचिकाः॥४०॥ अहंकारपिशा
चेन गृहीतो येन राधमः॥ न शास्त्राणि न मंत्राश्च तस्याभावस्य सिद्धये॥४१॥ श्रीरामउवाच॥ केनोपायेन भगवन्नहंकारोन
वर्द्धते॥ तत्वं कथय मे ब्रह्मन् संसारभयशांतये॥४२॥छ॥

रुरवः विस्फोटनशब्दो यस्य तथाविधपक्वशाल्मलीफलादिवत् तरंगायांवरारम्यायाः पंक्तयस्तद्वदापातभंगुराः फलावश्चार्थः॥३८॥ वस्तुत
स्त्वहंभाववर्जितएवात्मा आत्मनः परिरोधयात्तिरोधाय्या अहंभावनया स्वयमेव संसारचक्रेवहनंभ्रमया मिव भातीत्यर्थः॥३९॥ चिंतालक्ष
णामत्ताः पिशाचिकाः विवल्गंति विधावंति॥४०॥ तस्य अहंकारपिशाचभावस्य निवृत्तेः सिद्धये प्रभवंतीति शेषः॥४१॥ तं उपायं॥४२॥छ॥

॥चतुर्थः॥

॥६९॥

इत्युक्तप्रकारस्य भावस्य स्वात्मस्वभावस्यानुसंधानात् सदा स्मरणात् स्वात्मनि चिन्मात्रदर्पणाकारे निर्मले स्थिते सति अहंकारो
न वर्द्धते ॥४३॥ स्नेहविरागयोः रागद्वेषाभ्यां किं न किंचित्सयोजनत्वं तन्मनसि अनुसंधानात् ॥४४॥ यस्य पुंसः आत्मनि नाहं अहंका
रो नास्ति दृश्यस्य श्रियश्च नो संति इति स्थित्या स्वयमेव शांतेन ॥४५॥ अंतरहमिति बहिर्जगदिति हेयादेयव्यवहारनिमित्तयोर्दृशोः क्षये

॥श्रीवसिष्ठ उवाच॥ चिन्मात्रदर्पणाकारे निर्मले स्वात्मनि स्थिते ॥ इति भावानुसंधानादहंकारो न वर्द्धते ॥४३॥ मिथ्येयमिंद्रजा
लश्रीः किं मे स्नेहविरागयोः ॥ इत्यंतरानुसंधानादहंकारो न जायते ॥४४॥ नाहमात्मनि नो यस्य दृश्यश्रिय इति स्वयं ॥ शांतेन
व्यवहारेण नाहंकारः प्रवर्द्धते ॥४५॥ अहं हि जगदित्यंतर्हेयादेयदृशोः क्षये ॥ समतायां प्रसन्नायां नाहंभावः प्रवर्द्धते ॥४६॥
अहं चिज्जगदित्यंतर्हेयादेयदृशोः क्षये ॥ समतायां प्रसन्नायां नाहंभावः प्रवर्द्धते ॥४७॥ श्रीराम उवाच ॥ किमात्मकस्त्वहंकारः क
थं संत्यज्यते प्रभो ॥ सशरीरोऽशरीरश्च त्यक्ते तस्मिंश्च किं भवेत् ॥४८॥ श्रीवसि० ॥ त्रिविधो राघवास्तीह त्वहंकारो जगत्त्रये ॥ द्वौ श्रेष्ठावि
०॥ तरस्त्याज्यः शृणु त्वं कथयामि ते ॥४९॥ छ॥

सति समतायां अवैषम्यलक्षणायां प्रसन्नायां ॥४६॥ अहं द्रष्टा चित् दर्शनं जगत् दृश्यं इति त्रिपुटीप्रत्यये तत्रापि इदं हेयं शत्रुभूतमिदमादेयं
मित्रभूतमिति दृशोः क्षये समतायां सर्वात्मतालक्षणायां ॥४७॥ सशरीरे जाग्रदहंकारः अशरीरः स्वाप्नः मानोरथिकाहंकारश्च अथवा सशरीरः
देहमात्राहंभावलक्षणः अशरीरः देहव्यतिरिक्तबुद्धिमात्रोपाधिकाहंभावलक्षणः सर्वाहंभावलक्षणश्चेत्यर्थः कथं केनोपायेन संत्यज्यते ॥४८॥ अशा
स्त्रीयस्याहंकारस्य त्याजनार्थं शास्त्रीयौ द्वावहंकारौ विहितौ सूक्ष्मात्मविषयः सर्वात्म्यविषयश्च तयोस्तत्त्वदर्शनाप्रतिकूलत्वात् सांप्रतिकत्वेन सुत्यज
त्वात् परिच्छिन्नात्मदर्शनद्वारत्वाच्च श्रेष्ठता इतरस्य देहमात्राहंभावरूपस्यानर्थरूपत्वात्त्याज्यता चेत्यर्थः ॥४९॥

लक्ष्यार्थ

अहंसर्वमिदं विश्वमिति कार्यब्रह्मविषयापरमात्मात् मुच्यत इति कारणविषयात् सदा वाच्यार्थे विषया वा अन्यदहं भूतं जगति नास्तीत्यर्थः॥५०॥ जीवन्मुक्तस्य चतुर्थपंचमभूमिकास्थस्य यद्यपीयं तृतीयदशापन्नस्यापि भवति जीवन्मुक्तेषु पठ्येति भावः बालाग्रस्य केशाग्रभागस्य शततमभाग इव कल्पितः शोधनेन निरवयवः समर्थित इति यावत्॥ स्थौल्यविरहे बुद्धिसौक्ष्म्योपाधिकसौक्ष्म्यकाष्ठायां वाऽयं दृष्टांतो न तदणुपरिमाणत्वेतस्या वैदिकत्वात् स चानंतायकल्प्यत इति श्रुतिविरोधाद्येति बोध्यं॥५१॥ अत एवा

अहंसर्वमिदं विश्वं परमात्माहमच्युतः॥ नान्यदस्तीति परमा विज्ञेयासाद्यहंकृतिः॥५०॥ मोक्षायैषा न बंधाय जीवन्मुक्तस्य विद्यते॥ सर्वस्मात् व्यतिरिक्तोऽहं वालाग्रशतकल्पितः॥५१॥ इतियासं विदेषासौ द्वितीयाहंकृतिः शुभा॥ मोक्षायैषा न बंधाय जीवन्मुक्तस्य विद्यते॥५२॥ अहंकाराभिधायास्या कल्प्यते न तु वास्तवी॥ पाणिपादादिमात्रोऽयमहमित्येति निश्चयः॥५३॥ अहंकारस्तृतीयोऽसौ लौकिकस्तुच्छ एव सः॥ वर्ज्य एव दुरात्मासौ शत्रुरेव परः स्मृतः॥५४॥ अनेनाभिहतो जंतुर्न भूयः परिरोहति रिपुयानेनबलिना विविधाधिप्रदायिना॥५५॥ कष्टीकृतमतिर्लोकः संकटेषु वमज्जति॥ अनयादुरहंकृत्सा भावात्संसक्तया चिरं॥५६॥

त जीवन्मुक्तस्येति॥ षष्ठभूमिकास्थस्येत्याशयः॥५२॥ ये तु सप्तमभूमिकारूढास्तेषु जीवनान्यथानुपपत्त्यायाकल्प्यते न तु वास्तवी सा कल्पना कल्पयित्रा वेदित्रा वाप्रत्यक्षमननुभवात्॥ अतोऽस्यं नास त्वादहंकार इति नाममात्रपरिशेषादहंकाराभिधामात्र मित्याह॥ अहंकाराभिधेति तृतीयं दर्शयति पाणिपादादिति॥ अयं देह एवाहं इत्येष निश्चयो मिथ्याभिमानः॥५३॥५४॥ न परिरोहति नापरिच्छिन्नस्वभावेनाविर्भवति॥ अधिग्रहणं प्राधान्यात् दुःखमात्रोपलक्षणं॥५५॥ भावात्स्वभावादेव चिरमनादिकालादारभ्य संसक्तयाकष्टीकृतमतिर्दुर्वासनाप्रचयदुःप्रदया

केन तर्हि तस्मा ज्जंतुर्मुच्यते तदाह शिष्टेति ॥ शिष्टो प्रागुक्तो यो शुद्धाहंकारो तद्वान्सन् दोषान्ममता प्रयुक्तरागादीन्वपति सर्वतश्छि
नत्ति इति दोषवपुः सन् अस्मिन्सर्वात्मभावाहंकारो पि लोकप्रसिद्धदेहात्मभावाहंकारवत् निरूपयतीति निरूपपाः दृढीभूतः सन् भगवा
न् हिरण्यगर्भ ईश्वरो वा स्वयमेव भावनया सम्पन्नो देहाहंकारमुक्ततां यातीत्यर्थः ॥ ५६ ॥ अयमेव प्रकारोन्येषां ब्रह्मनिष्ठानां संमत इत्याह ॥ नदेह
इति ॥ अयं यो देहात्मभावाहंकार इव लौकिको निरूढतमो आद्यो द्वावहंकारौ प्रथममंगीकृत्य न देहो स्मीति विचारतो पि निर्णीयित देहंकार वर्ज

शिष्टाहंकारवान् जंतुर्भगवान्या ति मुक्ततां ॥ लौकाहंकारवन्दोषान्वपुरस्मिन्निरूपपाः ॥ ५७ ॥ न देहो स्मीति निर्णीय वर्जनं महतां
मतं प्रथमं द्वावहंकारावंगीकृत्यांत्य लौकिको ॥ ५८ ॥ तृतीयाहंकृतिस्त्याज्या लौकिकी दुःखदायिनी ॥ ५९ ॥ अनया दुरहंकृत्या दोमव्या
लक्वराः किल तां दशां समनुप्राप्ता या कथास्वपि खेददा ॥ ६० ॥ श्रीराम उवाच ॥ तृतीयां लौकिकीमेतां यत्का चित्तादहंकृतिं ॥ किं
भावः पुरुषो ब्रह्मन्प्राप्नुयादात्मनो हितं ॥ ६१ ॥ श्रीवसिष्ठ उवाच ॥ एषा नावसरि त्याज्या त्यक्तेतां दुःखदायिनीं ॥ यथा यथा पुमां
स्तिष्ठेत्स रमेत्तितथा तथा ॥ ६२ ॥ अहंकारदशावेते पूर्वोक्ते भावयन्यदि ॥ तिष्ठेदुपैति परमं तत्पदं पुरुषोनघ ॥ ६३ ॥

नं कार्यमिति महतां पूर्वेषां मतमित्यर्थः ॥ ५७ ॥ उक्तमेवार्थं पुनरनुद्योपसंहरति प्रथममिति ॥ ५९ ॥ तत्रोक्तोपाख्यानमपि निदर्शनमित्याह ॥ अनये
ति ॥ ६० ॥ प्रश्नद्वयसमाहितेरामस्तृतीयं प्रश्नमर्थत्तितीयाहंकारनिवृत्तिफलप्रश्नतया पर्यवसन्नमध्यवस्यन्तादशापुरुषस्थितिप्रकारभेदा
न्पृच्छति तृतीयामिति केभावाः स्थितिप्रकारा यस्य स किंभावः ॥ ६१ ॥ यथा यथा सर्वाहंभावेन शुद्धाहंभावेन श्रवणगुरुशुश्रूषादिपरतया
सप्तभूमिकाभ्यासेषु वा येन येन प्रकारेण स्थातुं शक्नोति तथा तथा स्वरूपसुखाभिव्यक्त्युत्कर्षलाभात्सरंरमतीत्यर्थः ॥ ६२ ॥ तदेव प्रपंचयति ॥ अहंकारे

६४ शत्तकृत्वोपि पथ्यं वक्तव्यमिति न्यायात् पुनर्देहात्मभावनात्यागगुणान्कीर्तयंस्तदवश्यकर्तव्यं दर्शयति ॥ सर्वदेत्यादिना ॥ ६५ शरीरास्थामयः अपुण्यः पापरूपो योऽहंकारस्तस्य वर्जनं ६६ भावनं भावो विचारस्तस्मात् ॥ ६७ प्रतिपन्नविषाः प्रतिविषाः विषसंपृक्ता इति ६८ प्रतिबंधनिरासात् पुरोगतमिव भवतीति शेषः ॥ मनसः अंधकारे अंधकारवद्ग्रहणान्यथाग्रहणनिमित्ते अहंकारे क्षीणे सत्यन्यत्किं

अथ ते अपि संत्यज्य सर्वाहंकृतिवर्जिताः ॥ संतिष्ठते तथास्फुच्चैः पदमेवाधिरोहति ॥ ६४ सर्वदा सर्वयत्नेन लौकिकी दुरहंकृतिः ॥ परमानंदबोधाय वर्जनीयानया धिया ॥ ६५ शरीरास्थामया पुण्यदुरहंकारवर्जनं ॥ अत्यंतपरमं श्रेय एतदेव परं पदं ॥ ६६ भावादहंकृतिं त्यक्त्वा स्थूलं मे तां हि लौकिकीं ॥ तिष्ठन्नुद्व्यवहरन्वापि न नरः प्रपतत्यधः ॥ ६७ स शांताहंकृतेर्जंतोर्भोगा रोगा महामते ॥ न स्वदंते सुतप्तस्य यथा प्रतिविषा रसाः ॥ ६८ भोगेष्वस्वदमानेषु पुंसः श्रेयः पुरोगतं ॥ क्षीणेंऽधकारे किं नाम मनसोन्यत्प्रवर्तते ॥ ६९ अहंकारानुसंधानवर्जनादेव राघव ॥ पौरुषेण प्रयत्नाच्च तीर्यते भवसागरः ॥ ७० नाहं न तेन मम किंचिदपीति मत्वा सर्वं च मे सकलमप्यहमेव चेति ॥ लब्ध्वास्पदं मनसि संविदमेवमीड्यां नीत्वा स्थितिं परमुपैति परं महात्मा ॥ ७१ ॥ त्रयस्त्रिंशः सर्गः

प्रतिबंधकं प्रवर्तते येन श्रेयः प्राप्तविघातः स्यात् न किंचिदित्यर्थः ॥ ६९ ॥ पौरुषेणाधैर्येणाश्रवणादिप्रयत्नाच्च ॥ ७० ॥ प्रथमं सकलमप्यहमेवेति न सर्वं च मे इति मत्वा तेन देहादिनाहं न संबंधि च किंचिदपि मम न इति मत्वानेन सर्वप्रतिबंधहत्या मनसि लब्धास्पदं यथा स्यात्तथा ईड्यां पूज्यां एवं प्राग्विस्तरोक्तप्रकारां शुद्धात्मसंविदं नीत्वा प्रापय्य क्रमेण सप्तमभूमिकास्थितिं प्राप्य महानपरिच्छिन्न आत्मा स्वयं सन्परं पदं विदेहकैवल्यं उपैति प्राप्नोतीत्यर्थः ॥ ७१ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे स्थितिप्रकरणे दामव्यालकटोपाख्याने अहंकारविचारस्त्रयस्त्रिंशः सर्गः ३३

भीमभासदृढैः कृतैर्दैवैरभ्यर्थितो हरिः॥ शंबरं निजघानात्र ते च मुक्ता विवासनाः॥ १॥ ज्ञानविवेकयोरभावे संपन्नमपि निर्वासन
त्वं दुराभ्यासेन विहन्यते तयोर्दार्ढ्ये तु तत्स्थलन देवाश्च नाशत्याईशते आत्मा ह्येषां स भवतीति श्रुसुक्त दिशा न दैवैरपि पुनर्बंधः कर्तुं शक्यत
इत्यर्थे भीमभासदृढन्यायं निदर्शयितुमुपक्रमते अत्रेत्यादिना॥ अत्रभावादहंकृतिं त्यक्त्वेत्यादि वर्णितेर्थे॥ नगसन्निभे संपदामेरुसदृशे॥ १

॥श्रीवसिष्ठ उवाच॥ अत्र ते शृणु वक्ष्यामि दामादिषु गते क्षय॥ यद्वृत्तं शंबरस्यैव नगरे नगसन्निभे॥ १॥ तथा गगनविभ्रष्टे समस्ते ध्व
॥स्तसंस्थिते॥ विनष्टे शंबरानीके शरदीवाभ्रमंडले॥ २॥ देवनिर्जितसैन्योसौ नीत्वा कतिपयाः समाः॥ पुनर्दैववधोद्युक्तश्चिंतयामा
॥स दानवः॥ ३॥ दामादयस्तु रचिता ये मया मायया सुराः॥ मौर्ख्यात्ते भाविता युद्धे मिथ्ये वद्गुरहंकृतिः॥ ४॥ इदानीं संसृजाम्यन्या
॥न्दानवान्माययोदितान्॥ तानप्यध्यात्मशास्त्रज्ञान्स विवेकान्करोम्यहं॥ ५॥ तत्तत्त्वपरिज्ञाना मिथ्याभावनयोज्झिताः॥
॥नाहंकारं प्रयास्यंति विजेष्यंति च तान्सुरान्॥ ६॥ इति संचिंत्य दैत्येंद्रस्तादृशान्दानवान्धियान्॥ माययोत्पादयामास बुद्बु
॥दानीव वारिधिः॥ ७॥ सर्वज्ञा वेद्यवेत्तारो वीतरागा गतैनसः॥ यथाप्राप्तैककर्तारो भाविता स्तानउत्तमाः॥ ८॥ भीमो भासो दृढइ
॥ति नामभिः परिलांछिताः॥ जगत्त्रपाम्रिवाशेषं पश्यंतः पावनाशयाः॥ ९॥ ७॥

तथा वर्णितप्रकारेण गगनाद्विभ्रष्टे अधःपतिते सति ध्वस्तसंस्थिते भिन्नमर्यादे॥ २॥ असौ दानवः शंबरः॥ ३॥ चिंताप्रकारमेवाह दामादय
इत्यादिना॥ ४॥ तानध्यात्मशास्त्रज्ञान्सविवेकानपि करोमीत्यन्वयः॥ ५॥ ६॥ वरप्राप्तिविद्याबलवशीकृता विद्यात्मलक्षणया मायया॥ ७॥ एकवि
ज्ञानेन सर्वविज्ञानात्सर्वज्ञाः वेद्यात्मतत्त्ववेत्तृत्वाद्वेदवीतरागादिविशेषणाः॥ ८॥ ९॥ श्रीरामचंद्राय नमः॥ श्रीकृष्णाय नमः॥ श्री श्री

भुवनमूर्ध्वभुवनं हेतिन उतिन इत्युपमानपक्षे इवार्थगर्भो बहुव्रीहिः॥ १०॥ ११॥ १२॥ येभ्यो भिन्नत्वं यदर्थं च तदुभयं मिथ्येति विचाराद्भया
घनुदय इत्याह शरीरं विबुधाश्च असत्त्वनपुंसकमपुंसके नैकवचनास्यान्यतरस्यामिसेकशेषैकवद्भावः॥ १३॥ १४॥ १५॥ हता अन्ये ये स्तथा विधै

तैर्दैत्यैर्भुवनं प्राप्य छादयामासुरंबरं॥ गर्जन्तो हेतिन डिताः प्रावृषीव पयोधराः॥ १०॥ अयुध्यन्त समं देवैरपि वर्षगणान्बहून्॥ विवेकव
शतो जग्मुर्न हिंकारं कदाचन॥ ११॥ तेषां यावद्गुदेसं तमर्मभेदमितिवासना॥ तावत्कोयमहं चेति विचाराद्यास्त सत्तां॥ १२॥ असच्छरी
रं विबुधाः को सावहमिति स्थितिः॥ विचारादिस्यमेतेषां प्रोदगुर्नभयादयः॥ १३॥ असच्छरीरं नास्तीदं चिच्छुद्धे वात्म नि स्थिता
अहं नाम न चान्योस्ति निश्चिये वासुरायुधः॥ १४॥ ततस्तैर्निरहंकारैर्जरामरणनिर्भयैः॥ प्राप्तार्थकारिभिर्धीरैर्वर्तमानानुसा
रिभिः॥ १५॥ असक्तबुद्धिभिर्नित्यं हतान्यैरप्यहंकृतिभिः॥ वासनाजालनिर्मुक्तैः कृतकार्यैरकर्तृभिः॥ १६॥ प्रभोः कार्यमिदं कार्य
मिति संगररत्सरैः॥ वीतरागगतद्वेषैः सर्वदा समदर्शिभिः॥ १७॥ सा दैवी दानवैः सेना भीमाभासदृढादिभिः॥ हता भुक्ता हता पुष्टा
सान्तश्रीरिव मोक्तृभिः॥ १८॥ भीमभासदृढस्फुपानतो गीर्वाणवाहिनी॥ परिद्रुद्राव वेगेन गंगेव हिमवद्भुवा॥ १९॥ सा सुरानीकि
नी देवं क्षीरोदार्णवशायिनं॥ जगाम शरणं शैलं वातार्तेवाब्दमालिका॥ २०॥ ७॥

रपि हंतृत्वाभिमानाभावादहंकृतिभिः॥ १६॥ नहि तेषां कुतः संगरे प्रवृत्तिस्तत्राह॥ प्रभोरिति॥ प्रभोः शंबरस्य द्दशाइदं कार्यं तस्याज्ञत्वा
दित्यर्थः॥ अथवा सेवकीभूतैः सदसद्वा प्रभोः कार्यं अवश्यं कार्यमिति नियतिरिति हेतोः संगररत्सरैः न तु फलाभिलाषयेत्यर्थः॥ १७॥
भुक्ता जवेन वशीकृत्य सेवादिनोपभुक्तेत्यर्थः॥ १८॥ १९॥ सुराणां अनीकिनी सेना॥ २०॥ श्रीरामाय नमः॥ श्रीगणेशाय नमः॥ ७॥

भुजंगैर्वेष्टितैर्बलादुपभोगाया भिद्रुतां भीतामिस्यास्या अपि विशेषणं नायको भर्त्ता ॥ २१ ॥ क्षीरोदस्य कुहरे श्वेतद्वीपे तावत्पर्यावद्घंबर स्यायुःक्षयस्तावत्तस्य शंबरस्य निरासो वधस्तदर्थं ॥ २२ ॥ कल्पांत इव अकालेपि समुद्धीन कुलाचलं युद्धे ॥ २३ ॥ शशाम मृत इतियावत् वैष्णवीं पुरीं यातः ॥ ये येहताभ्य कंधरे पादैस्त्यास्त्रैलोक्यनाथेन जनार्दनेन ॥ तेनेगता विष्णुपुरं नरेंद्र क्रोधोपि देवस्य वरेण तुल्य इति शास्त्रा

हरिराश्वासयामास तां भीतां देववाहिनीं ॥ भुजंगाभिद्रुतामेकां रमणीमिव नायकः ॥ २१ ॥ अथ क्षीरोदकुहरे तावत्सासुर वाहिनी ॥ उवास यावद्भगवांस्तन्निरासार्थमुद्ययौ ॥ २२ ॥ बभूव दारुणं युद्धं शौरिशंबरयोस्ततः ॥ अकाल इव कल्पांते समुद्धीन कुलाचलं ॥ २३ ॥ शशाम समरे तस्मिन्दैत्यः सबलवाहनः ॥ नारायणहतो यातः शंबरो वैष्णवीं पुरीं ॥ २४ ॥ भीमभास दृढास्ते तु तस्मिन्विषमसंगरे ॥ विष्णुनैव शमं नीताः पवनेनेव दीपिकाः ॥ २५ ॥ ते हि निर्वासना एव यदा शांतिमुपागताः ॥ नत दैषां गतिर्ज्ञाता दीपानामिव शाम्यतां ॥ २६ ॥ तस्माद्वासनया बद्धं मुक्तं निर्वासनं मनः ॥ राम निर्वासनीभावमाहरस्व विवेक तः ॥ २७ ॥ सम्यगालोकनात्सत्याद्वासना प्रविलीयते ॥ वासना विलयेचेतः शममायाति दीपवत् ॥ २८ ॥०

दित्यर्थः ॥ २४ ॥ शमं विदेहकैवल्यं ॥ २५ ॥ तेषामपि शंबरवत्ससक्कां देशांतरगतिं प्रतिषेधति ॥ तेहीति ॥ वासनाहि गतिकारणं तदेष सक्तः स ह कर्मणैति लिंगं मनो यत्र निषक्तमस्येति श्रुतेः ॥ निर्वासनत्वादेषां गत्यभावादेव गतिर्न ज्ञातेत्यर्थः ॥ २६ ॥ उक्तां कथां प्रकृते योजयन्नुपसंह रति ॥ तस्मादिति ॥ आहरस्व आनय ॥ अवश्यं संपादयेति यावत् ॥ २७ ॥ तदाहरणे कउपायस्तमाह ॥ सम्यगिति ॥ सत्याद्यथाभूतार्थगोच रात्सम्यगालोकनाद्दर्शनात्साक्षात्कारवाचिरविचारप्रणिधानजनितसाक्षात्कारादित्यर्थः ॥ चेतो मनः शमं नाशं ॥ २८ ॥ श्रीकृष्णायनमः

सम्यगालोकनप्रकारमिदानीं दर्शयति ॥ नसत्यमिति ॥ अनंतं पूर्णः सद्भावः परमार्थः सत्यश्चिदात्मा य दिदं दृश्यं भावयति तत् किंचिदपि न सत्यं तस्मात्तस्य दृश्यस्य भावनादर्शनमपि दृश्यविशेषिताकारा नास्त्येव इति एतत्स्वप्रकाश चिन्मात्र परिशेष दर्शनमेव सम्यगीक्षणमित्यर्थः ॥ २९ कः किं भावयतीति त्रिपुटीनिषेधः ॥ कः साधार निषेधः ॥ भावनेति तत्संस्कार निषेधः ॥ ३० वासनाचित्तमिति शब्दावपि राहोः शिर इतिवद्वैकल्पिकभे

न सत्यं किंचिदेवेह सद्भावो भाव यस्त्वलं ॥ नास्त्येव भावना तस्मादित्येतत्सम्यगीक्षणं ॥ २९ ॥ आत्मैवेदं जगत्सर्वं कः किं भावयतु क्व वा ॥ भावना नाम नास्त्येव तदेतत्सम्यगीक्षणं ॥ ३० ॥ वासना चित्त नामानौ शब्दावर्थसमन्वितौ ॥ सत्यावलोकनाद्यत्र विलीनौ तत्परं पदं ॥ ३१ ॥ वासनावलितं चित्तमित स्थितिमुपागतं ॥ तदेव तद्विनिर्मुक्तं विमुक्तमिति कथ्यते ॥ ३२ ॥ नानाघटपटाकारैश्चे तस्थितिमुपागतं ॥ तदेवास्मुशमं नेयं मिथ्यायक्ष इवोत्थितः ॥ ३३ ॥ दामव्यालकटाकारैश्चेतः परिणतं यथा ॥ भीमभासदृढन्यायोरा घवास्त्वचलस्त्वतु ॥ ३४ ॥ दामव्यालकटन्यायोमाते भवतु राघव ॥ पद्मग्रामपुराप्रोक्तं पित्रा कमलजेन मे ॥ ३५ ॥ भवतेयन्मयाप्रोक्तं शिष्यायासंतधीमते ॥ दामव्यालकटन्यायस्तस्मान्माते स्तु राघव ॥ ३६ ॥

दकल्पनात न्नामानौ ॥ ३१ ॥ विमुक्तं जीवन्मुक्तं विदेहकैवल्ये चित्तस्याभावात् ॥ ३२ ॥ मिथ्यायक्षो बलवेताल इव ॥ ३३ ॥ देहात्म ज्ञानवत् ज्ञानं देहात्मज्ञ नबाधकं आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते इति न्यायात् दामव्यालकटदेहात्म भावनया यथा तेषां चेतः परिणतं तथैव ब्रह्मात्म भावनया भी मभासदृढन्यायस्त्वनवाचलो स्थितिस्त्वित्यर्थः ॥ ३४ ॥ स्वोक्तोर्थे सादरग्रहणाय सिद्धये पितृप्रसादलब्धतां दर्शयन् पुनः स्नेहातिशयात्तमेवार्थं स्थिरयन्नु पदिशति ॥ दामेत्यादिना ॥ ३५ ॥ ३६ ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवेंकटेशायनमः ॥ श्रीवेदव्यासायनमः ॥ ३६ ॥ श्रीविघ्नेश्व

इति उक्तप्रकारेण भीमभासदृढन्यायेन व्यवहरणावतस्तव सर्वव्यवहारविषयेषु सक्ततयैव विभूतेस्तत्त्वबोधपरिपाकलक्षणास्यैश्व
र्यस्य यातो प्राप्तोसस्त्यां अविरलसुखदुःखसंकटाभावेषु जन्मपरंपरासु तापनाय त्रिविधतापभोगायोपयाता भवपदवी मूलतो छेदेन नश्य
तिनान्यथेत्यर्थः ॥ ३७ ॥ इति श्रीवा॰ स्थि॰ चतुस्त्रिंशः सर्गः ॥ ३४ ॥ इह चित्तशमोपायो भोगेच्छात्याग उच्यते ॥ सत्संगमविवेकात्मबोधरूढसमा
धियुक् ॥ १ ॥ तत्र मनोनिग्रह एव मुख्योपायः ॥ अन्येतदर्थ इत्याशयेन तमेव प्रथमं प्रशंसन् प्रस्तौति ॥ जयंतीति द्वाभ्यां ॥ १ ॥ २ ॥ मनोनिग्रहो

भीमभासदृढन्यायो नियमस्तु लवानघ ॥ अविरलसुखदुःखसंकटेयं भवपदवी भवतापनोपयाता ॥ व्यवहरयावतो विभूति
यातो सततमसक्ततयैव नश्यतीति ॥ ३७ ॥ मोक्षोपाय रामव्यालकरोपाख्यानं समाप्तं ॥ ३४ ॥ श्रीवसिष्ठ उवाच ॥ जयंति ते महा
शूराः साधवो ये विनिर्जितं ॥ अविद्यामेदुरोल्लासैः स्वमनो विषयोन्मुखं ॥ १ ॥ संसारस्यास्य दुःखस्य सर्वोपद्रवदायिनः ॥ उपाय
एक एवास्ति मनसः स्वस्य निग्रहः ॥ २ ॥ श्रूयतां ज्ञानसर्वस्वं श्रुत्वा चैवावधार्यतां ॥ भोगेच्छामात्रको बंधस्तत्त्यागो मोक्ष उच्यते ॥
३ ॥ किमन्यैः शास्त्रसंदर्भैः क्रियतामिदमेव तु ॥ यद्यत्स्वादिह तत्सर्वं दृश्यतां विषवन्हिवत् ॥ ४ ॥ विषमा विषया भोगाः प्रविचार्य पु
नः पुनः ॥ उपरिष्टात्परित्यज्य सेव्यमानाः सुखावहाः ॥ ५ ॥ दोषान्प्रसवति स्फारान् वासना वल्गितामतिः ॥ कीर्पकिंटकबीजाभः कंटकप्र

पायेषु भोगेच्छात्यागो मुख्य इत्याह श्रूयतामिति ॥ ३ ॥ तस्मिंश्च विषयेषु दोषदर्शनाद्वीभत्स उपाय इत्याशयेनाह ॥ किमन्यैरिति ॥ ४ ॥ तत्राऽवि
चार्य सहसा विषयत्यागो दुःखद एव विचार्य गुरुशास्त्रोक्तक्रमेण त्यागः स्वापातकटुः कोप्युदर्के महासुखं इत्याह विषमा इति विषयापाम
भोगास्त्यागाः विषमाः विना विचारमिति शेषः पुनः पुनर्विचार्य सहनाभ्यासादुपरिष्टात् क्रमेण भोगवासनाः परित्यज्य सेव्यमानास्तु
परिपाके सुखावह इत्यर्थः ॥ ५ ॥ भोगवासना सुसतीषु क्वाहा निस्तत्राह दोषानिति दोषान् रागादीन् प्रसवति पुनः पुनर्विषयस्मारयोनो

॥ सर्गः ३८ ॥

अलोयामतिरलग्नवासनाजाला अत एवादृष्टरागद्वेषा अत एव प्रसरश्चांचल्यं तद्वर्जितास ली सा शनैः शममेतीत्यर्थः ॥ ७ ॥ शुभामतिः असती अविद्यमानाग्लानिर्दुःखं येभ्यस्तथाविधान् सुगुणान् शांतिदांत्यादिसद्गुणयुक्तान् शुभानेव ज्ञानसमाधिविश्रांतिलक्षणान्मोक्ष फलदानंकुरान् सूते यथा शाल्यादिश्रेष्ठबीजवती भूरित्यर्थः ॥ ८ ॥ दयादाक्षिण्यसमादिशुभभावाभ्यासमारभ्य समाधिपर्यंतानि मनो विश्रांतिसाधनानि क्रमेणाह शुभेत्यादिना ॥ सर्वेषां भावलक्षणासमस्तानां मनो भवति निर्द्वंद्वमित्यत्रान्वयः ॥ ९ ॥ उडुपे चंद्रे ॥ १० ॥ धृतोदृष्टि

अलग्नवासनाजालामतिः प्रसरवर्जिता ॥ अदृष्टरागद्वेषायाशममेति शनैः परं ॥ ७ ॥ शुभाशुभानसतूग्लानीन्प्रसूतेसुगु णान्सदा ॥ फलदानंकुरांकाले श्रेष्ठबीजवतीवभूः ॥ ८ ॥ शुभभावानुसंधानाद्यस्मन्नेमनसिस्थिते ॥ शनैः शनैः प्रशांते च मिथ्याज्ञा नघनांबुदे ॥ ९ ॥ दृष्टिं याते च सौजन्ये पक्षेशुक्ल इवोडुपे ॥ विवेके प्रसृते पुण्ये नभसीवार्कतेजसि ॥ १० ॥ धृतावंतर्विद्वद्वायांमुक्ताया मिवकीचके ॥ स्थितावंतः कृतार्थायां मधाविव निशाकरे ॥ ११ ॥ फलिते शीतलच्छाये सत्संगसफलद्रुमे ॥ स्रवत्यानंदसुरसे समाधि सरलद्रुमे ॥ १२ ॥ मनो भवति निर्द्वंद्वं निष्कामं निरुपद्रवं ॥ प्रशांतचापलानर्थ शोकमोहभयामयं ॥ १३ ॥ क्षीणाशास्त्रार्थसंदेहं विग ताशेषकौतुकं ॥ निरस्तकल्पनाजालं मोहमुक्तमलेपकं ॥ १४ ॥ निरीहं निरुपाकोशं निरपेक्षं निराधिकं ॥ संशांतशोकनीहारमसक्तं ग्रंथि

यनिग्रहैर्धैर्ये कीचके वेणौ करींद्रजीमूतवराहशंखमत्स्याहिशुक्त्युत्तमवेणुजानि मुक्तानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरिति अष्टसु मुक्ताकारेषु वेणूनाम पिरलशास्त्रे परिगणितत्वात् अंतर्हृदि मनसि स्थिते आत्मसौख्यलाभेन कृतार्थायां ॥ ११ ॥ १२ ॥ सत्संगो गुर्वादिसमागमः ॥ १२ ॥ १३ ॥ कौतुकं विचित्रविषयदर्शनोत्कंठा ॥ १४ ॥ कामो बीजावस्था अपेक्षा प्ररूढसुखावस्था ईहा प्ररूढफलावस्थेति भेदान्नपौनरुक्त्यं ग्रंथिभिरासंगैर्वर्जितं भ वतीति सर्वत्रानुकृष्यते ॥ १५ ॥

एवंभूतंमनः किंकरोतीत्यत्राह॥ संदेहेति॥ न आत्माकीदृशोवाकैः साधनैर्वात्यिप्यः कर्मभिर्ज्ञानेनवा कीदृशंवाज्ञानंसाधनानिचतत्स्यक्ता
निस्यर्तानावादिभिरन्यथानिरूपयादित्यादिबहुविधसंदेहाएवउग्राः सुतादुष्पुत्रायस्यतथाविधंअग्रेः शाखाप्रायैर्नानामनोरथारंभैः सहि
तंतत्तच्छाल्लक्षणायेदाराः पंजरस्थूलशरीरंचतत्सहितंआत्मानंस्वंमनः स्वरूपंनाशयित्वास्वस्येश्वरोयःप्रत्यगात्मातत्संबंधिनंअर्थंजीवन्मुक्त
लक्षणंपरमपुरुषार्थंसाधयतीत्यर्थः॥१६॥ मनः केनक्रमेणस्वात्मानंनाशयतीतमाह॥ आत्मेति॥ प्रथमंआत्मनः स्वस्यपीवरतापुष्टिस्तद्धे
तून्रिमित्रसाध्वसाध्वादिविकल्पांनुझ्झतिकथं॥ एषुविकल्पेषुस्वस्यउत्सादनइवविग्रहेष्वपिप्रभुतांसमर्थतांसंस्मृत्यविचिंत्यर्थः ततः तत्तुदेहा

॥ संदेहोग्रसुतंसाग्रंसत्तच्छादारपंजरं॥ नाशयित्वास्वमात्मानंसाधयत्यर्थमैश्वरं॥१६॥ आत्मपीवरताहेतून्विकल्पांश्चायमुझ्झति॥
॥ संस्मृत्यप्रभुतामेषुजहातित्वपावत्तनुं॥१७॥ मनसोभ्युदयोनाशोमनोनाशोमहोदयः॥ ज्ञमनोनाशमभ्येतिमनोऽज्ञस्यविवर्धते॥१८॥

कारंस्वीयंकल्पितरूपंत्वपावज्जहाति॥ यावदेवदेहाहंभावेनवासितंमनोदेहाकारंभवतितावत्तद्देहानुकूलप्रातिकूल्यविषयेषुरागद्वेषादिप्रभवै
र्विकल्पसहस्रैर्वर्धतेतस्मिंस्तुक्षीणेक्षीयतइतिभावः॥१७॥ ननुस्वनाशस्याभ्युदयत्वाभावात्स्वकृतानर्थरूपत्वात्तत्रमनः कथंप्रवर्ततेतत्राह॥ मन
सइति॥ अयंभावः नहिमनः स्वातंत्र्येणाभ्युदयमिच्छतिकिंत्वात्मभूतत्वात् आत्मभूतस्यचमनोभावोनर्थस्तन्नाशस्तुसर्वानर्थप्रहाणरूप
त्वान्निरतिशयानंदस्वरूपपरिशेषाच्चाभ्युदयएवेतिप्रत्यगात्मनस्तुस्वरूपत्वाभान्महोदयत्वंनिर्विवादमेवेत्याशयेनाह॥ मनोनाशइति॥ तर्हि
देहाहंकारत्यागमात्रंकार्यं किंब्रह्मात्मज्ञानेनतत्राह॥ ज्ञमनइतिब्रह्मात्मैक्यज्ञस्यअज्ञस्येतिअज्ञानरूपेमत्वेतुछिन्नेमनोभूयः प्ररोहत्येवे
तिभावः॥१८॥ श्रीरामायनमः॥ श्रीकृष्णायनमः॥ श्रीवासुदेवायनमः॥ श्रीविश्वनाथायनमः॥७॥

प्ररोहत्वांकालानिरस्तत्वात् मनोमात्रमिति जगदनर्थताप्राप्तिरेवता निरितिभावः ॥१९॥ तर्हितस्यमनसः किंस्वरूपंयदवश्योच्छेद्यंतदाह विकल्पेति आत्माप्रतिसंधाननिमित्तनानाविकल्पवासनाएवतत्स्वरूपमित्यर्थः ॥२०॥ अस्त्वेवं विधंमनस्तेनबध्योजीवः कस्तमाह चेत्येति मनसिचेत्यस्यविषयस्ययोनुपातः वासनात्मनाप्रवेशस्तेनकल्पितेपरिछिन्ने चिन्मात्रेतिष्ठतीति तिष्ठस्तद्भावस्तिष्ठतात्स्यसयेनकर्तरिशः स्थि

मनोमात्रंजगच्चक्रंमनः पर्वतमंडलं ॥ मनोव्योममनोदेवोमनोमित्रंमनोरिपुः ॥१९॥ विकल्पकलुषायास्याश्चित्तत्वस्यात्म विस्मृतिः ॥ मनइत्युच्यतेसेयंवासनाभावभागिनी ॥२०॥ चेत्यानुपातकलिलचिन्मात्रेतिष्ठताभिधं ॥ मनाग्विकल्पकलुषं चित्तत्वंजीवउच्यते ॥२१॥ चेत्यप्रपतितंरूढसंज्ञमज्ञत्वमागतं ॥ तदेवाधिकनिःसारंकल्प्यतेतन्मनस्तया ॥२२॥ नात्मासंसा रिपुरुषोनशरीरंनशोषितं ॥ जडंसर्वंशरीरादिदेहीखवदलेपकः ॥२३॥ शरीरेकपाशःस्नेनास्त्यन्यद्रुधिराधिकात् ॥ निर्भिन्नेकदलिस्तंभेनास्त्यन्यसत्त्ववादते ॥२४॥ मनोजीवोनरंविद्धितदेवाकारमागतं ॥ आत्मनात्मानमादत्तेस्वविकल्पात्मकल्पितं ॥२५॥

तिरिस्तसिद्धाशब्दव्यवहारयोग्यतायस्मिंस्तथाविधंमनाग्विकल्पवासनाकलुषंब्रह्मतदेवजीवइत्युच्यतमित्यर्थः ॥२१॥ यत्तश्चेत्यप्रपतितंतत्रैवचि राभ्यासात्रूढासंज्ञाआत्मताभिमानोयस्यतथाविधंयदज्ञत्वंस्वरूपविस्मरणमागतंयज्जीवरूपंतदेवविकल्पसहस्रैर्मोमुह्यमानतयासार भूतसुखस्वभावतापहाराद्यदाअधिकनिःसारंभवतितदाजीवोपकरणामनस्तयाभेदेनकल्प्यतइत्यर्थः ॥२२॥ एवंजीवत्वदुपाधिप्रदर्श्यत द्विविक्तंशुद्धात्मस्वरूपंदर्शयति नेत्यादिनासंसारिपुरुषोजीवस्वभावोवस्तुतोनभवतीत्यर्थः ॥२३॥ जडत्वमेवस्फुटयति शरीरेइति स्नने छिन्नेपल्लवासत्त्वप्रकृतित्वकसंघातात् ॥२४॥ ॥२५॥ ॥ ॥श्रीराम॥

विकल्पान्विकल्पवासनाः उद्भाव्य नरो जीवः ॥ २६ ॥ तद्देहात्मकत्वाभावे युक्तिमाह इममिति शरीरत्वं देहांतरभावः ॥ २७ ॥ शरीरस्य वासनामयत्वे युक्तिमाह यादृगिति ॥ चित्तं यज्जातं स स्वपिति स्वप्ने न देवभूत्वा तिष्ठतीत्यन्वयः ॥ २८ ॥ विषयस्य वासनाधायकत्वे दृष्टांतमाह ॥ आम्लमिति ॥ आम्लातित्रिपयाद्यम्लबीजं मधुररसासिक्तं चेत् अंकुरादिक्रमेण वृक्षीभूय फलकाले पि मधुरं जितं सन्मधुरं जायते तदेव बीजं प्रति विषयाः विषप्रति निधिभूतधत्तूरकरंजादिवल्याः कल्केन रसेन सिक्तं चेत् फलकाले पि कटु जायते

स्वविकल्पान्नरस्तत्र प्रसार्य रसयत्यलं ॥ जालमात्म निबंधाय कोशकारकृमिर्यथा ॥ २६ ॥ इमं देहं भ्रमं त्यक्त्वा देशकालांतरे पुनः ॥ शरीरत्वमथादत्ते पल्लवत्वमिवांकुरः ॥ २७ ॥ यादृग्वासनमेतत्स्यान्मनस्तादृक्प्रजायते ॥ जातं स्वपिति यच्चित्तं तत्स्वप्ने निशि तिष्ठति ॥ २८ ॥ आम्लं मधुरसासिक्तं मधुरं मधुरं जितं ॥ बीजं प्रति विषाकल्कसिक्तं च कटु जायते ॥ २९ ॥ शुभवासनया चेतो महत्साजायते महत् ॥ भवंतीह मनोराज्य इंद्रता स्वप्नभाङ्करः ॥ ३० ॥ क्षुद्रवासनया चेतः क्षुद्रतामपि पेलवां ॥ पिशाचविभ्रमात्स्वप्ने पिशाचान्निशि पश्यति ॥ ३१ ॥ सरसि स्फारनैर्मल्ये कालुष्यं याति न स्थितिं ॥ तथैव स्फारकालुष्ये प्रसादो याति न स्थितिं ॥ ३२ ॥ मनसि स्फारकालुष्ये तद्रूपं जायते फलं ॥ तथैव स्फारनैर्मल्ये तद्रूपं जायते फलं ॥ ३३ ॥

इति लोके आगमशास्त्रे च प्रसिद्धमित्यर्थः ॥ २९ ॥ ३० ॥ पेलवं पश्यतीत्यपकृष्यते ॥ ३१ ॥ नैर्मल्ये हते पि पुनर्व्युत्थाने दैतदर्शनात् कालुष्यप्रसक्तिमाशंक्याह सरसीति ॥ एतेनाल्पविवेकादिना नैर्मल्यस्थितिप्रसक्तिरपि वारितेत्याशयेनाह तथैवेति ॥ ३२ ॥ ३३ ॥ श्रीरामचंद्राय नमः ॥ ७५ ॥

ननु नहि देशोपप्लवादिना चिरसमाधिभंगे पुनः कालुष्यं स्यादित्याशंक्याह ॥ रजनीति ॥ क्षीपाः दारिद्र्याद्युपप्लुतोपि उदाराशांतिसमाधानाद्विचित्तप्रसादं न गतिं ॥ ३४ ॥ अथवा नत्त्वबोधबाधितत्वादेव नोपप्लवसहस्रेपि कालुष्यप्रसक्तिरित्याशयेनाह नेहेति ॥ ३५ ॥ मायामेव विशिनष्टि ॥ गंधर्वेति ॥ द्वैतैकत्वविवर्जिते स्फुरत्तरान्वयि ॥ ३६ ॥ कातर्हि परमार्थता तामाह ॥ सर्वैवेति ॥ ३७ ॥ अहं अनंतः अपरिच्छिन्नो न अत एव वरा

रजन्युदारां न गतिं क्षीणोप्यनिशमुत्तमः ॥ उद्योगवान विरतं पूरपाशामिवोडुपः ॥ ३४ ॥ नेहं बंधो न मोक्षोस्ति नाबंधोस्ति न बंधता ॥ मिथ्यो स्थितैव मायेयमिंद्रजालनलतायथा ॥ ३५ ॥ गंधर्वनगराकारा मृगतृष्णाइवोत्थिता ॥ द्विचंद्रविभ्रमाभासा द्वैतैकत्वविवर्जिता ॥ ३६ ॥ सर्वैव ब्रह्मसत्तेयं मिथ्यैवैषा परमार्थता ॥ परिस्फुरति निःसारः संसारोयम सन्मयः ॥ ३७ ॥ नानंतोहं वराकोहमिति दुर्निश्चयोदितः ॥ अनंतोस्मीश्वरोस्मीति निश्चयेन विलीयते ॥ ३८ ॥ सर्वगे स्वात्मनि स्वच्छे एषोहमिति भावना ॥ एतत्तद्बंधनं लोके स्वविकल्पोपकल्पितं ॥ ३९ ॥ बंधमोक्षदशाहीना द्वित्वैकत्वविवर्जिता ॥ सर्वैव ब्रह्मसत्तेयं मिथ्यैषा परमार्थता ॥ ४० ॥ नैर्मल्यप्राप्तमरणा मसत्कं सर्वदृष्टिषु ॥ अमनस्त्वमिहापन्नं ब्रह्म पश्यति नान्यथा ॥ ४१ ॥ मनो निर्मलितां यातं शुभसंतानवारिभिः ॥ ब्राह्मीं दृष्टिमुपादत्ते रागं शुक्लपटो यथा ॥ ४२ ॥ सर्वमेवममात्मेति सत्यभावनयानघ ॥ हेयादेयबलेक्षीणो बंधमोक्षो विमुच्यतां ॥ ४३ ॥

कः क्षुद्रः ॥ ३८ ॥ एषएतत्तनूदेहमात्रः ॥ ३९ ॥ ४० ॥ नैर्मल्यातिशयेन प्राप्तं संनिहितं मरणं स्वनाशो यस्य तथाविधं अत एवामनस्त्वमापन्नं मनः इह अस्मिन्नधिकारिशरीर एव ब्रह्म पश्यति ॥ ४१ ॥ शुभसंतानं समाध्यभ्यासजन्यधर्मोपचयस्तल्लक्षणया वारिभिः ब्राह्मीं दृष्टिं सर्वत्र ब्रह्मदृष्टिं रागं रंजकद्रव्यवर्णं ॥ ४२ ॥ बंधसापेक्षो मोक्षोपि विमुच्यतां ॥ ४३ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवासुदेव

ननुकायादिबंधःसत्यःकिंनस्यादितिचेन्नमनोविकारमात्रत्वान्मनोरथिकप्रासादादिवदित्याशयेनाह ॥ शुद्धस्येति ॥ आदाव
नधिकार्यधिकारिशरीराभिमानात्कायात्मनाततःसच्छास्त्रश्रवणाभिमानाच्छास्त्रात्मनावैराग्यात्मनाचततआत्मबोधाद्बोधात्म
नाचशुद्धस्यमनसएवअभिज्ञातोपलस्यस्फटिकस्येवविद्युतिर्विविधप्रतिभासएवजगत्संसारइत्यर्थः ॥ ४४ ॥ द्वैतदर्शनक्षयाएवबंध
प्राप्तिंआत्मदर्शनक्षयाएवसद्योमोक्षप्राप्तिंचकरतलामलकवद्विविच्यदर्शयति ॥ पदार्थेनेतिश्लोकद्वयेन ॥ ४५ ॥ ४६ ॥ तन्मयत्वंदृश्य

शुद्धस्यमनसःकायाद्यशास्त्रवैराग्यबुद्धिभिः ॥ अभिज्ञातोपिलस्येवजगत्तस्येतिविद्युतिः ॥ ४४ ॥ पदार्थैर्नैकतामेत्यमनसो
नैकताननता ॥ असत्सज्ञानदृष्टिंतांविद्धिक्षयविनाशिनी ॥ ४५ ॥ सबाह्याभ्यंतरस्यक्वासर्वदृश्यदर्शयदा ॥ मनस्तिष्ठतितत्क्षी
नंसंप्राप्तंतत्पदंतदा ॥ ४६ ॥ दृश्यदृष्टिःस्फुरायेयंसाह्यवश्यमसन्मयी ॥ तन्मयत्वंचमनसःस्वस्वरूपंविद्धिनेतरत् ॥ ४७ ॥
आद्यंतयोर्विनाशित्वान्मध्येपितदसन्मयं ॥ अज्ञातमनसस्तेनदुःखिताहस्तसंस्थिताः ॥ ४८ ॥ आत्मैवेदंजगदिति
विनाभावेनदुःखदा ॥ दृश्यश्रीरन्यथात्वेषाभोगमोक्षप्रदायिनी ॥ ४९ ॥ जलमन्यत्तरंगोन्यइतिनानात्वयाज्ञता ॥ जल
॥ मेवतरंगोयमित्येकत्वाक्तिलज्ञता ॥ ५० ॥ ७ ॥

दृष्टिप्रचुरत्वं ॥ ४७ ॥ दृश्यदृष्टेरसन्मयत्वंकुतस्तत्राह ॥ आद्यंतयोरिति विनाशित्वात् असत्वात् एवमसदित्यज्ञातंमनोयेनतस्यहस्त
संस्थिताकरप्राप्तमेवनदुरन्वेषेत्यर्थः ॥ ४८ ॥ इतिभावेनबोधेनविनादृश्यश्रीःदुःखदा अन्यथातादृशबोधसत्वेतुभोगग्रहणमज्ञभो
गदुर्वासनाधानप्रयुक्तदुःखबीजत्वाभावात्सारभूतक्षपणेनमोक्षोपयोगाच्चपुरुषार्थएवभोगइतिद्योतनार्थी ॥ ४९ ॥ लोकवदेवशास्त्रे
ज्ञानाज्ञानेबोध्येनापूर्वेइत्याह ॥ जलमिति ॥ ५० ॥ ७ ॥

नानानाकुतो हेयाएकताचकुतउपादेयातत्राह दुःखमिति हेयोपादेयरूपियत् नानात्वं तत्तु असत् ॥ अविद्यमानमिति हेतोर्दुःखं जन्ममरणाद्यायाति अनुसरति अतो हेयं तदभावेन तात्त्विकज्ञानादानंदसमपरिच्छिन्नात्मरूपमवशिष्यते अतस्तदुपादेयमित्यर्थः ॥ ५१ ॥ ननु प्रियतमममनोबुध्यादि द्वैतस्य सत्त्वादात्मोपकरणत्वाच्च तन्नाशे धनादिनाश इव शोकः स्यात्तत्राह संकल्पेति ॥ ५२ ॥ किंच रागद्वेषयोः सतो रिष्टहानादनिष्टप्राप्तेश्च शोकः स्यात्तौ यत्का उदासीनदशा देहत्रयपंजरं पश्यतो न शोकप्रसक्तिरित्याशयेनाह ॥ अवत्सल इति ॥ अवत्सलो निःस्नेहः तत्त्वं पृथिव्यादिमूलतत्त्वरूपं ॥ ५३ ॥ तत्त्वचायात्मनः भूतराशिमात्रस्वभावात् देहद्वयंपंजरात् ॥ ५४ ॥ यस्मिन्नधिष्ठाने मनः क्षयस्तत्स्वरूपमा

दुःखमायात्यसदिति हेयोपादेयरूपियत् ॥ तदभावेन तु ज्ञानादानंदसमवशिष्यते ॥ ५१ ॥ संकल्पकल्पितत्वाच्च मनोरूपमसन्मयं
असन्मयविनाशे तु कः शोको वद राघव ॥ ५२ ॥ अवत्सलो यथा बंधुररागद्वेषया धिया ॥ दृश्यते पश्यत द्वैतं तत्त्वं पंजरमात्मनः ॥ ५३ ॥
अवत्सलाद्यथाबंधोः सुखदुःखैर्न लिप्यते ॥ ज्ञत्वेन संपरिज्ञानात्तथा तत्त्वचयात्मनः ॥ ५४ ॥ तदनादि शिवं ज्ञानं यन्मध्यं दृक्दृश्ययोः ॥ तस्मिन्स्वसे मनः शांतं पांसुर्वायुक्षयेयथा ॥ ५५ ॥ उपशांते मनोवायौ देहपांसुः प्रशाम्यति ॥ पुनः संसारनगरे न नीहारः
प्रवर्त्तते ॥ ५६ ॥ वासनाप्रावृषि क्षीपोसं स्थितो राम मागते ॥ जाड्योज्जनितहृत्कंपे पंके शोषमुपागते ॥ ५७ ॥ ७१ ॥

हृत्दृदिति ॥ शिवं नित्यं निरतिशयानंदरूपं दृक्दृश्ययोर्मध्यं दृग्रूपमित्यर्थः ॥ ५५ ॥ मनोनाशे स्थूलदेहोप्यसन्भवतीत्याह ॥ उपशांत इति संसारस्य नगरवदधिष्ठाने प्रतीचीनीहारो नीहारवदावरिका अविद्याक्षीपात्वान्न प्रवर्त्तते ॥ ५६ ॥ तत्क्षयप्रकारमेव शरत्कालत्वेनोपपादयति वासनेत्यादिना ॥ क्षीपोइतिपदसंस्कारपक्षे सामान्येन पुंसकं संस्थितो स्वरूपस्थितो रमृपां राम ः विहारस्त्वं आगते प्राप्ते मनसीति शेषः रागमितिपाठे ताद्रूप्यरंजनमित्यर्थः ॥ जनितो हृत्कंपो भयं येन तथाविधे जाड्ये मोख्येपक्षांतरे शैत्ये तद्रूपे पंके शोषमुपागते सति ॥ ५७ ॥ श्रीराम

मंदेरोगादिविरत्ने॥ अक्षकदंबेषु इंद्रियसमूहलक्षपाकदंबवृक्षेषु क्षीणेषु क्षीणपापफलेषु॥ ५८॥ ५९॥ भयलक्षणाः क्षुद्राः सरितः कुल्याः कल्पा
पिनोमयूराः॥ ६०॥ स्वरूपसंविल्लक्षणो आकाशगोचरः अपरोक्षं स्फुरन्॥ ६१॥ विक्तत्वं विवेकितां विभक्ततां च समये समाध्यादिकाले सू
र्यचंद्रोदयकाले च॥ धौतारजो निरदूषिताः आशाः तृष्णाः तल्लक्षणाः महादिशः॥ ६२॥ मुदिता पुण्यफलोशयनी चित्तवृत्तिस्तल्लक्षण चि नु २

शुष्केल्लब्धावटे शांते मंदे हृदयकानने॥ क्षीणेषु सकदंबेषु मिथ्याज्ञानघनेष्वलं॥ ५८॥ क्षीयते मोहमिहिका प्रभाते इव शार्वरी॥
कापि गच्छति तज्ज्ञा उग्रं विषमंत्रहतं यथा॥ ५९॥ देहाद्रोन भयक्षुद्राः सरितः प्रसरंत्यलं॥ नो लुलंति लसत्पक्षाः संकल्पोग्र
कल्पापिनः॥ ६०॥ परां निर्मलतामेति संविदाकाशगोचरः॥ राजते तिनरामच्छो जीवादित्यो महोदयः॥ ६१॥ घनमोहभ
रोन्मुक्ता विविक्तत्वं परां गताः॥ समयेत्यति शोभंते धौता आशा महादिशः॥ ६२॥ प्रशमाभाति विमला मुदिताकाशमंजरी
शीतलीकृतदिक्चक्रा शारत्व्योम्नीव चंद्रिका॥ ६३॥ सर्वसंपत्प्रकाशेन परमानंददायिना॥ प्रशंसफलतामेति सुविविक्ताविवे
वेकभूः॥ ६४॥ संपर्वतवनाभोगं परमालोकसुंदरं॥ अच्छाच्छशीतलच्छायं जायते भुवनांतरं॥ ६५॥ छ॥

ताकाशस्य मंजरी॥ ६३॥ सर्वाः संपदो विषयानंदलवान् चांतर्भावेन प्रकाशयतीति सर्वसंपत्प्रकाशः आत्मालक्षणोन फलेन सस्यफल
पक्षे तु सर्वेषां कृषिवलादीनां भाविसंपदः प्रकाशयतीति तेनेति योज्यं सुविविक्ता सम्यक्परिशोधिता केदारभेदैर्विभक्ता च॥ ६४॥ प
रमालोकेनात्मप्रकाशेन सूर्यचंद्रज्योतिषा च तत्पक्षे शीतला त्रिविधतापशून्या छाया चिदाभासो यस्मिन्निर्यर्थः शरत्पक्षे स्पष्टं॥ ६५

परिच्छेदापगमाद्विस्तारितं विवेकजलोपचयात्स्फारितं हन्मनस्तच्छ्रक्षणं सरः निर्गतरजोगुणो हृदयांबुजकोशो यत्र शरत्सच्छे स्य
हं ९६ नीरजसंकार्यतोप्याह हृदिति ९७ अपगतः आक्षेपः संकोचो यस्य अत एव सर्वगः ९८ एवं वासनाक्षयफलानि प्रपंच्य
तैरेव जीवन्मुक्तिस्थितिं दर्शयति विचारेणेति ॥ अवमत्तस्वदोषान्धीरा धीर्यस्य तथाविधः सन् क्षयेषु मरुकूपष्वेषु जन्मसु च पार

विस्तारितं सुसुमतां स्फारितं स्फटिकाकृतिः ॥ उपैति हृत्सरः स्वच्छं निरजोंबुजकोशकं ॥ ९६ ॥ हृत्सद्मकोशान्मलिनः
स्वाहंकारमधुव्रतः ॥ अपुनर्दर्शनायैव चंचलः क्वापि गच्छति ॥ ९७ ॥ भवत्यपगताक्षेपः सर्वगः सर्वनायकः ॥ नि
र्वासनः शांतमनाः स्वदेहनगरेश्वरः ॥ ९८ ॥ विचारणासमधिगतात्मदीपको मनस्यलं परिगलितेव धीरधीः
विलोकयन्नृक्षयभवनीरसागतीर्गतज्वरो विलसति देहपत्तने ॥ ९९ ॥ इति श्रीयोगवासिष्ठे॰ मोक्षोपायेउपशमव
र्णनं सर्गः ॥ ३५ ॥ श्रीरामउवाच ॥ यथेदृशं स्थितिं विश्वं विश्वातीते चिदात्मनि ॥ तन्मे कथय हे ब्रह्मन्पुनर्बोधविवृद्धये ॥ १ ॥

लौकिकीपेहलौकिकी च नीरसाः गलितिर्विलोकयन् विचारणासमधिगतात्मदीपको भूत्वा जीवन्मुक्तो गतज्वरः सन् देहपत्तने स्वशरीरनग
रे विलसति विराजते इत्यर्थः ९९ इति श्रीयोगवासिष्ठे प्रकाशे स्थितिप्रकरणे मोक्षोपायेउपशमवर्णनं पंचत्रिंशः सर्गः ३५ ७ ७
स्वतः स्थितात्मसत्तैव चित्सर्वत्र स्थितोच्यते ॥ चित्स्थितासर्वभावानां स्थितिर्न पृथगित्यपि १ इदानीं मुख्यं प्रकरणार्थं जगत्स्थिति
स्वरूपं जिज्ञासुः श्रीरामः पृच्छति ॥ यथेति ॥ ईदृशं प्राग्वर्णितप्रकारं ॥ १ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः ॥ श्रीवासुदेवायनमः

ब्रह्मसत्तयैव जगत्स्थितिर्निर्पृथक् प्राणिनां पृथक्सत्तया जगत्स्थितिप्रत्ययस्तु ब्रह्मस्वरूपस्थितिस्वबोधनिबंधन इति समाधातुकामो
वसिष्ठस्तदनुरूपं दृष्टांतमाह। यथेत्यादिना। सद्रूपादात्मनोऽन्यत्वाऽस्त्वत स्त्वत्शून्यत्वाच्च न स्थिताः॥२॥ यद्यात्मस्थित्यैव सर्वस्थिति
स्तर्हि सर्वत्रात्माकुतो न लक्ष्यते तत्राह। यथेति। निरंश इति सौक्ष्म्ये उपपत्तिः॥३॥ सुस्थिते निरावरणा स्थिते आस्थिते आवृत
स्थिते प्रतिभा प्रतिबिंबः मणौ स्फटिकादौ सुस्थिता अस्थितेति प्रतिभा विशेषेणैव वा॥४॥ असंगत्वे दृष्टांतमाह। स्वेति। अन्योन्यता

॥श्रीवसिष्ठ उवाच॥ यथोर्मयो न भव्यक्ताभाविनः पयसि स्थिताः॥ न स्थिताश्चात्मनोऽन्यत्वाच्चित्तत्वे स्वस्थय स्तथा॥२॥
यथा सर्वगतः सौक्ष्म्यादाकाशो नोपलक्ष्यते॥ तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते॥३॥ सुस्थिते वाऽस्थिते वांतः
प्रतिभास्ति मणौ यथा॥ न सत्यभूता नासत्या तथेयं स्वस्थिरात्मनि॥४॥ स्वधारै रंबुदैः स्तस्खैर्न स्पृष्टं गगनं यथा॥ चित्स्खैः
सर्गैश्चिराधारैर्न स्पृष्टा चित्सरा तथा॥५॥ जलाधिष्ठित तत्तेजो यथांग प्रतिबिंबति॥ तथा पुर्यष्टकेष्वेव चिद्धि देहेषु लक्ष्य
ते॥६॥ सर्वसंकल्परहिता सर्वसंज्ञाविवर्जिता॥ सैषा चिदविनाशात्मा तत्स्वैसाधिकृता पिधा॥७॥ छ

दात्स्वाध्यासाच्चित्तः आधारैः॥५॥ तर्हि सूक्ष्मान्तूचित्तूघटादाविव देहेऽपि न लक्ष्येत लक्ष्यते तु तत्र को हेतुस्तत्राह। जलाधिष्ठितेति
अंगेति संबोधने यथा जलसंयुक्ताः किरणाः संयुक्ततया स्फुटं न लक्ष्यंते प्रतिबिंबात्मना तु स्फुटं लक्ष्यंते तद्वत्पुर्यष्टकात्मकेषु देहे
ष्विसर्थः॥६॥ तस्याः प्रतिबिंबता तदधीन काम संकल्प नाम रूप भोक्ता च न वास्तवी साह सर्वेति किंकृता तर्हि जीवाद्यभिधान दाह तदिति आ
॥दिपदादाभासग्रहः॥७॥

चित्सो ऽक्षय्यस्वाद्यपर्यालोचने आकाशोपि शतगुणास्थूलो ऽस्वच्छश्च स्यादिति विद्वदनुभवेनाह ॥ आकाशेति सकलोप्यकलरूपो निष्क
लस्वरूपो यत्र तथाविधे कात्म्यदर्शनशीलेति विद्वदनुभवाभिनयः अमलेति पाठे मायामलरहित इत्यर्थः ॥ ८ ॥ अत एव तत्र भ्रांतिदृष्टाभा
वविकारास्तद्व्यतिरेकेणान संतीत्याह ॥ तरंगेति द्वाभ्यां ॥ ९ ॥ १० ॥ यदि चित् चेत्यं चिनोति उपचिनोतीति मन्यसे तर्हि चिच्चित्तमेव चिनोतीति
मन्यस्व न चेत्यमन्यदस्तीति एवं मननेनेन चितः स्वात्मनि व्यापारायोगेन हेतुना इदं चित्स्वरूपमात्मन्येव स्थितं न किं चित् चिनोतीति फ

आकाशशतभागाच्छा ज्ञेषु निष्कलरूपिणी ॥ सकलाकलसंसारस्वरूपैकात्मदर्शिनी ॥ ८ ॥ तरंगादिमयी स्फारानानाता
सलिलार्णवे ॥ तस्मान्नव्यतिरेकेण यथा भाव विकारिणी ॥ ९ ॥ तत्ता मत्ता मयी स्फारा नानातेयं चिदर्णवे ॥ चिन्मात्रव्यतिरे
केणात्तथा नैव प्रकाशते ॥ १० ॥ चिच्चिनोति चितं चेत्यं तेनेदं स्थितमात्मनि ॥ अज्ञे ज्ञे त्वन्यदायातमन्यदस्तीति कल्पना ॥ ११ ॥
अज्ञेषु सत्स्वभावोग्रसंसारगणागर्भिणी ॥ ज्ञेषु प्रकाशरूपैव सकलैकात्मिकासती ॥ १२ ॥ अनुभूतिवशान्नित्यमर्कादी
नां प्रकाशनी ॥ स्वादिनी सर्वभूतानां भाविनी भावभोगिनां ॥ १३ ॥

लतीत्यर्थः से यं परमार्थदृष्ट्या स्वज्ञ एव सन्नज्ञोस्मीत्यभिमन्यते ॥ तस्यैव चिल्व्यतिरिक्तं सर्गे त्वन्यदायातमन्यदस्तीति च कल्पनेत्यर्थः
अज्ञे अज्ञेइति वीप्सा वा ॥ ११ ॥ तामेव ज्ञाज्ञयोः कल्पनया चितं पुनर्विभज्याह ॥ अज्ञेष्विति ॥ १२ ॥ तस्या एव चितो जगत्प्रकाशभोगजन्म
निर्वाहकतामाह ॥ अनुभूतीति ॥ स्वादिनी विषयास्वादने निमित्तभूता भाव भोगिनां जीवानां भाविनी जन्मादौ निमित्तभूता च ॥ आनंदाद्ध्येव
॥ खल्विमानि भूतानि जायंत इति श्रुतेः ॥ १३ ॥

अज्ञानां जन्मादिनिमित्तभावेपि ज्ञदशा कूटस्थापरिच्छिन्नैकरूपैव सेत्याह ॥ नास्तमेतीति ॥ १४ ॥ विजृंभतेनेव विवर्त्तते ॥ १५ ॥ चिद्विवर्तोपि पर
मार्थदृशा चिदेवेत्याशयेन दृष्टांतावाह ॥ तेजःपुंजे इति ॥ १६ ॥ स्वतःशुद्धस्याप्यविद्यया सर्गविभ्रमैः परिस्फुरणमेव सर्गकर्तृत्वं नान्या
दृशमिति दर्शयितुं तदुपयोगिनी द्वैरूप्ये आह ॥ तदिति ॥ स्वभावेन चिन्मात्रव्यवहारतः सर्वगो न परमार्थतः प्रकाशेन नाहं जानामीति

॥ नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति ॥ न चायाति न वायाति न चेह न च नेह चित् ॥ १४ ॥ सैषा चिदामलाकारा स्वय
॥ मात्मनि संस्थिता ॥ राघवेत्थं प्रपंचेन जगन्नाम्ना विजृंभते ॥ १५ ॥ तेजःपुंजैर्यथा तेजः पयः पूरैर्यथा पयः ॥ परिस्फुरति सं
॥ स्पंदैस्तथा चित्सर्गविभ्रमैः ॥ १६ ॥ तत्स्वभावेन चिन्मात्रा सर्वगेनोदितात्मना ॥ प्रकाशेनाप्रकाशेन निरंशेनांशधारिणा ॥
॥ १७ ॥ स्वयं स्वकल्पनाभोगादनंतं पदमुज्झता ॥ अहमस्मीति भावेन गच्छता ज्ञपदं शनैः ॥ १८ ॥ नानातायां प्ररूढायामस्यां सं
॥ सृतिपूर्वकं ॥ भावाभावग्रहोत्सर्गपदे स्थितिमुपागते ॥ १९ ॥ पर्युष्टकस्पंदशतैः करोति न करोति च ॥ उत्सेधमेति भूकोश
॥ कोटरस्थोंकुरोत्करः ॥ २० ॥ ६१ ॥

व्यवहारादप्रकाशेन एवमग्रेपि ॥ १७ ॥ स्वकल्पना अविद्यायां स्वप्रतिबिंबस्तत्स्वरूपादाभोगात्कृत्रिमवेषात् ॥ अनंतं पदमपरिच्छिन्न
स्वरूपमुज्झता तेनाप्रतिसंधानेन अज्ञपदं जीवतां ॥ १८ ॥ इदमस्ति इदं नास्तीति भावाभावौ इदं ग्राह्यमिदं त्याज्यमिति ग्रहोत्सर्गौ तयोर्ग्रहो
त्सर्गौ चिन्तेषां पदे स्थाने देहात्मभावे ॥ १९ ॥ अध्यस्तात्मभावपर्युष्टकस्पंदशतैर्विहितनिषिद्धकर्मभिर्भोग्यं जगत्करोति न करोतीति वस्तु
तः तत्तद्वस्तुभावेन करणाप्रकाशनेन प्रपंचयति ॥ उत्सेधमित्यादिना ॥ उत्सेधमुपचयं नोन्नतं ॥ २० ॥ श्रीरामायनमः ॥ श्रीवासुदेवाय॰ ॥

बा॰टी॰स्थि॰
८०

चतुर्थः

सुवीरंकुरात्मनो त्से थे सूतांतरभावेन तदानुकूल्याचरणामाह व्योमेति ॥ यदि व्योम सौषिर्येनादद्यात्निरवकाशोंकुरो न निर्गछेत् एवं स्पंदात्मको वायुराकर्षतियेनांकुरो निर्गछतीत्याह स्पंदेति ॥ एवं जलं स्वरसेनांकुरं स्नेहयतीत्याशयेनाह रसेति ॥ २१ ॥ एवमुर्वीस्वदार्ढ्यदानेनांकुरमनुगृह्णातीत्याशयेनाह दृढेति ॥ तेजश्च रूपदानेन प्रकटीकरोतीत्याशयेनाह प्रकटमिति ॥ एवं सर्वजगंति तत्तत्कार्याणां स्थित्यविघ्नाताभ्यामनुग्राहकाणीत्याशयेनाह ॥ स्थितिमंतीति ॥ कालोहेमंतादिर्यबांकुरादिविरोधित्वयायुक्तमप्रतिबंधेन यबांकुरोद्गमाभ्यनुज्ञाने

व्योम सौषिर्यमाद्त्ते सर्वमूर्त्याविरोधियत् ॥ स्पंदैकधर्मवान्वातोरसरूपतयाजलं ॥ २१ ॥ दृढोर्वीप्रकटं तेजः स्थितिमंतिजगंतिच ॥ प्रतिबंधाभ्यनुज्ञासुकालः कलनया स्थितः ॥ २२ ॥ पुष्पेषु गंधतांयाति शनैः संचितकेसरं ॥ मरंदोटररसोल्लासः स्थाणुतामेतिभूतले ॥ २३ ॥ मूलस्थः फलमायांति पेलवारसलेशकाः ॥ सन्निवेशं व्रजंत्येतारेखाः पल्लवपालिषु ॥ २४ ॥ भवतामनुगृह्णातिशक्रबाणासनेनच ॥ योयो भवत्सचिरतं संस्थानेन नवेनेनच ॥ २५ ॥ वसंतमुपतिष्ठंति पुष्पपल्लवराशयः ॥ निदाघविधिमायांति दैवदाहविभूतयः ॥ २६ ॥ प्रावृट्समयमीहंते नीलाजलदराशयः ॥ शरदंचानुधावंति समग्राः फलराशयः २७

नचानुग्राहकत्वमाह प्रतिबंधेति ॥ कलनया परिणामकतया ॥ २२ ॥ पूर्वपुष्पादिभावापन्नाचिद्गंधाद्यात्मनाविवर्तत इत्युत आह पुष्पेष्विति मरंदं तद्गतरसभावापन्नाचित्स्थाणुतांतरूपचयेन तन्मूलदारुतां ॥ २३ ॥ मूलस्थरसभावापन्नाच फलभावं याति नपुनरसाः पल्लवपालिषु प्रविष्टारेखाः सिराभावापन्नादिसन्निवेशं व्रजंति ॥ २४ ॥ शक्रबाणासनेनेंद्रचापेनसममामितिशेषः नवतां वत्सस्य नूतनतां संपादयन्ननुगृह्णाति ॥ २५ ॥ तस्याः ऋतुरूपेणापिकार्यानुग्राहकत्वं प्रपंचयति वसंतमित्यादिना ॥ देवस्यतेजसो दाहविभूतयस्तापशक्तयः ॥ २६ ॥ समग्राः क्षेत्रेषु

८०

॥२८॥ संवत्सरयुगादिकालात्मना चतस्याः सर्गादिमर्यादानुग्राहकत्वमाह न जहातीति॥२९॥ नियत्यादिरूपेणापितस्या जगन्मर्या
दाव्यवस्थापकत्वमाह नियतिरिति॥ स्थैर्यचातुर्यकारित्वमेव धरादाबुदाहृत्य दर्शयति तिष्ठतीति॥ धरणाधर्मिणी सर्वजनाधारस्वभावा ३०
चतुर्दशलोकवासिनश्चतुर्दशविधा निभूतानि प्राणिनः॥३१॥ भूतानां धारापरंपरा जन्ममरणप्रवाहपरंपरा॥ ३२॥ छ॥

हेमंते हिमहासिन्यो भवंति ककुभो दश॥ न यंत्यपल्लतामंबुशिशिरे शीतला निलाः॥२८॥ न जहाति स्वमर्यादां कालोयु
गमयीमिमां॥ तरंगिणीतरंगौघलीलयायां निस्स्पृहः॥२९॥ नियतिः स्थितिमायाति स्थैर्यचातुर्यकारिणी॥ तिष्ठत्या
प्रलयं धीरा धरा धरणधर्मिणी॥३०॥ चतुर्दशविधा नीलभूतानि भुवनांतरे॥ नानाचारविहाराणि नानाविरचनानि च॥३१॥
पुनःपुनर्विलीयंते जायंते च पुनःपुनः॥ धारापरंपरायाति विना वारीव बुद्बुदाः॥३२॥ आयाति याति परितिष्ठति लील
याति स्वार्थानुपार्जयति धावति जन्मनाशैः॥ उन्मत्तवद्विहितभावनमाहितेहा मुग्धाकृतांतविवशा जनता वराकी॥३३॥
इति श्रीयोगवासिष्ठे स्थितिप्रकरणे चिदादित्यस्वरूपवर्णनं नाम षट्त्रिंशः सर्गः॥३६॥ छ॥

उत्क्रमेवार्थप्रपंचयन्नुपसंहरति॥ आयातीति॥ ब्रह्मांडकोटिलक्षणात दंतर्गलप्राणिलक्षणाच शोच्यत्वाद्वराकी जनता विहितभावनं यथा
स्यात्तथा प्राक्तनं संकल्पवासनारागादिलियावत् आहितेहा उद्भूतकामा स्वरूपविचारवार्तानभिज्ञत्वान्मुग्धा उन्मत्तवत् इहलोके जन्म
भिरायाति परलोकं याति परितस्थ्यस्थावरादिजन्मभिस्तिष्ठति लीलया भोगकौतुकेन अतिशयितान् ऐहिकामुष्मिकभोगोपायधनध
र्मादिलक्षणान् स्वार्थानुपार्जयति जन्मनाशैर्धवति संसारे इत्थं भ्रमतीत्यर्थः॥३३॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे षट्त्रिंशः सर्गः॥३६॥

आत्मनो नात्मभावोयमविद्याकामकर्मभिः॥ बोधादकामान्नैष्कर्म्यात्स्वरूपावस्थितिस्ततः॥१॥ चित्स्वरूपस्थितिरेव जगत्स्थितिश्चित्तएव जगद्रूपेणावस्थानादिति वक्तुं प्रागुक्तमनुवदति इत्यमिति॥१॥ अन्योन्यंहेतुतांगतमिदंजगत्स्वतः स्वाधिष्ठानचैतन्यादेवजातंएवमग्रेपि॥२॥ यथा अगाधजलोदरे जलाव्याप्तप्रदेशाभावाज्जलस्य स्पंदस्तथेत्यर्थः॥३॥ सरितोमृगतृष्णाः॥४॥ सएव स्वात्मा अन्यवत् अघूर्णमानोपिघूर्णमान इव चिद्धातुश्चित्सारः असः अचिदिव॥५॥ उक्तार्थंस्थिरयितुं जगतो निर्वचनीयस्वभावतां दर्शयति॥

॥श्रीवसिष्ठउवाच॥ इत्थंस्थिरतराकाराः संसारावल्ल्योभितः॥ स्वभावाद्ब्रह्मणः सर्वाः पुनरायांतियांतिच॥१॥ स्वतः॥ सर्वमिदंजातमन्योन्यंहेतुतांगतं॥ अन्योन्यमभिनश्यत्तत्स्वतएवविलीयते॥२॥ स्वतोस्पंदोपितुस्पंदोयथागाधजलोदरे॥ तथैवेयमसत्सच्चचिदेवपरिदृश्यते॥३॥ व्योमन्येवनिराकारे निदाघात्सरितोयथा॥ लक्ष्यंतेतद्वदेवेमाश्चित्तत्वेसृष्टिदृष्टयः॥४॥ यथामदवशादात्मासोन्यवत्प्रतिभासते॥ तथैवचित्ताच्चिद्धातुः सएवासइवास्थितः॥५॥ नचेदंसत्तदसन्नेदं तत्स्थानतत्स्थतयाचितः॥ नातिरिक्तातिरिक्ताचकटकादिषुहेमता॥६॥ येनशब्दंरसंरूपंगंधंजानासिराघव॥ सोयमात्मापरंब्रह्मसर्वमापूर्यसंस्थितः॥७॥ नानैकत्वादतीतातुसर्वगादमलात्मनः॥ द्वितीयाकल्पनानास्तिकाचिन्नेतरथास्वचित्॥८॥

नचेति॥ सत्तैवतत्त्वेषधातुणादसत्त्वंदुर्वचंबाध्यत्वाच्चसत्त्वंदुर्वचमित्याशयेनाह॥ तत्स्थानतत्स्थतयेति॥६॥ ननुब्रह्मरूपोजगद्विवर्तः श्रूयते नप्रत्यक्चिच्च इत्याशंक्य सैवब्रह्मेतिदर्शयति॥ येनेति॥ येन रूपंरसंगंधंशब्दंस्पर्शांश्चमैथुनान्॥ एतेनैवविजानाति किमत्रपरिशिष्यत एतद्वैतदितिकाठकश्रुतेर्ब्रह्मणएवप्रत्यगात्मत्वाभिधानादितिभावः॥७॥ ननुप्रतीचोनानात्वाद्ब्रह्मणश्चैकत्वात्कथमैक्यमित्याशंक्यनानैकत्वयोर्मिथ्यत्वान्नायंदोषइत्याशयेनाह नानैकत्वादितीतादिति॥८॥६॥

यतोऽन्यवस्तुनो भावाः सद्भावाः अभावाः सृष्ट्यश्च भावनाद्वासनावशादेव परिकल्प्यंते तेनास्य मायिकदशा अनात्मभू
तमायायामेव अथवा तत्वदशा आत्ममात्रत्वादात्मन्येव ॥ ९ ॥ अथवात्मनीति यस्य पक्षांतरमुक्तं तद्युक्तिप्रयोजनाभ्यां गद्येरुपपादय

॥ रामभावनादन्यस्य भावाभावाः शुभाशुभाः ॥ सृष्टयः परिकल्प्यंते नात्मन्येवाथवात्मनि ॥ ९ ॥ यस्मादात्मनो
॥ व्यतिरिक्ते वस्तुनि सिद्धे सति तत्रेच्छा प्रवर्त्तते ॥ यत्र स्वात्मनो व्यतिरिक्तं न किंचिदपि संभवति ॥ तत्रात्मा किमि
॥ ववांछन् किमनुस्मरन् धावतु किमुपैतु ॥

ति यस्मादित्यादिना ॥ यदा आत्मरूपाः सृष्टिरात्मन्येवास्ते इति पक्षस्तदा आत्मान्या सृष्टिर्नास्त्येवेति फलितं इच्छापूर्विका हि सृष्टिः
सोऽकामयत बहु स्यां प्रजायेयेत्यादिना श्रुतेः ॥ न चात्मना आत्मनीच्छा सिद्धत्वात् ॥ न चात्मनोऽन्यप्रसिद्धमस्ति यदिच्छन्नात्मा स्रष्टुं
प्रवर्त्तेत ॥ नवाप्रवर्त्तमानः कश्चित्स्रष्टुं शक्नोतीत्याशयः किमुपैतु धावने नवा किं फलं प्राप्नोतु ॥ १० ॥

॥ ननु नैष्कर्म्यसिद्धिस्तत्फलमस्तु तत्राह नचेति। निरिच्छत्ति अनिच्छेः कर्मप्रसिद्धौ नैष्कर्म्यफलं स्यान्नचसास्तीत्याशयेनाह द्वितीयाया इ
॥ ति इतराउक्तप्रकारेभ्यो ऽन्यासाफल्यादिकल्पनानास्त्येव। इयं हि ब्रह्मसंस्थितिः। यद्यत्र त्वमितराजानासि तर्हि सर्वद्वंद्वविनिर्मुक्तोगा
॥ तज्वरोपिसन्कर्ता भव नाहं निवारयामीति भावः॥ अज्ञातादशायामपि भौतिकशरीरपरिग्रहेणैकर्तृत्वे भूतैरेव भूतानि हन्यन्ते भौतिका निष्प
॥ त्तानि प्राप्तानि न त्वसंगोदासीनेनात्मना किं वाच्यं तस्य प्रबोधदशायां क्रियातत्फलयोरसंभव इति न तत्रास्थेति चित्ते त्याशयेन गद्योक्ता

अतः इदमीहितमिदमनीहितमित्यात्मानं स्पृशंति विकल्प्याः॥ अतो निरिच्छतायामात्मा न किंचिदपि करोति॥ कर्तृकरणकर्म
णामेकत्वात्॥ न कश्चित्तिष्ठत्याधाराधेययोरेकत्वान्न च निरिच्छस्यात्मनो नैष्कर्म्यमपि मतं द्वितीययाः कल्पनाया अभावात्
नेतराजानासि रामत्वमियं ब्रह्मसंस्थितिः॥ सर्वद्वंद्वविनिर्मुक्तः कर्ता भव गतज्वरः॥ अन्यच्च राघव पुनः॥ २॥ पुनः कृत्वा
कृत्वा बहुविधमिदं कर्मतरसा त्वया प्राप्यं किं तद्दृदयडचितं भूतकरणात्॥ अकर्तृत्वेवास्थाभवतु तव चाप्यागमवतो
भव स्वस्थः स्वच्छस्तिमित इव निर्वातजलधिः॥ १०॥

र्थसमर्थनाय पद्यमवतारयति॥ अन्यच्चेति॥ द्वितीयं पुनः शब्दमारभ्य पद्यं बोध्यं। हे राघव त्वया तरसा कर्तृत्वाभिनिवेशेन पुनः पुनः कृ
त्वा कृत्वा भूतकरणात् विषयभूतेर्देहभूतोपचयादेरन्यत् किं फलं प्राप्यं यत्ते तव निरतिशयानंदात्मनउचितं फलं स्यादित्यर्थः॥ अतस्त्वं कर्
र्तृत्वाभिनिवेशं हित्वा स्वस्वरूपो चित्ते अकर्तृत्व एवास्थाभवतु एवार्थे वाशब्दः तदुपपत्तये हेतुगर्भं विशिनष्टि॥ आगमवत इति॥ श्रुतिगु
रुवाक्यैरात्मप्रबोधवत इतियावत्॥ अपिशब्दान्मुख्याधिकारवता नुक्ता समुच्चियते अतः स्वच्छः स्वस्थो भवेत्यर्थः॥ १०॥

विस्तरोक्तमर्थं संक्षिप्योपसंहरति॥ गत्वेति॥ येन सुपूर्णात्मा अपरिच्छिन्नसुखत्वलोभेन पूर्णकामतापत्तिनत्साधनं सुदूरं दिशामंत
मपि गत्वा भ्रमित्वा असंतयत्नवतापि नासाद्यते इतिमत्वा निश्चित्य तं धिया मनसापि बाह्यपदार्थगयानुमार्गब्रजइत्सं क्रियाः सर्वास्त्याज
यित्वा स्वस्थानएव परमपुरुषार्थं दर्शयति॥ तत्वमिति॥ तत्वं निरस्तपराग्रूपस्तमेव परमार्थतया दृष्टः पूर्णानंदचिदात्मा परमपुरुषइत्य
र्थः॥ ११॥ इतिश्रीवा॰ स्थि॰ सप्तत्रिंशः सर्गः॥ ३७॥ असंगात्मानमभिज्ञस्य मनःसंगेन कर्तृता॥ ज्ञस्याकर्तृत्वरमोक्तत्वानबंधो स्तीस्फुटीर्यते

गत्वा सुदूरमपि यत्नवताजवेन नासाद्यते न दिह येन सुपूर्णतेति॥ मत्वेति माब्रजपदार्थगयानुधियात्वं तत्वं तमेव परमार्थतया
चिदात्मा॥ ११॥ उपशमवर्णनं सर्गः॥ ३७॥ श्रीवसिष्ठ उवाच॥ एवंस्थिते तु तत्ज्ञानां यदेतत्कर्तृत्वं दृश्यते सुखदुःखादिषु योगादिषु वा
तदसत्॥ न तु मूर्खाणां यतः कर्तृत्वं नाम किमुच्यते॥ यो ह्ययं नरास्थायामनोवृत्तेर्निश्चयय उपादेयताप्रत्ययो वासना भिधानस्तत्कर्तृत्व
॥ शब्देनोच्यते॥ १॥ ६८

ननु तत्वविदामपि लौकिकेषु शास्त्रीयेषु कर्मसु कर्तृत्वं दृश्यते तत्रावश्यं इष्टानिष्टभोक्तृत्वं प्रापयिष्यतीत्याशंक्याह॥ को विशेषस्तत्राह एवंस्थिते
इति सुखदुःखादिषु सुखदुःखभोगफलेषु कर्मसु योगादिषु समाध्याभ्यासपरिपाकभूमिकाभेदेषु वा तत्ज्ञानां तत्वविदां तत्दृश्यमानं कर्म
असत् नास्त्येव न तु मूर्खाणां तत्र हेतुं स्वयमेव विशेषइत्यर्थः तदुभयमुपपादयितुं कर्तृत्वस्वरूपं विमृशति यतइत्यादिना॥ यो हीति शारीरक्रियानक
र्तृता अबुद्धिपूर्वचेष्टायां करोमीति प्रत्ययादर्शनात् किंतु मानासीपूर्वपूर्वकर्तृत्ववासनारागात्मकमनोवृत्तेरुद्भूता कार्यमिदमिति निश्चयात्मकवृत्ति
॥ रूपेण परिणता क्रियाभिधाने त्यर्थः॥ ६॥ ०

भोक्तृत्वमपितदधीनचेष्टावशात्तत्तद्वासनानुरूपफलस्वादगोचरोद्भूतवासनेनेत्याह॥चेष्टावशादिति॥यतोवासनारूपंस्पंदते पुरुषः उक्तेर्थेश्लोकमुदाहरति॥तथाचेति॥स्वर्गेनरकेपिवातदनुभूयतइतिसंबंधः॥१॥अस्तुवासनैवकर्तृताभोक्तृता

चेष्टावशातारकूफलभोक्तृत्वंवासनानुरूपंस्पंदतेपुरुषः॥स्पंदानुरूपंफलमनुभवतिफलभोक्तृत्वंनामकर्तृत्वादिविसिद्धांतः॥तथाचकुर्वतोकुर्वतोवापिस्वर्गेपिनरकेपिवायादृग्वासनमेतत्स्यान्मनस्तदनुभूयते॥१॥
तस्मादज्ञाततत्वानांपुंसांकुर्वतामकुर्वतांचकर्तृता॥नतुज्ञाततत्वानामवासनत्वात्॥ज्ञाततत्वोहिशिथिलीभूतवासनःकुर्वन्नपिफलत्वंनानुसंदधाति॥अथचस्पंदनमात्रंकेवलंकरोत्यसक्तबुद्धिःसंप्राप्तमपिफलमात्रसैवेदंसर्वमेवंकर्मफलमनुभवत्यकुर्वन्नपिकरोतिमग्नमनाःमनोयत्करोतितत्कृतंभवतियन्नकरोतितत्रकृतंभवति॥अतोमनएवकर्तृनदेहः॥चित्तादेवायंसंसारआगतश्चित्तमयएवचित्तमात्रंचित्तएवस्थितिरितिविज्ञातं॥७॥

ननुतथापिकथंज्ञाज्ञयोर्विशेषसिद्धिस्तत्राह॥तस्मादिति॥ज्ञेविशेषमुक्तमुपपादयतिज्ञाततत्वोहीति॥एवंतस्यभोक्तृत्वमप्यसदित्येतदुपपादयति॥संप्राप्तमपीति॥मग्नमनाःभोगासक्तचित्तोऽज्ञस्त्वकुर्वन्नपिकरोतिविज्ञातंविचार्यनिर्धारितंप्रागित्तिशेषःसर्वोविषयःचिद्वृत्तिभेदश्चेत्क्रमयमुपशांतसद्वास॥७॥

नैवाभूत्तदा तद्रूपलितो ज्ञो जीव एवास्ति तेषु जीवेष्वात्मविदां तन्मनः वर्षति जलदे प्रावृषि मृगतृष्णा जलमिव उपश
ममागतं सत् चंडातपे हिमकणा इव निर्लीनं तुर्यदशामुपागतं सत् तद्भावेनैव स्थितमिति विशेष इत्यर्थः॥ उक्तमनोद

विषयश्च सर्वमुपशांतमभूत् दासनैवेति स एवास्तीति॥ आत्मविदां हि तन्मनः परमुपशममागतं
मृगतृष्णा जलमिव वर्षति॥ जलदो हिमकणा इव चंडातपे विलीनं तुर्यदशामुपागतं स्थितं॥ ना
नंदं न निरानंदं न चलं नाचलं स्थिरं॥ न सन्नासन्न चैतेषां मध्यं ज्ञानमनो विदुः॥ २॥ न वासनामये
स्पंदे से गज इव पल्वले मज्जतीति तज्ज्ञः मूर्खमनोभागाभूमिमेव पश्यतीति न सत्वं॥ ९॥०

शावर्णनं परश्लोकमुदाहरति॥ नानंदं विषयसुखविश्रांतं न नापि स्वरूपानंदशून्यं॥ अचलं चलादिव ज्जडावस्थं न
एतेषां उक्तानंद निरानंद चराचर सदसतां मध्यं संध्यावस्थारूपं च न किं तु परिशेषाद्भूमात्मसुखैकरसमित्यर्थः॥ ज्ञा
ज्ञयो विशेषांतरमप्याह॥ न वासने सादिना॥ न सत्त्वं परमार्थनत्वं॥ ७॥ श्रीरामाय नमः॥

अज्ञमनसो दुर्वासिनादुःखमज्जने स्वप्नो दृष्टांत उत्कृष्टोपपादयति ॥ तथाचेत्यादिना ॥ तथाच श्रुतिरपि अथ यत्रैनं घ्नंतीव जिनंतीव विछादयंति गर्तमिव पततीय देव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यत इति ॥ अपरस्तत्त्वज्ञस्तु उक्तमुपसंहृत्य प्रकृते योजयति तस्मादिति भवतु चेतः ॥ तवेति शेषः ॥ तत्त्वदृशस्तव यत्र संसक्तिः संभाव्येत तदात्मतत्त्वव्यतिरिक्तं न ह्यस्ति ॥ नामेत्यवधारणे

॥ तथाच यमत्रापरो दृष्टांतः अकुर्वन्नपि श्वभ्रपतनं शय्यासनगतोपि श्वभ्रपातवासनावासिते चेतसि
॥ श्वभ्रपतनदुःखमनुभवति ॥ अपरस्तु कुर्वन्नपि श्वभ्रपतनं परमसुपशाममुपगतवृत्तिमनसि शय्यासन
॥ सुखमनुभवति एवमनयोः शय्यासनश्वभ्रपातयोरेकः श्वभ्रपतनस्याकर्तापि कर्ता संपन्नो द्वितीयश्च श्व
॥ भ्रपतनस्य कर्तापि अकर्ता संपन्नश्चित्तवशात्तस्माद्यच्चित्तं तन्मयो भवति पुरुष इति सिद्धांतः ॥ तेन त
॥ त्र कर्तुरकर्तुर्वा नियमसंसक्तं भवतु चेतः ॥ न हि किंचिदस्त्यात्मतत्त्वव्यतिरिक्तं यत्र संसक्तिः संभाव्यते ॥ यत्किंचि
॥ दिदं जगद्गतं तत्सर्वं शुद्धचित्तत्त्वादाभासमेव हि एवं चास्य ज्ञातज्ञेयस्य पुंसो नाम आत्मा सुखदुःखानां न गम्य एवेति

निपातः सुखदुःखानाम गम्य एवेति निश्चये जाते इत्यस्योपपादकः आधाराधेयदृष्ट्यसह निश्चयस्तदुपपादको देहातिरिक्तबाला ग्रमात्मनिश्चयः सर्वाहंभावनिश्चयो वा तद्द्विशोधनफलभूतः ॥ सर्वगात्मनिश्चयस्तद्द्वारा प्रागुक्ते नाहं सुखदुःखानां गम्य इति निश्चये जाते विगतेच्छानिच्छाप्राप्तिपरिहारचिंताज्वरतया चित्तवृत्तिरात्मन्येव लीनतया प्रारब्धभोगार्थलीलां प्रकाशयंती व्यवहारेषु

तिष्ठते प्रकाशानस्त्रेयाख्ययोश्चेतितदुः अनन्तत्वज्ञस्य संकटेष्वपि न दुःखभोक्तृत्वं प्रसुतानंद एव स्यात्॥ तत्त्वज्ञस्येति तत्र हेतु
मात् येनेत्यादिना॥ मनसः सर्वकार्यमनोबुद्धितद्विषयतद्वृत्तीनां बीजत्वात्तत्त्यागे सर्वसंसारपरिहारः सिद्ध इत्याह एवमिति॥ सर्व
कर्माणि सर्वाश्चेष्टाः सर्वकर्माणि सर्वाणि पुण्यपापानि क्षयमुपयान्ति॥ मानसेन सांकल्पिकेन कृतेन शारीरेणापि कर्मणा यद्य

निश्चये जाते॥ नात्मव्यतिरिक्ता आधाराधेयदृश्यो विद्यंत इति निश्चये जाते कर्ता भोक्ता सर्वपदार्थव्यतिरिक्तो वालाग्रसहस्र
भागोहमिति निश्चये जाते यत्किंचिदिदं तत्सर्वमहमेवेति वा निश्चये जाते सर्वसत्तावभासकः॥ सर्वगस्तिष्ठाम्येवाहमिति निश्च
ये जाते नाहं सुखदुःखानां गम्य इति विगतज्वरतया चित्तवृत्तिर्लीनैव तिष्ठते व्यवहारेषु॥ तत्त्वज्ञस्य संकटे च मुदितैवकैव
तज्ज्योतिस्त्रैवभुवनभावमलंकरोति येन चित्तादर्तेतुज्ञः कुर्वन्नप्यकर्ता संपन्नो मनसो लेपकत्वान्नासौ पापण्यादिविक्षेपस्य य
त्कृतस्यापि कर्मणः फलमनुभवति॥ एवं मनः सर्वकर्मणां सर्वेहितानां सर्वभावानां सर्वलोकानां सर्वगतीनां बीजं॥ तस्मिन्परि
हृते सर्वकर्माणि परिहृतानि भवंति॥ सर्वदुःखानि क्षीयंते सर्वकर्माणि लयमुपयांति॥ मानसेनापि कर्मणा यत्कृतेनापि ज्ञो नाक्र
म्यते न विवशीक्रियते॥ नरंजनामुपैत्यव्यतिरिक्तात्॥ यथा वा छौं नगरस्य निर्माणं निमर्दं च कुर्वन्नगरनिर्माणं मनःकृतमहं कृतमि

मनसा १

स्मात्ज्ञो नाक्रम्यते न तत्र हेतुर्न वशीक्रियते न तत्र हेतुर्न रंजनामुपैति तित्कृत्वे रक्तो हि न साधनक्रियया स्वसिध्यैव शीघ्रं सप्रवर्त्यते प्रवृत्तश्चात
कृतगुणदोषैराक्रम्यते कुतः अव्यतिरिक्तात् परमार्थतः स्वव्यतिरिक्तस्याभावात्॥ कृतस्याप्यकृतत्वे दृष्टांतमाह॥ यथेत्यादिना॥ निर्मितं नि
र्मितस्य परिष्कारं नगरस्य निर्मथनं प्रविद्रापन प्रयुक्तं निवृत्तिं कृतं वास्तवेदार्थंतिकं उक्तं योजयति एवमिति इत्थं कर्तृत्वं विचार्य दुःखकारणं

विमृश्यति। सर्वभावेष्विति। जगति सर्वभावेषु हेयोपादेयताभ्यां व्यवह्रियमाणेषु दुःखस्य कारणं किं। न च हेयं दुःखकारणं उपादानपू
र्वकत्वाद्धानस्य हेयस्योपादेयत्वाभावादेव न तो दुःखाप्रसक्तेरिति परिशेषादुपादेयं दुःखहेतुरिति स्यात्तन्न च तदपि संभवतीत्याह। न चो
पादेयमिति। नश्वरादुपादेयाद्दुःखं च विनाशिनो वा नाद्यः। विनाशिनस्स्वरक्षणेऽप्यसमर्थस्य क्वापि कारणत्वायोगात्। न द्वितीयोपि नह्यु

वल्लीत्वयानुभवति। नोपादेयतया सुखदुःखमकृत्रिममिति पश्यति नगरनिर्मथनं च मनःकृतं कृतमिति पश्यतीति दुःखमपि
लीलयानुभवन्नपि न दुःखमिति पश्यति। एवमसौ परमार्थतः कुर्वन्नपि न लिप्यत एवेति। सर्वभावेषु हेयोपादेयताभ्यां जग
ति किं कारणं दुःखस्य। न चोपादेये किंचिदपि संभवति यद्विनाशव्यतिरिक्तं चात्मनः। तस्मादयमात्मा कर्ता भोक्ता तत्त्वतो यदे
तत्कर्तृत्वं च स्वध्यारोप्यते। आवश्यकं तत्सम्यग्दर्शनं मोहान्नवस्तुतः इति यथाभूतवस्तुविचारणात्कर्तृत्वभोक्तृत्वे न स्तः। इंद्रिये
इंद्रियार्थद्वेषाभिलाषाधिकादृष्टा यत्स्वदृष्टीनां दृश्यं तेनातत्त्वदृष्टीनां॥

पादेये जगति तादृशं किंचिदपि संभवति यदविनाशि चात्मनोऽन्यदात्मनीति श्रुत्या आत्मव्यतिरिक्तस्य विनाशित्वोक्तेरित्याशयेनाह हेतुगर्भं
विशिनष्टि व्यतिरिक्तं चात्मन इति। आत्मनो हानोपादानयोग्यत्वादुपादेयस्य तन्न्यतिरिक्तस्य नश्वरत्वादित्यर्थः। एवं भोग्यदुःखस्य कार
णानिरूपणादप्यात्मा अकर्ता अभोक्ता चेति सिद्धमित्याह। तस्मादिति। चकारो भिन्नक्रमः एतच्च कर्तृत्वं यदनुभूयते तत् अतत्त्वतः स्वत्र
ध्यारोप्यत इत्यन्वयः। अवश्यकं जीवनादनिवार्यं नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत इति न्यायादित्यर्थः। आवश्यकत्वं कुतस्तत्रा
ह इंद्रिये इंद्रियार्थेषु द्वेषाभिलाषादिकैः स्वनिमित्तैः पुण्यपापादृष्टैश्चायत्तो विवशीकृतबुद्धिर्येषामज्ञानां तेषामेवेत्यर्थः॥ ७॥

अत एव तत्त्वविदां न मोक्षकल्पनाप्यस्तीत्याह मोक्ष इति ॥ स्वस्मिन् पूर्णात्मन्येव संसक्तं मनो येषां इह स्वात्मनि असंसक्तमनसां अभ्यासदशा
पन्नानां तु दृष्ट्यापततद्बंधमोक्षादि सर्वमेवास्ति ज्ञस्य दशा तर्हि किमस्ति तदाह ॥ यथास्थितमिति ॥ कथं तर्हि तस्य व्यवहारसिद्धिरिति चेत्सद्दृष्टिप्र
सिद्धद्वित्वैकत्वादेस्तात्कालिकेनाभ्युपागममात्रेणेत्याह ॥ तद्द्वित्वैकत्वे इति ॥ तदात्मतत्त्वमेव तस्य तत्त्वज्ञस्य जीवनादिव्यवहारसिद्धये द्वित्वैकत्वा

॥ मोक्षोऽस्ति न संसारे स्वसंसक्तमनसामिह ॥ संसक्तमनसां त्वेतत्सर्वमेवास्ति यथास्थितं ज्ञस्य केवलमात्मतत्त्वमेवोल्लसति
॥ तन्नु द्वित्वैकत्ववादि सिद्धे द्वित्वैकत्वे करोति शक्तिजालादभिन्नां सर्वशक्तितां च दर्शयति तस्य ॥ न बंधोऽस्ति न मोक्षोऽस्ति नाबंधोऽस्ति
न बंधनं ॥ अप्रबोधादिदं दुःखं प्रबोधात्प्रविलीयते ॥ संकल्पिता जगति मोक्षमतिर्मुधैव संकल्पिता जगति बंधमतिर्मुधैव ॥
॥ संसज्य सर्वमनहंकृतिरात्मनिष्ठो धीरो धिया व्यवहरन्नपि तु विराम तिष्ठ ॥ ७ ॥ उपशमवर्णनं नाम सर्गः ॥ ३८ ॥ श्रीराम उवाच ॥

दिदृष्टिसिद्धद्वैतैकत्वे तत्कालं करोति फलितार्थं पद्यं ॥ नाहं बंध इति बंधनं बंधकारणं कामकर्मादि उक्तां पूर्णात्मनिष्ठामुपसंहरन्नुपा
मायोपदिशति संकल्पितेति स्पष्टोऽर्थः ॥ इति श्रीवा० स्थितिप्रकरणे अष्टत्रिंशः सर्गः ॥ ३८ ॥ ७ ॥ ब्रह्मणः सर्वशक्तित्वं राम व्यामो
हविस्तरः ॥ तद्बोधाय वशिष्ठस्य विमर्शादीह कीर्त्यते ॥ १ ॥ अज्ञदृष्ट्यैव वस्थितो रामो गुरुवचनविश्वासात्स्वरोक्षतयैव पूर्णतास्थि

सत्तासहेक
रो ति २

तिं पर्यालोच्य विरोधं मन्यमानः शंकते भगवन्निति ॥ एवंलक्षणकरी सा बंधमोक्षादेरसंभवे स्थिते सति ॥ ५ ॥ किमसाव दृष्टावव स्थि-
तः शंकने उत्ता भिन्नतां कांचिदाक्षिप्तांतरालवर्त्मीसि न्निति परीक्षितुं वसिष्ठः सर्वशक्ततावादाभ्युपगमेन परिहरति राजपुत्रेत्यादिना
ऽऽवर्तंति विवर्तंते दृश्यंते कार्यलिंगैरनुमीयंते तथा चाशक्तानामेव विरोधो न सर्वशक्तेरित्यभिप्रेत्योदाहरति ॥ सत्यमसत्यमित्यादि ॥ य

भगवन्नेवं स्थिते परे ब्रह्मण्येव विद्यमाने कुत एवाभिन्नचित्ररूपायाः स्रष्टेरागमः इति कथय महात्मन् ॥ ५ ॥ श्रीवसि॰ ॥
राजपुत्र ब्रह्म सत्यमेवेदमावर्तते यस्मात्सर्वशक्तिः ततस्मात्सर्वाः शक्तयो ब्रह्मणि दृश्यंते ॥ सत्यमसत्यं द्वित्वमेकत्वमाद्य-
त्वमंतत्वमिति ॥ तत्र नान्यत्त्व यथा जलराशेर्जलाशय उल्लासप्रफुल्लासे वै नानाकारतादिदर्शयन्नाकूटतां गच्छति
तथा चित्घन चित्तं चित्ता च सर्वाः शक्तीः कर्ममयीर्वासनामयीर्मनोमयीश्चिनोति दर्शयति विभर्ति जनयति क्षिप-
तिचेति ॥ सर्वेषामेव जीवानां सर्वासामपि तो दशां ॥ समग्राणां पदार्थानामुत्पत्तिर्ब्रह्मणो निशं ॥ ६ ॥ लोकास्तरादुपायांति
तस्मिंश्चित्वाद्विशंयल्लं ॥ तन्मया एव सततं तरंगा इव सागरे ॥ ७ ॥

था जलराशेः समुद्रस्य जलाशयो जलपूरः उल्लासेन चंद्रोदयनिमित्तकेन स्वाभाविर्भावेन प्रफुल्लतीति प्रफुल्लविकसने क्षिपू वि-
कस्वरं सत् उल्लासेन तरंगेन त्वयेन चित्तं चिनोपाधिकं जीवभावं तस्यापि चिदाभासरूपस्य चित्ता च चिनो ये कैकशः संचिनोति संचितां-
श्च फलमुखेन दर्शयति उपभोगे बिभर्ति पुनस्तिरोभावेन क्षिपयति उक्तं श्लोकेनोदाहरति ॥ सर्वेषामेवेति ॥ ६ ॥ पराल्लोकास्तरमात्मनः ॥ ७

एवं शक्तिवादेन समाधीयमानोपि रामेणैव ब्रह्मणो शैत्यशक्तिमिव जलेदहनशक्तिमिव विरुद्धां चिति जाड्यशक्तिं अदृश्ये दृश्यताशक्तिं नित्ये अनित्यताशक्तिं च ब्रह्मण्यसंभावयन् शंकते ॥ भगवन्नित्यादिना ॥ वचनव्यक्तिर्वाक्यार्थावगतिः अतिगहनाद् दुःसंपाद विरोधसत्वादित्यर्थः ॥ विरोधानेव दर्शयति ॥ क्वचिल्लेति ॥ वचनरचनानामसत्सृष्टिः आरंभो रूपसृष्टिः सदृशेनैव भवितव्यं नतु विरुद्धेनेत्यर्थः ॥ भवतिल्लोके इति शे

॥ श्रीरामउवाच ॥ भगवंस्तवातिगहनेयं वचनव्यक्तिर्न खल्ववबुध्यवाक्यार्थमवगच्छामि ॥ क्वचिल्वानीतमनः षष्ठेंद्रियवृत्ति ब्रह्मसत्वं
॥ क्षणभंगुरेयं तज्ज्ञापदार्थश्रीरिति वचनरचनायद्विचायमारंभो ब्रह्मणआपतितः सदेनेन तत्सदृशेनैव भवितव्यं ॥ योयस्माज्जा
॥ यते स तत्सदृश एव भवति ॥ यथा दीपान्दीपः पुरुषात्पुरुषः सस्यात्सस्यः यत्तो निर्विकाराद्यदागतं निर्विकारेणैवानेन भवित
व्यं ॥ अथैतत्व्यतिरिक्तं चिदात्मनस्तन्निष्कलंकस्य परमेश्वरस्य येयं कलंकापत्तिरियाकर्ण्य भगवान्ब्रह्मर्षिरुवाच ॥ १३
॥ ब्रह्मैवेदं स्थितं राम मन्त्वमस्तीह नानघ ॥ तरंगो घगणेरंभः सिंधौ स्फुरति नो रजः ॥ १४ ॥ ७ ॥

षः अथ शब्दो यदीत्यर्थे ॥ तत्तर्हि निष्कलंकस्य परमेश्वरस्य याजगद्भावापत्तिस्त्वयोक्ताऽयं कलंकापत्तिरुक्तास्यादित्यर्थः ॥ १३
तत्सदृशा वसिष्ठो जगतश्चिद्भावमेवमविकारतां च पश्यन्समाधत्ते ब्रह्मैवेदमिति ॥ १४ ॥ १५ श्रीरामकृष्णगोविंद ॥ श्रीरा

॥ वा॰टी॰स्थि॰ ॥
॥ ८७ ॥

अज्ञदृष्ट्यैवं स्थितो रामः सर्वथा आनंदैकरसस्वभावेन द्विरूढदुःखजगद्रूपता ब्रह्मणो दुर्वचैवेति प्रसवति छते निर्दुःखमिति ॥१६॥ एवं निरु
त्तरीकृतस्य वसिष्ठस्य रामप्रबोधनोपाय चिंतां वाल्मीकिर्दर्शयति इत्युक्ते सा दिना ॥१७॥ १८ ॥ यः पुरुषः व्युत्पन्नमना जगतो जडभावं विहाय
चिदेकरसतां द्रष्टुं समर्थः इ नियावत् ॥१९॥ तस्य दृशा कस्य चिद्वस्तुनः कश्चिदपि दोषो विरोधो नास्तीय तो जगद्विरूढरूपं विद्यात्मनि क्वचिदपि

द्वितीया कल्पनेनैवेह नरघूद्वहविद्यते ॥ ब्रह्ममात्रात् न तेन ह्यवो छायमात्रादनेयथा ॥१५॥ श्रीराम उवाच ॥ निर्दुःखं ब्रह्म निर्द्वंद्वं तज्जं दुःखमयं
जगत् ॥ अस्पष्टार्थमिदं ब्रह्मन् वेद्मि वचनं तव ॥१६॥ श्रीवाल्मीकिरुवाच ॥ इत्युक्ते तत्र रामेण चिंतयामास चेतसा ॥ वसिष्ठो मुनिशार्दूलो रा
घवस्योपदेशने ॥१७॥ परं विकाशमायाता नास्य तावदियं मतिः ॥ किंचिन्निर्मलतां प्राप्ता प्रोद्यते चेत वस्तुनि ॥१८॥ यो व्युत्पन्नमनास्तस्य ज्ञा
तज्ञेयस्य धीमतः ॥ मोक्षोपायगिरां पारं प्रयातस्य विवेकिनः ॥१९॥ न कश्चित् कस्यचिद्दोषो नास्ति विद्यात्मनिह्यलं ॥ यावन्नोक्तं न विश्रांतिं ता
वदिसेष राघव ॥२०॥ अर्धव्युत्पन्नबुद्धेस्तु नैतत्तु व्यक्तं हि शोभते ॥ दृश्याभया भोगदशा भावयन्नेष नश्यति ॥२१॥ परां दृष्टिं प्रयातस्य भोगेच्छा
नाभिजायते ॥ सर्वं ब्रह्मेति सिद्धांतः कालेन तु अस्य युज्यते ॥२२॥ आदौ शमदमप्रायैर्गुणैः शिष्यं विशोधयेत् ॥ पश्चात्सर्वमिदं ब्रह्म शुद्धस्त्वमिति
बोधयेत् ॥२३॥ अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ॥ महानरकजालेषु स तेन विनियोजितः ॥२४॥ प्रबुद्धबुद्धेः प्रक्षीणभोगेच्छस्य निराशि
षः ॥ नास्त्यविद्यामलमिति युक्तं वक्तुं महात्मनः ॥२५॥

नास्ति अलं सम्यक् यावन्नोक्तं नोपदिष्टम् अस्माभिः तावदेष राघवो विश्रांतिं नैति न प्राप्नोति अतोऽवश्यमुपदेष्टव्य इत्यर्थः ॥२०॥ परंतु अर्धव्युत्पन्न
दृष्टेः एतन्मयागुक्तं सर्वं ब्रह्मेत्युपदेशनं न शोभते कुतः यत एषोऽर्धव्युत्पन्नः दृश्यान्यानयति उपस्थापयति संजीवयतीति वा दृश्यानाम् अनितेर्किंचि
आपंचैव हलं नानामितिसपतथा विधाया भोगदशा सदैवार्थतत् दृश्यान्येव भावयन् सन्नश्यति पतिनत्त्वबोधाद्भ्रश्यति इति यावत् ॥२१॥ कस्य तर्हि

चतुर्थः ॥
॥ ८७ ॥

अज्ञान एवाज्ञानधिकार्युपदेशे प्रवर्त्तनेनास्य शिष्यप्रतारकस्य युक्तो नरकपात इत्याशयेनाह ॥ अपरीक्ष्येति ॥ एवकारो भिन्नक्रमः स यात्येवेति
२६ ॥ २७ ॥ स्वयमेव ज्ञास्यसि यदि न ज्ञास्यसि तर्हि सिद्धांतकाले वक्तव्यं नाधुनेत्यर्थः ॥ २८ ॥ सांप्रतमर्द्धव्युत्पन्ने योग्यब्रह्मरूपाः प्रागुक्तसर्वशक्तित्वादि
प्रतीचः सर्वात्मभावदर्शनं च प्रथममुपदिशति ॥ ब्रह्म सर्वशक्तीति ॥ माययैवास्य सर्वशक्तिता प्रतीच्यः सार्वात्म्यं चेति प्रपंचयति ॥ यथेंद्रजालिन इत्या

अपरीक्ष्य च यः शिष्यं प्रशास्ति विमूढधीः ॥ स एव नरकं याति यावदाभूतसंप्लवं ॥ २६ ॥ इति संचिंत्य भगवानज्ञानतिमिरापहः
तमुवाच मुनिश्रेष्ठो वसिष्ठो भूमिभास्करः ॥ २७ ॥ श्रीवसिष्ठ उवाच ॥ कलंकं कलना ब्रह्मण्यस्ति नास्तीति वानघ ॥ सिद्धांतकाले वक्त
व्यं स्वयं ज्ञास्यसि राघव ॥ २८ ॥ ब्रह्म सर्वशक्ति सर्वव्यापि सर्वगतं सर्वोहमेवेति ॥ यथेंद्रजालिनः पश्यसि चित्रा मायया क्रिया जनयं
तः सदसत्तां नयंति ॥ असच्च सत्तां नयंति तथैवात्मा ॥ अमायामयोपि मायामय इव परमैंद्रजालिको घटं पटं करोति पटं च घटं
करोति ॥ उपलेल्लतां जनयति मेरौ कनकतटे नंदनवनमिव लतायामुपलमुत्पादयति कल्पपादपेषु रत्नस्तबकमिव व्योम्नि का
०॥ ननमध्यारोपयति ॥ ७

दिना असंभावितसंभावनाय लोकशास्त्रप्रसिद्धं दृष्टांतमाह ॥ कनककतटे इति ॥ यद्वत्तद्देवशक्त्या असंभावितान्यपि नंदनवनरत्नस्तबकादीनि संभा
व्यंते तद्वदात्मशक्त्यापि संभाव्यतामिति भावः ॥ वस्तुव्यत्यय इव देशकालव्यत्ययोपि मायाशक्त्यैव संभावनीय इत्याशयेनाह ॥ भविष्यति गगने इ
ति ॥ व्योम नष्टच्छायां जनं निरस्तनैल्यकज्जलं हलता धरातले भूप्रदेशं नयतीति प्रापयति ॥ इति शब्दस्तत्राप्यसंभावितसहस्रसंभावनार्थः ॥ तर्हि दि
गगनस्या[illegible]ो निवेशाय भूतलमन्यतो नयतीत्येयाह ॥ गंधर्वनगरेति ॥ जगत्त्रय किंचिदस्ति भविष्यति बभूव यत्तत्सर्वं रत्नकुट्टिमेषु पद्मरागमयोपि म

॥ वा॰टी॰स्थि॰ ॥
॥ ८८ ॥

॥ चतुर्थः ॥

यत्सौधभागेषु आकाशप्रतिबिंबमिवाधिष्ठानरक्तिम्नारक्तं स्वतोऽसदपि ब्रह्मसत्तया सदिव भवतीत्यर्थः ॥ तत्र हेतुमाह ॥ यदीश्वर इति ॥ निदर्शयति स्वात्मानमित्यर्थः ॥ एवं चैकमेव वस्तु सर्वथा सर्वं संभवतीति नासंभावना हर्षामर्षादयश्चायुक्त इत्याह सर्वमेवेति ॥ एवमसंभावनां रामस्य निरस्य प्रायुक्तसमतास्थितिमेव विधत्ते समतयैवेति ॥ तदेव हर्षशोकादेरासंतिकत्वस्य इत्याशयेन श्लोकमुदाहरति ॥ विस्मयेति ॥ अपर्यवसाने समतायाइति

गंधर्वउद्यानमिव तस्मिन् जगति भविष्यति गगने कल्पनया नगरतां जनयति नरच्छायां जनमिव व्योम धरातलं नयतीति गंधर्वनगर राजगृहे विपुलांगनाजनमिव भूतले व्योम निवेशयति ॥ रक्तकुट्टिमेष्वाकाशप्रतिबिंबमिव किंचिदस्ति जगति भविष्यति वा बभूव ॥ यदीश्वरो व्यक्तिरूपो विचित्रतामुपेत्य निदर्शयति ॥ सर्वमेव सर्वथा सर्वत्र यथासंभवत्येकमेवेह वस्तु विद्यत इति तस्माद्धर्षामर्षविस्मयानां कवावसरो रामसंमतयैव सततं धृतिमता स्थातव्यं ॥ विस्मयस्मयसंमोहहर्षामर्षविकारिणां ॥ समतावलितस्त्वं नो न कदाचन गच्छति ॥ अपर्यवसाने देशकालवति चित्राहि जगति युक्तयो दृश्यंते ॥ एतास्वयुक्तीर्नामासावात्मा यत्नेन रचनां करोति न चोत्पन्नां तिरस्करोति सागर इव वीचीः किं तर्हि क्षीर इव घृतं घट इव मृदि पट इव तंतुषु वट इव धानायामात्मन्येव स्थिताः शक्तयः प्रकटतामागता व्यवह्रियंते विरचितमेव तरंगवत् नात्र कश्चित्कर्ता न भोक्ता न विनाशमेति ॥ केवलमात्मतत्त्वे सात्त्विकी निरामयसमतया त्वमिति नित्यमसंक्षुब्धे तिष्ठ तिसत्ये

॥ ४२ ॥ (margin: ०स्थि॰ स॰ ४२)

शेषः ॥ युक्तयो दृश्यरचनात्मिकाः दृश्यंते सामग्रीयुक्तावस्थायुक्तिः फलावस्था रचनेति प्रवृत्तिनिमित्तभेदाद्युक्तीः रचनां करोतीति समानाधिकरण्यं ॥ अयमात्मा न तिरस्करोति किंतु स्वयं नेन प्रकटतामागता ॥ शक्तयो व्यवह्रियंते इति कथं चिद्योज्यं ॥ इयं च व्यवहारदृष्टिः कल्पनैव परमार्थतस्तु अविरचितमेव जगत् नात्र कर्तेत्यादि स्पष्टं तादृशोपि परमार्थसति जगत्संपत्तौ दृष्टांतप्रदर्शकौ श्लोकाववतारयति सत्येवं संपद्यत इति ॥ ४२ ॥ श्रीरामायनमः ॥ श्रीः ॥ छ

॥ ८८ ॥

श्लोकोस्पष्टो ॥ ४३ ॥ नसन्नासदिति अनिर्वचनीयमित्यर्थः ॥ ४४ ॥ एवं ब्रह्मसंनिधिमात्राज्जायमानजगद्दोषैरलिप्यमानएवात्माजगतः ॥ कर्तैवनि
यंतेवनभइवतारकाकुसुमराशीनांभवतीत्याह ॥ निर्दोषवदेवेत्यादिना ॥ ४५ ॥ केवलेनभासितारकाःकुसुमराशयइवकदाचित्प्रकटाःतस्मिन्नुभवं
तीतिसर्वत्रशेषः ॥ इत्थंचासतोजगतःअसत्तात्मकोनाशः ॥ ४६ ॥ सत्तएवसत्तात्मिकाउत्पत्तिःस्थितिश्चब्रह्मसत्तैवेतिविभागोफलितमाहनश्य
तीत्यादिसार्द्धश्लोकद्वयेन ॥ ४७ ॥ जायतइत्येतत्स्थितेरप्युपलक्षणं ॥ ४८ ॥ नहिंकिमात्माजन्यःनेत्याहकथमिति ॥ आत्मसत्तायाजगत्यध्यासो

सन्निदीपइवालोकःसत्यर्कइववासरः ॥ सतिपुष्पइवामोदःस्वतःसंपद्यतेजगत् ॥ ४३ ॥ आभासमात्रमेवेदंपरिदृश्यतएवच स्पंदःसमी
रणस्येवनसन्नासदवस्थितं ॥ ४४ ॥ निर्दोषवदेवनागतीनांदृष्टीनांपरमार्थतोभगवान्स्थितोविनष्टानांपुनःकर्ताकृतानांवानाशयिता
सकेवलंकदाचित्प्रकटाः ॥ ४५ ॥ कदाचिदल्पप्रकराःकदाचित्प्रकटास्तारकाइवकुसुमराशयः ॥ ४६ ॥ नश्यतीहहितद्वस्तुनात्म
भूतंयदात्मनः ॥ कथंनश्यतितद्वस्तुस्वात्मभूतयदात्मनः ॥ ४७ ॥ जायतेचैवतद्वस्तुस्वात्मभूतंयदात्मनः ॥ कथंतज्जायतेतस्मात्स्वा
त्मभूतंयदात्मनः ॥ ४८ ॥ तस्मात्सम्यक्ज्ञानवशाद्ब्रह्मणःसर्वपदार्थानामागमः ॥ अवतीर्णानांचतेषामवतरणासमकाल्मेवावि
द्योदेतितज्ज्ञानंदृढतामेतितदनुशतसहस्रस्कंधोविचित्रशुभाशुभफलभरफलितोभूरिशाखःस्फारतामेतिसंसारद्रुमः ॥ आ
शामंजरिताकृतिंविफलितंदुःखादिभिर्दारुणैर्भोगैःपल्लवितंजराकुसुमितंतृष्णालताभासुरं ॥ संसाराभिधवृक्षमात्मनिगडं
छित्वाविवेकासिनामुक्तस्त्वंविहरेहवारयापतिःस्तंभादिवोन्मोचितः ॥ ५४ ॥ इतिवा० सर्वैकत्वप्रतिपादनंसर्गः ॥ ३९ ॥

जगतोजन्मनात्मनःभेदाभावादित्याशयेनोक्तमुपसंहरति ॥ तस्मादिति ॥ सम्यग्ज्ञानवशात्परमार्थसत्यचित्स्वरूपबलात् आगमोवतारउत्पत्ति
रितियावत् अस्तुपदार्थानामवतारस्तैरात्मनःकथंसंसारप्राप्तिरिति ॥ तद्दर्शयति ॥ अवतीर्णानामिति ॥ अविद्यातत्रतदभिमानःतत्तुअज्ञानंअभिमा
नलक्षणंकालेनदृढतामेतिसंसारद्रुममेवनिर्वर्ण्यतदुच्छेदोपायमाह ॥ आशेति ॥ आशाभिर्मंजरितासंजातमंजरीका आकृतिर्यस्यदुःखादिभिर्वि
विधंफलितंप्रकृत्याचारुरित्यादिवत् भेदेप्रकृत्यादिस्यउपसंख्यानमितितृतीयालताःशाखाःवल्यश्च आत्मनोनिगडंबंधस्थानंशिष्टंस्पष्टं ॥ ५४ ॥ सर्गः ३९ ॥

वर्ण्यंतेजीवभेदानामिहोत्पत्तिरूपाधिभिः॥ तेषांतदुपधीनांचब्रह्मभावश्चविस्तरात्॥१॥ प्रश्नःस्पष्टः यद्यपिजीवभेदाना
मुत्पत्तिरुत्पत्तिप्रकरणेवर्णितेतिनपुनःप्रश्नार्हतथापिकरिष्यमाणास्थाक्षेपैस्योद्घाटनायविशेषबुभुत्सयाचपुनःप्रश्नोबोध्यः
१ अतएववसिष्ठःसंक्षिप्यतत्समाधिंप्रतिजानीतेउत्पद्यंतइत्यादिद्वाभ्यां॥२॥३॥ कल्पनाबीजप्राक्तनवासनोद्बोधस्यानियत

॥श्रीरामउवाच॥ उत्पत्तिःकथमेतेषांजीवानांब्रह्मणःपदात्॥ कियतीकीदृशीचेतिविस्तरेणावदप्रभो॥१॥ श्रीवसि
ष्ठउवाच॥ उत्पद्यंतेयथाचित्राब्रह्मणोभूतजातयः॥ यथानाशंप्रयांत्येतायथामुक्ताभवंतिहि॥२॥ यथाचपरिवर्द्धं
तेतिष्ठंत्यंतर्हितायथा॥ संक्षेपेणमहाबाहोशृणुवक्ष्यामितेनघ॥३॥ ब्राह्मीचिच्छक्तिरमलाकल्पयंतीयदृच्छया
सर्वशक्तिःस्वयंचेत्यंभवत्याकल्लनात्मकं॥४॥ कल्लनात्घनतामेत्ययत्किंचिदपिसास्वयं॥ संकल्पयतिपश्चात्तत्ता
मेतिमनःपदं॥५॥ मनःसंकल्पमात्रेणगंधर्वपुरवत्क्षणात्॥ ततोतीदमसत्दृश्यंब्राह्मीस्थितिमिवत्यजत्॥६॥
चित्स्वरूपंपरिकचच्छून्यमेवावतिष्ठते॥ यत्तत्दृश्यंस्थितंतस्यात्दृश्यमाकाशमेवतत्॥७॥

रूपनाशदर्शनाययदृच्छयेति॥ भाविदेहाद्याकारस्येषत्स्फुरणामाकल्लनानदात्मकं॥४॥ तस्यैवसम्यगहंभावेनस्फुरणंघनतांदृस
प्राप्यसाधनतेवमनोजीवोपाधिश्चेत्याशयेनाह॥ मनइति॥५॥ ब्राह्मींस्थितिंदृग्रूपतांदृश्याहंकारादिकल्पनयात्यजेदिव॥६॥ ततः
किंवृत्तंतदाह॥ चित्स्वरूपमिति॥ परितःकचत्स्वप्रकाशमपिचित्स्वरूपंपरागदृष्ट्यादृश्यमानंशून्यंरिक्तघटोदरसदृशमेवावभासतेतद
वस्थयास्थितंतत्दृग्रूपमेवसर्वजनदृश्यंतत्प्रसिद्धमाकाशमितिकथ्यतइत्यर्थः॥७॥

तस्मिन्नाकाशेचतुर्मुखादिस्थूलदेहस्यभुवनानांचकल्पनांचदर्शयति ॥ हत्वेति ॥ प्रजापतयोदक्षादयः ॥ ८ ॥ ९ ॥ इत्थंचोपाध्युत्पत्तेर्मिथ्यात्वे
तत्संयुक्ताजीवोत्पत्तिःसुतरांमिथ्येत्याशयेनाह ॥ चित्तमात्रेति ॥ १० ॥ तत्रशास्त्राधिकारिदौर्लभ्यप्रदर्शनायजीवांस्त्रिधाविभजते ॥ इहेति ॥ इह
भुवनेषुअभ्युदितज्ञानाःसनकादयः ॥ मध्येअंतरालिकदशायांस्थितामोक्षाययतमानाअपिपुनःपुनर्विघ्नैःस्खलंतिवैराग्यदार्ढ्याभा
वादित्यर्थः ॥ ११ ॥ कतर्हिशास्त्राधिकारप्रयोजकंवैराग्यंसुलभंतत्राह ॥ भुवीति ॥ निर्धारणेषष्ठ्यः ॥ एताःभरतखंडस्थाः ॥ १२ ॥ तासांवैराग्यसं

हत्वापद्मजसंकल्प्यंरूपंपश्यतिपद्मजं ॥ ततोजगत्कल्पयतिसप्रजापतिपूर्वकं ॥ ८ ॥ चतुर्दशविधानंतभूतजातसघुंघुमा
स्रष्टिरेवमियंरामचित्तनिर्मितमागता ॥ ९ ॥ चित्तमात्रमयीशून्याव्योममात्रशरीरका ॥ संकल्पमात्रनगरीभ्रांतिमात्रात्मिकास
ती ॥ १० ॥ इहकाश्चिन्महामोहाभूतानांजातयःस्थिताः ॥ काश्चिदभ्युदितज्ञानाःकाश्चिन्मध्येस्खलंतिहि ॥ ११ ॥ भुविसंबध्य
मानानांयासेनामुपदेश्यतां ॥ सर्वासांभूतजातीनांयाएतानरजातयः ॥ १२ ॥ बव्हाधयोदुःखमयामोहद्वेषभयातुराः ॥ तासांस
म्यक्प्रवक्ष्यामितावद्राजससात्विकी ॥ १३ ॥ यत्तदव्ययमनंतंब्रह्मसर्वव्यापिनिरामयं ॥ चिदाभासमनंताख्यमनादिविगतभ्र
मं ॥ १४ ॥ निष्पंदवपुषस्तस्यस्पंदःसत्तैकदेशतः ॥ घनतामेतिसोम्येब्धौचलतांचलतामिव ॥ १५ ॥

भवेहेत्यूनाह ॥ बव्हाधयइति ॥ तासांनरजातीनांमध्येतामसीनांशास्त्रमधिकारादुपदेशयोग्याराजससात्विकीः ॥ द्विचत्वारिंशेसर्गेजीवाव
तरणक्रमवर्णनेप्रवक्ष्यामीत्यर्थः ॥ १३ ॥ यदमृतंब्रह्मतच्चिदाभासंजीवरूपंयथाजातंतदपितत्रैवप्रवक्ष्यामीत्यर्थः ॥ १४ ॥ निष्पंदवपुषस्त
स्यपरमात्मनःसोम्येनिश्चलेब्धौचलतांतरंगाणांचलतांचाचल्यमिवसत्तैकदेशतोजीवभावेनस्पंदःयथाघनतामेतितथातद
पितत्रैवप्रवक्ष्यामीत्यर्थः ॥ १५ ॥ श्रीरामकृष्णगोविंद ॥ श्रीवासुदेवायनमः ॥ श्रीरामचंद्रगुरवेनमः ॥ श्रीवेदव्यासायनमः ॥

स्पंदः सत्तैकदेशत इतियदुक्तं तदयुक्तं अखंडपूर्णसत्तैकरसे ब्रह्मणि सत्तैकदेशस्य स्पंदस्य चासंभाव्यत्वादिति रामः शंकते॥ अनंतस्येति १६
जीवब्रह्मैक्यस्य वास्तव्यस्य व्युत्पादनायायमुपत्येकदेशस्पंदादिव्यवहारः शास्त्रे कल्पितः अतो न वस्तुवृत्ताश्रयेणास्यां विरोध उद्भा
वनीय इत्याशयेन वसिष्ठः उत्तरमाह॥ तेन जातमित्यादिना तेन निमित्तेन तत उपादानात्॥ १७ कुतो न परमार्थतस्तत्राह॥ विकारितेति

॥श्रीरामउवाच॥ अनंतस्यात्मतत्वस्य एकदेशः क उच्यते॥ कथं विकारितावास्या कथं वाद्ययविक्रमः॥ १६ श्रीवसिष्ठउवाच॥
तेन जातं ततो जातमितीयं रचना गिरां॥ शास्त्रसंव्यवहारार्थं न राम परमार्थतः॥ १७॥ विकारितावयवितादिक्सत्तादेशता
दयः॥ क्रमान संभवंतीशे दृश्यमानोदया अपि॥ १८॥ नं विना कल्पनैवान्या नास्ति नापि भविष्यति॥ कुतस्त्योक्रमशब्दा
र्थौ वृत्तयो व्यवहारजाः॥ १९॥ यायेत्कल्पना योर्थोयः शब्दो यो गिरांगणाः॥ तज्ज्ञात्तन्मयत्वाच्च तत्तत्सदमिवेष्यते॥ २०॥
तज्ज्ञः स एव भवति वह्नेर्वह्निरिवोत्थितः॥ जन्योयं जनकश्चायमित्यस्मात्भेदकल्पना॥ २१॥

देशताएकदेशता दृश्यमानोदयाः प्रत्यक्षेणोत्पद्यमानातयादृश्यमाना अपि॥ १८॥ यदि तत्र न संभवंति तर्हि जगतामन्यदेव मूलं कस्यतां त
त्राह तं विनेति॥ अन्यकल्पनाया अपि चित्प्रकाशं विना अयोगादित्यर्थः॥ हेतुकार्यै क्रमशब्दार्थौ व्यवहारजा उक्तयश्च कुतस्त्या इति विप
रिणाम्यते १९ शब्दो नामानि गिरांगणो वाक्यानि तन्मयत्वात्तन्मयत्वात् सद्वस्त्विव २०॥ एवं च सत्ताभेदाभावाद्भेदप्रत्ययो मिथ्यैवेत्याह
तज्ज्ञ इत्यादिना॥ २१॥ श्रीरामकृष्णवासुदेवमुकुंदमुरारयेनमः॥ श्रीगोविंदगोपालकृष्णायनमः॥ श्रीहरिहरयेनमः॥ ७९॥

कथं तर्हि दीपाद्दीपांतरमिदमुत्पन्नमिति व्यवहारस्तत्राह ॥ अयमिति ॥ एकस्यैव दीपस्य मायया द्विधा स्वरूपनिर्माणक्रियाशक्तेोयदाधिक्यं अतिशयस्तदेव जन्यंजनकमिति द्विधाभासतमित्यर्थः ॥ २२ ॥ शब्दार्थविक्लृवः नामरूपव्यवहारभ्रमः उक्तो वाङ्मात्रेस्मिन देवे परमात्मन्यस्मिन् वाचारंभणं विकारो नामधेयमिति श्रुतिः यतः प्रमितौ परिच्छेदे सति भिन्नतास्यादित्यर्थः ॥ २३ ॥ तज्जयाक्रियाशक्तिजन्ययैव मनःशक्त्या

अयमस्मात्समुत्पन्न इतीयं याजगत्स्थितिः ॥ आधिक्यं तत् क्रियाशक्तेोनन्यं जनकमेव वा ॥ २२ ॥ इदमन्यदिदं चान्यदिति शब्दार्थविक्लृवः उक्तावेवन देवेस्मिन्प्रमितौ भिन्नतायतः ॥ २३ ॥ तज्जयैव मनःशक्त्या स्वतःसंज्ञाप्रवर्त्तते ॥ दृढभावनया तस्मादिष्टोर्थः प्रतिपद्यते ॥ २४ ॥ अग्नेः शिखाया एकस्याद्द्वितीयाजनकेतिया ॥ उक्तिर्वै चित्रमेवेतन्नोत्यर्थेनास्तिसत्यता ॥ २५ ॥ नजन्यजनकाद्यास्ताःसंभवत्युक्तयःपरे ॥ एकमेवद्यनंतत्वात्किं कथं जनयिष्यति ॥ २६ ॥ उक्तेरेवस्वभावोयमुक्तेरुक्तिरनंतरं ॥ प्रतियोगिव्यवच्छेदसंख्याद्यर्थेनयुज्यते ॥ २७ ॥ ऊर्मिजालमिवांभोधौ परेयःपरिदृश्यते ॥ शब्दार्थकल्पनाकारस्तद्ब्रह्मैव विदुर्बुधाः ॥ २८ ॥ ब्रह्मचिद्ब्रह्म च मनो ब्रह्म विज्ञानवस्तु च ॥ ब्रह्मार्थो ब्रह्म शब्दश्च ब्रह्म चिद्ब्रह्मधावतः ॥ २९ ॥ ब्रह्म सर्वमिदं विश्वं विश्वातीतं च तत्सदं ॥ वस्तुतस्तु जगन्नास्ति सर्वं ब्रह्मैव केवलं ॥ ३० ॥ अयमन्यो यमन्योयं भागइत्यंबरात्मनि ॥ मिथ्याज्ञानविकल्पोक्तिवाचि सत्यार्थतात्र का ॥ ३१ ॥

स्वतः स्वभावत एव संज्ञा नाम विभागोपि प्रवर्त्तते इष्टोर्थो व्यवहारः प्रतिपद्यते संपद्यते ॥ २४ ॥ उक्तमेवार्थं उदाहृत्य दर्शयति ॥ अग्नेरिति ॥ २५ ॥ २६ ॥ प्रतियोगी स्वाश्रयतादात्म्यविरोधी व्यवच्छेदः भेदः संख्या द्वित्वादि ॥ २७ ॥ २८ ॥ कस्तर्हि सिद्धांतस्तमाह ब्रह्मेत्यादिना ॥ चित्सत्सगात्मा विज्ञानवस्तु बुद्धिवृत्तिभेदाः चित् ईश्वरः साक्षी अर्थप्रथा वा ॥ २९ ॥ ३० ॥ ३१ ॥ श्रीरामकृष्णगोविंद ॥ श्रीरामनारायणवासुदेव ॥ श्रीगोविंदमाधवमुकुंद ॥

वा॰री॰स्थि॰
॥९१॥

चतुर्थः॥

सिध्यति निसससिद्धकूटस्थे॥ ३२॥ विकल्पते स्त्रांसाप्राप्यते॥ ३३॥ ३४॥ ३५॥ भविष्यति बुद्धोप्रति शास्यति तत्रैव तदेव उदाहरिष्यामो निर्वाणप्रकर
णे॥ ३६॥ इत्थमस्यांपरमार्थतायां॥ अत्वंपूर्णब्रह्मभावेन॥ एकस्याप्यज्ञानस्य संशयच्छेदेः सत्र बहुत्व विवक्षया तत्तदज्ञानसंक्षये इतिवीप्सोक्तिः
३७॥ दृश्यंचक्षुषांदर्शनार्हंजगत्स्थावरादि॥ ३८॥ उक्तंसर्वमुपसंहरति॥ यदिति॥ कुदृष्ट्या अज्ञानदूषितदृष्ट्यायदिदंअखिलंजगदाततंसर्व

वह्नेः शिखेव जातेयं शिखेति मनसोभिधा॥ चापल्योद्य विकल्पश्रीर्वस्तुतस्यान्न सिध्यति॥ ३२॥ असत्यैव विकल्पोक्तिः सतस्भावो
विकल्प्यते नमोपहतदृष्टित्वात् द्विचंद्रज्ञानदोषवत्॥ ३३॥ सर्वस्मात्सर्वगात्तस्मादनंताद्ब्रह्मणः परात्॥ नान्यत्किंचित्संभव
तितद्रूपंचलदेवतत्॥ ३४॥ ब्रह्मतत्त्वं विना नेह किंचिदेवोपपद्यते॥ सर्वंचखल्विदंब्रह्मेत्येषैवपरमार्थतः॥ ३५॥ एवंप्रायश्च हेप्राज्ञ
सिद्धांतस्ते भविष्यति॥ तत्रैवोदाहरिष्यामः सिद्धांतार्थोक्तिपंजरं॥ ३६॥ इहाविद्यादिकाः केचिद्विधंते नेतरक्रमाः॥ ज्ञास्यस्यल
मशेषार्थस्तत्तदज्ञानसंक्षये॥ ३७॥ अवस्तुसंक्षयेवस्तुयथावस्तुप्रसीदति॥ यथाचदृश्यतेदृश्यंजगत्त्वेषात्मनः क्षये॥ ३८॥ यदि
दमखिलमाततंकुदृष्ट्या तदुपशमेतवराम निर्मलात्मे॥ अवितथपदनिर्मले भविष्यत्यवितथमेव न संशयोत्रकश्चित्॥ ३९॥ ब्र
ह्मैवेदंसर्वंजगदितिप्रतिपादनंसर्गः॥ ४०॥ श्रीरामउवाच॥ क्षीरोदकुक्षितुल्याभिः शीतलाभिर्मलदीप्तिभिः॥ नवोक्तिभिर्विचित्राभिर्गंभीराभि

नोविस्तरंभातितस्यसर्वस्यसहाज्ञानेननाशेसति निर्मलदर्पणाभे अवितथे परमार्थभूते परमपदे निर्मले अवितथं तदेव भविष्यति स्थास्यति
३९॥ इतिश्रीवा॰स्थि॰ चत्वारिंशोध्यायः॥ ४०॥ कल्पनादिविशेषाणां माययामूलमिहोच्यते॥ दुर्वचासाचकिंस्यैवनविचिंत्यामषेत्यपि॥ १॥ पूर्वस
र्वत्रकालत्वैवमनआदिद्वैतकल्पनायामूलमित्युक्तं इदानींनिर्विकारेऽद्वयकल्पनायाः निमित्तमसंभावयंस्तत्सद्गुरुश्रीरामोगुरोरादराय॥ प्रा
क्तनोक्तीः प्रशंसमानः प्रथमंस्वव्यामोहमुद्गिरीति॥ क्षीरोदेतिद्वाभ्यां॥ क्षीरोदस्यकुक्षिगर्भस्तेनतत्प्रसूतश्चंद्रोलक्ष्यते चंद्रतुल्याभिरित्यर्थः॥

॥९१॥

आं ध्यंव्यामोहतमःप्रावृषिल्लोल्लान्यन्नायिय स्मिन् ॥ २ ॥ अनंतत्वादेवाप्रमेयस्य प्रमाणापरिछेद्यस्य सर्वस्य पूर्णस्य भास्वतः स्वतः सदाप्र
थमानस्य न अस्तमितः सारः परमार्थस्वरूपं प्रथा यस्य ॥ तथाच प्रथमानेऽद्वितीयपूर्णस्वभावे परिछिन्नकल्पना त्मको विकारो वस्तुतः
कल्पनया वा न संभाव्य इति ॥ तत्र हेतुर्वाच्य इत्यर्थः ॥ ३ ॥ न वायं व्यामोहो न मद्वाक्यदोषात् किं तु ते तात्पर्यानवधानदोषादेवेति दर्शयन् वसिष्ठः
समाधत्ते यथाभूतेत्यादिना ॥ यथाभूतो यथास्थितो अर्थ एव वाक्यार्थो यासां ॥ असामर्थ्यपदानां आकांक्षायोग्यतासन्निधिराहित्यं वैरूप्यं तु अवांतर

क्षणामोध्यमिवाज्ञो भि क्षणं यामि प्रकाशतां ॥ शांतातपक्लवः प्रावृड्लोल्लापन्न इव वासरः ॥ २ ॥ अनंतस्याप्रमेयस्य सर्वस्यैकस्य
भास्वतः ॥ अनस्तमितसारस्य कल्पना कथमागता ॥ ३ ॥ श्रीवसिष्ठ उवाच ॥ यथाभूतार्थवाक्यार्थाः सर्वा एव ममोक्तयः ॥ नासम
र्थविरूपार्थाः पूर्वापरविरोधदाः ॥ ४ ॥ ज्ञानदृष्टौ प्रसन्नायां प्रबोधे विततोदये ॥ यथावत् ज्ञास्यसि स्वच्छो मद्वाग्दृष्टिबलाबलं
॥ ५ ॥ उपदेश्योपदेशार्थशास्त्रार्थप्रतिपत्तये ॥ शब्दार्थवाक्यरचनाक्रमो मातन्मयो भव ॥ ६ ॥ यदा पुरा ज्ञास्यसि तत्सत्यमत्यंतनिर्म
लं ॥ वाच्यवाचकशब्दार्थभेदं त्यक्ष्यसि वै तदा ॥ ७ ॥ भेदरूढ्वाक्प्रपंचोयमुपदेश्येषु कल्पितः ॥ उपदेश्योपदेशार्थशास्त्रार्थप्रति
पत्तये ॥ ८ ॥ शब्दार्थवाक्प्रपंचोयमुपदेश्येषु कल्पितः ॥ सदाज्ञेषु न तज्ज्ञेषु विद्यते पारमार्थिकः ॥ ९ ॥

वाक्यानां महावाक्यार्थपर्यवसानं ॥ विरोध उपक्रमोपसंहारयोः परस्परव्याघातस्तैर्वर्जिता इत्यर्थः ॥ ४ ॥ कदा तर्हि ममतात्पर्यावधानं स्यात्तत्राह ज्ञानदृ
ष्टाविति मद्वाचां तत्प्रयुक्त नदृष्टेश्च इतरवाग्दृष्ट्यपेक्षया बलाबलं प्राबल्यं ॥ ५ ॥ ननु यथा स्वमाता वंध्या स्वमुखे जिह्वा नास्ति मूको हमिति वा वाक्यं
हेतु स्वसत्ताबाधितार्थकं तथा नेह नानास्ति किंचन एकमेवाद्वितीयमित्यादि श्रुतिशास्त्र तद्वाक्यानि चेति कथं विरोधपरिहार इति चेत्तत्राह ॥ उपदेश्येति ॥ अ
सत्यस्यापि स्वप्नादेः सत्यार्थप्रतिपत्त्युपायतादर्शनान्मिथ्याभूतशब्दार्थवाक्यरचनाक्रमोपि सत्यशास्त्रार्थप्रतिपत्तिहेतुः संभवतीति मिथ्याभूतनयात्तन्मयो
भ्रममयो नाभवेत्यर्थः ॥ ६ ॥ कियत्कालं तर्हि शब्दार्थवाक्यरचनाक्रमोनुसर्तव्यस्तत्राह यदेति ॥ यावद्वाक्यार्थापरोक्षोदयमिति भावः ॥ ७ ॥ ननु न रत्तत्र

बा॰टी॰सि॰
१९२

प्रागुक्ताकल्पनाचित्तश्श्रेयोनुसुखतालन्निमित्ते मल्ले पूर्वसंस्कारकर्मणी मोहोऽविद्या ॥ १० ॥ सिद्धांतावसरे असंभावनोच्छेदानंतरं निर्वाण प्रकरणे ॥ ११ ॥ तर्हीदानीं तत्तो वाक्यप्रपंचस्ते किमर्थस्तत्राह ॥ वाक्यप्रपंचमिति ॥ अज्ञानं साधनाज्ज्ञानं अतुल्यंतमो मूलाज्ज्ञानं चान्योन्यं परस्परसहायेन भ्रांतिसहस्रशाखाप्ररोहैरूदितं प्ररूढं भेत्तुं तत्साधने बुधलं कर्तुं च न शक्यत इत्यर्थः ॥ १२ ॥ तर्हि उपदेशवाक्यप्रपंचस्य तज्जन्यविद्यायाश्चाविद्याकार्यत्वाविशेषात्कथमविद्याविरोधित्वात्स्वविरोधिविद्यां वा कथमविद्या प्रार्थयेदिचेत्तत्राह ॥ अविद्ययैवेति ॥ उत्तमयाबहु

कल्पनामल्पमोहादि किं चिन्मात्मनि विद्यते ॥ नीरागं ब्रह्मपरमं तदेवेदं जगत्स्थितं ॥ १० ॥ एतद्धि चित्ररूपाभिर्युक्तिभिर्बहुशः पुनः ॥ विस्तरेणैव वक्तव्यं सिद्धांतावसरे नघ ॥ ११ ॥ वाक्यप्रपंचं विना लेतद्ज्ञानमतुल्यंतमः भेत्तुमन्योन्यमुदितं यत्नं कर्तुम शक्यते ॥ १२ ॥ अविद्ययैवोत्तमया स्वात्मनाशोद्यमेच्छया ॥ विद्या सा प्रार्थ्यते राम सर्वदोषापहारिणी ॥ १३ ॥ शाम्यति ह्यस्त्रमस्त्रेण मल्लेन क्षाल्यते मल्लः ॥ शमं विषं विषेणैति रिपुणा हन्यते रिपुः ॥ १४ ॥ ईदृशी राम मायेयं या स्वनाशेन हर्षदा ॥ न लक्ष्यते स्वभावोस्याः प्रेक्ष्यमाणैव नश्यति ॥ १५ ॥ विवेकमाछादयति जगंति जनयत्यलं ॥ न च विज्ञायते केषापश्याश्चर्यमिदं जगत् ॥ १६ ॥ अप्रेक्ष्यमाया स्फुरति प्रेक्षिता तु विनश्यति ॥ मायेयमपरिज्ञायमानरूपैव वल्गति ॥ १७ ॥

जन्मसंचितसुकृतविशुद्धांतःकरणाकारपरिणतया ॥ तथा च स्वशरीरविरोधेपि स्वात्मसहितत्वाद्विवेकिन्याः पतिव्रतायाः पतिचितारोहणेनेव तत्स्वार्थनोपपत्तिरिति भावः ॥ १३ ॥ विरोधित्वामुपपादयति शाम्यतीति मल्लेन क्षारेण ॥ १४ ॥ तस्याः स्वनाशकत्वेकर्मकर्तृत्वाविरोधमाशंक्य क्रियायां सविरोधो न ज्ञाने नाज्ञानबाधे इत्याशयेनाह ईदृशीति ॥ १५ ॥ तस्या असंभावितानंतकार्यदर्शनादपि न विरोधसंभावने त्याशयेनाः

चतुर्थः

ना॰ विवेकभित्तिका १९२

१९२

येनहेतुनाअसौअक्षराख्यामायातस्मिन्नक्षमिन्नपदेआत्मनिक्षरात्मकंआततंसर्वतोविस्तृतंतन्वानाआस्तेतेनहेतुना। अ
सोक्षरात्क्षरलक्षणपुरुषातीतआत्मापुरुषोत्तमइत्यर्थः॥ १७ एषमायापरमार्थेनवस्तुत्वेनतुनास्तिएवंभावनयाइच्छयाआचार्यश्रु
तितर्कस्वानुभवाभ्यासप्रदीपितयात्वंज्ञः नतुवित्तभूत्वाज्ञेयंस्वात्मवास्तवरूपंविस्मृतंकंठचामीकरवत्संप्राप्तःसन्अस्याःमदुक्तेराशयंज्ञा
स्यसिसंभावयिष्यसि॥ २० इदानींतुमद्वचनविश्वासासरोक्षकत्वंपएवमदुक्तोर्थोग्राह्यइत्यालयावदिति॥ २१ निश्चयस्यनिश्चलतासंपादने

अहोनुखलुचित्रेयंमायासंसारबंधनी॥ असत्यैवास्तिसत्येवस्वज्ञानंविहितंतया॥ १८ अक्षमिन्नपदेतस्मिंस्तन्वानाभेदमाततं॥
संसारमायायेनासौतेनासौपुरुषोत्तमः॥ १९ नास्त्येषापरमार्थेनत्वेनंभावनयेच्छया॥ ज्ञोभूत्वाज्ञेयसंप्राप्तौज्ञास्यस्यस्याशयं॥
२० यावत्तुनप्रबुद्धस्त्वंतावन्मद्वचसेवतं॥ निश्चयोभवतद्वामोनास्त्यविद्येतिनिश्चयः॥ २१ यदिदंदृश्यतांयातंमानसंमननंमहत्॥
असन्मात्रमिदंयस्मान्मनोमात्रविजृंभितं॥ २२ सत्तब्रह्मेतियस्यांतर्निश्चयःसोपिमोक्षभाक्॥ चलाचलाकृतिर्यायादृष्टिरा
बद्धभावना॥ २३ सासमग्रजगज्जातखगबंधनवागुरा॥ यःस्वप्नभूमिवज्ज्ञातमसत्संदेकनिश्चयः॥ २४

उपायमाह यदिदमिति मानसंमनोवृत्तिरूपंयदिदंदृश्यतांसाक्षिप्रत्ययवेद्यतांयातंसर्वव्यवहारबीजत्वान्महत्मननंअतीतानागता
नेकार्थप्रतिसंधानंइदंअसन्मात्रंअसदेवेत्यर्थःतत्रहेतुमाहयस्मादिति॥ २२ मननिरासेमनोनिरिंधनाग्निवत्स्वयमेवशाम्यतीति
ब्रह्मसन्मात्रपरिशेषेप्रागुक्तनिश्चयनैश्चल्यात्पुरुषार्थसिद्धिरित्याशयेनाहसत्तदिति॥ उक्तमर्थंस्थिरीकर्तुंबाह्यार्थमननदृष्टीनांबंधहेतुतामा
ह चलाचलेति॥ २३ समस्तेजगतिभूतखगानांजीवपक्षिणांअसतिअनागतातीतेसतिवर्तमानेचेतिद्विरूपेपिमननविषयेसदेवेदमसदेवे
दमितिवाएकरूपोदृढनिश्चयोयस्यतथाविधोयोधिकारीजगत्स्वप्नभूमिवत्प्रतीतिमात्रमितिपश्यतिसननिमज्जतीत्यर्थः॥ २४ श्रीकृष्णायनमः

कस्तर्हि निमज्जतीत्यत आह यस्येति । अस्वरूपासु मिथ्याभूतासु देहेंद्रियादिद्वैतभावनासु आत्मभावना अहमिति बुद्धिः ॥ २५ मिथ्यात्मदर्शि
नस्तस्य अविद्यामज्जनमेवदंडमित्याशयेनाह अस्वरूपेति ॥ २६ तर्हि तत्वविदां पूर्वापरार्थभावनाभावात्तत्व्यवहारासिद्धिरित्याशंक्याह भा
वनेति । शब्देषु नामसु शब्दार्थेषु पुरुषेषु च स्फाटिकवद्रंजनता क्वाचित्कानुषंगः ॥ २७ ॥ २८ यद्यविद्यादिनास्त्येव तर्हि किमर्थं शास्त्रमिति

जगत्यस्य सत्कात्मानसङ्गः खो निमज्जति । यस्येता स्वस्वरूपासु भावनास्वात्मभावना ॥ २५ अस्वरूपस्य तस्यापि साद्यविद्ये
व विद्यते । विकारितादयो दोषा न केचन महात्मनि ॥ २६ परमात्मनि विद्यंते पयसीवेह पांसवः । भावना शब्द शब्दार्थरंजने यं
जगद्भ्रता २७ व्यवहारार्थमुसन्नाव्यतिरिक्ताचनात्मनः । अनेनव्यवहारेण विनेतः शास्त्रदृश्ययः २८ संस्थितिं नाधि
गच्छंति पटाइव वितन्तवः ऊह्यमानो ह्यविद्यायामात्मनेहोपलक्ष्यते ॥ २९ आत्मज्ञानादतेतच्च शास्त्रार्थात्समवाप्यते अवि
द्यासरितः पारमात्मलाभाद्दते क्विल ३० रामनासाद्यते तद्विपदमक्षयमुच्यते यतः कुतश्चि ज्जातेयमविद्यामल्लदायिनी ३१ नू
नं स्थितिमुपायाना समासाद्य पदं स्थिता कुतो जातेयमिति ते राम मास्तु विचारणा ॥ ३२ इमां कथमहं हन्मीत्येषाते स्तु विचारणा
अस्तंगतायां क्षीणायामस्यां ज्ञास्यसि राघव ३३ यत एषा यथा चैषा यथा नष्टेत्यखंडितं वस्तुतः किल नास्त्येषा विभात्येषा न वेक्षिता ३४

चेत्तत्राह ऊह्यमान इति अविद्यायां ऊह्यमानः आत्मा आत्मज्ञानादतेनैव उपलक्ष्यते अनुभूयते ॥ २९ तच्च आत्मज्ञानं तु ३० नन्वियमविद्या
परमात्मनि कुतो जाता तत्राह यत इति कुतश्चिदिति ३१ ३२ तर्हि इयमनादिरुत सादिः आद्यो आत्मवन्नित्या स्यात् द्वितीये तु हेतुर्वाच्यः एवं
किमसत्या उत सत्या आद्ये ज्ञानादनिवृत्तिः द्वितीये संवादिव्यवहारहेतुत्वानुपपत्तिरित्याद्याशंकासहस्रस्यापि तन्नाशादेव निवृत्तिरित्या
शयेनाह अस्तंगतायामिति ॥ ३३ ॥ ३४ श्रीरामकृष्णगोविंदवासुदेवपरमात्मनेनमः ॥ श्रीरामायनमः श्रीवेदव्यासायनमः

असतः सत्यत्वद्विमर्शः स्वात्मपुरुषगोत्रचिंतावद्दृश्येवेत्याशयेनाह असत इति ॥ ३५ तर्हि स्वात्मपुरुषवधो योगवत्तच्छिष्टानौ
यत्नातिशयो रक्ष्येत्याशंक्य तद्विलक्षणामनर्थप्राबल्यमाह अपीति ॥ ३६ ॥ ३७ ॥ ३८ उपसंहरति भयेति हृदयपदेन तत्स्था आत्मद
ष्टिरूपत्वलक्ष्यते ॥ तस्या मोहलक्षणां ध्यहे तूनां महतां पटरत्वं तत्कुस्थानीयानां स्थूलदेहादीनामंकुरवत्कारणभूतां कुदृष्टिमविद्यां ॥ ३९

असतो यांनतां सत्यरूपी जानातु कः कुतः ॥ जातेयं प्रौढिमापन्ना दोषायैवाततात्मकतिः ॥ ३५ बलात्मपाशयत्येनां परिज्ञा
स्यसि वै ततः ॥ अपि शूरा अपि प्रज्ञास्तेन संति जगत्त्रये ॥ ३६ ॥ अविद्यया यया पुरुषान नाम विवशीकृताः ॥ तदस्या रोगशा
लायायत्नं कुरु विनाशने ॥ ३७ यथैषा जन्ममृदुःखेषु न भूयस्त्वां नियोक्ष्यति ॥ सर्वापदामेककरवीम ज्ञानतरुमंजरी ॥ ३८
अनर्थसार्थजननीम विद्यामलमुद्धर भयविषादपुराधिविपत्सदां हृदयमोहमहापटलांकुरां ॥ परशमुपास्य कुदृष्टिमिमां
बलाद्भववार्णवपारमुपागतः ॥ ३९ अविद्याकथनं सर्गः ॥ ४१ श्रीवसिष्ठ उवाच ॥ कुपितस्यास तोप्यस्यप्रेक्षामात्रा विना
शिनः ॥ अविद्याविततव्याधेरौषधं शृणु राघव ॥ १ यां तां कथयितुं जातिरामराजससात्विकीं ॥ मनोवीर्यविचारार्थप्रस्तुतो
स्मीहतां शृणु ॥ २ यत्तदप्यमलं ब्रह्म सर्वव्यापि निरामयं ॥ चिदाभासमनंताख्यमनादि विगतभ्रमं ॥ ३ ॥

इति श्रीवासिष्ठे एकचत्वारिंशः सर्गः ॥ ४१ अनंतशक्तेश्चिद्ब्रह्मणो वासनाघनताक्रमात् ॥ वर्ण्यते विस्तरेणात्र जीवावतरणक्रमः ॥ १
एवमविद्यांव्याधिमुपवर्ण्य तच्चिकित्सोपायं बहुभिः सर्गैः वक्तुं प्रतिजानीते ॥ कुपितस्येति ॥ १ तदर्थं जीवावतरणक्रमं वर्णयितुं चत्वारिंशे
सर्गे तां सम्यक् प्रवक्ष्यामि तावद्राजससात्विकीरिति प्रतिज्ञातं तच्छेषवर्णनमिदमिति स्मारयति यां तामिति ॥ २ यत्तदपीति श्लो
कस्तत्रैव व्याख्यातः ॥ ३ ॥ ६९ ॥

स्पंद इति स्पंदश्चिदाभासः प्रदेशादौपाधिकैकदेशात् यथा सौम्य एवाविशृंखलनात्तरंगादिघनतामेतीति तद्वत् ४ शक्तिवैचित्र्यापांसत्वादिगुणोपचयापचयमिश्रणतारतम्यकृततादुपचयादेश्वराजसक्रियाशक्तिमूलकत्वात्स्वयमेव क्रियाशक्त्युद्भवं दर्शयति अंतरब्धेरिति ५ स्वतः कूटस्थेप्याध्यासिकचलनाविरोधमाह आत्मन्येवेति ६ स्पंदशक्तेरस्पंदशक्त्याप्यविरोधे दृष्टांतमाह दीप इति

चित्स्पंदवपुषस्तस्य स्पंदस्तस्माच्चिदेव हि प्रदेशात् घनतामेति सौम्यो विशृंखलनादिव ४ अंतरब्धेर्जलं यद्वत्स्पंदास्पंदवदीहते सर्वशक्तिस्तथैकत्र गच्छति स्पंदशक्तितां ५ आत्मन्येवात्मना व्योम्नीव यथा सरति मारुतः तथेहात्मात्मशक्त्यैव स्वात्मन्येवैति लोलतां ६ स्वशिखास्पंदशक्त्यैव दीपः सौम्यो यथोन्नतं एति तद्वत्स्वात्मात्मस्वेव पुष्पि वल्गाति ७ जलांतरेंबुधिर्यद्वदुल्लसद्वारीवचंचलः सर्वशक्तिवपुष्येव तथा स्पंदविलासवान् ८ यथोल्लसति भास्वत्कैः क्वचत्कनकसागरः तथात्मनि परिस्पंदैः स्फुरत्यक्षैश्चिदार्णवः ९ लक्ष्यते मोक्तिकस्पंदो यथा व्योम्नि दृशो दृशी तथाभातिलसद्रूपा चिद्घनैश्चिन्महांबरे १० किं चिद्गुप्तिरूपोसौ चिद्घनैश्चिन्महार्णवे तन्मयी चित्स्फुरत्यच्छा तत्रैवोर्मिरिवार्णवे ११

सौम्यः वाय्वाद्यविक्षिप्तः उन्नतं ऊर्ध्वदेशं एति वल्गाति चलति प्रकाशतीति यावत् ७ शरदातपादिसंपर्कोल्लसति स्फुरति वारिप्रदेशे चंचलइवन सर्वतस्तद्वदिति कल्प्यतैकदेशे चलनारोपदृष्टांतः ८ परमार्थतोन्यथैव सतः कल्पितरूपांतरेणास्फुरणेप्ययमेव दृष्टांत इत्याशयेनाह यथेति भासा शरदातपानां चक्रैः समूहैः क्वचन दीप्यन् द्रवीभूतकनकमिव सागरः स्फुरति अक्षैः ऐंद्रियकप्रकाशैः ९ १० अतींद्रियेपेंद्रिकरूपस्फुरणोपितमात् लक्ष्यत इति अदृशी अतींद्रियैः ११ श्रीरामकृष्णगोविंद श्रीवासुदेवपरमानंद

ऐंद्रिकचिच्छक्तिः परमार्थचिदेव जन्यतारोप एव केवलमोपाधिक इत्याशयेनाह ॥ आत्मन इति ॥ अव्यतिरिक्तैवेतिच्छेदः ॥ आलोक
कोटरे सूचीपाशादिकल्पितलोकच्छिद्रे यत्नतां उपाधिपारवश्यं ॥ १२ ॥ अत एतस्याः कालिकपरिच्छेदः शक्तिशक्तिमतादिभेदविभा
वनं चोपपन्नमित्याशयेनाह क्षणामिति ॥ १३ ॥ शान्त्यांतराणां चिच्छक्त्युदयाधीनैव प्रवृत्तिर्न स्वातंत्र्येणेत्याह ॥ उदितेति वयस्याः सखी:
१४ एवं स्वभावं विदित्वा अनाद्यंतपदे स्थिता भवति ॥ अविभाविता सती एवमुक्तत्वक्षणांकल्पितरूपं भ्रांत्यास्वस्वभावं गृहीत्वा परिमि

आत्मनो व्यतिरिक्तैवव्यतिरिक्तैव तिष्ठति ॥ आलोकश्रीरिवालोककोटरे यत्नतां गता ॥ १२ ॥ क्षणं स्फुरति सा देवी सर्वशक्ति
तया तया ॥ चेततिस्वांस्वयं शक्तिं कलेंदोः शीततामिव ॥ १३ ॥ उदितैषा प्रकाशाख्या चिच्छक्तिः परमात्मनः ॥ देशकालक्रियाश
क्तीर्वयस्याः संप्रकर्षति ॥ १४ ॥ स्वस्वभावं विदित्वैव मनाद्यंतपदे स्थिता ॥ रूपं परिमितेवासौ भावयत्यविभाविता ॥ १५ ॥ यदे
वं भावितं रूपं तया परमसत्तया ॥ तदैवैनामनुगतानाम् संख्यादिका दृशः ॥ १६ ॥ चिदेवैतदवस्थैवव्यतिरिक्ता तथात्मनः ॥ अ
नंतानङ्गैवाम्बु लहरीव महार्णवात् ॥ १७ ॥ यथा कटककेयूरे भेदो हेम्नो विलक्षणाः ॥ तथात्मनश्चितो रूपं भावयंत्याः स्वमां
शिके ॥ १८ ॥ यथा दीपेन दीपानां जातानामात्मनां तथा ॥ देशकालकलामात्रभेदः स्वाभाविकस्थितेः ॥ १९ ॥

तापरिच्छिन्नास्मीति स्वात्मानं भावयति दृढं वासयतीत्यर्थः ॥ १५ ॥ नामेति लथा च श्रुतिः प्राणान्नेव प्रायो नाम भवति वदन्वाक्पश्यंश्चक्षुरिति सं
ख्यारूपभेदाः आदिपदादिष्टानिष्टादिसर्वं जगत्कल्पनार्हत्वंते ॥ १६ ॥ एवंचितिकल्पितस्य सर्वस्य चिन्मात्रत्वेनैव परमार्थरूपमिति फलितमित्याह
चिदेवेत्यादिना ॥ आत्मनः सद्रूपात्व्यतिरिक्ता कल्पनायतोऽवस्थैव भवतीति शेषः ॥ १७ ॥ आंशिके अंशकल्पनाधीनं सर्वं जगद्रूपमित्यर्थः ॥ १८
वर्तिकाद्युपाधिदेशेन देशः तत्कालेम कालस्तत्कालाभिस्तदवयवैः कालश्चेति तन्मात्रप्रयुक्तो भेदो न दीपाग्निस्वरूपेतथा चित्तेरपि उपाधिस्वभावा

दृष्टांतोक्तं चित्युपपादयति देशेति ॥ २० ॥ अत एव क्षेत्रोपाधिकल्पनाधीनं चित्तः क्षेत्रज्ञत्वं प्रसिद्धमित्याह विकल्पेति ॥ २१ ॥ २२ ॥ क्षेत्रक
ल्पनाक्रमं दर्शयति वासनमित्यादिना निर्णीता अध्यवसिता अत एव कल्पनांतरकलंकी ॥ २३ ॥ २४ ॥ देहं देहांतरं गच्छंतीति विपरिणाम्या
नुषज्यते ॥ २५ ॥ चित्ततां बाह्यार्थचेतनसमर्थतां ॥ २६ ॥ फलं वदरादि अन्यतां वैलक्षण्यं अवस्थया रूपरसपरिणामादिगुणपरावृत्त्या

देशकालपरिस्पंदशक्तिसंदीपितात्म चित्त ॥ संकल्पमनुधावंती प्रयाति कलनापदं ॥ २० ॥ विकल्पकलिताकारं देशका
लक्रियास्पदं ॥ चित्तो रूपं महाबाहो क्षेत्रज्ञ इति कथ्यते ॥ २१ ॥ क्षेत्रं शरीरमित्याहुस्तद्वेत्ति वेत्सु खंडितं ॥ सबाह्याभ्यंतरं
तेन क्षेत्रज्ञ इति कथ्यते ॥ २२ ॥ वासनां कल्पयन्सोपि यात्यहंकारतां पुनः ॥ अहंकारोपि निर्णीता कलंकी बुद्धिरुच्यते ॥ २३ ॥
बुद्धिः संकल्पकलिता प्रयाति मनसः पदं ॥ मनो घनविकल्पं तु गच्छतींद्रियतां शनैः ॥ २४ ॥ पाणिपादमयं देहमिंद्रिया
णि विदुर्बुधाः ॥ देहे सोज्ञायते लोके सूयते पि च जीवति ॥ २५ ॥ एवं जीवो हि संकल्पवासनारज्जुवेष्टितः ॥ दुःखजालपरी
तात्मा क्रमादायाति चित्ततां ॥ २६ ॥ क्रमेपापाकवशतः फलमेति यथान्यतां ॥ अवस्थयैव नाहत्या जीवो मलवशात्तथा ॥
॥ २७ ॥ जीवोहंकारतां प्राप्तस्त्वहंकारश्च बुद्धितां ॥ संकल्पजालकलितां मनस्तां बुद्धिरागता ॥ २८ ॥

ननु आकृत्या वदरत्वादि जात्या न तथा जीवः क्षेत्रज्ञोपि अविद्यामलपरिणामवशाद्वैलक्षण्यं याति नापरिणामि चित्स्वभावेनेत्यर्थः
॥ २७ ॥ एवं क्षेत्रसिद्धिमुपवर्ण्य जीवस्याहंकारादिक्षेत्रतादात्म्यसंसर्गाध्यासलक्षणं बंधक्रमेणाह जीव इत्यादिना ॥ २८ ॥ श्रीराम

संस्थानं संस्था स्त्रीपुत्रादिशरीराकारस्तस्य ग्रहणेन तदाकारवृत्तिद्वारा संस्कारात्मना धारणेन सरं सर्वैः सफलैरपि शब्दादिफ लैरपि ई हितैर्मनोरथैः प्रतियोगिष्योऽव्यवच्छिन्नाव्याहृतात्प्राप्तिरर्थग्रहो यस्य परिच्छिन्नतुच्छविषयासक्तं भवतीत्यर्थः ॥ २९ तदास क्तौ तान्विषयान्पुनः पुनः स्मरन् चित्तं रागद्वेषादिदोषैरास्कंद्यत इत्याह इच्छाद्या इति ॥ अनुधावंत्यनुसरंति ॥ ३० इति उक्तक्रमेणा राग

मनो हि संकल्पमयं संस्थाग्रहणात्सरं ॥ प्रतियोगिव्यवच्छिन्नप्राप्तिसर्वैरपीहितैः ॥ २९ इच्छाद्याः शक्तयश्चैतो गावो वृष मिवोन्मदं ॥ अनुधावंति दोषाय सरितः सागरं यथा ॥ ३० इति शक्तिमयं चेतो घनाहंकारतां गतं ॥ कोशकारकृमिरिव स्वेच्छया याति बंधनं ॥ ३१ स्वसंकल्पानुसंधानापाशैरिव नयन्वपुः ॥ कष्टमस्मिन्स्वयं बंधमेत्यात्मा परितप्यते ॥ ३२ बद्धमस्मीति कल्प यद्विद्यात्वं जडन्ध्रुवैः ॥ अविद्या जनयत्यंतर्जगज्जंगलराक्षसी ॥ ३३ स्वसंकल्पितत न्मात्रज्वालाभ्यंतरवर्तिच ॥ परां वि वशतामेति श्रृंखलाबद्धसिंहवत् ॥ ३४ विचित्रकार्यकर्तृत्वमाहरद्वासनावशात् ॥ स्वेच्छामात्रानुरचितादशाश्चानुपतन्न या ॥ ३५ ॥ क्वचिन्मनः क्वचिद्बुद्धिः क्वचित् ज्ञानं क्वचित्क्रिया ॥ क्वचिदेतदहंकारः क्वचित्पुर्यष्टकं स्मृतं ॥ ३६ ॥

द्वेषादिशक्तिप्रचुरं चेतः शाखाप्ररोहशतकोटिभिरभिमानच्छध्यायनाहंकारतां गतं सत् ॥ ३१ पाशैर्बडिशजालादिपाशैः स्ववपुर्मत्स्यवन्नय न्मत्स्यादिरिव एवम्प्राप्य आत्मा मनः प्रकृतत्वात् ॥ ३२ अस्मीति कल्पयन् परमार्थसत् अस्मि इति पश्यन् विद्यात्वं पारमार्थिकमात्मरूपं ज हत् स्वेच्छयापि विचारयदि ति यावत् अविद्या जन्ममरणादि भ्रांतिपरंपरां ॥ ३३ तन्मात्राणि शब्दादिविषयास्तदिंधना रागादिज्वाला स्तदभ्यं तरवर्तिमनः चकारः पूर्वोक्तविद्यांतसमुच्चयार्थः ॥ ३४ विचित्राणां विहितनिषिद्धनानारूपाणां कार्याणां कर्मणां कर्तृत्वं आहरत् यत्नैः संपाद यत् दशाः नानायोनिनरकादिदुर्दशाः वक्ष्यमाणा मननादिदशाश्च अनुपतन् विवशतामेतीति प्राक्तनेनान्वयः ॥ २५ तस्यैव मननादिदशाभेदैर्म

॥ नक्षादिशस्वसाकंनानसेसारा ॥ किविशिष्टा ॥ ३६

३७॥ ३८॥ तथाचबद्धत्वमपितस्यैवनात्मन इतिप्रपंचयति॥ तदेतदित्यादिना॥ ३९॥ ४०॥ सुष्ठुविस्मृतंस्वोत्पत्तिनिमित्तंपरमात्मपदंयेन॥ ४१॥
४२॥ स्वस्यात्मनोदृश्यमपिघ्रनात्मत्वेनज्ञातुंयोग्यमपिदुर्विवेकत्वेनदुरुद्धरत्वाच्छैलेंद्रसमेनभारेणागौरवेणाभयावहंविषमयंदुर्द्रुमंदुष्टवृक्षं॥ ४३॥

क्वचित्सदसतिरिक्तंक्वचिन्मायेतिकल्पितं॥ क्वचिन्मलमितिप्रोक्तंक्वचित्कर्मेतिसंस्थितं॥ ३७॥ क्वचिद्बंधमितिख्यातंक्वचिच्चित्तमितिस्फुटं॥ प्रोक्तंक्वचिदविद्येतिक्वचिदिष्टेतिसंस्थितं॥ ३८॥ तदेतदावद्धमिहचित्तंराघवदुःखितं॥ तृष्णाशोकसमाविष्टंरागायतनमातुरं॥ ३९॥ जरामरणमोहांतर्भविभावनयाहतं॥ ईहितानीहितैर्ग्रस्तमविद्यारागरंजितं॥ ४०॥ इच्छासंस्मितिाकारंकर्मवृक्षनवांकुरं॥ सुविस्मृतोत्पत्तिपदंकल्पितानर्थकल्पितं॥ ४१॥ कोशाकारवदाबद्धंशोकाकारपदंगतं॥ तन्मात्रवृंदावयवमनंतनरकातपं॥ ४२॥ स्वदृश्यमपिशैलेंद्रसमभारभयावहं॥ जरामरणशाखाढ्यंसंसारविषदुर्द्रुमं॥ ४३॥ इमंसंसारमखिलमाशापाशविधायकं॥ दधदंतफलैर्हीनंवटधानावटंयथा॥ ४४॥ चिंतानलशिखादग्धंकोपाजगरचर्वितं॥ कामाब्धिकल्लोलहतंविस्मृतात्मपितामहं॥ ४५॥ मरगंयूथादिवभ्रष्टंशोकोपहतचेतनं॥ पतंगकमिवज्वालादग्धंविषयपावके॥ ४६॥ छिन्नमूलमिवांभोजंपरमांम्लानिमागतं॥ छिन्नागमात्मनःस्थानाद्विशेषोंसंगदुःस्थितं॥ ४७॥ विषयादिषुमध्यस्थंचित्ररूपेषुशत्रुषु॥ दशास्वेतास्वनंतासुलुठितंसंकटास्थिति॥ ४८॥ दुःखेनिपतितंघोरेविहंगःसागरोयथा॥ स्वबंधास्थंजगज्जालैश्शून्यैरोधर्वपत्तने॥ ४९॥

पुरुषैःपुरुषार्थैःहीनं॥ ४४॥ विस्मृतःआत्मरूपःपितामहोमूलकारणंयेन॥ ४५॥ ४६॥ आत्मनःस्वस्यस्थानात्निवासभूतादेहभेदात्मस्तकगायनयनेलत्तद्देहाभिमानविच्छेदाच्छिन्नांगं॥ अतएवतत्तद्देहविशेषासंगाद्दुःस्थितं॥ ४७॥ विषयेंद्रियदेहादिलक्षणेषुचित्ररूपेषुनानाविचित्रैःस्वबधोद्यतेषुशत्रुषुतद्विन्यासेनतन्मध्यस्थंइतिप्रपंचितप्रकारास्थितिर्यथः॥ ४८॥ स्वस्यबंधेतत्साधनदेहादौचआस्थास्नेहानिश्चयोयस्यतत्॥ ४९॥ ७॥

तत्त्वज्ञानतत्साधनादौ अनास्था अनादरस्तद्रूपेऽब्धौ उह्यमानं प्लवमानं मनः तदास्थोपोद्बलनेनोद्धर ॥५०॥ चिरविषयभोगप्रयुक्तपु
पयस्यपरलोकगतिसाधनाभावाद्दावान्नूनशीर्णपादाद्यवयवप्रायं वल्लीवर्धपक्षे स्पष्टं ॥५१॥ प्रागुक्तानास्थापरनिंदनेनोपसंहरति शु
भाशुभेति शुभानां काम्यसुकृतानां अशुभानां निषिद्धकर्मणां च प्रसरैः पराहता मलिनीकृता आकृतिर्यस्य ज्वलद्भिर्जरामरणविषा
दैर्मूर्छिते ईदृशे स्वमनसि सति यस्य व्यथा तदुद्धारफलचिंताप्रयुक्तपीडा न जायते स पुमान् नराकृतिप्रतिच्छन्नो राक्षस एवेत्यर्थः ॥५२॥ सर्गः ४२॥

ऊह्यमानमनास्थाब्धौ मनो विषयविह्वलं । उद्धरामरसंकाशमातंगमिव कर्दमात् ॥५०॥ बलिवर्दं यदा मग्नं मनो मदनपल्वले । आलू
नाशीर्णावयवं बलाद्राम समुद्धर ॥५१॥ शुभाशुभप्रसरपराहताकृतौ ज्वलज्जरामरणविषादमूर्छिते । व्यथेह यस्य मनसि भो न जा
यते नराकृतिर्जगति स राम राक्षसः ॥५२॥ जीवावतरणं नाम सर्गः ॥४२॥ श्रीवसिष्ठ उ० ॥ एवं जीवाश्रितो भावा भवभावनयोहिताः ॥
ब्रह्मणः कल्पिताकाराल्लक्षशोऽप्यथ कोटिशः ॥१॥ असंख्याताः पुरा जाताः जायंते चापि वाद्य भो । उत्पत्स्यंति चैवांबुकणौघा
इव निर्झरात् ॥२॥ स्ववासनादशावेशादाशाविवशतां गताः । दशास्वति विचित्रासु स्वयं निगडिताशयाः ॥३॥

जीवानां कर्मगतयः प्रपच्यंतेऽत्र विस्तरात् । विवेकादेशसुदौर्लभ्यान्मुक्तिः केषांचिदित्यपि ॥१॥ एवं मनसः स्वबंधकत्वप्रकारमुपवर्ण्य तत्
दुपहितचिद्रूपजीवनाम्नामो मोक्षसंसारस्थितिप्रकारवैचित्र्यं वर्णयिष्यंस्तत्संगतिप्रदर्शनाय प्रागुक्तजीवोत्पत्तिप्रकारभेदैरनुवदति
एवमित्यादिना । चितः भावाः औपाधिका विश्वविरूपाः जीवाः भवभावनया संसारवासनया ऊहिताः प्रवाहिताः इट् छांदसः पूर्ववा
सनानुसारेण कल्पिताकाराद्ब्रह्मणः सकाशाज्जाता इत्यादिपरेणान्वयः ॥१॥ अद्य संप्रति जायंते भो इति रामसंबोधनं ॥२॥३॥

अनारतं सततं वा शब्दोपर्यायार्थौ ॥ ४ ॥ प्रथमजन्मानः अस्मिन्कल्पे एकमेव जन्म प्राप्ताः न विद्यते जन्मसंख्या येषां ते अजन्मसंख्याकाः ॥ ५ भविष्यंतीति जातिर्जन्म येषां ते भविष्यज्जातयः अस्मिन्कल्पे आ द्याप्यनुत्पन्ना इत्यर्थः ॥ भूताः अतीता भवोद्भवा येषां जीवन्मुक्ता इतियावत् अभवला विदेहमुक्तिं ॥ ६ ॥ योनिं देहजातिं ॥ ७ महादुःखसहाः नारकाः अल्पोदया अल्पसुखा मर्त्याः अत्यंतमुदिता

अनारतं प्रतिदिशं देशे देशे जले स्थिते जायंते वा म्रियंते वा बुद्बुदा इव वारिणि ॥ ४ ॥ केचित्प्रथमजन्मानः केचिज्जन्मशताधिकाः ॥ केचिद्वाजन्मसंख्याकाः केचिद्द्वित्रिभवांतराः ॥ ५ भविष्यज्जातयः केचित्केचिद्भूतभवोद्भवाः ॥ वर्तमानभवाः केचित्केचित्तु भवतां गताः ॥ ६ केचित्कल्पसहस्राणि जायमानाः पुनः पुनः ॥ एकामेव स्थिता योनिं केचिद्योन्यंतरं स्थिताः ॥ ७ केचिन्महादुःखसहाः केचिदल्पोदयाः स्थिताः ॥ केचिदत्यंतमुदिताः केचिदर्कादिवोदिताः ॥ ८ केचित्किन्नरगंधर्वविद्याधरमहोरगाः केचिदर्केंद्रवरुणास्त्र्यक्षाधोक्षजपद्मजाः ॥ ९ केचित्कूष्मांडवेतालयक्षरक्षःपिशाचकाः ॥ केचिद्ब्राह्मणभूपाला वैश्यशूद्रागणाः स्थिताः ॥ १० केचिच्छ्वपचचांडालकिरातावेशपुल्कसाः केचित्तृणौषधी केचित्फलमूलपतंगकाः ॥ ११ केचिच्चित्रलतागुल्मतृणोपलदशोषिताः ॥ केचित्कदंबजंबीरशाल ॥ १८ ॥ [illegible]

देवाः अर्कादिवोदिताः ससलोकगाः ॥ ८ त्र्यक्षादिग्रहणं त्र्यक्षादिसारूप्यप्राप्तजीवाभिप्रायं ॥ ९ ॥ १० किरातवेषाः किरातयोनिप्रविष्टास्त एव तृणौषधी इति जात्योर्द्विवचनं फलमूलग्रहणं तदंतर्गतबीजादस्थजीवाभिप्रायेण ॥ ११ पुनस्तृणग्रहणं तद्वांतरजातिप्रपंचार्थं उपलपश्यंति स्वदेहतयेत्युपलदशाः पर्वतादयः ॥ १२ ॥ श्रीरामकृष्णगोविंदचरणारविंदाभ्यां नमः ॥

विभवैः संसरंति भ्रमंति विभवसंसाराः अंबरदोर्लम्यात्तपोर्थं वाचीरांबरछन्ना ॥ १३ गोनासा अजगराः ॥ १४ ॥ १५ कल्भः करिशा-
बः पुत्तिका पतंगिकाः ॥ १६ ॥ १७ ऋक्षचक्रं नक्षत्रचक्रं तद्गताः ॥ वातभूता आवहप्रवाहादिवाय्वधिकारं प्राप्ताः व्योमपदे आकाशाधि

केचिद्विभवसंसारमंत्रिसामंतभूमिपाः ॥ केचिच्चीरांबरछन्ना मुनिमौनमुपास्थिताः ॥ १३ ॥ केचिद्भुजंगगोनासकृमिकीट
पिपीलिकाः ॥ केचिन्मृगेंद्रमहिषमृगाजचमरैणकाः ॥ १४ ॥ केचित्सारसचक्राह्वाबलाकाबककोकिलाः ॥ केचित्कमलक
ल्हारकुमुदोत्पलतां गताः ॥ १५ ॥ केचित्कल्भमातंगवाराहवृषगर्दभाः ॥ केचिद्द्विरेफमशकाः पुत्तिकादंशवंशजाः ॥ १६ ॥ के
चिदापद्बलाक्रांताः केचित्संपदमागताः केचित्स्थिताः स्वर्गपुरे केचिन्नरकमास्थिताः ॥ १७ ॥ ऋक्षचक्रगताः केचिद्वृक्ष
रंध्रगताः परे ॥ वातभूताः स्थिताः केचित्केचिद्व्योमपदे स्थिताः ॥ १८ ॥ सूर्यांशुषु स्थिताः केचित्केचिदिंद्वंशुषु स्थिताः ॥
केचित्तृणलतागुल्मरसस्वादुष्ववस्थिताः ॥ १९ ॥ जीवन्मुक्ता भ्रमंतीह केचित्कल्याणभाजनाः ॥ चिरमुक्ताः स्थिताः केचिन्न
नं परिणताः परि ॥ २० ॥ केचिच्चिरेण कालेन भविष्यन्मुक्तयः शिवाः ॥ केचित्द्विषंति चिद्भावाः केवलीभावमात्मनः ॥ २१ ॥

कारे ॥ १८ सूर्यांशुषु रसादानाद्यधिकारे इंद्वंशुषु औषध्याद्याप्यायनाधिकारे तृणादीनां रसः स्वादुर्यत्र पश्वादियोग्ये विषये लब्धांपद्ये इति यावत्
॥ १९ परे परमात्मनि परिणताः तद्भावं प्राप्ता विदेहमुक्ताः ॥ २० ॥ चिद्भावा जीवाः भोगलंपटाः संतः केवलीभावं कैवल्यं द्विषंति ॥ २१ ॥ श्रीराम

ककुभः दिग्देवताः ॥ २२ ॥ २३ ॥ एतेसर्वेपिसंसरणानर्थवासनावशादेवेतिसैवसमूलमुच्छेद्येसाशयेनोपसंहरति ॥ जीवाइति ॥ उक्तानु
क्तसर्वसंग्रहार्थमेतास्वेतास्विति वीप्सा ॥ २४ ॥ विहरंतिभुवि निपतंतिनरकेउत्पतंतिस्वर्गे अतएवकंदुकाइव ॥ २५ ॥ वासनारूपान्भावान्
भाविदेहादीन्धारयंतितिताच्छील्यः ॥ २६ ॥ अनंतेषुविषयेषु अनंतसंकल्पकल्पनोत्पादनहेतुभूतयामायया अविद्यया २७ आवर्तरा

केचिद्दिक्पालाः ककुभः केचिन्नृपामहारयः ॥ केचित्स्त्रियः कांतदृशः केचित्षंढनपुंसकाः ॥ २२ ॥ केचित्प्रबुद्धमतयः केचिज्जडतरा
शयाः ॥ केचिद्ज्ञानोपदेष्टारः केचिदात्तसमाधयः ॥ २३ ॥ जीवाः स्ववासनावेशाद्विवशाशयतांगताः ॥ एतास्वेतास्ववस्थासुसं
स्थितावद्धभावनाः ॥ २४ ॥ विहरंतिजगत्केचिन्निपतंत्युत्पतंतिच ॥ कंदुकाइवहस्तेनमृत्युनाविरतंहताः ॥ २५ ॥ आशापाशश
तावद्धावासनाभावधारिणः ॥ कायात्कायमुपायांतिवृक्षाद्वृक्षमिवांडजाः ॥ २६ ॥ अनंतानंतसंकल्पकल्पनोत्पादमायया ॥ इं
द्रजालंवितन्वानाजगन्मयमिदंमहत् ॥ २७ ॥ तावद्भ्रमतिसंसारेवारिण्यावर्तराशयः ॥ यावन्मूढानपश्यंतिस्वमात्मानमनिं
दितं ॥ २८ ॥ दृष्ट्वात्मानमसत्यक्त्वासत्यमासाद्यसंविदं ॥ कालेनपदमागत्यजायंतेनेहतेपुनः ॥ २९ ॥ च्युत्वाजन्मसहस्राणिभू
यः संसारसंकटे ॥ पतंतिकेचिदबुधाः संप्राप्यापिविवेकतां ॥ ३० ॥ केचिच्छक्रसमप्युच्चैः प्राप्यतुच्छतयाधिया ॥ पुनस्तिर्यक्त्वमायां
तितिर्यक्त्वान्नरकादपि ॥ ३१ ॥

शयइवेतिशेषः २८ विवेकिनांतदुःखदर्शनात्कोलाभस्तमाह ॥ दृष्ट्वेति ॥ कालेनभूमिकादार्ढ्यक्रमेण ॥ २९ ॥ विवेकभ्रष्टानांयागतिस्तामाह
च्युत्वेति ॥ ३० ॥ शक्रत्वंप्रशस्तजन्मदेशकालप्रतिभाविनयसत्समागमादिसंपन्नत्वांउच्चैर्देवगंधर्वब्राह्मणाद्युत्कृष्टसंपद्रूपंतुच्छतयातु
॥ च्छविषयलंपटतयाधियास्वबुध्यैवशक्रत्वमितिपाठेनतुषेउदाहार्य॥३१॥

महाधियः सनकादयः तदेव तस्मिन्नेव कल्पे। तत्र मोक्षाख्ये ब्रह्मपदे ॥ ३२ ॥ इतरेषु स्थोसन्ति ब्रह्मांडांतरेषु यथैवं देवाः तेषु स्थोसन्ति स्था
न ब्रह्मांडेषु हरतां हरसारूप्यं ॥ ३३ ॥ नागतां सर्पतां गजतां वा। यथेह ब्रह्मांडे तथैव ब्रह्मांडांतरे पीति शेषः ॥ ३४ ॥ इदं जगद्ब्रह्मांडं जगं
ति ब्रह्मांडानि ॥ ३५ ॥ आपतंत्याविर्भवंति पतंति तिरोभवंति च ॥ ३६ ॥ अत्रैव ब्रह्मांडांतरेष्वपि कर्मवैचित्र्या ज्जीवगति विचित्रैवेत्याश

केचिन्महाधियः संतं उसद्यब्रह्मणः पदात्। तदेव जन्मनैकेनतत्रैवाप्नु विशंत्यलं ॥ ३२ ॥ ब्रह्मांडे ष्वितरे ष्वन्ये तेष्वन्ये जीव
राशयः। प्रयांति पद्मोद्भवतामन्ये च हरतामपि ॥ ३३ ॥ अन्ये प्रयांति तिर्यक्त्वमन्ये च सुरतामपि। अन्येपि नागतां रामयथैवे
ह तथैव हि ॥ ३४ ॥ यथेदं हि जगत्स्फारं तथान्यानि जगंत्यपि। विद्यंते समतीतानि भविष्यंति च भूरिशः ॥ ३५ ॥ अन्येनान्येन चि
त्रेण क्रमेणान्येन हेतुना। विचित्राः सृष्टयस्तेषामापतंति पतंति च ॥ ३६ ॥ कश्चिदूर्ध्वं तां यांति कश्चिद्गच्छति यक्षतां। कश्चि
त्स्यांति सुरतां कश्चिदायाति दैत्यतां ॥ ३७ ॥ येनैव व्यवहारेण ब्रह्मांडेस्मिन् जनाः स्थिताः। तेनैवान्येषु तिष्ठंति सन्निवेश
विलक्षणाः ॥ ३८ ॥ स्वस्वभाववशावेशादन्योन्यपरिघट्टनैः। सृष्टयः परिवर्तंते तरंगिण्या इवोर्मयः ॥ ३९ ॥ आविर्भवंति
रोभावैरुन्मज्जननिमज्जनैः। सृष्टयः परिवर्तंते तरंगिण्या इवोर्मयः ॥ ४० ॥ ५९ ॥

येनाह कश्चिदिति ॥ ३७ ॥ येनैव मनुष्यादियोग्यव्यवहारेण द्वीपांतरीयजनवत्सन्निवेशेन संस्थानभेदेन परं विलक्षणाः ॥ ३८ ॥ अस्त्वेवं तथा
पि कथं तेषामुत्तमाधमादिभावेन परस्परस्नेहविरोधादिना च सृष्टिपरिवृत्तिस्तत्राह स्वस्वभावेति। सात्विकराजसतामसादि स्वस्व
भाववशात्तत्तदनुकूलव्यवहाराभिनिवेशात्तत्तन्नामैकविषयस्पर्धया अन्योन्यपरिघट्टनैः सृष्टिपरिवृत्तिरित्यर्थः ॥ ३९ ॥ तत्रापि हेतुमाह
आविर्भवेति। रजस आविर्भावे सृष्टेरुन्मज्जनं सत्त्वतमसोर्निमज्जनं तमस आविर्भावे रजस्तिरोभावे सृष्टेर्निमज्जनं अंतरा सत्त्वाविर्भावे

तावत्कालं पालनमितिहेतुपरिवृत्त्या परिवर्तनतइत्यर्थः ॥ ४० ॥ गुणाधीनांतःकरणादिसृष्ट्यानदुपाधिकजीवनिर्गमप्रसिद्धिरित्याशये
नाह निर्यांतीति ॥ तत्र परस्मिन्नेव स्फुरंति स्फुटं व्यवहरंति च ॥ ४१ ॥ तत्र श्रुत्यादिप्रसिद्धदृष्टांतमाह दीपादिति ॥ ४२ ॥ शीतलात्तुषार
इव ॥ ४३ ॥ प्रलयेशांतेपदेबीजभूते निलयं निलीनतां ॥ ४४ ॥ उक्तं जीवजगत्सर्गं संक्षिप्योपसंहरति ॥ अविरतमिति ॥ इयं त्रिभुवनरचना

निर्यांति विरतं तस्मात्परमाज्जीवराशयः ॥ अनिर्देश्याः स्वसंवेद्यास्तत्रैवाशु स्फुरंति च ॥ ४१ ॥ दीपादिवालोकदशः सूर्यादि
वमरीचयः ॥ कणास्तप्तायस इव स्फुलिंगा इव पावकात् ॥ ४२ ॥ कालादिवर्त्तवश्चित्रा आमोदाः कुसुमादिव ॥ शीतलादि
व वर्षाणि पूरादब्धेरिवोर्मयः ॥ ४३ ॥ उत्पत्स्योत्पत्स्यकालेन भुक्तादेहपरंपरां स्वतएवपदे यांति निलयं जीवराशयः ॥ ४४ ॥ अ
विरतमियमातत्यो च्चैर्भवति विनश्यति वर्धते मुधैव ॥ त्रिभुवनरचनादिमोहमायापरमपदे लहरीववारिराशौ ॥ ४५ ॥ जीवनि
चयस्थानोपदेशसर्गः ॥ ४३ ॥ श्रीरामउवाच ॥ क्रमेणानेन येनाम्ना जीवेन स्थितिरात्मनः ॥ सकथं भगवन्देहं समाधत्ते स्थिपंजरं ॥ १ ॥

भ्रांतिलक्षणा माया परमपदे अविरतं संततं मुधैव आतता सर्गेण विस्तृता वर्द्धते तथा उच्चैर्भवति विपरिणमते विनश्यति च ॥ वारिराशौ लह
रिवेति दृष्टांतः ॥ ४५ ॥ इति श्रीयोगवासिष्ठतात्पर्ये स्थितिप्रकरणे जीवनिचयस्थानोपदेशस्त्रिचत्वारिंशः सर्गः ॥ ४३ ॥ ७ ॥ मुक्तिप्रलयसाम्ये
पि विशेषोत्र प्रकीर्त्यते ॥ तथा विरिंचिजीवस्य शरीरग्रहणक्रमः ॥ १ ॥ प्रलये स्वत एव परमपदे शांते जीवराशयो विलयं यांतीति यदुक्तं तत्र रामः श
कते क्रमेणेति ॥ अनेन उत्पत्स्योत्पत्स्यकालेन भुक्तादेहपरंपरामिति यदुक्तं तेन क्रमेणायेन जीवेन प्रलये स्वत एव परमपदे आत्मनः स्थितिरावभा
सम्युक्त एवेति पुनः कथं देहमादत्ते परमपदप्राप्तस्य पुनरावृत्तौ मुक्तावप्यनाश्वासप्रसंगात् ॥ न चाज्ञानावृतस्य बीजभावकृतो विशेषः ॥ अबी
जस्य शिलाशकलादेरज्ञानमात्रावरणे नांकुरादिबीजत्वादर्शनादित्यर्थः ॥ १ ॥

स्वसमसत्ताकं प्रतिबीजत्वादर्शनेपि आवरणासमसत्ताकसर्पादिकं प्रति आवृतरज्ज्वादेर्बीजत्वदर्शनान्मिथ्याजन्मबीजत्वमावरणमात्रकृतं वि
शेषेणानुक्तमपि स्वबुध्येव त्वयोहितुं शक्यमिति न प्रश्नार्हमेतदित्याशयेन परिहारमाह पूर्वमेवेति ॥ २ ॥ आभासो विवर्तस्तावन्मात्रं ॥ ३ ॥ चिरस्था
यिनां ब्रह्मांडभुवनादीनां कथमाभासमात्रतेत्यत्राह दीर्घेति ॥ ४ ॥ अज्ञात्मनो बीजाभावात्पुनः संसारस्वप्नदर्शनेपि ज्ञस्य न तत्सक्ति
रित्याशयेनाह प्रशांतेति जीवन्मुक्तव्यवहारार्हः पश्यन्नपि परमार्थदृशा न पश्यति ॥ ५ ॥ बीजभूते अज्ञात्मनि भाविसंसारस्यामोक्षं संस्

॥ श्रीवसिष्ठ उवाच ॥ पूर्वमेव मया प्रोक्तं राम किं नावबुध्यसे ॥ पूर्वापरविचारार्हा शेमुषी क्व गता तव ॥ २ ॥ यदिदं हि शरीरादि ज
गत्स्थावरजंगमं ॥ आभासमात्रमेवैतन्नेदं सत्स्वप्नमिवोत्थितं ॥ ३ ॥ दीर्घस्वप्नो ह्ययं राम मिथ्यैवानघ दृश्यते ॥ द्विचंद्रविभ्रमा
कारं भ्रमांतर्भ्रांतशैलवत् ॥ ४ ॥ प्रशांताज्ञाननिद्रस्तु नूनं गलितभावनः ॥ प्रबुद्धचेताः संसारस्वप्नं पश्यन्न पश्यति ॥ ५ ॥
स्वभावकल्पितो राम जीवानां सर्वदैव हि ॥ आमोक्षपदसंप्राप्ति संसारोस्त्यात्मनोंतरे ॥ ६ ॥ जीवस्यांतरस्तः कायआवर्तः
पयसो यथा ॥ यथा बीजेंकुरः स्फारः पल्लवः स्वांकुरे यथा ॥ ७ ॥ पल्लवे च यथा पुष्पं पुष्पकोशे फलं यथा ॥ यतः स्वकल्पनारू
पो देहोस्ति मनसोंतरे ॥ ८ ॥ बहुरूपतया राम यतोस्येकतमः स्फुटः ॥ स एव प्रतिभासोस्य मनसः किल जायते ॥ ९ ॥

स्मरूपेणासत्वादपि पुनर्जन्मोपपत्तिरित्याशयेनाह स्वभावेति ॥ ६ ॥ जीवस्यांतरेंतरस्तः कायोस्ति यथा पयसोंतरे आवर्त इत्यादिदृष्टांताः ॥ ७ ॥ कु
तो जीवांतः कायोस्ति तत्राह यत इति अंतरे मध्ये ॥ ८ ॥ तत्रापि देहः कथं संभाव्यते तत्राह बहुरूपतयेति मनसो बहुरूपतया प्रसिद्धे देहरूपस्या
पि वासनात्मना तत्र संभवादित्यर्थः ॥ तर्हि बहूनि शरीराण्यपि युगपत्कुतो न जायंते तत्राह यत इति यतो बहुषु वासनात्मना स्थितेषु यए
वैकतमः परिपक्वैः कर्मभिः स्फुटोऽभिव्यक्तः क्रियते स एव प्रतिभासो यस्य प्रापपाकात्ते जायते न सर्व इत्यर्थः ॥ ९ ॥ श्रीरामाय नमः

एतन्मनः स एव देहो भवतितत्रोत्तमकर्मपरिपाके उत्तम एव देहो भवतीत्येतदादिसर्गमारभ्य दर्शयति आदिसर्ग इति॥ १० ११ १२ १३ १४
१५ कल्पनाकलनोन्मुखमिति यदुक्तं तद्विवृणोति॥ कलयंतीत्यादिना॥ पूर्वसर्गे आकाशादिक्रमाविर्भूतहिरण्यगर्भादिग्रहोपास

सएवाभ्युदयसेतन्मृत्सिंडोघटकोपमः॥ आदिसर्गेपुराकायः प्रतिभासस्य चोत्तमः॥ १०॥ यस्मादेषविभुर्ब्रह्मापद्मको
शगृहस्थितः॥ ततसंकल्पक्रमेणैव ततस्थितिमुपागता॥ ११॥ इयंसृष्टिरपर्यंता मायेव घनमायया॥ श्रीरामउवा०॥
जीवोमनः पदंप्राप्य वैरिंचिपदमागतः॥ १२॥ यथाब्रसंस्तथासर्वविस्तरेणावदाशुमे॥ श्रीवसिष्ठउवाच॥ ब्राह्मेश्र
णुमहाबाहो शरीरग्रहणक्रमं॥ १३॥ निदर्शनेन तेनैव जागंतीज्ञास्यसिस्थितिं॥ दिक्कालाद्यनवछिन्नमात्मशक्तिंस्व
शक्तितः॥ १४॥ लीलयैवयदादत्ते दिक्कालकलितंवपुः॥ तदेवजीवपर्यायंवासनावेशतत्परः॥ १५॥ मनः संपद्यतेलो
लंकल्पनाकलनोन्मुखं॥ कलयंतीमनः शक्तिरादौभावयतिक्षणात्॥ १६॥ आकाशभावनामछां शब्दबीजरसोन्मु
खीं॥ ततस्तां घनतांयातं घनस्पंदक्रमान्मनः॥ १७॥ भावयत्यनिलस्पंदंस्पर्शबीजरसोन्मुखं॥ ताभ्यामाकाशवाताभ्या
मृदृष्टाभ्यांमनोदृशा॥ १८॥ शब्दस्पर्शस्वरूपाभ्यां संघाताज्जन्यतेनलः॥ मनस्तत्घनतांप्राप्य ततोभावयतिक्षणात्॥ १९॥

नसंस्कृतंमनस्तथैवाव्यक्तेतल्लीनंमनः शक्तिरित्युच्यते सा तेनैव क्रमेणास्वाविर्भावं कलयंतीसतीत्यर्थः॥ १६॥ शब्दानांबीजशब्दत
न्मात्रंरसः श्रोत्रेंद्रियं तांतादृशाकाशभावनांप्राप्य घनतां उपचयंयातंमनः॥ १७॥ अनिलात्मनास्पंदं ईषच्चलनं॥ स्पर्शबीजे
त्यादिप्राग्वत्॥ अपंचीकृतत्वेनसूक्ष्मतमत्वान्मनोदृशामनोवछिन्नचैतन्यात्मना जीवेनादृष्टाभ्यां॥ १८॥ संघातात्॥ उपचयाद
भिघाताच्च॥ अनलोरूपबीजरसात्मकः॥ १९॥ श्री॥

तावद्गुणागतं ॥ तावद्भिराकाशवायुतेजोभिर्गुणानंगुणाउपचयस्संगतं प्राप्तं ॥ २० ॥ अपांशेऽयं रसतन्मात्रं ॥ आप्यजलमितिसंवेद्यत इतिसंविस्मृतीसर्लंभवेदित्यर्थः ॥ तादृशामुक्तप्रकाराणांचतुर्णांगुणानांसंघातभावंगतं ॥ २१ ॥ उदेष्यतीतिपूर्वजन्मकालमपेक्ष्यभविष्यत्विवक्षणाद्रूपभूततन्मात्रवेष्टितं ॥ इदंपंचकं मिलितंसत्तनुतां सौक्ष्म्यं जहत्सजत् ॥ २२ ॥ यद्वपुःपश्यतितल्लिंगाख्यंपुर्यष्टकमित्यन्वयः ॥ २३ ॥ कर्मज्ञानेंद्रियगणौभूतप्राणमनोगणाः ॥ अविद्याकामकर्माणिलिंगंपुर्यष्टकंविदुः ॥ वक्ष्यमाणदेहभावनयालिंगस्यैवबहिःपंचीकरणो

प्रकाश्यममलालोकमालोकस्तेनवर्द्धते ॥ मनस्तावद्गुणागतंरससन्मात्रवेदनं ॥ २० ॥ क्षणार्द्धेनत्वपांशेऽयंजलसंवित्ततोभवेत् ततस्तादृग्गुणागतंमनोभावयतिक्षणात् ॥ २१ ॥ स्वरूपंगंधवत्स्थूलंयेनोदेष्यतिमेदिनी ॥ अथेदंभूततन्मात्रवेष्टितंतनुतांजहत् ॥ २२ ॥ वपुर्वह्निकणाकारंस्फुरितंव्योम्निपश्यति ॥ अहंकारकलायुक्तंबुद्धिबीजसमन्वितं ॥ २३ ॥ तत्पुर्यष्टकमित्युक्तंभूतहृत्पद्मषट्पदं ॥ तस्मिंस्तुतीव्रसंयोगाद्भावयद्भास्वरंवपुः ॥ २४ ॥ स्थूलतामेतिपाकेनमनोबिल्वफलंयथा ॥ मूषास्वद्रुतहेमाभंस्फुरितंविमलांबरे ॥ २५ ॥ सन्निवेशमथादत्तेतत्तेजःस्वस्वभावतः ॥ तस्मिन्स्वसन्निवेशेचतेजःपुंजमयेमनः ॥ २६ ॥ भजतेभावनोत्सा ॥ रानिश्चितामाननांबरां ॥ ऊर्ध्वंशिरःपीठमयीमधःपादमयींतथा ॥ २७ ॥

नघनत्वेस्थूलदेहताविर्भावनमित्याहतस्मिंस्त्विति ॥ २४ ॥ मूषाप्रतिमाकारनभोगर्भमृत्संपुटसदंतर्निषिक्तद्रुतहेमाभंबहिःस्थूलभास्वरमंतःसूक्ष्मभास्वरंस्थूलदेहसंवलितंवक्ष्यमाणासन्निवेशमुपादत्तेतत्तेजोलिंगकर्तृ ॥ २५ ॥ तत्रमनसोविशेषकल्पनाभिनिवेशशाखोपशाखाप्रचयइत्याहतस्मिन्नित्यादिना ॥ २६ ॥ आननांबरांव्याप्ताशांभूयसीमितियावत् ततक्रमाच्छिरआद्यवयवकल्पनामाह ऊर्ध्वमिति ॥ २७ ॥

वा॰टी॰स्थि॰
१०१

अंगुल्याप्रकटावयवः॥ २८ ॥ असौ ब्रह्मा मुनिः पूर्वोपासितप्रकारमननशीलः॥ २९ ॥ ३० ॥ ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयमिति स्मृतिप्रसिद्धविशेषणासिद्धं तस्य दर्शयति बुद्धीति ॥ परमाकाशे ब्रह्मण्य सो यथा यादृश्यास्व सत्तया तिष्ठति तथा तादृश्येव व्यवहाररक्षमतया आत्मनो मोहमज्ञानमेव चित्तलीलया पंचीकृतस्थूलव्योमादिवक्ष्यमाणरूपेणाज्ञ

पार्श्वयोर्लरूलसंस्थानां मध्ये चोदरधर्मिणी ॥ प्रकटावयवो बालो ज्वालामालामलाकृतिः॥ २८ ॥ मनोरथवशोपात्तवपुस्तिष्ठस सावथ ॥ एवं स्ववासनावेशात्कल्पितांगो मनो मुनिः॥ २९ ॥ नयत्युपचयं देहं स्वस्वभावमृतुर्यथा ॥ कालेन स्फुटतामेति भवत्यमल विग्रहः॥ ३० ॥ बुद्धिसत्त्वबलोत्साहविज्ञानैश्वर्यसंस्थितः॥ स एव भगवान्ब्रह्मा सर्वलोकपितामहः॥ ३१ ॥ द्रवकनकसंकाशः परमाकाशसंभवः॥ यथासौ परमाकाशे तिष्ठत्स परस्वरूपवान्॥ ३२ ॥ जनयत्यात्मनो मोहमात्मस्वचित्तलीलया ॥ कदाचित्केवलं व्योम परमं पारवर्जितं ॥ ३३ ॥ अनादिमध्यपर्यंतं कदाचिदमलं पयः॥ कदाचित्कल्पकालाग्निज्वालाभास्करमंडलं ॥ ३४ ॥ कदाचित्काननं काष्ठ्यं कांतं कमलकुड्मलं ॥ अन्यान्यन्यान्यनेकानि प्रतिजन्मावधि प्रभुः॥ ३५ ॥

नयतीत्यर्थः॥ ३२ ॥ तस्य कालभेदेन नानाविधाः कल्पना दर्शयति ॥ कदाचिदिति ॥ ३३ ॥ पारंपरावधिः आदिः पूर्वावधिः पर्यंतोपार्श्वतोवधि स्तदभावादेव मध्यमावधिरहितं च केवलं व्योम कल्पयतीत्यर्थः दैनंदिनप्रलयकाले लमलं पय एव कल्पयती कदाचित्कल्यांते दाहकाले ॥ ३४ ॥ कदाचित्पृथिवीसर्गोत्तरं चरभूतसर्गात्प्राक्काले कष्ठमेव काष्ठ्यं चातुर्वर्ण्यमिति वत्स्वार्थे ष्यञ् ॥ हरितवर्णकाननं वक्ष्यत्या मांत्रलत्वात्सु ष्टिमित्यर्थः॥ कदाचित्पाद्मे कल्पे श्याम भूपद्मप्रकृति तात्कालं श्यामं विष्णुनाभ्युत्थं कमलकुड्मलं ॥ अन्यान्यन्यानि भुवनाधविजनादिरूपा

॥ व्योकेकानि संस्थानि कल्पयानि विविधानि च ॥
॥ स्वयमेव पालयति हि ॥ ३६ ॥

॥ १०१ ॥

तस्य प्रथमकल्पमारभ्य प्रतिदिनं सुप्तोत्थितस्य स्वदेहकल्पनाक्रमं दर्शयति ॥ तत्रेत्यादिना ॥ सर्वेषां ब्रह्मांडानां तदभिमानि ब्रह्मरूपाणां च कल्पानव
च्छिन्नब्रह्मपदादेवाविर्भावात्तत्तद्दृशानपौर्वापर्यमस्तीति प्राथम्यमेवेत्यभिप्रेत्येदं प्रथमत्वेनोच्यते ॥ ३६ ॥ यदावतीर्णस्तदाप्रभृति ब्रह्मांडगर्भे
विष्णुकुक्षिगर्भे वा सुखं सौषुप्तसुखोपलक्षितमस्मरत् प्राक्तनवास्तवरूपस्य देहव्यवहारादेश्चास्मरणरूपं सुषुप्तमाप्नुदिति शेषः ॥ ३७ ॥ द्रव्यैः पंच

कल्पयन्नालयं सोषनानारूपाणि हेलया ॥ तत्रेदं प्रथमत्वेन यद्देषब्रह्मपः पदात् ॥ ३६ ॥ अवतीर्णस्तदाज्ञानात्तथैव सुखमस्मरत् ॥ गर्भ
निद्राव्यपगमे वपुः पश्यति स्म भास्वरं ॥ ३७ ॥ प्राणापानप्रवाहाख्यद्रव्यैरिव विनिर्मितं ॥ रोमकोटिशिराकीर्णं द्वात्रिंशद्दशनान्वितं ॥ ३८ ॥ त्रि
स्थूणं पंचदैवत्यमधश्चरणलांछितं ॥ पंचभागं नवद्वारं त्वग्लेपमस्रपांगकं ॥ ३९ ॥ युक्तमंगुलिविंशत्या नखविंशतिलांछितं ॥ द्विबाहुद्वि
स्तनं द्व्यक्षं वक्षसि भुजमेव च ॥ ४० ॥ नीडं चित्तविहंगस्य नीडं मन्मथभोगिनः ॥ तृष्णापिशाच्या निलयं जीवकेसरिकंदरं ॥ ४१ ॥ अ
भिमानराजालानं मानसांभोजशोभितं ॥ अथालोच्य वपुर्ब्रह्माकांतमात्मीयमुत्तमं ॥ ४२ ॥ चिंतयामास भगवान् स्विन्नकालाम
लदर्शनः ॥ अस्मिन्नाकाशकुहरे तत्तेन मधुपलांछिते ॥ ४३ ॥ अदृष्टपारपर्यंते प्रथमं किमभूदिति ॥ इति चिंतितवान्ब्रह्मा
सद्योजातो मलात्मदृक् ॥ ४४ ॥ अपश्यत्सर्गवृंदानि समतीतान्यनेकशः ॥ अथ सस्मार सकलान्सर्वान्धर्मगणाक्रमान् ॥ ४५ ॥

मूलस्य चर्षभोगैः ॥ ३८ ॥ सक्थिपृष्ठास्थिभिः त्रिस्थूणं पंचभिः प्राणैः पंचदैवत्यं पाणिपादशिरोवक्षःकुक्षिपाणपंचभागं ॥ ३९ ॥ उक्षयाक
दाचिद्वक्षसि भुजामपि ॥ ४० ॥ ४१ ॥ ४२ ॥ मधुपपदेन तत्सदृशश्यामलता लक्ष्यते तया लांछिते ॥ ४३ ॥ प्रथमं तदुक्तेः पूर्वं इति शब्दद्व
यं वीप्सायां सर्वपूर्वविशेषचिंताभावार्थं ॥ अमलनिर्मलत्वादतीतानागतदर्शनक्षमा आत्मदृक् यस्य ॥ ४४ ॥ अथ तत्कारणाचिं
तानंतरं सकलान् सांगोपांगान् धर्मगणाग्रहणां अधर्माणामप्युपलक्षणं ॥ ४५ ॥ श्रीरामाय नमः ॥ श्रीकृष्णपरब्रह्म ॥०

अत एव तस्योत्तरकाले सर्गोपि वेदोक्तक्रमेयो वसुकरोभूदित्याशयेनाह लीलयेति ॥ ४६ ॥ ४७ मनस एव सर्वसृष्टिरिति यदुक्तं तज्ज्ञा
तं तु देवंरीसा समर्थितमित्युपसंहरति दृष्टिरिति ॥ ४८ हे रघुसुत रघुसंतते परिदृश्यमाना सर्गलक्ष्मीः कमलजरूपधरेणा चेतसा म
नसैव स्वपरिकल्पनेन अतुलां सत्यत्तुल्यविलक्षणां हार्दसदृशीं स्थितिं नीतेत्यर्थः ॥ ४९ इति श्री वा॰ चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ ६
मनोरथादौ दृष्टत्वान्मनः कार्यं न सत्किंचित् ॥ असत्तस्माज्जगद्रूपं सत्संदेवेति वर्ण्यते ॥ १ संपन्नं परिनिष्ठितमेव सत् न किंचि

वसंतः कुसुमानीव वेदानादाय संस्तुतान् ॥ लीलया कल्पयामास चित्तसंकल्पजाः प्रजाः ॥ ४६ ॥ नानाचारसमा
चारं गंधर्वनगरे यथा ॥ नानास्वर्गापवर्गार्थं धर्मकामार्थसिद्धये ॥ ४७ ॥ अनंतानि विचित्राणि शास्त्राणि समक
ल्पयत् ॥ दृष्टिरेवमियं राम सर्गेऽस्मिन् स्थितिमागता ॥ ४८ ॥ विरिंचिरूपान्मनसः पुष्पलक्ष्मीर्मधोरिव ॥ विविधवि
रचनैः क्रियाविलासैः कमलजरूपधरेण चेतसैव ॥ रघुसुत परिकल्पनेन नीता स्थितिमतुलां जगतीह सर्गलक्ष्मीः ॥
४९ ॥ संसारावतरणप्रतिपादनोपदेशो नाम सर्गः ॥ ४४ ॥ श्रीवसिष्ठ उवाच ॥ जगत्संपन्नमेवेदं संपन्नं किंचिदेव न ॥ शून्यमेव
च भामात्रं मनोविलसितं स्थितं ॥ १ ॥ न देशकालावेतेन ब्रह्मांडेनावृतौ स्थितौ ॥ मनागपि महारूपवताप्याकाशरूपिणा ॥ २ ॥

देव संपन्नं यतो मनोविलासितं सर्वं भामात्रं प्रतिभासमात्रं स्थितं तं तदतिरेकेण शून्यमेवेत्यर्थः ॥ १ कुतश्च प्रतिभासव्यतिरेकेण शून्यता
न स्यादित्यत्राह नेति ॥ यतः प्रतिभासदेशकालौ एतेन परिछिन्नेन ब्रह्मांडेन नावृतौ न व्याप्तौ अतीतानागतावृहिः स्थितब्रह्मांडकोटीनामपि
त्रसरेणूनामानपांतरिव प्रतिभासांतः स्फुरणादर्शनात् किं बहुना महारूपवता परममहत्त्वेन प्रसिद्धेनाप्याकाशरूपिणा प्रथमभू
तेन तस्य तौ न व्याप्तौ ज्यायानाकाशादिति श्रुतेः अप्रतिभासमाने आकाशजायस्वेमानाप्रभावेन प्रतिभासांतरेव तस्य भा

नस्यावश्यवाच्यत्वे प्रतिभासमानानंतकोटिविकृतमभूतस्य निरस्ताप्रतिभासदेशकालव्यापकत्वेनिसूचनायमनागपीत्युक्तिरितिबोध्यं ॥ २ ॥ पूर्वोक्तरदेशकालव्याप्तिरास्तां नाम तस्याश्रयदेशकालयोरपि अध्यस्तेनाधिष्ठानासंस्पर्शान्न प्रतिभासव्याप्तिप्रसक्तिरित्याशयेनाह ॥ एतदिति ॥ यत्रैवदेशकाले च जगत्प्रतिभासते तत्रैव तदधिष्ठानं चित् जगच्छून्यं केवलं व्योममेव

एतत्संकल्पमात्रात्म स्वप्नदृष्टपुरोपमं । यत्रैव तत्र चिच्छून्यं केवलं व्योम संस्थितं ॥ ३ ॥ अभित्तिरागरचनमपि दृष्टमसन्मयं ॥ अकर्तृकृतमेवैतत्व्योम्नि चित्रं विचित्रकं ॥ ४ ॥ मनसा कल्पितं सर्वं देहादि भुवनत्रयं ॥ संस्मृतो कारणं चैतच्चक्षुरालोकनं यथा ॥ ५ ॥ आभासमात्रं हि जगत् घटावटपटभूमिभिः ॥ आवर्त्तनेन सद्रूपात्स्थकुड्यादयः स्थिताः ॥ ६ ॥ मनसेदं शरीरं हि वासनार्थं प्रकल्पितं ॥ कृमिकोशप्रकारेण स्वात्मकोशइवस्वयं ॥ ७ ॥

संस्थितमित्यर्थः ॥ ३ ॥ अतएवेदं गंधर्वनगरविचित्रवदिति प्रयुक्तमित्याह ॥ अभित्तीति ॥ किंच मनसः स्मृतिमात्रहेतुत्वात्तद्रचितमिदं स्मृतितुल्यमिति न स्वकालेऽर्थरूपं सदित्याह ॥ मनसेति ॥ एतत् मनः कुड्यादि जगतः सतः पृथक्कृत्य दर्शयितुमशक्यत्वादपि सत्व्यतिरेकेणासत्वमित्याह ॥ आभासेति ॥ ६ ॥ यथा स्वात्मनः स्वयं कोश इव प्रकल्पितं तथैव स्वस्य वासनार्थं स्थित्यर्थमिदं शरीरं ॥ कृमिकोशप्रकारेण नीडभूतं प्रकल्पितमित्यर्थः ॥ ७ ॥

चेतसः संकल्पमात्रेणासद्रचनाप्राप्तिशक्तिप्रसिद्धेरप्युक्तार्थोपपत्तिरित्याह ॥ न तदिति ॥ यदिति सामान्येन पुंसकं अंबरमर्थशून्यं
संकल्पं संकल्परूपं यन्न करोति न प्राप्नोति चेत्यन्वयः दुर्गं दुरापं ॥ ८ ॥ याभिः शक्तिभिर्मनोगुहा अंतर्नाश्रियं तेनाः शक्तयो देव जगदीश्व
रे पिकानाम संभवंतीत्यन्वयः ॥ ९ ॥ यदि सद्देवजगदसत् ब्रह्म सदेवसत् परस्परं च तयोः सदेवासंस्पर्शस्तर्हि कथं जगति कदाचिके सत्तासत्ते

न तदस्तीह यन्नाम चेतःसंकल्पमंबरं ॥ न करोति न चाप्नोति दुर्गमप्यतिदुष्करं ॥ ८ ॥ सर्वशक्तिधरे देवे कानाम
न तु शक्तयः ॥ न संभवंत्याश्रियं तेयाभिरंतर्मनोगुहा ॥ ९ ॥ सत्ताऽसत्ते पदार्थानां सर्वेषां सर्वदैव हि ॥ महा
त्माह्यो संभवतः सर्वशक्तौ विभौ सति ॥ १० ॥ पश्य तावन्नयाश्चर्यं मनसैवात्मजं वपुः ॥ तस्मात्तत्कल्पनां राम
सर्वशक्तियुतां विदुः ॥ ११ ॥ स्वसंकल्पकृताः सर्वे देवासुरनरादयः ॥ स्वसंकल्पोपशमने शाम्यंत्यस्नेहदीप
वत् ॥ १२ ॥ आकाशसदृशं सर्वं कल्पनामात्रजृंभितं ॥ जगत्स्वप्नमहाबुद्धे सुदीर्घस्वप्नमुत्थितं ॥ १३ ॥ न जायते म्रि
यते इह किंचित्कदाचन ॥ परमार्थेन सुमते मिथ्या सर्वं तु विद्यते ॥ १४ ॥ ॥ क्वेसाशयेनाह स्वसंकल्पेति ॥ १२ ॥ १३ ॥ १४ ॥

तत्राह ॥ सत्ताऽसत्ते इति न कदाचिके अपि तु सदा तन्नेतयोः परस्पराभिभवेन पर्यायेणावेशकल्पनमेवाचिंत्यमायाशक्तिकृ
तमित्यभिप्रायः ॥ १० ॥ सेयमैश्वरी सर्वशक्तिः स्वमनस्येव प्रत्यक्षं दृश्यतामित्याह ॥ पश्येति ॥ जगति विचित्रपदार्थशक्त्यापि
सर्वशक्तिमन्मनः कल्पनादित्येवाह ॥ तस्मादिति कल्पनां कल्पनां ॥ ११ ॥ अत एव नदेवादिशक्तिभिरपि मुक्तिः प्रतिबुद्धस्येत्याशा

तनुखंडनेनाल्पीकृतंनत्वखंडेखंडनमंतरेणापरिछेदप्रसक्तिः नचखंडनंवासंभवतीत्यर्थः ॥ १५ ॥ बहोर्भावो भूमा तथाभूतं
अपरिछिन्नमितियावत् ॥ स्वकायाद्दृश्यंमुंजेषीकावत् ॥ पृथक्कृतमपश्यन् ॥ अमहतापरिछिन्नात्मदर्शनेनकिंमुह्यसि ॥ १६ ॥

नदृष्टिमेतिनोहासंयन्नकिंचित्कदाचन ॥ किंवानतुभवेत्तत्रकस्यकानामखंडना ॥ १५ ॥ भूमभूतंस्वकायोत्थमप
श्यन्निपुणंदृशा ॥ राघवामहतास्वांतः किमज्ञइवमुह्यसि ॥ १६ ॥ मृगतृष्णाययातापान्मनसोनिश्चयात्तथा ॥ अ
संतइवदृश्यंतेसर्वेब्रह्मादयोप्यमी ॥ १७ ॥ द्विचंद्रविभ्रमप्रख्यामनोरथवदुत्थिताः ॥ मिथ्याज्ञानघनाः सर्वेजगत्या
कारराशयः ॥ १८ ॥ यथानौयायिनोमिथ्यास्थाणुस्पंदमतिस्तथा ॥ असत्सैवोत्थितानिसमाकाराणांपरंपरा ॥ १९ ॥
इंद्रजालमिदंविद्धिमायारचितपंजरं ॥ मनोमननिर्माणंनसन्नासदिवस्थितं ॥ २० ॥ ब्रह्मैवेदंजगत्सर्वमन्यता
यास्ततः कुतः ॥ प्रसंगः कीदृशः कोसौक्ववासापरितिष्ठति ॥ २१ ॥ अयंगिरिरयंस्थाणुरित्याडंबरविभ्रमः ॥०
मनसोभावनादार्ढ्यादसन्सन्निवलक्ष्यते ॥ २२ ॥

तापान्मरुमयूखान् निश्चयात्संकल्पात् ॥ १७ ॥ आकारराशयोदृश्याकारसमूहाः ॥ १८ ॥ १९ ॥ नासदिवसत्समिव ॥ २० ॥ अन्यता
याः भेदस्यचतुर्भिः किंवृत्तैः प्रमाणप्रकारस्वरूपाधाराणांनिषेधः सा अन्यता ॥ २१ ॥ उपचयावधिः स्ताणुस्ताभ्यांसर्वेतदांत
रात्मिकपरिछेदाडंबरविभ्रमा अप्युपलक्ष्यंते ॥ २२ ॥ श्रीरामकृष्णगोविंद ॥ श्रीकृष्णाचरणाकमलमकरंदमिलिंद ॥ श्री

प्रमत्तस्यविचारहीनस्यपुंसः सकामत्वछ्वामननं इदंजगत्प्रपंचे सर्गनरकतिर्यगादिजन्मसुपतनमारभतइतिप्रपंचतेनारं संभवतीतिशेषः॥ अतस्त्वंविवेकेनजगत्सक्त्वा अन्यत् निष्प्रपंचमात्मानं भावयेत्यर्थः॥२३॥२४॥ दृश्यमानावस्तुंमहाभोगंबहुविस्तीर्णंरमणीयमिवनेषुकनिपयानामेवगृहीतुंशक्यत्वात् गृहीतेष्वपिकदाचित्तकस्यचिदेकोपभोगात्तदुत्तरक्षणमेवक्षया

प्रपंचपतनारंभंप्रमत्तस्यइदंजगत्॥ सकामत्वछ्वामननंसक्त्वान्यद्रामभावय॥२३॥ यथास्वप्नेमहारंभोभ्रांतिरेवनवस्तुतः॥ दीर्घस्वप्नस्तथैवेदंविद्धिचित्तोपपादितं॥२४॥ दृश्यमानमहाभोगंगृह्यमाणामवस्तुकं क्रोशमाशाभुजंगानांसंसाराडंबरंत्यज॥२५॥ असदेतदितिज्ञात्वामात्रभावंनिवेशय॥ अनुधावतिनप्राज्ञोविज्ञायमृगतृष्णिकां॥२६॥ स्वसंकल्पात्स्वरूपाढ्यांमनोरथमयींश्रियं॥ योनुगच्छतिमूढात्मादुःखस्यैवसभाजनं॥२७॥ वस्तुन्यसत्तिलोकोयंयात्तुकाममवस्तुनि॥ यस्तुवस्तुपरित्यज्ययात्यवस्तुसनश्यति॥२८॥ मनोव्यामोहएवेदंरज्ज्वामहिभयंयथा। भावनामात्रवैचित्र्याच्चिरमावर्ततेजगत्॥२९॥ असदस्मिन्दिनेर्भावैजल्पांतस्थंद्रवच्चलैः॥ वंचनेबाल्यएवेह

न्नअवस्तुकंतुच्छं अभुक्तेषुपूर्वदृष्टेषुचविषयेषुतृष्णाविशेषोत्कटानामाशाभुजंगानांकोशंवल्मीकमिवस्थितं॥२५॥ कथंत्याज्यंतत्राह असदितिभावरागं॥२६॥ तदनुधावनेनर्थमाहस्वसंकल्पेति॥२७॥ नकेवलमनर्थप्राप्तिरेवकिंतुनर्थनाशोपितत्स्यास्तीत्याह यस्त्विति॥ नश्यतिपरमपुरुषार्थात्भ्रश्यति॥२८॥२९॥३०॥ श्रीरामचंद्रगुरवेनमः॥ श्रीकृष्णायनमः॥ श्रीवासुदेवायनमः॥

गुणादीनांशब्दादीनांसंघातंदेहादिसंभाव्य नू अहंममेतिअभिमन्यमानः जाड्यंशीतंवह्निभावनयामनोरथकल्पितवह्निने
तियावत् ॥ ३१ ॥ जलपंजरंखडयोरभेदाज्जडसंघातभूतंदेहादि ॥ ३२ ॥ यदीदमैच्छिकं संकल्पवशादुदितंतर्हि ऐच्छिकनिवृत्तिसंकल्पा
देवकुतोननिवर्त्ततेतत्राह ॥ यतइति ॥ तस्यचित्तस्यानिच्छयारागक्षयमात्रेण ॥ एवंविधंलोकेमिथ्यैवदृश्यतेगंधर्वनगरग्रहणंमनोरथ

यद्रमंगुणासंघातंभावयन्सुखमीहते ॥ प्रमार्ष्टिसजडोजाड्यंवह्निभावनयास्वया ॥ ३१ ॥ असदेवेदमाभोगिदृश्यते
जलपंजरं ॥ मनोमनननिर्माणंहृदयेनगरंयथा ॥ ३२ ॥ इदंचित्तेच्छयोदेतिलीयतेतदनिच्छया ॥ मिथ्यैवंदृश्यतेस्फीतंगंध
र्वनगरंयथा ॥ ३३ ॥ रामनष्टेजगत्यस्मिन्नूनकिंचिदपिनश्यति ॥ युक्तोपिचजगत्यस्मिन्नकिंचिदपियुज्यते ॥ ३४ ॥ मनः
प्रकल्पितेभग्नेहृदिविस्तीर्णपत्तने ॥ वृद्धिंचोपगतेब्रूहिकिंवृद्धंकस्यकिंक्षतं ॥ ३५ ॥ क्रीडार्थेनयथोदेतिबालानांहृदिवं
र्तनं ॥ मनसालब्धदेवेदमुदेत्यविरतंजगत् ॥ ३६ ॥ नकिंचित्कस्यचिन्नष्टमिंद्रजालजलेयथा ॥ भ्रष्टेनष्टेतथैवास्मिन्संसं
सारेविनथोस्थिते ॥ ३७ ॥ यदसत्तदसत्याच्चेन्नकिंचित्कस्यचित्क्षतं ॥ ततोहर्षविषादानांसंसारेनामनास्पदं ॥ ३८ ॥ ५

कल्पितनगरोपलक्षणं ॥ ३३ ॥ अतोनास्यनाशासम्बंधोवाशोकहर्षौकार्याविति आशयेनाह रामेत्यादिना युक्तोसम्बद्धो ॥ ३४ ॥ ३५ ॥ क्रीडार्थे
नपुत्रिकादिनावर्तनंपुत्रपश्वादिव्यवहाराभासकल्पनंयथानाशोच्यतेतिशेषः ॥ ३६ ॥ ३७ ॥ यत्असदलीकंतत्असत् अविद्यमान
मेवचेत्स्यात्कस्यकिंक्षतं नकिंचिदितिशेषः इत्यर्थेवानकारः ॥ अतः संसारेहर्षविषादानामास्पदंनकिंचिन्नामेत्यन्वयः ॥ ३८ ॥ ५ ॥

इत्थंनाशाभ्युपगमेनशोकानर्हतामुक्त्वावस्तुतोनाशएवकस्यचिन्नास्तीतितनामाह ॥ असदेवेति ॥ यद्यतोऽसदेवतस्मान्नतः ॥ ३९ ॥ अध्य
स्तदृश्यानाशासंभवमुपपाद्याधिष्ठानदृश्यापितमुपपादयति सदेवेति सुखदुःखेकिंनिमित्तमुस्थितेनोत्थितएवेत्यर्थः ॥ ४० ॥ उत्पत्तिनि
रासादेववृध्यादिविकारा अपिनिरस्ताएवेतितन्निमित्तहर्षस्याप्ययुक्ततेत्याह ॥ असदिति ॥ वापीअवधारणे ॥ ४१ ॥ इष्टप्राप्तौहिहर्षःस्या

असदेवयदुत्पन्नंतस्मात्किंनामनश्यति ॥ नाशाभावेहिदुःखस्यकःप्रसंगोमहामते ॥ ३९ ॥ सदेववायदुत्पन्नंतस्यकिंनाम
नश्यति ॥ अतैवेदंजगत्सर्वंसुखदुःखेकिमुस्थिते ॥ ४० ॥ असद्वापियदुत्पन्नंवृद्धिःस्यात्तत्रकीदृशी ॥ वृद्धेरभावेहर्षस्यकःप्र
संगोमहामते ॥ ४१ ॥ सर्वत्रासत्यभूतेस्मिन्ब्रह्मन्नवमयेपिच ॥ किंस्यात्त्रिभुवनेहेयंप्राज्ञाःपरिहरंतुयत् ॥ ४३ ॥ असत्सद्वाज
गद्यस्यतेनासौसुखदुःखयोः ॥ अगम्यएवमूर्खस्तुतद्विनाशेनदुःखितः ॥ ४४ ॥ आदावंतेचयन्नास्तिवर्तमानेपितत्तथा ॥ यो
भिवांछसद्भामतस्यासत्त्वेवदृश्यते ॥ ४५ ॥ सर्वत्रासत्यभूतेस्मिन्प्रपंचैकांतकारिणि ॥ संसारेकिमुपादेयंप्राज्ञोयदभिवांछतु ॥ ४२ ॥

दृष्टमेवमायामयेनास्तीत्याह सर्वत्रेति ॥ ४२ ॥ एवंसर्वमानंदैकरस्येनपश्यतोहेयमपिनास्तीत्याह सर्वत्रेति ॥ ब्रह्मन्नवमयेस्वार्थेमयट्परिहरंतु
सज्जंतु ॥ ४३ ॥ तस्यपक्षद्वयेपिविनाशानर्हस्यपुत्रमित्रादेर्विनाशेनस्वप्नांतिकल्पितेनदुःखितः ॥ ४४ ॥ इदानीमसत्सत्पक्षयोस्तुल्येउपपत्तीद
र्शयति ॥ आदावितिद्वाभ्यां ॥ असद्वाइदमग्रआसीत्नैवेहकिंचनाग्रआसीत्इत्यादिश्रुतिभिर्गगनपवनभुवनादीनामाद्यंतयोरसत्त्वंश्रूयते
घटादेश्चप्रत्यक्षमनुभूयतेचिरंचोभयतस्त्वासत्त्वंअचिरंसत्त्वंअसत्त्वंप्रतिव्यक्तिप्रसिद्धंतेचपरस्परोचित्तिस्वभावेसत्त्वासत्त्वेनैकवस्तुन्येकत
रप्रहायामंतरेणानिवेशितेइत्यवश्यमेकतरस्मिन्त्रहातव्येआद्यंतयोश्चिरतरमसत्त्वप्रसिद्धेर्वर्तमानदशायामपिअसत्त्वमेवसर्वव्यक्तीनामितिअ

सदेवसोम्येदमग्र आसीत्कथमसतः सज्जायेतेत्यादिश्रुतिभिः सत्त्वसिद्धेस्तत्प्रमाणाप्रवृत्तिकाले सर्ववस्त्वनुभवादाद्यंतकालयोः स
त्तानभिव्यक्तितिरोधानमात्रकल्पनेनाप्यसद्वा इदमग्र आसीदित्यादिश्रुतियुक्त्योरुपपत्तेः सत्त्वश्रुतियुक्त्योरन्यथोपपादयितुमशक्य
त्वाच्च सदातनी सार्वत्रिकी च सर्ववस्तूनां सत्ता त्वाद्यवादे केवयुक्तेति सत्त्वे न्यसिद्धे आदावंते च कारणब्रह्मसत्त्वैव सर्वस्य सत्ता द्वर्त

आदावंते च यः सत्स्यं वर्तमाने सदेव तत् । यस्य सर्वं सदेव स्यात्तस्य सत्त्वेन दृश्यते ॥ ४६ ॥ असत्यभूतं तोयांतश्चंद्रव्योम
त्वतादिके । बालाएवाभिवांछंति मनोमोहाय नोत्तमाः ॥ ४७ ॥ बालो हि वितताकारैर्वस्तुरिक्तैः प्रयोजनैः ॥ संतोषमे
त्यनंताय दुःखाय न सुखाय तु ॥ ४८ ॥ तस्मान्मा त्वं भवो बालो राम राजीवलोचन ॥ अविनाशमिहालोक्य नित्यमाश्र
यसुस्थिरं ॥ ४९ ॥ असदिदमखिलं मया समेतं त्विति विगणय्य विषादितास्तु मा ते ॥ सदिति हि सकलं मया समेतं त्विति च विलो
क्य विषादिनास्तु मा ते ॥ ५० ॥ ७ ॥ मानकालेन तथैवेति ॥ सद्वादिना अखंडब्रह्मसत्त्वेव सर्वत्र दृश्यत इत्यर्थः ॥ ४६ ॥ देशकालपरिच्छिन्नस

ताकल्पनं पक्षद्वयबहिःकृतं सर्वश्रुतियुक्तिविरुद्धं मूर्खसहस्रैरंधपरंपरया परिकल्पितं सर्वानर्थकारीति बालिशानां तेषामेवोचितं न त्वचेयाशयेना
ह असत्यभूतमित्यादिना ॥ ४७ ॥ वस्तुरिक्तैः अर्थशून्यैः प्रयोजनैः सुखाभासैः ॥ ४८ ॥ मा भवः मा भूः लुङ्विषये व्यसयेन लङ् ॥ ४९ ॥ इदानीं दर्शित
योः सदसत्पक्षयोर्द्वयोरभेदेनैकप्रयोजनावासनेफलतः समुच्चयं दर्शयन्नुपसंहरति असदिति ॥ मया ममैदेहात्मत्वेन कल्पितेनाहंकारेण समेतं
सहितमिदमखिलं जगदसदेवेति मत्वा श्रुतिगुरुयुक्तिस्वानुभवैरवधार्य पुत्रमित्रधनादिनाशे विषादिता शोकः ॥ विषमिव परिणामदुःख
दान्विषयान्भोक्तुं शीलमस्येति विषादी रागी तद्भावो विषादिता रागश्च मास्तु तथा च शोकरागादिनिरासद्वारा ऐकात्म्यदर्शने प्रपंचासत्व

॥वा॰री॰स्थि॰
॥१०६॥

वादउपयुज्यते इति भावः॥ एवमन्यार्थे नासद्वादप्रस्तावेन निःसत्त्वमेव जगदिति न मंतव्यं किंतु सकलं सदेव॥ सत्त्वस्याप्रसिद्धौ न ह्यतिप्रसे
पकस्यासत्त्वस्याप्रसिद्धेः प्रसिद्धौ च तत्त्वह्यतिप्रसिद्धत्वादेवासत्त्वासिद्धेः॥ एवं सर्वत्र सत्तयाप्रतिष्ठितत्त्वमसत्त्वं निरास्पदं न कचित्कस्यचित्॥ परिच्छे
दायप्रभवती सपरिच्छिन्नसदेकरस्ये सिद्धे घटपटादिपरिच्छेदकाकारस्य पृथगनवशेषान्मया शोधितचिन्मात्रैकरसेन प्रतीचा अखंडैकरसेन
समेतं सदेव ब्रह्माख्यमहमिति विलोक्य स्वात्मप्रतिष्ठस्य ते न वविषादिता पुनः संसारिकजन्ममरणादिविषादावाप्तिर्मास्तु कालत्रयेपिन

॥श्रीवाल्मीकिरुवाच॥ इत्युक्तवत्यथ मुनौ दिवसो जगाम सायंतनाय विधयेस्तमिनो जगाम॥ स्नातुं सभा कृतनमस्करणा जगाम
श्यामाक्षये रविकरैश्च सहाजगाम॥५१॥ यथाभूतार्थयोगोपदेशो नाम सर्गः॥४५॥ श्रीवसिष्ठ उवाच॥ रम्येषु धनेषु दारादौ शोकस्या
वसरो हि कः॥ इंद्रजाले क्षणात् दृष्टे नष्टे का परिवेदना॥१॥ गंधर्वनगरस्यार्थे दूषिते भूषिते तथा॥ अविद्यांशे सुतादौ वा कः क्रमः
सुखदुःखयोः॥२॥ रम्येषु धनेषु दारादौ हर्षस्यावसरो हि कः॥ वृद्धायां मृगतृष्णायां किमानंदो जलार्थिनां॥३॥ धनदारेषु वृद्धेषु दुःख
युक्तं न तुष्टयः॥ वृद्धायां मोहमायायां कः समाश्वासवानिह॥४॥ यैरेव जायते रागो मूर्खस्याधिकतां गतैः॥ तैरेव भोगैः प्राज्ञस्य विराग

संभावितेस्यर्थः॥५०॥५१॥ इति श्रीवा॰ता॰स्थि॰ पंचचत्वारिंशः सर्गः॥४५॥ विहरन्नपि संसारे यैर्गुणैर्न निमज्जति॥ ते रामायात्र कीर्त्यंते जीव
न्मुक्तेषु ये स्थिताः॥१॥ तत्र सर्ववस्तुष्वनास्थया नष्टोपेक्षणानागतावांछनलक्षणौ गुणौ प्रथममुपदिदिक्षुः॥ पूर्वप्रस्तावस्य तदुपयोगं
दर्शयितुमाह रम्येष्वित्यादिना॥ रम्य इति पदसंस्कारपक्षे एकवचनं वचनं सर्वनाम्नि स नुशासनादेकवचनं॥ आदृत्य उभयान्वयि॥१॥ क्रमयां
क्रमः प्रसरः॥२॥ धने दारादौ च समृद्धे सतीति शेषः॥ आनंदः जलक्रीडादिसुखाधिक्यं किं॥३॥ तद्वद्धौ संसाररोगवृद्धिसंभावनात् दुः
॥खमेव कर्तुमुचितं न हर्षेत्साह धनेति॥४॥ अधिकतां अभिवृद्धिं आगतैः
॥५

॥चतुर्थः॥
उत्पत्ति ४
॥१०६॥

नष्टेन नश्वरस्वभावे पारावल्लोकिनः। नश्वरता नरकहेतुता युदर्ककटुकतादर्शिनः ॥६॥ यदर्थमयं प्रस्तावस्तं दर्शयति ॥ अत इति। उपा
हरत्युपयुंक्ष्व प्राप्तोपयोगोर्थप्राप्तत्वान्न विधेयो गुणाः ॥७॥ गुणांतरमाह अनागतानामिति ॥८॥ अप्रमादलक्षणं गुणांतरमुपदिश
ति॥ संसारेति। संसारे संभ्रमयतीति संसारसंभ्रमः ॥ कामस्तल्लक्षणो छन्नात्म निजिघांसया प्रच्छन्ने आततेन विषशस्त्राग्न्यादिना
हंतुं अयते उपागच्छतीत्याततायी शत्रुस्तस्मिन्। तदुक्तं उद्यतासिं विषाग्निं च शापोद्यतकरं तथा ॥ अथर्वणेन हंतारं पिशुनं राजस

नष्टे धने यद्दारादौ हर्षस्यावसरो हि कः ॥ पारावल्लोकिनस्तेनैर्विरागं यांति साधवः ॥६॥ अतो राघव तत्त्वज्ञो व्यवहारेषु
संस्थितः ॥ नष्टं नष्टमुपेक्षस्व प्राप्तं प्राप्तमुपाहर ॥७॥ अनागतानां भोगानामवांछनमकृत्रिमं ॥ आगतानां च संभो
ग इति पंडितलक्षणं ॥८॥ संसारसंभ्रमेऽस्मिन् छन्नात्मन्याततायिनि ॥ तथा विहर संबुद्धो यथा नायासि मूढ
तां ॥९॥ संसाराडंबरस्यास्य प्रपंचरहिते क्रमे ॥ सम्यग्ज्ञानानुपश्यंति ये हतास्ते कुबुद्धयः ॥१०॥

ग्रस्तु। भार्यातिक्रमिणं चैव विद्यात्सप्ताततायिन इति संप्रबुद्धः प्रबोधोऽप्रमत्तः ॥९॥ प्रपंचरहिते क्रम्यत इति क्रमः परमपदं तस्मिन् स
म्यक् ज्ञा अपि ये प्रमादादस्य संसाराडंबरस्य वंचनां नानुपश्यंति ते कुबुद्धयः ॥ प्रमादेन हता इत्यर्थः ॥ अथवा प्रपंचरहिते ब्रह्मणि विवेकवै
राग्यप्रबोधाप्रमादादिगुणार्जनक्रमे ये सम्यक् ज्ञास्तेऽस्य संसाराडंबरस्य कर्मपापवशेषविवक्षायां षष्ठी इमं संसाराडंबरं नानुपश्यंति ये
तु कुबुद्धयः उक्तगुणहीनास्ते हता इत्यर्थः ॥१०॥ श्रीरामायनमः ॥ श्रीवासुदेवचरणारविंदाभ्यान्नमः ॥ श्रीगोविंदपरमात्मनेनमः ॥ छ

दृश्यदर्शनाऽरतिलक्षणामपरां गुणामुपदिशति ॥ ययेति ॥ चित्तरंजनहेतुवासनाधानस्वरूपप्रच्यवननरकाद्यनर्थहेतुत्वमिथ्यात्वानामन्यत
मोपपादिकयाययाकयाचिद्युक्त्यागतानिवृत्ताऽऽस्थापरमार्थाभिनिविष्टाविमलापिपापमतिं नपरिमज्जति मोहाब्धौ ॥ ११ ॥ एवं बाह्यार्था
भिनिवेशत्यागोपिगुणाद्याशयेनाह ॥ यस्येति ॥ असदिदमिति निश्चयेनेति शेषः ॥ आस्थाऽभिनिवेशः ॥ १२ ॥ ऐकात्म्यदर्शनमपिगुणाद्रसा
ह ॥ अहमिति ॥ अनास्थापरित्यागोयथाप्राप्तानुवर्तनं ॥ १३ ॥ उक्तमेवविवृणोति ॥ शुद्धमिति ॥ सदसतोर्व्यक्ताव्यक्तयोर्मध्ये अनुगतं शुद्धं सत्तामात्रंपदंत

ययाकयाचिद्युक्त्यैवदृश्याद्यस्यगतारतिः ॥ परिमज्जतिनस्यास्थानकचिद्विमलामतिः ॥ ११ ॥ यस्यासदिदमित्यास्थानिवृत्तासर्ववस्तुषु ॥ कोऽङ्गीकरोतिसर्वज्ञं नाविघातमवाप्तवान् ॥ १२ ॥ अहं जगच्चैकमिदं सर्वमेवेतियस्यधीः ॥ आस्थानास्थेपरित्यज्यसंस्थितास नमज्जति ॥ १३ ॥ शुद्धं सदसतोर्मध्ये पदं बुध्वावलंब्यच ॥ सबाह्याभ्यंतरं दृश्यंमाग्रहाणाविमुंचमा ॥ १४ ॥ असंतविरतः स्वस्थः सर्वदासविवर्जितः ॥ व्योमवत्तिष्ठनीरागोरामकार्यपरोपिसन् ॥ १५ ॥ यस्यनेच्छानवानिच्छाज्ञस्यकर्मणितिष्ठतः ॥ नतस्यलिप्यतेप्रज्ञापद्मपत्रमिवांबुभिः ॥ १६ ॥ दर्शनस्पर्शनादीनिमाकरोतुकरोतुच ॥ तवेंद्रियमनोगोपात्वमनिच्छोभवात्मवान् ॥ १७ ॥ ममेदमितिसद्भूतमिंद्रियार्थेभवन्मनः ॥ नानिमज्जत्वमज्ञः सन्माकरोतुकरोतुवा ॥ १८ ॥ यदातेनेंद्रियार्थश्रीः स्वदत्तेहृदिराघव ॥ तदाविज्ञातविज्ञानः समु

देवप्रसगात्त्वेसवलंब्य ॥ १४ ॥ उपरतिसंतोषाभिकेतनत्वासंगत्वगुणानुपदिशति ॥ असंतेति ॥ १५ ॥ कथंनीरागः स्यात्कथंवाऽसंगस्तत्राऽऽहयस्ये
ति ॥ १६ ॥ बाधितानुवृत्तिमात्रत्वेनासुख्यत्वाज्जोपांतवेंद्रियसहितमनः दर्शनादीनिकरोतुवा ॥ १७ ॥ इंद्रियार्थेममतात्यागलक्षणांगुणामुपदिश
न्ननास्थामुपपादयति ॥ ममेति ॥ अमग्नः सन्निति पुंस्त्वंछांदसं त्वमज्ञः सन्निति पाठेतुत्वंमनः मानिमज्जयेत्यर्थः ॥ १८ ॥ स्वस्यजीवन्मुक्ततापाप्ति
प्रत्ययेलिंगमाह ॥ यदेति ॥ नस्वदत्ते अनर्थहेतुत्वात्प्रतिसंधानेपिस्वतएवनरोचते ॥ १९ ॥ श्रीरामरूपपरब्रह्मणेनमः ॥ श्रीवासुदेवायनमः ॥ ५ ॥

आ आस्वादितेतिच्छेदः॥ आसमंतात् ऐहलौकिकाः पारलौकिकाश्च आस्वादिताः अरुचिविषयीकृताः इंद्रियार्था विषया यस्य धीरस्य सततनोर्व्युत्थाने
देहभावनवतः अतनोः समाधिना तद्रहितस्यापि अर्थवशात् अनायासेनेति यावत्॥२०॥ तस्यां जीवन्मुक्तो वासनाप्यश्नितस्य निष्कर्ष एव मुख्यं सा
धनमित्याह उच्चैःपदायेति॥ उदारं विवेकवैराग्योत्कृष्टं चेतो मनः॥२१॥ बुडिता निमग्नाः॥२२॥ कीदृशी सा प्रज्ञा तां दर्शयति क्षुरधारेति॥ विविक्त वैरा

आस्वादितेंद्रियार्थस्य सततनोरतनोरपि॥ अनिच्छतोपि संपन्ना मुक्तिरर्थवशात्तव॥२०॥ उच्चैःपदाय परया प्रज्ञया वासनागयात्
पुष्पाद्गंधमिवोदारं चेतो राम पृथक् कुरु॥२१॥ संसारांबुनिधावस्मिन्वासनांबुपरिप्लुते॥ ये प्रज्ञानावमारूढास्ते तीर्णा बुडिताः
परे॥२२॥ क्षुरधाराप्रमितया धियोपरमधीरया॥ प्रविचार्यात्मनस्तत्त्वं ततः स्वपदमाविश॥२३॥ यथातत्त्वविदः प्राज्ञा ज्ञानदृष्टि
न चेतसः॥ विहरंतित्तथा राम विहर्तव्यं न मूढवत्॥२४॥ जीवन्मुक्ता महात्मानो निःसत्त्वा महाधियः॥ आचारैरनुगंतव्या न
भोगकृपणाः शठाः॥२५॥ न हृष्यंति न वांछंति व्यवहारं जगद्गतं॥ सर्वमेवानुवर्तंते पारावारविदो जनाः॥२६॥ प्रभावस्या
भिमानस्य गुणानां यशसः श्रियः॥ न कश्चित्कृपणाल्लोके महांतस्तत्त्वदर्शिनः॥२७॥ सुशून्येपि न रिक्तंते देवोद्या
नेन संगिनः॥ नियतिं च न मुंचंति महांतो भास्करा इव॥२८॥ ५॥ स्वमार्गमर्यादां॥२८॥

यादितीक्ष्णीकृतया स्वार्थः धीरया द्वंद्वसहनधैर्यवत्या॥२३॥२४॥ शठाः स्वपरवंचकाः॥२५॥ पारं अत्यतत्वं अवारं जगत्तत्त्वं तद्विदः॥
२६॥ न विदुषामपि कश्चित्कार्पण्यं स्यात्किं तेषामित्याह प्रभावस्येति प्रभावः विद्यातपःपराक्रमाद्युत्कर्षः गुणा दाक्षिण्यकुलशीलाद
यः श्रियः संपदः एतेषां हि विषये लोके कार्पण्यं प्रसिद्धं तत्त्वदर्शिनः प्रभावादीनां मिथ्यात्वाद् पुरुषार्थतादर्शिनः॥२७॥ सुशून्येस
र्वनाशेपि देवोद्याने सर्वकामसमृद्धनंदनादावपि न संगिनो नासक्ताः नियतिं शास्त्रमर्यादां भास्करपक्षे सुशून्ये आकाशे नियतिं

समुन्नद्धाः विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नर इत्यादिश्रुत्युक्तसाधनसनद्धाः ॥२९॥ मयि तर्हि ते गुणाः संति न वेत्ति संदेहं
कालतरं राममाश्वासयति त्वमपीति ॥३०॥३१॥ दूराः आलोकवासनाविषयकौतुकदर्शनेच्छाः यस्य तथाविधो भूत्वेत्यर्थः ॥३२॥ उपदि
ष्टार्थरहस्यानां राममस्यांतरुन्मेषाद्विभाव्य वाल्मीकिराह इत्यमिति ॥ विमलाशयस्य मुनेर्वसिष्ठस्येत्थमुक्तप्रकारया गिरा रामः स्पष्ट

विगतेच्छाय यथाप्राप्तव्यवहारानुवर्तिनः ॥ विचरंति समुन्नद्धाः स्वस्था देहरथे स्थिताः ॥२९॥ त्वमपि प्राप्तवान्राम विवेकं भिम
मानतं ॥ प्रज्ञाबलेन चानेन ज्ञानेन स्वस्थो सि सुंदर ॥३०॥ स्पष्टं दिष्टमवष्टभ्य निन्योत्त्योगतमत्सरः ॥ विहरस्मिन्भुवःपीठे परां
सिद्धिमवाप्स्यसि ॥३१॥ स्वस्थः सर्वंहितत्यागी दूरालोकनवांछनः ॥ परां शीतलतामंतरादाय विहरानघ ॥३२॥ श्रीवा
ल्मीकिरुवाच ॥ इत्थं गिरा विमलया विमलाशयस्य रामो मुनेः सपदि स्पष्ट इवावभासे ॥ ज्ञानामृतेन मधुरेण विराजितांतः पू
र्णः शशांक इव शीतलतां जगाम ॥३३॥ इति श्रीयोगवासिष्ठतात्पर्ये स्थि॰ मोक्षोपाये षट्चत्वारिंशः सर्गः ॥४६॥ ७॥
श्रीरामउवाच ॥ भगवन्सर्वधर्मज्ञ सर्ववेदांगपारग ॥ आश्वस्त इव तिष्ठामि शुद्धाभिर्भवदुक्तिभिः ॥१॥ उदारा यिविविक्ता
निपेशलान्युदितानि च ॥ श्रोतुं तृप्तिं न गच्छामि वचांसि वदतस्तव ॥२॥७॥

परिमार्जितो दर्पण इव अवभासे ज्ञानामृतेन विराजितांतःकरणः संपूर्णः शशांक इव शीतलतां तापत्रयोपशांतिं जगाम ॥३३॥ इति श्री
वासिष्ठतात्पर्ये स्थि॰ षट्चत्वारिंशोध्यायः ॥४६॥ अतीतानि दिविनः संतो ब्रह्मब्रह्माण्डकोटयः ॥ देवाद्याश्चात्र वर्ण्यंते नियतानियतक्रमाः
आश्वस्तः अपनीतश्रमाध्वक्षुद्भ्रमः पुरुष इव ॥१॥ उदाराण्युत्तमफलार्थप्रदानि वर्णपदवाक्यप्रकरणभेदैर्व्यक्तानि पेशलानि विचि
त्रकथायुक्तिसंदर्भचतुराणि उदितानि आत्मतत्त्वप्रकाशकत्वेन हृदयपद्मविकासकत्वेन च सूर्यादिवदुद्भूतानि ॥२॥ श्रीरामायनमः

एवं प्रशंसया गुरुमुल्लाद्य प्रासंगिकं ब्रह्मादिदेवतैश्वर्यं तत्वं जिज्ञासुः पृच्छते जाया इति राजससाक्ष्विक्यां जाताः जीवस्तातेः कथनाव
सरे भवता शास्त्रेः नानाविधिसृष्टि प्रतिपादकश्रुतिपुराणादि प्रमाणेः कमलजन्मनः उत्पत्तिर्या प्रोक्ता प्रस्तुता तां स्फुटं वर्णयेति शेषः ३
बहूनीत्यस्य सर्वत्र संबंधः अच्छुत सहस्रपदान्यप्यनंतपराणि ४ अन्येषु ब्रह्मांडेषु चाद्यस्मिन्नपि नानाचारविहाराणि सुरासुर शरी
राणीति शेषः ५ ६ विचित्रे इंद्रजाले अभ्युत्थिता इव ७ शार्व्यः रुद्रपूर्व्याः पद्मजादेव प्रथमजाद्भवो या सा तताः वैष्णव्यो विष्णुप्र

जाया राजससात्विक्याः कथनावसरांतरे उत्पत्तिर्भवताप्रोक्ता शास्त्रेः कमलजन्मनः ३ श्रीवसिष्ठ उवाच बहूनि
ब्रह्मलक्षाणि शंकरेंद्रशतानि च नारायणसहस्राणि समतीतानि राघव ४ अन्येषु च विचित्रेषु ब्रह्मांडेषु च भूमि
शः नानाचारविहाराणि विहरंति सहस्रशः ५ तुल्यकालमनंतेषु कालांतरभवेषु च जगत्सु प्रोद्भविष्यंति बहून्य
न्यानि भूरिशः ६ तेषामब्जोद्भवादीनां ब्रह्मांडेषु दिवौकसां उत्पत्तयो महाबाहो विचित्रा अभ्युत्थिता इव ७ कदाचित्सृष्ट
यः शार्व्यः कदाचित्पद्मजोद्भवाः कदाचिदपि वैष्णव्यः कदाचिन्मुनिनिर्मिताः ८ कदाचित्पद्मजो ब्रह्मा कदाचित्सलिलोद्भ
वः अंडोद्भवः कदाचित्तु कदाचिज्जायतेंबरात् ९

र्व्यः तथा चोक्तं पुराणे तपसा तोषयित्वेशं ब्रह्मा विष्णुर्महेश्वराः परस्परस्माज्जायंते परस्परजयैषिणा इति मुनिनिर्मिता इयुवांतरसर्गाभिप्रा
यं ८ ब्रह्मादीनामाविर्भावस्थानान्यनियतानीत्याह कदाचिदिति पाद्मे कल्पे पद्मजः सलिलोद्भवः आपवाख्यः अंडोद्भवः प्रसिद्धः अं
बरादिति तथा च आकाशप्रभवो ब्रह्मेति सूर्यवंशादिप्रस्तावे पूर्वरामायणे उक्तं ९ श्रीरामचंद्रगुरवे नमः श्रीवेदव्यासाय नमः श्री

॥ वा॰ रा॰ स्ख॰ ॥

॥ १०९ ॥

एवमकार्दिपराधिकारिष्वप्यनियम इत्याह ॥ कस्मिंश्चिदिति ॥ त्र्यक्ष एव सर्वदेवताधिकारेष्विति एवकारबलाल्लभ्यते हि शब्दस्वरसे
वान्यत्रापि देवतान्तरभावकल्पनान्यस्येति द्योतनार्थः ॥ १० ॥ नीरंध्रतरुसंकटा प्रथममिति सर्वत्र शेषः ॥ ११ ॥ प्राचुर्ये मयट् ॥ १२ ॥ इतो
स्मिन्ब्रह्मांडे एवकानि कियंति चित्राण्याश्चर्याणि ॥ अथ अन्यान्यपि जगंति ब्रह्मांडानि अन्यथा अन्यैः प्रकारैः बह्वाश्चर्याणि इत्य

कस्मिंश्चिदंडे त्र्यक्षोर्कः कस्मिंश्चिदपि वासवः ॥ कस्मिंश्चित्पुंडरीकाक्षः कस्मिंश्चित्त्र्यक्ष एव हि ॥ १० ॥ कस्यांचिद्भूरभूत्
स्रष्टा नीरंध्रतरुसंकटा ॥ कस्यांचिन्नरनीरंध्रा कस्यांचिद्भूधरावृता ॥ ११ ॥ भूरभूत्स्वर्णमयी कापि काचिदासीत्तु दृषन्म
यी आसीद्धेममयी काचित्काचित्ताम्रमयी तथा ॥ १२ ॥ इहैवैकानि चित्राणि जगंत्यन्यान्यथान्यथा ॥ अन्यान्येकैकलो
कानि निर्महांस्यपि कानिचित् ॥ १३ ॥ अनंतानि जगंत्यस्मिन्ब्रह्मतत्त्वमहांबरे ॥ अंभोधिवीचिजालवन्निमज्जं
त्युन्मज्जंति च ॥ १४ ॥ यथा तरंगा जलधौ मृगतृष्णा मरौ यथा ॥ कुसुमानि यथा चूते तथा विश्वश्रियः परे ॥ १५ ॥ भानो
र्गपायितुंशश्यार रश्मिषु त्रसरेणवः ॥ आलोलवपुषो ब्रह्मतत्वेन जगतां गणाः ॥ १६ ॥ यथा मशकजालानि वर्षादि
ष्वाकुलानि तु ॥ उत्पद्योत्पद्य नश्यंति तथेमालोकसंचयः ॥ १७ ॥ नच विज्ञायते कस्मात्कालाद्यास्संप्रति चागताः ॥ नियागमा

र्थः ॥ एकैक एव सूर्यादिवल्लोकः आलोकः प्रकाशात्मा येषु निर्महांसि निष्प्रकाशानि ॥ १३ ॥ निमज्जंति लीयंते ॥ १४ ॥ १५ ॥ आलोल
वपुषो चंचलाः ॥ १६ ॥ १७ ॥ तेषां सर्गयां प्रवाहानादितामाह ॥ न चोत्पादिनां नियममेव आगमापायावाविर्भावतिरोभावौ तत्पराः ॥ १८

॥ चतुर्थः ॥

॥ १०९ ॥

१९ ॥ सरित्तरंगाणां संख्यारीत्या ॥ २० सहस्राः सहस्रशः नाडिकाः घटिकाः ॥ २१ सर्वेषां ब्रह्माण्डानां त्रैलोक्यपारव्यानोत्करी सा हृदयाका
शस्थे ब्रह्मण्येव कल्पनमित्याह ॥ अन्या इति ॥ अन्या ब्रह्मांडपंक्तयः संप्रति इदानीमपि अस्य ब्रह्मोपलब्धिस्थानत्वाद्ब्रह्मपुरस्य श
रीरस्य प्रांते हृदयपुंडरीकदेशे स्थिते वितते अनंतविस्तीर्णे ब्रह्मणः पदे ब्रह्मणि वर्तमानशरीरकाः परिवर्तमानमूर्तयः संस्थो विद्यंते

अनादिमंत्योविरतं प्रस्फुरंति तरंगवत् ॥ पूर्वास्तूर्वं किल्वाभूवंस्तत्तः पूर्वतरं यथा ॥ १९ ॥ भूत्वा भूत्वा प्रलीयंते ससुरा
सुरमानवाः ॥ सरित्तरंगसंख्येव समस्ता भूतजातयः ॥ २० ॥ यथेदमंडं वैरिंच्यं तथा ब्रह्मांडपंक्तयः ॥ याः सहस्राः
परिक्षीणा नाडिकावत्सरेष्विव ॥ २१ ॥ अन्याः संप्रति विद्यंते वर्तमानशरीरकाः ॥ प्रांते ब्रह्मपुरस्यास्य वितते ब्र
ह्मणः पदे ॥ २२ ॥ ब्रह्मण्यन्या भविष्यंति ब्राह्म्यो ब्रह्मपुरश्रियः ॥ पुनस्तास्त्वविनश्यंति भूत्वा भूत्वा यथा गिरा ॥ २३
ब्रह्मण्यन्या भविष्यंत्यः स्थिताः सर्गपरंपराः ॥ घटाद्यवमहोराशावंकुरे पत्रवाद्यव ॥ २४ ॥ यावद्ब्रह्म चिदाका
शे तथा त्रिभुवनश्रियः ॥ स्फारकारविकाराढ्याः प्रेक्ष्यमाणा न किंचन ॥ २५ ॥

अस्मिन् द्यावापृथिवी अंतरेव समाहिते इति श्रुतेरिति भावः ॥ २२ ॥ ब्रह्मपुरोपलक्षितहृदयाकाशश्रियः शोभा भूताः ब्राह्म्यः ब्र
ह्मनिर्मिताः ब्रह्मांडपंक्तयः यथा गिरः ध्वनिभेदाः आकाशे भूत्वा नश्यंति तद्वत् ॥ २३ ॥ दृष्टांतांतरोक्त्यर्थमुक्तमेवाह ॥ ब्रह्मणीति
यावत्तत्त्वज्ञानेन प्रेक्ष्यमाणाः न किंचनेति बाधस्तावत्कालं भविष्यंतीत्यर्थः ॥ २५ ॥ श्रीवेदव्यासाय नमः ॥ श्रीरामाय नमः

जडारंभाः मूर्खैरध्यस्ताः वितन्वंसः विस्तीर्णमृणाः खल्वता व्योमल्वता इव ॥ २६ ॥ स्रष्टिराशीनांस्वांतर्गतस्रष्टिसमष्टि
भूतानांब्रह्मांडानांस्रष्टयः चित्राकाराणिविचेष्टितानितदंतर्गतप्राणिचेष्टायासांताः ॥ २७ ॥ सर्वेषांब्रह्मांडानांसमस्ताः
स्रष्टिदृष्टयस्तत्वज्ञविषयेसल्लिलाद्दृष्टय इव नहिव्यतिरिक्ता इतिपरेणान्वयः ॥ २८ ॥ अतस्तत्वज्ञदृष्ट्यातु जलदाद्दृष्टय

उन्मज्जंसोनिमज्जंसोनसत्यानाप्यसद्रिूपः ॥ जडारंभा वितन्वंसस्ता एव खल्वता इव ॥ २६ ॥ तरंगसमधर्मिण्यो
दृष्टनष्टशरीरकाः ॥ सर्वासांस्रष्टिराशीनांचित्राकारविचेष्टिताः ॥ २७ ॥ चित्राकारविकाराश्च चित्ररूपाहि
स्रष्टयः ॥ व्यतिरिक्तानसर्वेषांसमस्ताः स्रष्टिदृष्टयः ॥ २८ ॥ तत्वज्ञविषयेरामसल्लिलादिवदृष्टयः ॥ आयांति
स्रष्टयोदेवा ज्जलदादिवदृष्टयः ॥ २९ ॥ व्यतिरिक्तानसर्वेषांसमस्ताः स्रष्टिदृष्टयः ॥ व्यतिरिक्ताद्रवांभो
धिस्थाछीलाः शाल्मलेरिव ॥ ३० ॥ इह स्रष्टिषु पुष्टासु निकृष्टासु च राघव ॥ परमात्मभसो जातास्तन्मात्रमल्लमा

इव देवात्तटस्थेश्वरादायंति ॥ २९ ॥ परमार्थतस्तु अज्ञानांतत्वविदांचसर्वेषांनव्यतिरिक्ताः मृत्कष्टानिद्रवरूपाणिभूमेरंभां
सिधारयंतीतिद्रवांभोधयः शिरास्ताश्चसास्तीयास्त क्षीनाटपत्रादयश्च अष्टीलाः ॥ दारुबीजादिग्रंथयश्चशाल्मलेर्द्रक्षाद्यथा
नव्यतिरिक्तास्तद्वत् ॥ ३० ॥ पुष्टासुस्थूलभूतारब्धासुदेहादिषु ॥ निकृष्टासुसूक्ष्मभूतारब्धास्विंद्रियादिषु च परमात्मभसः आव्या
कृताकाशाज्जाताः भूतसूक्ष्माख्यपंचतन्मात्रलक्षणास्यमायामल्लस्यसूत्रस्थानीयस्यस्फटिकरुद्राक्षग्रंथिमालिका इव सर्वभा

॥ वाइसर्थः ॥ ३१ ॥

कदाचित्सप्रजो ब्रह्मेतिय दुक्तं तत्र यथायोगं पंचीकरणोत्तरभाविस्थूलव्योमादीनां प्रथमाविर्भावक्रमो नियामक इत्याह कदाचिद्यादिनाप्र
तिष्ठां स्थूलीभावेन स्थितिं एवं सर्वत्र ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ इदानीमेकैकस्योक्तव्योमादेः प्रथमाविर्भावे युक्तिमाह ॥ इदमिति ॥ इदं स्वातिरि
क्तं चत्वारि भूतचतुष्टयं संपीड्य स्वांशोपबृंहणेन तिरोभूतमिव कृत्वा पंचमयं देवभूतं यदा वर्द्धते तदा तज्जातप्रवेश ब्रह्माजायंतीत्युक्त

कदाचित्प्रथमं व्योम प्रतिष्ठामधिगच्छति ॥ ततः प्रजायते ब्रह्मा व्योमजो सो प्रजापतिः ॥ ३२ ॥ कदाचित्प्रथमं वायुः
प्रतिष्ठामधिगच्छति ॥ ततः प्रजायते ब्रह्मा वायुजो सो प्रजापतिः ॥ ३३ ॥ कदाचित्प्रथमं तेजः प्रतिष्ठामधिगच्छति
ततः प्रजायते ब्रह्मा तेजसो सो प्रजापतिः ॥ ३४ ॥ कदाचित्प्रथमं वारि प्रतिष्ठामधिगच्छति ॥ ततः प्रजायते ब्रह्मा वारि
जो सो प्रजापतिः ॥ ३५ ॥ कदाचित्प्रथमं पृथ्वी स्फारतामधिगच्छति ॥ ततः प्रजायते ब्रह्मा पार्थिवो सो प्रजापतिः ॥ ३६ ॥
इदं चत्वारि संपीड्य पंचमं वर्द्धते यदा ॥ तदा तज्जातप्रवेषकुरुते जोनीं क्रियां ॥ ३७ ॥ कदाचिदप्सु वायो वा सुस्फारे वापि
तेजसि ॥ स्वयं संपद्यते कस्मात्सुमान्प्रकृतिभावितः ॥ ३८ ॥

रसस्पृष्ट्यादिक्रियां कुरुते इत्यर्थः ॥ ३७ ॥ सर्वेषां पंचभूतकार्यतया पंचात्मकत्वेन तदुत्तरस्य प्रजापतेः कथमेकैकजत्वव्यपदेश इति चेद्वैशे
ष्यादितिन्यायेनेत्याह ॥ कदाचिदिति ॥ सुस्फारे अधिकभागवति सति तदुपाधिपुमान्प्रजापतिः प्रकृत्या पूर्वोपासनक्रमानुसारिस्वभा
वेन भावितो वासितः ॥ स्वयमेव आपवो वायुजस्तेजस इत्याद्याकारेणाकस्मात्संपद्यत इत्यर्थः ॥ ३८ ॥ श्रीरामायनमः ॥ श्रीकृष्णायनमः

ग

ता यथा येनोपायेन चोच्छेदस्तत्सर्वमिह कीर्त्यते १ प्रश्नः स्पष्टः १ चेत्योन्मुखत्वं यत्साज्ञ्ञ इति व्याख्यातं तदेव सं कल्पवृक्षस्याविद्याबीजोद्भवं प्रथमांकुरं विदुरित्यर्थः २ चित्तत्वं तमेव चित्ताकाशं आपूर्य सर्वतो व्याप्य दृढजा ड्याय अधिष्ठानचित्तश्चित्स्वभावतानिरोधानेन जडप्रपंचाकारसंपत्तये इति यावत् ३ श्रीरामायनमः ७

एवं समष्टिसंकल्पाज्जगदुद्भवमुक्त्वा तथैव बुध्यहंकारप्राणेंद्रियदेहाद्याकारव्यष्टिसंकल्पोऽसत्तिमाह भावयंतीति ४ ततो
मूलांकुराणामिव बाह्यविषयाकारसंकल्पपरंपराभिवृद्धिं दुःखांतमाह संकल्पेनेति ५ ६ ननु निर्विकाराद्वयेवस्तुनि कथं नि
र्बीजजगदुद्भवस्तत्राह काकतालीयेनेति विवर्तवादाश्रयेणावायं दोषः परिहार्य इत्याशयेनाह मृगतृष्णेति पूर्वानुभूतविष

भावयंती चितिश्चेत्यं व्यतिरिक्तमिवात्मनः संकल्पतामुपायाति बीजमंकुरतामिव ४ संकल्पेन हि संकल्पः स्वय
मेव प्रजायते वर्द्धते स्वयमेवाशु दुःखाय न सुखाय तु ५ संकल्पमात्रं हि जगज्जल्पमात्रं यथार्णवः अन्ते संकल्प
मन्यातेनास्ति संसारदुःखिता ६ काकतालीययोगेन संजातोऽस्मि मुधैव हि मृगतृष्णाब्धिचंद्रत्वमिवासत्यं च व
र्द्धते ७ निगीर्णमातुलिंगस्य कनकप्रत्ययो यथा स्वयमभ्येसि सत्योंतः संकल्पस्ते तथा हृदि ८ असत्समेव जा
तस्त्वमसत्समपि वर्त्तसे अस्मिन्नज्ञाते च विज्ञाने ह्यसत्यं संविलीयते ९ असौ सोऽहमिमे भावा सुखदुःखमयाः मम
छ ॥ व्यर्थमेवेति नानास्थायेनांतः परितप्यसे ॥ १० ॥ ५

यद्वासनोद्बोधाद्वयं जगद्भ्रांतिरित्याशयेनाह निगीर्णेति मातुलिंगं फलविशेषः तद्धि चाक्षुषं पित्तमुदीपयत् शुक्लेपीतभ्रमं
जनयति ८ अस्मिन्मदुपदेशात्मके विज्ञायते अनेनेति विज्ञाने शास्त्रे ९ असौ योऽयो वेदांतेषु प्रसिद्धः पूर्णात्मा सः अहमेव
मम इमे सुखदुःखप्राया जन्मादिभावा व्यर्थं मिथ्यैव इत्यनास्थायेनाज्ञानेन हेतुना नास्ति तेन परितप्यसे ॥ १० ॥ श्रीरामायनमः

॥९०॥ अस्यजन्मादेः संबंधीकदाप्यसन्नेवमांसाजातोसि विलासतस्तास्तिकपूर्यतात्वक्षणाखविलासानाचुकुतोजन्म ॥ ११ ॥ तर्ह्य
॥१०॥ स्यभ्रमस्यनिवृत्तौकउपायस्तमाह मासंकल्पयेति पूर्वानुभूतंसुखदुःखादिभावंसांप्रतिकस्खिन्नोमाभावय मास्मरस्मृतेहि
पूर्वभावेतदुपादानहानाद्यर्थसंकल्पोदयःस्यादेवेतिभावः ॥ १२ ॥ तथाचसंकल्पक्षयात्सर्वभयक्षयः पूर्वभावनाभावनाच्चसंक

असन्नेवास्यजातोसिकुतोजन्मविलासतः व्यर्थमेवावमूढोसिसंकल्पवशतःस्वतः ॥ ११ ॥ मासंकल्पयसं
कल्पंभावंभावयमास्खिन्नो एतावतैवभावेनभाव्योभवतिभूतये ॥ १२ ॥ संकल्पनाशायतेनन्नभयान्यनुग
च्छति भावनाभावमात्रेणसंकल्पःक्षीयतेस्वयं ॥ १३ ॥ सुमनःपल्लवामर्दे किंचित्व्यतिकरोभवेत् सुसाध्यो
भावमात्रेणनतुसंकल्पनाशने ॥ १४ ॥ पुष्पाक्रांतोकरस्पंदयत्नःपुत्रोपयुज्यते तदप्युपकरोत्यस्मिन्नसंकल्प
रिक्षये ॥ १५ ॥ संकल्पोयेनहंतव्यस्तेनभावविपर्ययात् अप्यदृष्टेननिमेषेणात्मीलयैवनिहन्यते ॥ १६ ॥

संकल्पक्षयइतिक्रमःसिद्धइत्याह संकल्पेति ॥ १३ ॥ अयमुपायोत्यंतसुकरइतिप्रशंसति सुमनइत्यादिना सुमनःसांशिरीषा
दिपुष्पाणांपल्लवस्यदलस्यामर्दनेकश्चिद्व्यासोव्यतिकरश्चकिंचित्स्यनिकरःप्रयत्नःसुसाध्यःसुकरोपिभवेन्नसंभावितःन
तुअभावोऽभावनातन्मात्रेणसाध्येसंकल्पनाशनेतत्संभावनेत्यर्थः ॥ १४ ॥ उक्तमेवव्याचष्टे पुष्पेति तदापिसोपितावानपीति
यावत् नोपकरोति ॥ १५ ॥ भावोभावनास्मृतिस्तस्यविपर्ययादस्मरणात् ॥ १६ ॥ श्रीरामायनमः श्रीकृष्णायनमः

चतुर्थः॥

॥१३०॥

ननुसंकल्पक्षयात् दुःखक्षयेपिनिरतिशयानंदावाप्तिः केनोपायेनसाध्यातत्राह ॥ भावेति ॥ भावोभावनानिरंतरंस्वपूर्णानंदात्म
ताचिंतनंतन्मात्रेणोपसंपन्नेप्राप्तेस्वात्मनिस्थितिंस्वरूपाप्रच्युतिमागतेसतियदसाध्यंतदपिसाध्यतेनन्वसाध्यंसाध्यते
इतिविप्रतिषिद्धंतत्राह कस्येति स्वतःसिद्धंतन्नापेत्तीसाशयेनसाध्यंस्यादितिउक्तेनतुसद्यतउत्साशयेनभावानाह्यपगमो
द्वेधापरेणापहारेवानाशेनभावांतरतापत्तौवाहेश्रंगतेतवआत्माअन्येनापक्रियमाणःकस्यस्यात्नह्यद्वितीयात्मनो

भावमात्रोपसंपन्नोस्वात्मनिस्थितिमागते ॥ साध्यतेयदसाध्यंतत्कस्यस्यात्किंमिवांगते ॥ १७ ॥ संकल्पेनैव
संकल्पंमनसास्वमनोमुने ॥ छित्वास्वात्मनितिष्ठत्वंकिमेतावतिदुष्करं ॥ १८ ॥ उपशांतेहिसंकल्पेउपशांतमिदं
भवेत् ॥ संसारदुःखमखिलंमूलादपिमहामते ॥ १९ ॥ संकल्पोहिमनोजीवश्चित्तंबुद्धिःसवासनाः ॥ नाम्नैवा
न्यत्वमेतेषांनार्थेनार्थविदांवर ॥ २० ॥ संकल्पनाद्दतेनेहकिंचिदेवास्तिकुत्रचित् ॥ तमेवहृदयात्छिंदि किमन्यस

॥ ८८ ॥ [illegible]

न्यःप्रसिद्धःविनश्यन्वाकिमिवस्यात्घटोहिविनश्यकपालंभवतिआत्मातुकिंस्यात्यस्यात्तन्ननष्टेनद्रष्टंशक्यंनचात्मन्यो
द्रष्टास्तितस्मादात्मनाशोनिःसाक्षिकोनसिध्यत्येवेत्यात्मरूपोमोक्षःस्वतःसिद्धोनापेक्ष्यतीत्यर्थः ॥ १७ ॥ असंकल्पेनसंकल्पे
नैवसर्वसंकल्पंआत्मतत्वमनन्यरूपेयामनसैवस्वमनश्छित्वेत्यर्थः ॥ १८ ॥ उक्तोपायद्वयेनमूलादप्युपशांतेसतिदुःखमपिमूलदुपशां
तंभवेदित्यर्थः ॥ १९ ॥ ननुसंकल्पेउपशांतेपिजीवचित्तवासनादिवशादुःखंस्यादेवेत्याशंक्यतेषांअसंकल्पेंतर्भावमाहसंकल्पइति
॥ २० ॥ २१ ॥

ननु संकल्पस्यैव जीवजगदात्मकत्वे तत्क्षयान्नैरात्म्यलक्षणा शून्यतापत्तिः । बहिर्जीवान्यं आत्मा नामास्तीत्याशंक्याह य
थैवेति । मरुमरीचिकोच्छेदेपि न मरुभूः शून्यात्मिका यथेदं निदर्शनं तथा जगज्जीवादिदृश्यमात्रबाधेपि न तद्रूप आत्मा
शून्यात्मिकः । एते मरीचिकाजगती उभे समे तत्र ते आरोपेण विस्तृते । २२ ननु बाधितमपि भावनया पुनः स्यादित्याशंक्य ।

यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि । असन्मयविकल्पोत्थो उभे ह्येते तते यतः ॥ २२ असिद्धं सर्वमे
वैतदसिद्धेनैव साधितं । संकल्पेन जगद्यस्माद्भावना क्वावतिष्ठतां ॥ २३ भावनाक्षयतः सिद्धिस्ततः
प्राप्यं न शिष्यते । तस्मादसदिदं सर्वं विज्ञेयं हेलनेच्छया ॥ २४ तत्तु भावनयातेन सुखदुःखैर्न लिप्य
ते । अवस्थितिश्च निर्यियस्नेहास्थानप्रवर्तते ॥ २५ आस्थाक्षयेन जायेते हर्षमर्षौ भवाभवौ । तस्माद
सदिदं सर्वं सुखदुःखादिविभ्रमैः ॥ २६ मनो जीवस्फुरत्सुच्छैर्मनिसं नगरं जगत् । भविष्यद्वर्तमानं च भूतं च प

तु असिद्धमिति । बाधिते र्थे भावनैव नावतरतीत्यर्थः ॥ २३ तस्माज्जगन्मिथ्यात्वदर्शनं भावनोच्छेदार्थिना प्रथमं साध्यमित्या
शयेनाह । भावनेति । इच्छया अध्यासदृढीकृतया हेलया दृश्यावहेलनया ॥ २४ तेन दृश्यावहेलनेन ननु भावनया देहात्मता
प्रतिसंधानेन प्रागुक्तैः सुखदुःखैः तनुसंबंधिपुत्रमित्राद्यव्यवस्थिति विज्ञायते पुस्नेहास्था च न प्रवर्तत इत्यर्थः ॥ २५ २६ म
न एव चिदुत्तिबिंबो जीवाः सन् जगल्लक्षणं मानसनगरं परिवर्तयन् रचयन् परिणामयन् विनाशयंश्च स्फुरतीत्यर्थः ॥ २७

कुतस्तथापरिवर्तयन्स्फुरतीति तत्राह ॥ वासनेति ॥ यतोऽस्य मनः विषयसंबंधात्ततद्वासनाभिरावलितं अधिष्ठानचित्संबंधात्स्फुरणशक्तिकं च स्थितं अतो मलिनस्वभावस्यास्य सन्स्वाशयेन कामेन इमां प्रागुक्तां रचनादिव्यावस्थां करोतीत्यर्थः ॥ २८ ॥ तर्हि इष्टमेव कुतो न करोति अनिष्टं च कुतः करोति तत्राह ॥ आत्मन इति ॥ २९ ॥ कुतोऽस्य दृढिमा सोऽतत्राह ॥ ग्रही

वासनावलितं लोके स्फुरच्छक्ति मनः स्थितं ॥ करोति स्वाशयेनेमां व्यवस्थां मलिनस्थलः ॥ २८ ॥ आत्मनः सदृशीं लीलां जीवो हंदनमर्कटः ॥ दीर्घमाकारमादाय निमेषाघातिन्हस्वतां ॥ २९ ॥ ग्रहीतुं च न शक्यंते संकल्पजल्पवीचयः ॥ मनाग्दृष्टा विवर्द्धंते हसंति सपरिच्छदाः ॥ ३० ॥ तृणमात्रेणदीप्यंते संकल्पा वह्निशेषवत् ॥ जगत्प्रकटाकाराः प्रदीप्ताः क्षणभंगुराः ॥ ३१ ॥ भ्रमदाजड संस्थानाः संकल्पास्तडिदग्नयः ॥ यदेवासन्मयं पुत्र तदेवाशु चिकित्सितुं ॥ ३२ ॥ ॥ सन्मयं असरसज्ज्ञाना विकारभूतं ॥ ३२ ॥

तुमिति ॥ नियंतुमित्यर्थः ॥ दृष्टा विषयदर्शिनो वृद्धाः विषयदर्शनस्मरणत्यागे तु सपरिवारा हसंति ॥ ३० ॥ तृणमात्रेण तृणसदृशेनाल्पेनापि विषयेण दीप्यावलं वह्निशेषोऽग्निकणाः जगतीसाधुत्तरान्वयि ॥ ३१ ॥ भ्रमदाः स्थाणवादौ चौरादिभ्रांतिहेतवः जडेषु विषयेषु लडयोरभेदान्मेघजलेषु च संस्थानं येषां ॥ इत्थं कीदृशस्तातसंकल्प इत्यादिप्रश्नानामुत्तरमुपवर्ण्य कथं चैष विनश्यतीति चरमप्रश्नस्योत्तरं विवक्षुर्वर्णितस्य संकल्पस्य सुचिकित्स्यतामाह ॥ यदेवेत्यादिना ॥ अ

शाम्यते ज्ञानेनेति शेषः ॥ संस्थितः परमार्थभूतो यदि भवेत् ॥ २३ ॥ जगत्सत्यतापक्षे तु आत्मनोपि जगदविशेषान्मलिनस्वा
भावत्वापत्तौ ज्ञानेन सत्यस्य निरास एव सर्वप्रमाणविरुद्ध इत्यनिर्मोक्षप्रसंगः ॥ विरुद्धस्याप्यभ्युपगमे अंगारकार्ष्ण्यस्य सशो
धक्षालनेन मलिनस्यैव परिशेषः ॥ निःशेषक्षालने तु शून्यवासनतेति वसुरूपार्थापरिशेषस्येत्याशयेनाह ॥ अकृत्रिममि

शाम्यते नात्र संदेहो नासतः सद्भवति कश्चित् ॥ संस्थितो यदि संकल्पो दुश्चिकित्स्यस्ततो भवेत् ॥ २३ ॥ किं त्वस
द्भूत एवैष सुचिकित्स्यस्तदा भवेत् ॥ अकृत्रिमं चेत्संसारमलमंगारकार्ष्ण्यवत् ॥ २४ ॥ तदेतत्क्षालनेनासाधो
कः प्रवर्तेत दुर्मतिः ॥ किं त्वेतत्तंडुलेष्वेव तुषकंचुकवत्स्थितं ॥ २५ ॥ यतस्ततः प्रयत्नेन पौरुषेण विनश्यति
अकृत्रिममयं प्राप्तं माशंपुत्र तथा पुनः ॥ २६ ॥ सुखोच्छेद्यतया ज्ञस्य संसारमलमागतं ॥ तंडुलस्य यथा च
र्म यथा ताम्रस्य कालिमा ॥ २७ ॥ नश्यति क्रियया पुत्र पुरुषस्य तथा मलं ॥ नश्यत्येव न संदेहस्तस्मादुद्यमवान्भव ॥ २८ ॥

ति ॥ कृत्रिमैर्मिथ्याकल्पनातया निर्वृत्तं कृत्रिमं तद्भिन्नमकृत्रिमं सत्यं ॥ २४ ॥ तुषकंचुकं यथा आतंडुलभूतमेव तंडुले निरस्य
ते तद्वदसदेव सूतिनिरस्यमित्यर्थः ॥ २५ ॥ कृत्रिकारणव्यापारस्तया निर्वृत्तं कृत्रिमं तदन्यं अनादिभूतमपीत्यर्थः ॥ दुष्क
रोद्भितः वित्रः क्रैर्मम्पिसमिति निवृत्तार्थमम् ॥ २६ ॥ ज्ञस्य तत्त्वविदः सुखेन अनायासेनैव उच्छेद्यतया उच्छेदार्हतया आततं वि
स्तीर्णं अनाद्यज्ञानजस्यातिविस्तीर्णस्य चरमात्मस्वभ्रादिविभ्रमस्य प्रबोधमात्रेणोच्छेददर्शनादिति भावः ॥ असंभावनाविप
रीतभावनादिमलं तु ज्ञानभूमिकाभ्यासलक्षणपुरुषयत्नेनापि नश्यतीत्याशयेनाह ॥ तंडुलेत्यादिना ॥ २७ ॥ २८ ॥

१३२

असत्कल्पैर्विकल्पैरुपलक्षितः संसारो यदेतावंतं कालं त्वया न जितस्तन्मुधैवोपायापरिज्ञानादित्यर्थः ॥ ३९ ॥ असत्यां स्वव्यव
स्थां स्वनिष्ठां बाधमित्रियावत् ॥ अंधस्य तमसा तिरोभूतचक्षुषो दीपालोके सति आंध्यमिवेति शेषः ॥ ४० ॥ असौ संसारः हिय
स्मादसत्तैः सत्यवत् दृष्टः स तिरीदृशः ॥ एतादृशस्य भावना पुनः स्थिता मास्म न खल्वनुयुक्तेति शेषः ॥ ४१ ॥ मम संसारिस्वभावस्य

असत्कल्पैर्विकल्पैर्यत्संसारो न जितो मुधा ॥ स्तोकेनाप्युल्लयंयां तिष्ठासद्वस्तु चिरं स्थितं ॥ ३९ ॥ असत्यामेति
संसारः स्वव्यवस्थाविचारतः ॥ दीपालोकादिवांधस्य दीडुत्वं सीक्षितादिव ॥ ४० ॥ नासौ तव न चास्य त्वं भ्रांतिं पुत्र
परित्यज ॥ असत्ये सत्यवत् दृष्टे भावना मास्म हीदृशः ॥ ४१ ॥ मम गुरुविभवोज्वला विलासा इति तव मास्तु दृष्टे
व विभ्रमोंतः ॥ त्वमपि च विततात्मन्यनंते विलासा विलसति सर्वमिदं तदात्मतत्त्वं ॥ ४२ ॥ दाशूरोपाख्याने संकल्पः ० ॥ ५४ ॥
श्रीवसिष्ठउवाच ॥ इत्याकर्ण्यैतदात तत्र रात्रावालापनं द्वयोः ॥ अहं रघुकुलाकाशशशांक रघुनंदन ॥ १ ॥ पतितः स्वा
त्कदंबाग्रे पत्रपुष्पफलाकुले ॥ तूष्णीं निरत्रि सुक्तात्माश्रृंगाग्र इव तोयदः ॥ २ ॥

पते गुरुभिर्महद्भिर्विभवैः संपद्भिरुज्वलादीप्यमाना भोगा विलासाः सत्याः शाश्वता इत्येतिविभ्रमस्तव मास्तु त्वं संसारी अपि ते वि
लासाश्चकारादन्यदपि जननमरणादि दृश्यमात्रं तदात्मन त्वमेव तथा विलसति न दृश्यरूपं तदन्यदस्तीत्यर्थः ॥ ४२ ॥ इति ० सर्गः ॥ ५४ ॥
दाशूरेणावसिष्ठस्य पूजितस्य मिथः कथाः ॥ कथं शोभाविवक्षात्र प्रातर्यानिं तवर्ण्यते ॥ १ ॥ आलपनं व्यक्तसंभाषणं ॥ १ ॥ स्वान्नूतूष्णीं निः
शब्दं पतितः अवतीर्णः निवृत्तेन वृष्टिजालवर्षेणामुक्त आधोवतारित आत्मा येन तोयदेन ॥ २ ॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय ०

३ तापयंतं भासयंतं ॥ ४ वितीर्णः विष्टरः आसनं यस्मै तं पत्रग्रहणं पुष्पफलादीनामप्युपलक्षणं ॥ ५ पूर्वकथाः प्राक्प्रस्तुतकथाचर्चाः तन यं सम्यक् बोधयंतीति तत्तनयसंबोधाः कर्मण्यण् गतिकारकोपपदानां कृद्भिः सहसमासवचनेन ग्रहणेगतिपूर्व

अपश्यंतत्र दाशूरं शूरमिंद्रियनिग्रहे परेण तपसा युक्तं तेजसेव हुताशनं ॥ ३ तेजोभिर्देहनिष्क्रांतैः कांचनीकृतभूतलं तापयंतं प्रदेशं तं भुवनं भास्करो यथा ॥ ४ मामयाल्लोक्य संप्राप्तं दाशूरोर्घ्यसपर्यया वितीर्णविष्टरं पत्रपूजया पर्यपूजयत् ॥ ५ ततः पूर्वकथास्तेन सह दाशूरभास्वता कृतास्तनयसंबोधाः संसारोत्तारणक्षमाः ॥ ६ दृष्टवांस्तमहं च सं कोरकोत्तरकोटरं दाशूरस्येच्छया सर्वैरपतद्भिर्मृगाब्जैः ॥ ७ सेव्यमानं वनश्रीवल्लीनामंडल्यमंडितं स्मितेन विस्फुटमिव श्वसनस्फुरितच्छदं ॥ ८ लताकोटिगतैः प्रांतैः श्यामरैरिंदुसुंदरैः मुक्ताम्बरखंडनिकरैः शरन्मेघैरिवावृतं ॥ ९ प्रालेयकणपद्धत्या मुक्तावल्या अलंकृतं सर्वावयवमेवाच्छपुष्पपूरैः प्रपूरितं ॥ १० स्वरेणुचंदनालेपैः समालब्धमखंडितं स्वच्छदाभोगविपुलरक्तांबरपरिच्छदं ॥ ११ विवाहायेव वेषेण पुष्पभारातिभारिणा लतांगनानुषक्तेन नगरेण कृतोपमं ॥ १२

कस्यापि ग्रहणात् सोपसर्गेण सह समासः ॥ ६ अपतद्भिः अव्याकुलत्वयद्भिरिति ॥ ॥ कस्यापि ग्रहणात् सोपसर्गेण सहसमासः ॥ ६ ॥ कोरकोत्तरकोटरं श्वसनस्फुरितपल्लवं च अत एव स्मितेनेवत्यादिना यतः कोरकोत्तरकोटरं श्वसनस्फुरितपल्लवं च अत एव स्मितेयावत् ॥ ७ तं कुदंबंवधूश्लिष्करवेषेण वर्णयति स्मितेनेत्यादिना ॥ यतः ॥ ८ लतानां कोटिषु शाखाग्रेषु गतैः संक्रांतैः श्यामरैः श्यामरपुच्छैः ॥ ९ सर्वावयवं अभिव्याप्येति शेषः तेन विस्फुटमिव स्थितं ॥ ८ ॥ १० समालब्धं लिप्तं स्वस्य छदाभोगैः पच्छवविस्तारैर्विपुलाः रक्ताः शोणाः अंबरपरिच्छदा अंतरीयोत्तरीयकंचुकोष्णी

मि: ३

मुनिभिर्बद्धा नामुटजा नामाकार इवाकारो येषां तैर्लतामंडपैर्मंडितं ॥ पुरमहोत्सवे पताकाभिर्युक्तं अर्थात्पुरं इवेत्यनुषज्य ते पुरमिवोत्सव इति पाठः साधु ॥ १३ मृगकंडूयनकंपेन ध्वस्तैः स्खलितैः पुष्पधूलिभिर्विधूसरं प्रोत्सारितं सोत्कर्षेण न्युग्भावितं उपांतवनं येन वृषभ उक्षं वृषश्रेष्ठं ॥ १४ बर्हिभिर्मयूरैः अचलैः पर्वतैर्निक्षेपभूताः क्षिप्ताः स्थापिताः संध्याभ्रपो

मुनिबद्धोटजाकारलतामंडपमंडितं ॥ मंजरीभिः पताकाभिर्युक्तं पुरमहोत्सवे ॥ १३ मृगकंडूयनध्वस्त पुष्पधूलिविधूसरे ॥ प्रोत्सारितोपांतवनं वृषमहक्षमिवोच्छ्रितं ॥ १४ बर्हिभिः कुसुमोद्भ्रांतपरागपरिपाटलैः ॥ निक्षेपक्षिप्तसंध्याभ्रबालवालमिवाचलैः ॥ १५ प्रवालारुणहस्तेन कुसुमस्मितशोभिना ॥ मधुनाघूर्णमानेन प्रांतेन पुलकत्विषा ॥ १६ नीरंध्रपुष्पपूर्णेन घूर्णितेन वनानिलैः ॥ निद्रालुकुड्मलदृशा

तल्लक्षणाः बालाः स्वकेशाः यस्मिंस्तथाविधमिवेत्युत्प्रेक्षा ॥ १५ इदानीमलिनेत्रेणाभासिनेत्यंतैः साधारणैः विशेषणैः विलासिपुरुषरूपेण करंदं वसंतं वनदेवी इंद्रं वा वर्णयितुं तदालयलेन तं वर्णयति ॥ प्रवालेत्यादिना ॥ तत्राद्यकल्पे स्वेन स्वदेहेनेति वा विशेष्यमंते ध्याहार्यं मधुना श्लेषान्मकरंदेन मद्येन च मदेनेव घूर्णमानेन प्रांतेनार्थात्केसरपूर्णेनेति तु ना पुलकशोभावता ॥ १६ नीरंध्रं निरंतरं पुष्पैः पूर्णेन लतास्तबकस्तनाधारिणा पल्लवकरैः परामृशता ॥ १७ ॥ श्रीरामायनमः ॥ ७

लतारचितवितानलक्षणानां निलयानां गृहाणां वातायनेषु प्रासादगवाक्षद्वारकेषु निषंगिणा ॥ १८ ॥ अनुरक्तेन नीला
सुस्निग्धलरितछदासु पुष्पयुक्तलतादोलासु लीलास्येकौतुकं दोलनविषये विलासि पुरुषभूतेन कोकिलालापशालिना
वनदेवीनां वृंदेन रत्नेने निवापाठयोरन्यतरदध्याहार्यं ईदृशेन स्वेन स्वदेहेन वा आपादमस्तकप्रांतं सर्वतः सर्वैरवयवैः निर्मिताः
आलयाः पुष्पफलपक्ष्यादिभूषणाश्रयाः येन तं द्वितीयेन उक्तविशेषणगणवतामधुना वसंतेन सर्वतः सर्वदा सर्वांगे निर्मि

नीलपुष्पलतादोलालीलालास्यविलासिना ॥ आपादमस्तकप्रांतं सर्वतो निर्मितालयं ॥ १९ ॥ वृंदेन वन
देवीनां कोकिलालापशालिना ॥ संदिग्धमंजरीजालमलिनेत्रेणभासिना ॥ २० ॥ अवश्यायोपशमितरति
खेदैर्मंदालसैः ॥ पुष्पधूलिसमालब्धैरा श्लिष्टैर्निबिडं मिथः ॥ २१ ॥ पुष्पांतरांतःपुरयोः क्रिमपि प्रणयोचितं ॥
ध्वनद्भिरभितः स्वच्छं मत्तालियुगलैर्वृतं ॥ २२ ॥ पुष्पजालरजःपुंजकुंकुमारुणवाससा ॥ लता वितान निलय

निर्मितालयमितियोज्यं ॥ तृतीयेपि उक्तविशेषणगणवता वनदेवीनां वृंदेन सर्वतो निर्मितालयमितिपरेणासह योज्यमिति ॥ १९ ॥
अलीनां पर्याये पाललताकदंबमंजरीषु प्रवेशात्किमेता निलता नेत्रा पि उत कदंबनेत्राणीति संदेहास्पदीभूतमंजरीजालमुक्तमित्यर्थः ॥ अथवा वनदेवीनां अलिसदृशनेत्रेण वृंदेन किमेताः किमेता निवनदेवीनां नेत्राण्युत भ्रमरयुतामंजर्य इति संदिग्धमंजरीजालमितियोज्यं ॥ २० ॥ पुष्पधूलिभिः समालब्धैर्लिप्तैः मिथः अन्योन्यं रहसि च निबिडं आश्लिष्टं ॥ २१ ॥ पुष्पस्यांतरोगर्भएवांतः

२४ ॥

॥ चतुर्थः ॥

॥ १३४ ॥

आशांतेषु दिग्प्रदेशेषु चारुभिर्मधुरैः खर्वपाणां नीलक्षिकाणां निवेदकपुरुषस्थानीयानां टांकृतैः ध्वनिभिः काननोपांतलक्ष्मणायाः स्तनगायि घुंघुमस्य मृगपक्ष्या घोरक्रोशस्याकर्णने छयाक्षपांउत्कर्णमूर्ध्वीकृतकर्णमिव स्थितमित्यर्थः ॥ २३ दलाग्रेषु पल्लवेषु उपस्था नीयेषु निद्रावशाच्चापल्याच्च क्षणं विश्रांतिमुग्धासु मुग्धादिदर्शनीयतमा निशिरां सियेषांतझावेन रंडुना शुकं वतिक्रियापटेराच्छादितानि वनाद्यवयवजालानि यस्यास्तथाविधामर्णवमेखलां भूमिं निशापरामप्रतीक्षयापश्यद्भिः ॥ २४ वनस्थलीनां तनयैः पुत्र

काननोपांतनगरीघुंघुमाकर्णनेछया ॥ क्षणमुत्कर्णमाशांतचारुचर्वपाटांकृतैः ॥ २३ ॥ क्षणं दलाग्रविश्रांतमुग्धामुग्धशिरस्तया ॥ पश्यद्भिरिदं शुकवज्जालमर्णवमेखलां ॥ २४ ॥ वनस्थलीनां तनयैर्नयैर्मूर्तिभिवास्थितैः ॥ शुभैः पुत्रपुटेष्वंतर्मृगैः सारलतांतरं ॥ २५ ॥ नीडभ्रष्टसुविश्वस्तसुप्तमात्रकपक्षिणं ॥ पाकच्युतफलोपांतभूतकंचुकमंडली ॥ २६ ॥

भूतैः मुनिप्रभावान्मूर्तिमाश्रितैर्नयैर्विनयैरिवास्थितैः ॥ पत्रपुटेषु पर्णजालोदरेषु अंतः लीनैः मृगैः शाखामृगादिभिः सारः शोभमानाः सारभूताश्च लत्वमधोभूभागः ॥ अंतराः शाखाद्यवयवाश्रयस्यतां ॥ २५ नीडेषु संतः मुनिप्रभावनिर्भयत्वात्सुविश्वस्तं यथास्यात्तथा सुप्तमात्रकाः अज्ञातेकन्न सुप्तत्वादलक्ष्यमाणाः इतियावत् पक्षिणो यत्रतं पूर्वं भ्रमराविशेषु दैवसाकवशादधच्युतेषु फलेषु उपांत स्थितमृगादिभूतैः कंचुकवत्सर्वतोव्याप्तं मंडली भ्योभक्षणोपमाद्दिशंकयासंदिग्धाः भयान्मूकाश्च भ्रमरकीटाय स्यतं उत्कृत्तरेणासहसमासः ॥ २६ ॥ ७ ॥ ७ ॥

पूजापदेनतत्कारिकोजपोत्लस्यनेतत्राक्षसूत्रकल्पैः लंबमानलतागुच्छैः सुगंधितं अशेषं वनं येन ॥२७॥ तल्लेषु विधूलिकदंबशबलैः फुल्लौघैः वलितं व्याप्तं २८ यत्र तरौ यत्र यस्मिन् पक्षे प्राणिभिर्नोष्यते न युज्यते नोपभुज्यते वा तादृशं पत्रमपि किंचिन्न विद्यते किंवाच्यं शाखाफलपुष्पादीत्यहो अस्य सर्वथा परोपकारेण जन्म सार्थकमिति भावः ॥२९॥ पत्रेपत्रे अधोगलित पत्रेषु सर्वेष्वित्यर्थः कं

संदिग्धमूकभ्रमरंगुच्छैः पूजाक्षसूत्रकैः ॥ श्यामली कृतपर्यंतनीडैः पल्लवमंडितैः ॥२७॥ सुगंधिताशेषवनं पुष्पमेघीकृतांबरं ॥ धूलीकदंबशबलफुल्लौघवलितं तलं ॥२८॥ बहुनात्र किमुक्तेन न किंचिदपि विद्यते ॥ पत्रं यत्र तरौ यन्नोष्यते वा न युज्यते ॥२९॥ पत्रेपत्रे मृगाः सुप्ता विश्रांताश्च पदे पदे ॥ कच्छे कच्छे खगाली नास्त्यस्य भूरुहे भूपते ॥३०॥ एवं गुणविशिष्टं तं समालोकयतो मम ॥ महोत्सवेन सदृशी सा बभूव तमस्विनी ॥३१॥ ततः कथाभिरन्याभिः स तस्य तनयो मया ॥ विज्ञानलोकरम्याभिर्नीतो बोधं परं पुनः ॥३२॥ आवयोस्तत्र चित्राभिः कथाभिरितरेतरं ॥ शर्वरी सा व्यतीताय मुहूर्त इव कांतयोः ॥३३॥ प्रातः प्रतनुतां याते पुष्पर्द्धिघनजालके ॥ स्वर्गांगनांगभोगाभे तारकानिकरे शं

अवश्यायजलं च्युतिच्छिन्नतीतिरूक्षं पत्रायधोदेशः छोघेदनेद्दस्य स्मादातोनुपसर्गेकिः ॥३०॥ दिव्यदृशा समालोकयतः तमस्विनीति ॥ यद्यपि शारिंद्रं शुकवज्ञात्वमिस्फत्कत्वात् ज्योत्स्ना स्ते वतथापि रात्रिलमात्रविवक्षयैव मुक्तं ॥३१॥ ॥३२॥ ममतस्य च सदादीनि सर्वैर्नित्यमित्येकशेषः ॥३३॥ पुष्पर्द्धिघनजालप्रतिकृतो तारकानिकरे द्रवेप्रतिकृता वित्ति

उपयातमनुयातं ॥ आेदकांताच्छियं पांथमनुब्रजेदितिस्मृतेः ॥ ग्रहंप्रतिविसृज्य निवर्त्य ॥ ३५ ३६ ३७ आख्यायिकायाः
प्रागुक्तां संगतिं स्मारयति ॥ दाशूरेति ॥ ३८ दाशूरोपदिष्टसिद्धांतदृशा ॥ ३९ विकल्पंतद्धर्मिमनस्तद्धेतुमल्मज्ञानंच
निर्धूयियेन आसादनेन इज्यः पूज्योभविष्यसि ॥ ४० इति श्री योगवासिष्ठ सर्ये ति प्र रणेपंचपंचाशः सर्गः ॥ ५५

आकदंबनभोभागमुपयांतंसुतान्वितं ॥ अहंविसृज्यदाशूरंततोमरनदींगतः ॥ ३५ तत्राभिमतमासाद्य
स्थानमेसनभस्थलं ॥ प्रविश्यस्वंमुनीनांचमध्यंस्वछइवस्थितः ॥ ३६ दाशूराख्यायिकैषातेकथितारघुनंद
न ॥ जगतःप्रतिबिंबाभासत्याकाराप्यसन्मयी ॥ ३७ दाशूराख्यायिकेवेयमियेलकथितंमया ॥ तुभ्यंराघव
बोधायजगद्रूपनिरूपणे ॥ ३८ तस्मादवास्तवीास्त्येवास्तवीमपिरंजनं ॥ दाशूरसिद्धांतदृशासदोदारो
भवात्मवान् ॥ ३९ तस्माद्विकल्पंमलमात्मनस्त्वं निर्धूयपश्यामल्मात्मतत्वं ॥ आसादयिष्यस्यचिरात्सदंतइ्र
विष्यसीज्योभुवनेषुयेन ॥ ४० इतिश्रीयोगवासिष्ठेमोक्षोपायदाशूरमेलनंसर्गः ॥ ५५ श्रीवसिष्ठउवाच ॥ ना
स्तीदंमितिनिर्णीयिसर्वतस्सजरंजनं ॥ यन्नास्तिनसतिकिल्केवास्थेहविचारिणां ॥ १

सत्तासत्तेजउस्याद्यकर्तृताकर्तृतेचितः ॥ विमृश्यसर्वथादृश्येरंजनास्थानिवार्यते ॥ १ इदंजउंजगत्रंजनामहंममेति
संसर्गतादात्म्याध्यासलक्षणामास्थां ॥ विचारिणांविवेकिनां ॥ १ ॥ श्रीविश्वेश्वरायनमः ॥ श्रीगोविंदायनमः ॥ ६७

की दृश्यं सदप्यसदसन्नुउतासदेवपक्षत्रयेपितत्राहंतादिरंजनंनो चितमित्याह दृश्यमानमिति ॥ त्रिभिः इदं देह
दिलसत्तामुपागतंयद्यस्ती तिमन्यसेतर्हित्वमपितत्सत्ता निरपेक्षेऽसंगोदासीनचिद्रूपेस्वात्मनितिष्ठ ॥ अत्रत्वंनिर
पेक्षदेहादौ अध्यासेनात्मतां किंबभासि ॥ नचेदंतववोचितमित्यर्थः ॥ तिष्ठत्वात्मनीतिपाठे ॥ यदि सत्तामुपागतं
अस्ति तर्हि आत्मनि स्थिरजडस्वभावे निष्ठतुनामत्वमत्रेत्यादि प्राग्वत् ॥ २ ॥ भावनासंगः प्रागुक्ताध्यासः चलाच

दृश्यमानमथेदंत्वदस्तिसत्तामुपागतं ॥ तिष्ठत्वात्मनिबध्नासित्वंकिमत्रकिलात्मतां ॥ २ ॥ अथचेदस्ति
नास्तीदमतिनिश्चयवानसि ॥ तथापिभावनासंगः कथंयुक्तोऽयलाचले ॥ ३ ॥ नेदमस्ति जगद्दाममबंधो
नास्तिमूढात्मते ॥ केवलंस्वच्छमेवेत्थमाततंमितमीदृशं ॥ ४ ॥ नेदंकर्तृकृतंकिंचिन्नवाकर्तृकृतक्रमं ॥ स्वय
माभासतेचेदंकर्त्रकर्तृपदंगतं ॥ ५ ॥ अकर्तृकजगज्जालंभवत्वथसकर्तृकं ॥ मात्समेतेनशबलंभावयन्ना

ले सत्वासत्वयोः ॥ परस्परोच्छित्तिरूपत्वादनियतस्वभावे ॥ ३ ॥ अथचेदियनुक्तव्यते ॥ अथचेन्नेदंजगदस्तितर्हितवबंधो
नास्त्येव ॥ केवलंस्वच्छमेवात्मतत्वमित्थंरीत्याऽऽततंसर्वतोविस्तीर्णमितंप्रमितमितिनान्यरंजनावकाशइत्यर्थः ॥ ४ ॥
किंचेदंजगत्सकर्तृकमुताकर्तृकमप्यकर्त्रकर्तृसाधारणोउदासीनात्मासन्निधिमात्रत्वब्धस्वरूपं त्रिष्वपिपक्षेषुत्वत्वंद्रेऽज
नानयुक्तेत्याह ॥ नेदमितिद्वाभ्यां ॥ ५ ॥ शबलंअन्योन्यतादात्म्याध्यासादैक्यमिवापन्नंभावयन्देहात्मभावंपश्यन्नचेतसि

चतुर्थः ॥

॥ १२६ ॥

ननुयतोवाइमानिभूतानिजायंते ॥ विश्वस्यकर्त्ताभुवनस्यगोप्तेत्यादिश्रुतिविरुद्धोयमकर्तृकत्वपक्षः कथमुच्यतेनःकि
मर्थंवात्वयोपन्यस्तस्तत्राह ॥ सर्वेति ॥ यत्तदद्रेश्यमग्राह्यमवर्णमचक्षुः ॥ श्रोत्रंतदपाणिपादंनित्यंविभुंसर्वगतंसूक्ष्मं
तदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराइत्यादिश्रुतिभिरसंगोदासीनत्वाज्ज्ञउपर्वताद्युपमआत्मामेरुःसूर्यंपरिवर्त

सर्वेंद्रियविहीनात्माकर्त्तैवसज्जडोपमः ॥ अकर्तृचतदात्मन्येकाकतालीयवज्जगत् ॥ ७ ॥ काकता
लीययोगेनजातंयत्किंचिदेवतत् ॥ तस्मिन्भावानुसंधानंबालोवभ्रांतिनेनरः ॥ ८ ॥ नकदा
चिदिदंशांतंजराद्रामनचक्षयि ॥ अजस्रंदृश्यमानत्वात्प्रविताच्यपुनःपुनः ॥ ९ ॥

यतीतिवत्कर्त्तैवोपचर्यते जगन्मिथ्यात्वत्युत्पादनायेति ॥ यदासर्वासांसकर्तृकत्वप्रतिपादकश्रुतीनांहृदयंज्ञा
तंतदेत्यर्थः ॥ ७ ॥ यत्किंचिदेवअनिर्वचनीयमेव ॥ भावोहंताभिमानस्तेनपुनःपुनःअनुसंधानंस्मरणंबालो
बालिशः ॥ ८ ॥ अनिर्वचनीयमेवयुक्त्यादर्शयति ॥ नेत्यादिना ॥ शांतमंत्यताभावात्मकशून्यस्वभावंक्षयिप्रध्वंसि
अयुक्तशून्यस्वभावंचन ॥ शून्यस्यदर्शनायोग्यत्वाज्जगतश्चसर्वदाप्रवाहरूपेणदृश्यमानत्वात्ध्वस्तस्योत्पत्तिवि
॥ रोधाच्चजगतश्चपुनःपुनरुत्पद्यमानत्वादित्यर्थः ॥ ९ ॥

॥ चतुर्थः ॥

तर्ह्यात्मवस्तु सदा सत्स्वभावं क्षणिकसत्तास्वभावं वा वस्तु तत्राह । नेति ॥ अस्ति नित्यसत्तास्वभावं क्षयि क्षणिकसत्तास्वभावं आ
॥ स्थि० ॥ द्ये अत्र स्वप्रतिक्षणं परिणामभेदेन क्षीयमाणत्वानुभावविरोधात् ॥ द्वितीये अनाद्यनंतयोः पूर्वोत्तरकालयोरसतः ॥ वर्तमा
॥ ७ ॥ नत्वात्क्षिमलक्षणेऽप्यसतः सत्वायोगेनासत्वानुमानादित्यर्थः ॥ १० ॥ अस्तु वास्य नियतिप्रयुक्तसर्गादौ संनिधिमात्रेण कर्तृ

नकदाचिदिदं चास्ति जगद्धाम न चक्षयि ॥ अत्र स्वं क्षीयमाणत्वान्नास्तित्वाद्यनुमानतः ॥ १० ॥ सर्वेंद्रिय
परातीतो यदा कर्तेह विज्वरः ॥ कुर्वाणः सर्वदा खेदं न कदाचन गच्छति ॥ ११ ॥ तेनेयं नियतिप्रौढा भावा
भावदशामयी ॥ ईदृश्येव स्थिरा दीर्घा मिथ्यो ह्यापि च दृश्यते ॥ १२ ॥ अपर्यंतस्य कालस्य कश्चिदंशः श
रद्घतं ॥ तावन्मात्रमहाश्चर्यः किमर्थं सोनुधावति ॥ १३ ॥ स्थिराश्चेज्जगतां भावास्तत्वादास्थानशोभते ॥
॥ कथमन्योन्यसंश्लेषो जडचेतनयोः किल ॥ १४ ॥

त्वं तथापि स्रजामीत्यभिमानेन न तत्र खेदो न युक्त इत्याह । सर्वेंद्रिये तिद्वाभ्यां ॥ ११ ॥ १२ ॥ शरद्घतं मानुषदेहजीवनपरमावधिः
कालः ॥ अनाद्यनंतयोः पूर्वोत्तरकालयोः कदाप्यसत्वादस्यं तासंभावितं तावत्कालमात्रं महत् अति दृढ मनुष्यदेहात्मत्वात्क्षण
माश्चर्यं यस्य तथाविधः सन् सः सर्वेंद्रियपरातीतः आत्मा किमनुधावति सर्वथेदमनुचितमित्यर्थः ॥ १३ ॥ इदानीं अकर्तृकत्वपक्षे
स्थिरत्वाभ्युपगमेप्यास्थानोचितेत्याह । स्थिरा इति । तत्वास्थिरत्वादेव हानोपादानायोग्यत्वादित्यर्थः ॥ असंगचितो जडसंबंधा
॥ घटनादपि तत्र सा अनुचितेत्याशयेनाह कथमिति ॥ १४ ॥ ॥ १२७ ॥

इदानीमकर्तृत्वेऽस्थिरत्वपक्षे पर्यास्थानौचित्येनाह ॥ अस्थिराइति ॥ यतस्तेऽस्थिरे आस्थांबध्नतः पयःफेनलक्षणास्या
प्यस्थिरस्य अंते नाश एषा आस्था प्रसक्ता सती दुःखं ददाति दानं प्रसज्यते नियावत् ॥ तथा च पयःफेन आस्थ्यातन्नाशे
शोकउचितश्चेन्नु देहाद्यास्थयातन्नाशे शोकउचितस्यादिति भावः ॥ १५ ॥ आत्मनः जगद्गावत्वं जगत्स्वभावता जन्मनाशादि

अस्थिराश्च ज्ञ जगद्गावास्तराप्यास्थान शोभते ॥ पयःफेनास्थिरस्यांते दुःखमेषाददाति ते ॥ १५ ॥ आस्था
बंधोमहाबाहो जगद्गावत्वमात्मनः ॥ नस्थिरास्थिरयोः फेनशैल्योरिवराजते ॥ १६ ॥ सर्वकर्त्राप्यकर्तैवक
रोत्यात्मानकिंचन ॥ तिष्ठत्येवमुदासीन आलोकंप्रतिदीपवत् ॥ १७ ॥ कुर्वन्नकिंचित्कुरुते दिवाकार्यमिवां
॥ शुमान् ॥ गच्छन्नगच्छति स्वस्थः स्वास्यदस्थोरविर्यथा ॥ १८ ॥

स्वभावत्वेनियावत् ॥ सा च अन्योन्यतादात्म्यसंसर्गाध्यासलक्षणा आस्थाबंध एव न तदन्यो निरूपयितुं शक्यः ॥ स च न त
विमर्शे स्थिरास्थिरपक्षयोर्द्वयोरपि न राजते न शोभत इत्यर्थः ॥ अथवा स्थिरयोरात्मजगतोस्तादात्म्यलक्षणो आ
स्थासंबंधो न राजते फेनशैल्योरिवेत्यर्थः ॥ १६ ॥ ननु कर्तृत्वपक्षे कथमनास्थोपपत्तिः सदृष्टांतमाह ॥ तिष्ठती
त्यादिना ॥ १७ ॥ दिवाकार्यं सर्वप्राणिदिनकृत्यनिर्वाहं ॥ १८ ॥ श्रीकृष्णायनमः ॥ श्रीगोविंदायनमः ॥

स्थि ॥
१२८ ॥

॥ चतुर्थः ॥

नन्वादित्यो दिनकरकृत्या निमित्तमात्रं कर्त्तारस्तु जनास्तद्भिन्ना दृश्यंते जगन्निर्माणे तु नान्ये कर्त्तारः संतीति वैषम्यमाशं
क्याह ॥ अरुणेति ॥ अरुणाख्या नदी तस्यास्तीरं स्वभावत एव शिलाविषमं पुरा सीनं च वारि पूरेपि निम्नानुसारि स्वभा
वेन प्रवाहवैषम्यकृत्तु ॥ द्वयोस्तयोः सन्निधाने जायमान आवर्त्तः ॥ यतः कुतश्चिद्देव आकस्मिकः संपन्नः तद्वच्चिज्जडस
न्निधौ जगदपीति नात्र कस्यचिच्छिरसि तत्कर्तृताभारमारोपयितुं शक्यत इति भावः ॥ आद्योवर्त्तीति वार्ये सन्नम्यते

यतः कुतश्चिद्देवेदं संपन्नमिव लक्ष्यते ॥ अरुणातीरवद्वारिपुरावर्त्तवदाततं ॥ १९ ॥ इति चेद्भवता रामनैपुण्ये
नावधारितं ॥ प्रमाया परिशुद्धेन चेतसा च विचारितं ॥ २० ॥ तथापि भावनां साधो पदार्थे प्रति नार्हसि
अलातचक्रे स्वप्ने च भ्रमेवाकेवभावना ॥ २१ ॥ अकस्मादागतो जंतुः सौहार्दस्य न भाजनं ॥ भ्रमोद्भूते जग
ज्जाले मास्थायास्तत्र भाजनं ॥ २२ ॥ ओष्ठेयं दीशीतले भानो मृगतृष्णाजले तथा ॥ यथा न भावयेत्स्था
स्थामेवं भावयमास्थितो ॥ २३ ॥ संकल्पपुरुषस्वप्नजनद्वींडुलविभ्रमं ॥ यथा पश्यसि पश्य त्वं भावजातमिदं त

तु द्वितीयस्तु ते न तुल्यमिति तृतीयांतात् ॥ १९ ॥ एवं विमर्शे तु सुतरां जगत्यास्थानोचितेत्याह ॥ इतीति त्रिभिः ॥ २० ॥ २१ ॥ सौ
हार्दस्य मैत्र्याः ॥ २२ ॥ अन्नत्वात्तत्रास्थानोचितेत्याह ॥ ओष्ठेति यथा शीतार्त्तः ओष्ठ्यमग्निं गृहीते इंदौ तापार्त्तः प्राप्नोति तद्व
त् शीतले भानौ तृषार्त्तश्च त्वं मृगतृष्णाजले आस्थां न भावयसि एवं जगत्स्थितावपीत्यर्थः ॥ २३ ॥ २४ ॥ श्रीरामाय ॥

भावश्रीः स्यादिवस्तुसौरं र्यंतच्चिंतनमप्रचुरं ॥ २५ ॥ अकर्तृत्वपदं तदिच्छां अपिशब्दात् कर्तृत्वपरं तदिच्छां च पीत्वा निगीर्य यो
खिपरिशिष्टः सोऽसीति पूर्वेणान्वयः ॥ लीलया विहरेति ॥ यदुक्तं तद्विवृणोति ॥ अकर्तृत्वपरमिति कुर्वतः ॥ व्यवहारेऽप्यौ
दासीन्येन कर्तृत्वमूलस्य ते सन्निधिमात्रेण निरिच्छैव नियतिः परिस्पंदते व्यवहारकारा प्रथते इति यावत् ॥ २६ ॥ तत्र दृष्टां

अंतरस्थां परित्यज्य भावश्रीभावनामयीं ॥ योऽसि सोऽसि जगत्यस्मिंल्लीलया विहरानघ ॥ २५ ॥ अकर्तृत्वपदं पीत्वा
पीत्वेच्छामपि कुर्वतः ॥ सर्वभावांतरस्थस्य सर्वातीतस्य चात्मनः ॥ २६ ॥ इयं संनिधिमात्रेण नियतिः परिस्पंदते
दीपसंनिधिमात्रेण निरिच्छैव प्रकाशते ॥ २७ ॥ अब्जसंनिधिमात्रेण कुटजानि यथा स्वयं ॥ आत्मसंनिधिमात्रे
णात्रिजगंति तथा स्वयं ॥ २८ ॥ सर्वेच्छारहिते भानो यथा व्योम नितिष्ठति ॥ जायते व्यवहारस्य सतिदेवे तथा क्रि
या ॥ २९ ॥ निरिच्छे संस्थिते रत्ने यथालोकः प्रवर्तते ॥ सत्तामात्रेण देवेतु तथैवायं जगद्गुणः ॥ ३० ॥ अतः स्वात्मनि क
र्तृत्वमकर्तृत्वं च संस्थितं ॥ निरिच्छत्वादकर्ता सौ कर्ता संनिधिमात्रतः ॥ ३१ ॥ सर्वेंद्रियाद्यतीतत्वात् कर्ता भोक्ता न सन्म
या ॥ इंद्रियांतर्गतत्वाच्च कर्ता भोक्ता स एव हि ॥ ३२ ॥ द्वे एवात्मनि विद्येते कर्तृताकर्तृते नघ ॥ यथैव पश्यसि श्रेयस्तामाश्रिस

नानाह दीपेति ॥ निरिच्छैव प्रभेति शेषः ॥ २७ ॥ कुटजानि कुटजपुष्पाणि उभयत्र जायंत इति शेषः ॥ २८ ॥ देवे परमात्मनि ॥ २९ ॥
३० ॥ कर्तृत्वाकर्तृत्वोत्त्यो बीजं दर्शयन्नुपसंहरति ॥ अत इति ॥ ३१ ॥ बीजांतरे च दर्शयति ॥ सर्वेति ॥ कर्ता भोक्ता च न अकर्ता अभो
क्ता च स एक इत्यर्थः ॥ ३२ ॥ कर्तृता अकर्तृता चेत्यध्याहार्यं ॥ ३३ ॥ श्रीरामकृष्णगोविंद श्रीकृष्णपरमानंद श्रीविश्वम्भर

ति
स्थि॰

द्वयोरपिश्रेयस्त्वंप्रत्येकंदर्शयति ॥ सर्वस्येत्यादिना ॥ ३४ ॥ कथंनलिप्यतेतत्राह ॥ यातीति ॥ नीरसतांविरागं ॥ ३५ ॥ ३६ ॥ ॥ चतुर्थः ॥
द्वितीयकल्पस्यापिश्रेयस्त्वंदर्शयति ॥ अथेत्यादिना ॥ ३७ ॥ तत्रांतादृशीस्थितमपिप्रथमकल्पेरागद्वेषाद्यप्रसक्तिंदर्श
यति ॥ अहोइति ॥ ३८ ॥ क्रमःप्रसंगःममकुतःयतःस्यात्तस्यमदन्यस्य अत्यंतमसंभावादित्यर्थः ॥ अन्यसंभवादिति

सर्वस्येहोहमकर्तेतिदृढभावनयानया ॥ प्रवाहपतितंकार्यंकुर्वन्नपिनलिप्यसे ॥ ३४ ॥ यातिनीरसतांजंतुरप्र
तेश्च्यचेतसः ॥ यस्याहंकिंचिदेवेहनकरोमीतिनिश्चयः ॥ ३५ ॥ भोगौघकामवांस्तत्रकःकरोतुजहातुवा ॥ त
स्मान्नियमकर्ताहमितिभावनयेद्धया ॥ ३६ ॥ परमामृतनाम्नीसासमतेवावशिष्यते ॥ अथसर्वंकरोमीतिम
हाकर्तृतयालया ॥ ३७ ॥ यदिच्छसिस्थितिंरामतन्नामप्युत्तमांविदुः ॥ अहोयन्नकरोमीमंसमग्रंजागतंभ्र
मं ॥ ३८ ॥ रागद्वेषक्रमस्तत्रकुतोन्यस्यान्यसंभवात् ॥ यदन्येनशरीरंतुदग्धमन्येनलालितं ॥ ३९ ॥ सोस्मदारंभएवां
तःकःखेदोल्लासयोःक्रमः ॥ मत्सुखासुखविस्तारेजगज्जालक्षयोदये ॥ ४० ॥ अहंकर्तेतिमत्वांतःकःखेदोल्लास
॥ योःक्रमः ॥ खेदोल्लासविलासेषुस्वात्मकर्तृतयैलया ॥ ४१ ॥

पाठेतुअकर्तुरन्यस्यरागादेःसंभवादित्यर्थः ॥ द्वितीयकल्पेपित ॥
दप्रसक्तिंदर्शयतियदिति ॥ ३९ ॥ अस्मदारंभोस्मत्कृतएव अतःखेदोल्लासयोःदुःखहर्षयोःजगज्जालस्यक्षयेउदयेचअ
हंकर्ता ॥ ४० ॥ मत्वास्थितस्येतिशेषः ॥ अस्त्वेवंतथापिकथंसमतालाभस्तत्राह ॥ खेदेति ॥ ४१ ॥ श्रीकृष्णगोविंद ॥ श्रीराम ॥ १३९ ॥

त्वयंयातेयान्तेषु व्यत्ययेनैकवचनंछांदसं ॥ ४२ ॥ अभ्यासदशादृष्टीद्वेस्युसाधपरिनिष्ठतदृष्टिं दर्शयति ॥ अथवेति ॥ ४३ ॥ पुन
नूदृष्टिदशापूर्वदृष्ट्योः अल्पतां दर्शयति ॥ अयमिति ॥ अयंपुलत्तदेहप्रसिद्धोहंसः सर्वदेहात्मकसमदृष्टिरूपः इति द्वितीयकल्पे
समुष्टिपरिछेदस्यकर्तृत्वाभिमानस्यानगपमाद पूर्णता आद्यद्वयवाभ्यार्थनिष्ठायाभ्यात्वाभादपूर्णतेति दृष्टिकल्पेतु
इदंदेहेंद्रियाद्यहंन अतः ॥ इदं किंचिदपि न करोमीत्यध्यात्मपरिछेदस्यकर्तृत्वादेश्च निरासेन शोधितत्वंपदार्थमात्रनि

स्वयमेवत्वयंयाते समनेवावशिष्यते ॥ समता सर्वभावेषु यासौ सत्या परास्थितिः ॥ ४२ ॥ तस्यामव
स्थितं चित्तं न भूयो जन्मभाञ्जनाकु ॥ अथवा सर्वकर्तृत्वमकर्तृत्वं च राघव ॥ ४३ ॥ सर्वं सत्यक्त्वा मनः पी
त्वा योसि सोसि स्थिरो भव ॥ अयं सोहमयं नाहं करोमीदमिदं तु न ॥ ४४ ॥ इति भावानुसंधानमयी
दृष्टिर्न तुष्टये ॥ सा कालसूत्रपदवी सा महावीचिवागुरा ॥ ४५ ॥ सासिपत्रवनश्रेणी या देहोहमिति स्थि
तिः ॥ सा त्याज्या सर्वयत्नेन सर्वनाशेप्युपस्थिते ॥ ४६ ॥

ष्ठत्वेपि तत्पदार्थशोधस्यमयितुष्टयेनेत्यर्थः ॥ ४४ ॥
यदि तेन तुष्टये तर्हि किमर्थमुपन्यस्तेइ त्विचेत्सर्वानर्थस्य स्थूलदेहाहंभावे विश्रामेनोपायत्वेनोपन्यस्ते इत्याशयेन देहंभावस्या
नर्थरूपतां सर्वथा त्याज्यतां च दर्शयति ॥ सेत्यादिना ॥ कालसूत्रवीच्यसियत्रवनानि नरकभेदाः कार्यकारणयोरायुर्घृतमि
तिवदभेदारोपात्सामाधिकरण्यं ॥ ४५ ॥ स्वमांसेन सहिता स्वमांसादेहाहंमतेरपि स्वमांससदृशकामाद्यशुचिदूषितत्वा
भावः विशुद्धात्मदृष्टेस्वाधिष्ठानेपटत्वेस्वावरणविक्षेपहेतुत्वात्त्याज्यत्वं नयेतियावत् ॥ ४६ ॥

वसिष्ठ०
२०

॥४७॥४८॥ इदानींदृष्टित्रयंसंगृह्णनासुखाधिकारानुरूपांमोक्षकोस्थितिमुपदिशन्नुपसंहरति ॥ कर्तेति ॥ कर्तृताप्रयो
जकदेहादिरूपोहंनास्मि ॥ समग्रमितिपदंतंत्रेणद्वितीयाप्रथमांतंदेहलीदीपन्यायेनपूर्वोत्तरयोःसंबध्यते ॥ तथाचसमग्रं
सर्वकर्त्राहमेवास्मिसमग्रंसमष्टिभूतंतत्त्वंहंतांउमप्यहमेवास्मीत्यर्थः ॥ एवंप्रसिद्धदृश्यरूपंनकिंचिदस्मिकिंतुकोप्येव

चतुर्थः

स्पष्टव्यासानभव्येनसभ्यमांसेनपुल्कसी ॥ तयासुदूरोज्झितयादृष्टेपरल्लेखया ॥४७॥ उदेतिपर
मादृष्टिर्ज्योत्स्नेवविगलंबुदा ॥ ययाभ्युदितयारामतीर्यतेभवसागरः ॥४८॥ कर्तानास्तिनचाहमस्मि
सइतिज्ञात्वैवमंतःस्फुटंकर्तानचास्मिसमग्रमस्मिनदतिज्ञात्वाथवानिश्चयं ॥ कोप्येवास्मिनकिंचिदेव
मितिवानिर्णीयसर्वोत्तमेनिष्ठतांस्वपदेस्थिताःपदविदोयत्रोत्तमाःसाधवः ॥४९॥ इतिश्रीवासिष्ठतात्प
र्येस्थितिप्रकरणोविचारयोगोपदेशकरणंनामषट्पंचाशत्तमसर्गः ॥ श्रीकृष्णायनमः ॥ छ ॥ छ ॥ छ ॥

लोकप्रसिद्धपरिच्छिन्नजडदुःखस्वभावात्मविलक्षणाः पूर्णानंदचिदात्मास्मीत्यर्थः ॥ निर्णयस्तनेनपूर्वदृष्ट्योरप्य
प्यतसर्यवसानमावश्यकमितिध्वनितं ॥ पदविदोब्रह्मविदः ॥४९॥ इतिश्रीवासिष्ठतात्पर्येस्थितिप्रकरणेविचारयो
गोपदेशकरणंनामषट्पंचाशत्तमसर्गः ॥ श्रीरामायनमः ॥ श्रीवासुदेवायनमः ॥ श्रीवेदव्यासायनमः ॥

रामप्रश्नानवसरोवासनावर्णनक्रमः॥ तदेकोपायसिद्धानांप्रशंसाचारविस्तरात्॥ १ वक्ष्यमाणप्रश्नकामोरामः प्रागुक्तानामनुवादप्रशंसाभ्यांस्वस्यतदवबोधंदर्शयति॥ सत्यमित्यादिना॥ तुल्यन्यायेनानुक्तमस्याभोक्तृत्वं सर्वभोक्तृत्वंवेत्येतदपिमयावगतमितिसूचयति॥ भोक्तेति॥ १॥ तिष्ठंतिसर्वभूतान्यस्मिन्निति स्थानंयथाभुविव पुश्चतुर्विधभूतमग्रामशरीरेति छतितद्वदित्यध्याहृत्यकथंचिद्योज्यं॥ स्वयंचसर्वभूतांतरस्थितः॥ २ तथाचसर्वभूते

श्रीरामउवाच॥ सत्यमेतत्त्वयाब्रह्मन्यदुक्तंसूक्तिसुंदरं॥ अकर्तैवहिकर्तात्माभोक्ताभोक्तैवभूतकृत्॥ १॥
सर्वेश्वरःसर्वगश्चचिन्मात्रममलंपदं॥ स्थानंभुविवपुर्देवःसर्वभूतांतरस्थितः॥ २ हृदयंगमताप्राप्त मिदानींब्रह्मसमेविभोत्वदुक्तिभिर्यथांभोदधाराभिर्भूःपरंदव्यथः॥ ३॥ औदासीन्यादनिच्छत्वात्सभुंक्तेन करोतिच॥ समग्रालोककारित्वाद्भुक्तेदेवःकरोतिच॥ ४॥

षुचात्मानंसर्वभूतानिचात्मनिसंपश्यन्ब्रह्मपरमंयातिनान्येनहेतुनेतिश्रुत्युक्तार्थस्यापितुल्ययुक्त्यैवमयावगत त्वाद्ब्रह्मसमेअनुभवपदमारूढमित्याह॥ हृदयंगमतामिति॥ यथांभोधाराभिर्भूःपर्वतोऽव्यथः निरस्तग्रीष्मताप आस्ते॥ तथात्वदुक्तिभिरिदानीमहमासेइतिशेषः॥ ३ भोक्तृत्वाभोक्तृत्वयोरविरोधेपित्वदुक्तोसूक्तिस्तुल्येतिमयावग

अयं वक्ष्यमाणप्रकारः ॥ ५ ॥ प्रश्नोपयोगितायां पूर्वसर्गोक्तं जगतः सत्वासत्वदृष्टिपक्षं स्थूलं तापरित्यागे समष्ट्यत्वं भावपक्षं
चानूद्य पृच्छति ॥ इदमिति ॥ इदं जगत्सन्ततदिदमसत्कालइत्युक्तदिशा सोयं प्रसिद्धः समष्टिरेवाहमिदं व्यष्टिदेहमात्रं तु न इत्येत
द्वा ॥ अयं प्रपंचः समष्टिदृशा एकः व्यष्टिदृशा तु द्वितीयः ॥ नानावाइत्याद्य नियतबहुरूपकल्पनामयं ॥ ६ ॥ एकस्मिन्नियते क
स्वभावे अध्वांते स्वप्रकाशत्वादेव स्वतः परिहृतमोहांधकारे अच्छे निर्मले आत्मनि भास्करे नीहार इव विरुद्धं कथं सांप्रतं विद्य

किं त्वयं भगवन् स्फारः संशयो मे हृदि स्थितः ॥ तं त्वं छिंधि गिरा ब्रह्मन्दीधित्येंदुर्यथा तमः ॥ ५ ॥ इदं सत्तदिदं चासद
यं सोहमयं न तु ॥ अयमेको द्वितीयो यमित्यादिकल्पनामयं ॥ ६ ॥ एकस्मिन्विद्यते ध्वांते नीहार इव भास्करे ॥ इदं प्र
थममेवाच्छे कथमात्मनि संस्थितं ॥ ७ ॥ श्रीवसिष्ठ उवाच ॥ सिद्धांतकाले वक्तास्य संप्रश्नस्योत्तरं स्थिरं ॥ कथयि
ष्यामि ते राम येन ज्ञास्यसि तत्त्वतः ॥ ८ ॥ मोक्षोपायस्य सिद्धांतमसंप्राप्येन राघव ॥ श्रोतुं प्रश्नोत्तराण्येतान्य

ते ॥ यदि ब्रूयाः प्रथमं मायाशबलब्रह्मोदरे स्थितमिदं सांप्रतमपि व्यक्तं विद्यत इति ॥ त्वं योग्यो भविष्यसि ॥ ९ ॥
तत्रापि पृच्छामि इदं प्रथममेव वा कथं स्थितं विरोधस्य तदानीमपि तुल्यत्वादित्यर्थः ॥ ७ ॥ रामवाक्यबलादेव रामस्य स्वप्र
काशमत्युगात्मदर्शनं तस्य सर्वशरीरे घेकतत्त्वज्ञानं जगतो निर्वचनीयताबोधश्च वृत्तः वासनाक्षयाभावात्तु सर्वसंशयमू
लाविद्याच्छेदि प्रसंगात्सब्रह्मैक्यत्वलक्षणाख्य उपकारामुभवो न वृत्त इति निश्चित्य वसिष्ठः तदुपायतया वासनोच्छेदोपाया
न्विवक्षुरस्योत्तरं वक्तुं नायमवसर इत्याह ॥ सिद्धांत इत्यादिना ॥ सिद्धांते निर्वाणप्रकरणे अस्योत्तरं दृढं पाषाणाख्यायिकादौ ॥ ८

सांप्रतंमुच्यमानमपिनतेचित्तमधिरोक्ष्यतीत्याशयेनाह ॥ कांतेति ॥ पुण्यफलं सर्वकर्मफलपरिविष्ठात्माज्ञानवान् ॥ १० ॥
उदारउदयोनिश्रेयसंशयस्याः सकाशात्सा ॥ ११ ॥ तथाप्रश्नोप्ययंतदैवराजतेउत्याशयेनाह ॥ कस्मिंश्चिदिति ॥ वृक्षस्य
पूगनारजंबीरादेः ॥ १२ ॥ उपदेशगिरः वैराग्योपदेशाः वृद्धेज्ञानवृद्धे विवेकिनिनतुरारिणिल्गंतीत्यर्थः ॥ १३ ॥ भार्गवो

कांतागीतगिरांरामतरुणोभाजनंयथा ॥ प्रश्नानामुत्तमोक्तीनांपुण्यफलज्ञाजनंतथा ॥ १० ॥ वृथाभवतिबा
लेषुयथारागमयीकथा ॥ निरर्थकाल्पबोधेषुतथोदारोदयाकथा ॥ ११ ॥ कस्मिंश्चिदेवसमयेकिंचिद्युंसो
विराजते ॥ फलमाभातिवृक्षस्यरैयौवनमाधवे ॥ १२ ॥ उपदेशगिरोवृद्धेरंजनानिर्मलेपटे ॥ त्वरांसुदार
विज्ञानकथाचाधिगतात्मनि ॥ १३ ॥ प्रश्नस्यास्योत्तरंपूर्वंलेशतःकथितंमया ॥ नविस्तरेणतेनैतत्तून
ज्ञातंभवतास्फुटं ॥ १४ ॥ यदित्वमात्मनात्मानमधिगच्छसितंस्वयं ॥ एतत्प्रश्नोत्तरंसाधुजानास्यत्रनसंश
यः ॥ १५ ॥ मयासिद्धांतकालेतुप्राप्तबोधेत्वयिस्थिते ॥ वक्तव्योविस्तरेणैवसाधोप्रश्नोत्तरक्रमः ॥ १६ ॥

पाख्यानांतेप्रागाख्यातमप्यस्योत्तरंमनधिकारमात्लोक्येवोपेक्षितमित्याह ॥ प्रश्नस्येति ॥ १४ ॥ अखंडार्थबोधे
जातेमदुक्तिंविनाप्यस्योत्तरंस्वयमेवज्ञास्यसीत्याह ॥ यदीति ॥ स्वयंस्वयमेवजानासिज्ञास्यसि ॥ १५ ॥ नर्हितं
॥ किमुपेक्षितव्यसेनेत्याह ॥ मयेति ॥ १६ ॥

२८३

॥ ...रस्य ॥ १२ ॥

मदुपदेशोद्वारभूदर्शनमात्रं त्वया त्वात्मनैवात्मप्रणिधानेन द्रष्टव्य इत्याशयेनाह ॥ जानातीति ॥ संसारिणामप्यात्मानं आ
त्मैव जानातीति यस्मादात्मनैव आत्मा अप्रसादात्तथाकृतः स आत्मैवात्मबोधात्संप्रसन्नः सन् त्वात्त्वं पूर्णमात्मानं प्र
तिपद्यत इत्यर्थः ॥ १७ ॥ कर्तृकर्त्रात्मविचारणमपि मया तदेतद्रखं उक्तं आत्मबोधमुद्दिश्यैव कथितं कथितेपि तामसैतामसरवउक्त
तां अज्ञानित्वात् ज्ञानवानित्यतस्त्वं नूनं भवान क्षीणवासनो भवेत् संभावनायां लिङ् वासनाक्षयस्त्वं न जात इति सं

॥ चतुर्थः ॥

जानात्यात्मानमात्मैव कृत आत्मात्मनैव हि ॥ आत्मैव संप्रसन्नः सन्नात्मानं प्रतिपद्यते ॥ १७ ॥ तदेतत्कथि
तं राम कर्तृकर्तृविचारणं ॥ अज्ञानित्वात्तु नाभैतामक्षीणवासनो भवेत् ॥ १८ ॥ बद्धो हि वासनाबद्धो मोक्षः
स्याद्वासनाक्षयः ॥ वासनास्त्वं परित्यज्य मोक्षार्थित्वं परित्यज ॥ १९ ॥ तामसीर्वासनाः पूर्वं त्यक्त्वा विषयवासि
ताः ॥ मैत्र्यादिभावनानाम्नीं गृहाणामलवासनां ॥ २० ॥

भावनमित्यर्थः ॥ १८ ॥ इदानीं बंधमोक्षस्वरूपे दर्शयन्वासनोच्छेदोपायक्रममाह बद्ध इत्यादिना ॥ १९ ॥ तत्र वासनाक्षये
प्रथमपीठिकावैराग्यदार्ढ्यमित्याह तामसीरिति तामसीः तमःप्रधानतिर्यग्योन्यादिगतिप्रदाः राजसमनुष्यादिजन्मप्र
दानामप्युपलक्षणमेतत् विषयैर्वासिताः सहिताः मैत्रीकरुणामुदितोपेक्षाः मैत्र्यादयस्तद्भावनानाम्नीं तथा च पातंजल
सूत्रं मैत्रीकरुणामुदितोपेक्षणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति ॥ २० ॥ श्रीरामायनमः ॥ ६ ॥

ऽन्तश्चिन्मात्रव्यतिरेकेणामैत्र्यादयोपि न संतीति दर्शनेन बहिस्ताभिर्मैत्र्यादिभिर्व्यवहरन्नपि चिन्मात्रमेवाहमिति संप्रज्ञात्त
मसाध्यभ्यासदृढीकृतवासनो भव ॥ २१ ॥ मनोबुद्धियहंकारचित्ततद्वृत्तीनामप्युपलक्षणं शेषे आत्मतत्वादेव त्यक्तुमशक्य
त्वात्तदवश्यं परिशिष्यमाणो प्रत्यक्चित्ते स्थिरं समाधानं विश्रांतिर्यस्य तथाविधोऽसंप्रज्ञातसमाधौ विश्रांत इति यावत्
येन कलनाख्येन द्वैतकल्पनामूलं त्वं भ्रान्तेनाहंकारेणा प्रागुक्तं सर्वं त्यजसि तदपि त्यज सर्वस्यापि हि त्यागस्तत्र तत्रा

तामप्यंतः परित्यज्य ताभिर्व्यवहरन्नपि ॥ अंतःशांतसमस्नेहो भव चिन्मात्रवासनः ॥ २१ ॥ तामप्यं
तः परित्यज्य मनोबुद्धिसमन्वितां ॥ शेषे स्थिरसमाधानो येन त्यजसि तं त्यज ॥ २२ ॥ चिन्मयः कलना
कालप्रकाशतिमिरादिकं ॥ वासनं वासितारं च प्राणस्पंदनपूर्वकं ॥ २३ ॥ समूलं परिसंत्यज्य व्योम
सौम्यप्रशांतधीः ॥ यस्त्वं भवसि सद्बुद्धो स भवानस्तु सत्कृतः ॥ २४ ॥

हं ममेति च अभिमानवर्जनमेव तत्त्वात् अहंकारेपि शुद्धचिन्मात्ररूपाहंभूतपूर्वात्मदर्शने मूलज्ञानोच्छेदात्स्वयमेव भवतीति
न तत्र करणान्तरापेक्षेति नानवस्थेति भावः ॥ २२ ॥ प्राणस्पंदनपूर्वकं कलनाकालप्रकाशतिमिरादिकं वासनां वासितारं विषयं
चकारात्तद्द्वाराणीन्द्रियाणि च समूलमहंकारमपि चोन्मूल्य व्योमवत्सौम्या निर्मला प्रशांतविक्षेपा च ब्रह्मात्मखंडैकाकारा धीर्य
स्य तथाविधः सन् चिन्मयस्त्वं भवसि संपद्यसे स एव परमार्थरूपो भवानस्त्विति परेणा सहान्वयः सत्कृतः सर्वपूजितः ॥ २३ ॥ २४ ॥

ईदृशीं स्थितिं प्राप्तस्य पूज्यतामेव प्रशंसाभिर्दर्शयति ॥ हृदयादित्यादिना ॥ गतो व्यग्रः सर्वविक्षेपहेतुरभिमानो यस्य ॥ २४ ॥ एवमभ्यासपरिपाकेन सप्तमीभूमिकामारूढस्य सिद्धस्य कृतकृत्यत्वेन कर्तव्यांतरपरिशेषो स्तीत्याह ॥ समाधिमिति ॥ आस्थाः निरस्ताः सर्वाः आस्थाः प्रागुक्तमानाध्यासा येन सः ॥ २६ ॥ २७ ॥ कतिपयकालानुष्ठितश्रवणमनननिध्यानैर्वासनाक्षयात्प्रागेव कृतकृत्यता भ्रमात्तरागनिवारयन्नाह ॥ विचारितमिति ॥ मिथः परस्परं विद्वद्भिः सह संवादेनोद्भाहि

हृदयात्संपरित्यज्य सर्वमेवमहामतिः ॥ यस्तिष्ठति गतव्यग्रः समुक्तः परमेश्वरः ॥ २५ ॥ समाधिमथ कर्माणि माकरोतु करोतु वा ॥ हृदयेनात्तसर्वास्थो मुक्त एवोत्तमाशयः ॥ २६ ॥ नैष्कर्म्येण न तस्यार्थो न तस्यार्थोस्ति कर्मभिः नसमाधानजाप्याभ्यां यस्य निर्वासनं मनः ॥ २७ ॥ विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः ॥ संत्यक्तवासनान्मौनादृतेनास्त्युत्तमं पदं ॥ २८ ॥ दृष्टं द्रष्टव्यमखिलं भ्रांत्वा भ्रांत्वा दिशो दश ॥ जनाः कतिपया एव यथावस्तु विलोकिनः ॥ २९ ॥

तं दृढमुपन्यासक्षमं कृतं ॥ महता परिश्रमेण सर्वविद्वत्संमत्याचेदमेव मौ ॥ सशास्त्ररहस्यमिति निर्णीतमित्यर्थः ॥ मौनाद्वाल्यपांडित्यशब्दवाच्यश्रवणमनन परिपाकजन्यप्रागुक्तनिर्विकल्पासंप्रज्ञातसमाधिपरिपाकात्तान्मुनिभावादृते परं परं ब्रह्माख्यं परिनिष्ठितं तत्त्वज्ञानं नास्तीति निर्णीतमित्यर्थः ॥ तथा च श्रुतिः यस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति एष नित्यो महिमा ब्राह्मणस्येति च ॥ २८ ॥ अत एव तत्त्वज्ञा विरला दुर्लभा इत्येवाह दृष्टमिति ॥ २९ ॥ श्रीरामाय नमः ॥ श्रीकृष्णाय नमः ॥

सर्वजनानां बहिर्मुखत्वाद्बहिश्चेप्सितानि ईप्सितयोरेव दर्शनात्प्राप्तिपरिहारोपायप्रवणत्वेन दृष्टत्वात्प्रवणत्वेनेत्याह ॥ यद्यदिति ॥ यत्र किंचिदालोक्यते तत्र ईप्सितादन्यन्न विद्यते तदन्यविषयमात्रमसत्तत्र तु कश्चिदपि जनो न पतते ॥ किं त्वीप्सितानीप्सितयोरेवेत्यर्थः ॥ ३० ॥ सज्ञानात्मविषये यत्नो ऽनात्मदेहमात्रार्थतास्तु नः पुनर्देहारंभानर्थहेतुरेवेत्याशयेनाह

यद्यदालोक्यते किंचित्कश्चिद्यत्नं न विद्यते ॥ ईप्सितानीप्सितादन्यन्न तत्र यतते जनः ॥ ३० ॥ ये के च न समारंभा ये जनस्य क्रियाक्रमाः ॥ ते सर्वे देहमात्रार्थमात्मार्थं न तु किंचन ॥ ३१ ॥ पाताले ब्रह्मलोके च स्वर्गे च वसुधातले ॥ व्योम्नि कृतिपया एव दृश्यंते दृष्टदृष्टयः ॥ ३२ ॥ इदं हेयमुपादेयमिदमित्यसदुत्थितो ॥ निश्चयो गलितो यस्य तस्यासाकलितुर्लभाः ॥ ३३ ॥ करोतु भुवने राज्यं विशत्वंभोदमंबुवा ॥ नात्मलाभादृते जंतुर्विश्रांतिमधिगच्छति ॥ ३४ ॥

ये के च नेति ॥ समारंभा लौकिकगृहप्रासादादिविषयाः ॥ क्रियाक्रमाः वैदिकयज्ञादयः ॥ ३१ ॥ व्योम्नि अंतरिक्षलोके ॥ ३२ ॥ असदुत्थितो स्वात्मज्ञानादुद्भूतो ॥ ३३ ॥ ननु संसारेपि उत्तमराज्यादिपदलाभे विश्रांतिर्दृश्यते किमात्मदर्शनेनेत्याह ॥ करोत्विति ॥ इंद्रपदलाभेन स्वस्याधिकारे अंभोदं विशतु वरुणपदलाभेनाबुवा योगसिद्धिभिर्वा भूतजयात्सर्वं विशतु ॥ ३४ ॥

स्थि० ॥ चतुर्थः ॥

तर्हिविश्रांत्यर्थिनाकेउपायाआस्थेयास्तानाह ॥ येइति ॥ ३५ ॥ तदुपासनेनतत्त्वबोधेपिपुनर्भोगभूमिषुरतिःकेनवार्यतेतत्र आह ॥ सर्वत्रेति ॥ अपागादग्नेरग्नित्वं त्रीणिरूपाणीत्येवसत्यमितिश्रुत्युक्तदिशासर्वभौतिकानांभूतमात्रत्वात्तस्य चामिथ्यात्वबोधेतेषुरत्यनुदयादितिभावः ॥ ३६ ॥ तर्हिभूतानामेवपरिशिष्टानामानंत्यात्तदुत्तरायामसंभवइतिचेत्तत्र

येमहामतयःसंतःशूराश्चेंद्रियशत्रुषु ॥ जन्मज्वरविनाशायसमुपास्यामहाधियः ॥ ३५ ॥ सर्वत्रपंचभूतानिषष्ठंकिंचिन्नविद्यते ॥ पातालेभूतलेस्वर्गेरतिर्मेतिकधीरधीः ॥ ३६ ॥ युक्त्यावैचरतोज्ञस्यसंसारोगोष्पदाकृतिः ॥ दूरसंसक्तयुक्तेस्तुमहामत्तार्णवोपमः ॥ ३७ ॥ कदंबगोलकेस्तुल्यंब्रह्मांडस्फारचेतसः ॥ किंप्रयच्छतिकिंभुंक्तेप्राप्तेस्मिन्नूसकत्वेपिसः ॥ ३८ ॥

मज्ञानामेकमेवतत्त्वविदांतुअन्नेनसोमांशुंगेनापोमूलममन्विछेतिश्रुतिदर्शितयुक्त्यासर्वाधिष्ठानब्रह्मदर्शनेनभूतानामप्यनृतत्वनिश्चयात्तदुत्तरयांसुखभूमेवेत्याशयेनाह ॥ युक्त्येति ॥ मत्तार्णवःप्रलयार्णवः ॥ ३७ ॥ किंचापरिछिन्नात्मानंदस्याब्रह्मांडस्याल्पतरत्वादर्शनादपिकदंबगोलकमशकभोग्येष्विवतुच्छेषुधनादिषुनदानभोगादिवांछाप्रसक्तिरित्याह ॥ कदंबेति ॥ ३८ ॥

२ ॥ १४४ ॥

राज्यादिसुखं समराघनर्थैर्योधद्वंद्व लक्षणांक्षयावहत्वात्तत्त्वाविदादयात्तुनाधिक्कार्यएवनसत्कार्यमित्याह ॥ एत
दर्थमिति ॥ यच्छब्दार्थएतच्छब्दः ॥ अबुद्धीनां मूर्खाणां तद्राज्यसुखमिति शेषः ॥ ३९ ॥ ननु महाकल्पावसानं चिरकाल
भोग्यं ब्राह्मपदं तस्यरतिः स्यान्नेत्याह ॥ कल्पेति ॥ द्विपरार्द्धावधिनामहाकल्पांतमात्रेणकालेनापि शीर्यमाणत्वात्सु
महापेल्ववादरे तस्मिन्नपिपदे सर्वप्राणिनां प्रलयनिमित्तत्वादाधिर्मानसव्यथानिमित्तभूतोनाशः ॥ सः अमहाधियां

एतदर्थमबुद्धीनां यन्महासमरक्रियाः ॥ तन्मन्येरामधिक्कार्यं द्वंद्वलक्षक्षयावहं ॥ ३९ ॥ कल्पमात्रेण
कालेन सहसापेल्ववोदरे ॥ तस्मिन्नपि हियोनाशः सर्वाधिरमहाधियां ॥ ४० ॥ आसनोज्ञस्यसर्गादे
र्यन्मनागपिनोज्झतं ॥ तस्मिन्जगत्त्रयेप्राप्ते किंचिदात्माबलीभवेत् ॥ ४१ ॥ इतः शैलशतैर्व्याप्तातथैतोज
लराशिभिः ॥ कियानस्यभुवोदेहोयेनोदारंप्रपूरयेत् ॥ ४२ ॥

मूढानामेवस्पृहणीयोनतत्त्वविदामित्यर्थः ॥ ४० ॥ किंचज्ञस्यतत्त्वविदोदशायज्जगत्त्रयंसर्गादेरुपायान्मनागपिंदपि
नोज्झतंनोसन्नमेवनविरोधोनचोसत्तिरित्यादिश्रुतेः ॥ तस्मिंस्तुच्छेवंध्यापुत्रप्रायेप्राप्तेचिदात्माकिंबलीबलवान्भवेत्येन
तत्ररागः स्यादित्यर्थः ॥ असारबहुलत्वादुपयुक्तांशात्पत्वादपिसार्वभौमादिपदस्यनस्पृहणीयतेत्याशयेनाह ॥ इतइ
॥ ४१ ॥ ॥ति ॥ उदारं सर्वत्यागरिक्ताविपुलाशयं ॥ ४२ ॥

स्थि
५

कार्यनरं अवश्यकर्तव्यं सर्वकामावाप्त्या कृतकृत्यत्वादित्यर्थः ॥ ४२ ॥ यथा मृगतृष्णा सवितुः प्रकाशमपेक्ष्य सिध्यंती सवि
तारमपेक्ष्यते न तु सविता मृगतृष्णानिमित्तभूतोपि तामपेक्षते तथा तत्त्वविदश्चित्प्रकाशमपेक्ष्य प्रसिध्य जगदेव प्रसु
तत्तत्त्वविदमपेक्षतां न तत्त्ववित् पूर्णानंदारामः कटाक्षेणापि जगन्न पश्यति दूरे तस्य तदपेक्षेत्याशयेनाह ॥ एकतामिसादि

नतदस्ति जगत्यस्मिन् सपाताल सुरालये ॥ यन्नाम त्वं वतोज्ञस्य किंचित्कार्यं तरं भवेत् ॥ ४३ ॥ एकतामनुयातस्य
व्योमवद्वितनस्य च खस्थस्यात्मवतोज्ञस्य स्थितस्यासन्यचेतसः ॥ ४४ ॥ शरीरजाल्वनीहारधूसनाशून्यकोटरा ॥
शांतसंसारसुभगा त्रिलोकी विपुलानटी ॥ ४५ ॥ स्फारब्रह्मामलांभोधिफेनाः सर्वे कुलाचलाः ॥ चिरादित्यमलाभा
से मृगतृष्णा जगच्छ्रियः ॥ ४६ ॥ आसनलमहांभोधिवीचयः सर्गराजयः ॥ अनुत्तमपदांभोदवृष्टयः शास्त्रदृष्ट
यः ॥ ४७ ॥ चंद्राग्नितपनालोकाघटकाष्ठादिसंनिभाः ॥ प्रकाशनीयाश्चिद्रूपस्त्विषोमल्लकयास्तथा ॥ ४८ ॥

ना ॥ अचेतसो निर्मनस्कस्यात्मवतस्त्रिलोकील्लक्षणा विपुला मृगतृष्णानदीतटी शांतसर्वसंसारसुभगासती शून्यकोटरा आ
काशोदरनिभेव नमूर्तरूपास्तीत्यर्थः ॥ ४४ ॥ असतीमपि बाधितानुवृत्त्या यावत्सार ध्वस्यप्रतिभास निर्वाहाय विशिनष्टि शरीर
जालनीहारेति ॥ ४५ ॥ जगतस्तत्त्वविदात्मप्रकाशापेक्षां प्रपंचयति ॥ स्फारेसादिना ॥ जगच्छ्रियो नदीसमुद्रादयः ॥ ४६ ॥ शास्त्रदृष्टयः
श्रौतस्मार्तधर्मब्रह्मादिनत्वप्रतिभासाः यद्यपि लोके किंचक्षुरादिदृष्टयोपि प्रकाशात्मकत्वाद्ब्रह्मांभोद वृष्टिकल्पा एव तथापि सुक्षेत्र
वृष्टिवच्छास्त्रदृष्टीनामेव पुरुषार्थोपयोगात्ता एवोपात्ताः ॥ ४७ ॥ अधिष्ठानत्वेन तदपेक्षामुक्त्वा जडानां प्रकाशार्थमपि तदपेक्षामाह
चंद्रेति यदा निर्मल्ला आदित्यादयोपि तत्प्रकाशापेक्षास्तदा असंतमलिनत्वान्मल्लकप्रायाः पार्थिवादिधातवस्तमपेक्षंत इति किं वाच्यमि

एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ॥ सर्वप्राणिनां जीवनहेतु विषयानंदार्थमपि तदपेक्षामाह ॥ विहरंतीति ॥ स्वंदेहस्तदात्मनामीयते परिछिद्यते अनुभूयते हिंस्यते वा यः स स्वमः ॥ तथा विधा त्मा येषां काम भोगल्लस्यपानां तुल्यपानां तृणराजीनां ग्रासे मृगाइव मृगाः भवंतीति शेषः ॥ ४९ ॥ मृगानां वने विहारे स्वातंत्र्यमस्ति नरसुरासुरजीवानां तु देहपंजरे बद्धत्वादत्यंतपारतंत्र्यदुःखमेवेत्याशयेनाह ॥ अस्थीति ॥ जगतां सर्वेषां नरसुरादिदेहाः जरंतो अनादिसंसारकां

विहरंति स्वमात्मानः संसारवनचारिणः ॥ कामभोगोल्लपग्रासमृगा नरसुरासुराः ॥ ४९ ॥ अस्थिखंडार्गलामूर्द्धपिधानाः स्नायुश्रृंखलाः ॥ जगद्देहा जरज्जीवरक्तमांससमुद्गकाः ॥ ५० ॥ वनमालामृगामुग्धाः पुरसंचारितास्थितो ॥ बालबुद्धिविनोदाय योजिता श्चर्मपुत्रिकाः ॥ ५१ ॥ नैवं विधोदारमानामनागपि महामतिः

तारे जीर्णानां जीवानां पर्याये पाबंधनार्थाः रक्तमांसनिर्मिताः ॥ ० ॥ न जस्थल्लति भोगोघेर्मंदवाते रिवाचलः ॥ ५२ ॥ समुद्गकाः संपुटकाः पंजराणीति यावत् कृताः धात्रेति शेषः ॥ पंजरसामग्रीमेवाह ॥ अस्थीति ॥ अस्थिखंडा एव अर्गलाविष्कंभदारूणि येषां मूर्द्धैव पिधानं ऊर्ध्वफलकं येषां ॥ स्नायवः शिराः श्रृंखलाः लोहबंधनानि येषां ॥ ५० ॥ एवं जीवाविष्टाश्चर्मपुत्रिका एव संसारवनमालामृगाः ते एव मुग्धाः देहविवेकशून्या बालानां स्वस्वबुद्धीनां भोगपल्लवग्रासे विनोदाय तत्तद्भोगभूमिलक्षणपुरसंचारणासंस्थितो धात्रा योजिता इत्यर्थः ॥ ५१ ॥ तत्त्वविदोपि देहदर्शनात्सोपि किं तथानेत्याह ॥ नैवं विधेति ॥ उदारमनाः सर्वत्यागी प्राग्युक्त महामतिस्तु एवं विधः मनागपि न यत्लोपस्यासिद्धत्वात् संधिरार्षः ॥ दारेषु दारो लक्षित भोगेषु मनो यस्य एवं वि

॥ ४३ ॥

॥ रस्मु ॥ २६ ॥

चंद्रार्कमंडलप्रदेशः पातालमिवपरिहृतप्रकाशोपि न स्थितः ॥ किंवाच्यं प्रकाशमानो न स्थित इति ॥ अथवा चंद्रार्कसंचारदेशो ॥ चतुर्थः ॥
विपुल आकाशदेशोपि पातालं मृच्छिद्रमिवाऽत्यभावेनापि न स्थित इति तादृशमहापदे स्थितस्याकाशोदरैकदेशपरिच्छिन्ने
षुपदेषु कान्यकेत्यर्थः ॥ ५३ ॥ यस्य तत्त्वविदः ॥ आलोकात् चित्प्रकाशात् लोकपाला ब्रह्मादयः समालोकाः सर्वजगत्साधार
णप्रकाशाः संतश्च असुरादिद्वारा बहिः अंतर्बुध्या सुवेदिनः सम्यग्व्यवहारोचितबोधशालिनः संतः क्षपापार्णवे अज्ञानसमु

तस्मिन्किल पदे राम ज्ञस्तिष्ठति मलोत्तमे ॥ यस्मिंश्चंद्रार्कदेशोपि न पातालमिव स्थितः ॥ ५३ ॥ यस्यालोकाल्लो
कपालाः समालोकाः सुवेदिनः ॥ शरीरं पांसुज्ञ इव पश्यन्मूढः क्षपार्णवे ॥ ५४ ॥ न केचन जगद्भावास्तत्त्वज्ञं रंजयंत्यमी ॥
अभ्यासगताः स्फारहृदयं खमिवांबुदाः ॥ ५५ ॥ न केचन जगद्भावास्तत्त्वज्ञं रंजयंत्यमी मर्कटाऽऽ
वन्त्यंतो गोरील्यास्यार्थिनं हरं ॥ ५६ ॥ न केचन जगद्भावास्तत्त्वज्ञं रंजयंत्यमी ॥ प्राक्तनप्रतिबिंबश्री रत्नकुंभगतं

द्रे मग्नाः पश्यन्मूढा अशरीरं स्वात्मानं विविच्य पश्यंतोपि मूढाः संतः अयं अज्ञजन इव शरीरात्मभावेन शरीरं पांसुरक्षंति
दृष्ट्वाप्युत्तभोगवासनासहकृताधिकारिकप्रारब्धप्राबल्यादित्यर्थः ॥ ५४ ॥ तत्त्वज्ञं तु वैराग्यदार्ढ्येन भोगवासनक्षय स्फार
हृदयं निर्वासनत्वशुद्धांतःकरणं केचन लोकपालभोग्या अपि त्रैलोक्यराज्यादिजगद्भावाः अभ्यासगताः पुनःपुनः परिशी
ल्यमाना अपि न रंजयतीत्यर्थः ॥ ५५ ॥ ५६ ॥ प्राक्तनो कुंभाद्बहिःस्थितिदशायां रत्नांतर्दृश्यमानास्तत्प्रकुट्यादिप्रतिबिंबश्रीः ॥ ५७ ॥

उक्तमेवार्थं संक्षिप्योपसंहरति ॥ वज्रेति ॥ तत्तूज्ञस्तत्त्ववित्ब्रह्मलोकांतं सर्वजगद्वैभवं अज्ञदशा अतिक्षुभेदित्वाद्वज्रा
र्पितोपमं विवेकिदशा बुद्बुदभंगेषु जल्पविलासेषु तुंगासु च्छिन्नतरंगेषु आस्वाद्येण कृतं चंद्रादिप्रतिबिंबमिवानिर्वचनीयमस्थि
रतलदशा तत्सन्मयं तुच्छं अवलोक्य अज्ञ इव तदीहितसुखेषु लोलांलोल्यवतीं रतिं न याति यथा मत्तु भोग्येषु कुसितशै
वलखंडेषु राजहंसो रतिं न बध्नाति तद्वदित्यर्थः ॥ ५८ ॥ इति श्रीवा० सप्तपंचाशत्तमः सर्गः ॥ ५७ ॥ आरूढस्य पदं पूर्णं सा

वज्रार्पितोपममसन्मयमंबुभंगं तुंगं तरंगकृतबिंबमिवावलोक्य ॥ लोलां तदीहितसुखेषु रतिं न याति तत्त्वज्ञः कुशै
वलखंडेष्विव राजहंसः ॥ ५८ ॥ मोक्षोपायेपूर्णाशयस्वरूपवर्णनं सर्गः ॥ ५७ ॥ श्रीवसिष्ठ० ॥ अत्रैव वस्तुन्युदिताः अ
णुराघवपूर्वजाः ॥ कुचेन गाथया गीताः बार्हस्पत्येन पावनाः ॥ १ ॥ कस्मिंश्चिन्मेरुगहने तिष्ठन्सुरगुरोः सुतः ॥ कदा
चिदभ्यासवशाद्विश्रांतिं प्राप चात्मनि ॥ २ ॥ सम्यग्ज्ञानामृतापूर्णामतिर्नीरमतास्य सा ॥ पंचभूतमये मान्ये दृश्ये स्थि
न्येल्पवात्मनि ॥ ३ ॥ स तेन निर्विण्ण इव सदात्मतादतेपदं ॥ अपश्यन्नूसमुवाचेदमेकोगद्गदया गिरा ॥ ४ ॥

र्वात्म्यस्थितिबोधिनी ॥ रामायात्र वसिष्ठेन कथागाथोपदिश्यते ॥ अत्रैव प्रागुक्ते वस्तुनि विषये पूर्वजाः पूर्वकालवृत्ताः ॥ बार्हस्पत्ये
